'परात्पर ब्रह्मके वे सभी रूप नित्य शाश्वत परमात्म-स्वरूप हैं। उनके देह जन्म-मरणसे रहित होकर स्वरूपभूत हैं; वे प्रकृतिजनित कदापि नहीं हैं। वे परमानन्दसन्दोह हैं, सर्वतोभावेन ज्ञानैकस्वरूप हैं, वे सभी समस्त भगवद्गुणोंसे परिपूर्ण हैं एवं सभी दोषोंसे (माया-प्रपञ्चसे) सर्वथा रहित हैं।'

ब्रह्म, परमात्मा और भगवान् एक ही अद्वय परम सत्य तत्त्वके लीलानुरूप तीन नाम हैं। इस परम तत्त्व भगवान्‌के भ्रुकुटिविलासकी लीलामात्रसे सृष्टिका निर्माण और संहार हो सकता है। ये भगवान् निर्गुण (प्राकृत गुणोंसे रहित), सर्वेश्वर, प्रकृतिसे परे और परमात्मा हैं। ये सब जीवोंसे निर्लिप्त हैं और उनमें स्थित भी हैं। ये (भौतिक रूपसे रहित) निराकार और (स्वस्वरूपमें स्थित) साकार, सर्वव्यापी और स्वेच्छामय हैं। योगिगण 'सनातन परब्रह्म' कहते हैं और रात-दिन इन सर्वमङ्गलमय सत्य-स्वरूप परमात्माका ध्यान करते रहते हैं। ये स्वतन्त्र तथा समस्त कारणोंके भी कारण हैं। प्रलयके समय सर्वबीजस्वरूपा प्रकृति इनमें लीन रहती है और सृष्टिके समय प्रकट होकर क्रियाशील हो जाती है। यह प्रकृति भगवान्‌की निज अभिन्न शक्ति है और योग्यतानुसार अप्रकट या प्रकटरूपमें इनमें रमी हुई सदा-सर्वदा रहती है—जैसे अग्निमें उसकी दाहिका शक्ति रहती है।

पुराणोंमें युगोंतक धर्मका प्रचार हुआ। आज उनके प्रचारके अभावमें इस तरहके प्रकाशन कथा-आख्यानों, उपाख्यानोंके मिस धर्मकी व्याख्या पुराणोंका प्रमुख उद्देश्य है। धर्मकी स्थिति डाँवाडोल हो उठी है। धर्मभावनाके अभावमें देशका वास्तव स्वरूप बिगड़ता जा रहा है। अपना देश धर्मप्राण देश है। अतः पुराणोंके प्रचारके द्वारा धर्मस्थापनका कार्य बड़े महत्त्वका होगा। सभीको सचेष्ट होकर इसपर प्रयत्नशील होना चाहिये।

वामनभगवान्‌ने बलिको क्यों छला ?

(लेखक—स्वामी श्रीशङ्करानन्दजी सरस्वती)

नास्तिक एवं आस्तिक जनताके मनमें स्वभावतया यह शङ्का उठती है कि भगवान् तो धर्मकी स्थापनाके लिये अवतार लेते हैं—'धर्मसंस्थापनार्थाय सम्भवामि' किंतु वामन-अवतारमें उन्होंने बलिको छलकर इसके विपरीत ही किया है। अवतारका यदि दूसरा प्रयोजन दुष्टोंका विनाश—'विनाशाय च दुष्कृताम्' लिया जाय तो राजा बलि धर्मात्मा थे, उनका विनाश भगवान्‌ने छलसे क्यों किया ?

इस शङ्काका उत्तर यह है कि जब धर्मकी ओटमें अधर्मकी वृद्धि होकर सृष्टिचक्र-सञ्चालनमें बाधा उत्पन्न हो जाती है और ऐसी परिस्थिति उत्पन्न हो जाती है कि धर्म या धर्मात्माको विनष्ट किये बिना अधर्म या अधर्मात्माका विनाश नहीं किया जा सकता, तब समष्टि-धर्मकी रक्षाके लिये तामस-धर्मका विनाश ही सर्वजनहितकारी एवं शास्त्र-सम्मत माना गया है।

राजा बलि यद्यपि स्वयं धर्मात्मा थे तथापि उनके आश्रयसे रहनेवाले असुरोंके अधर्मकार्योंसे पृथ्वी आकुल थी। अतः भगवान्‌ने वामन शरीरसे तीन पग पृथ्वीको

माँगकर अति विशाल शरीरसे तीनों लोकोंको नापकर बलिको बाँध लिया । समष्टि-धर्मकी स्थापनाके लिये ही भगवान्‌ने बलिके व्यक्ति-धर्मकी उपेक्षा की, यह कार्य वैसे ही उचित है, जैसे सम्पूर्ण शरीरकी रक्षाके लिये आवश्यक होनेपर एक अङ्गको काट देना होता है ।

गम्भीर विचार कर देखा जाय तो राजा बलिके धर्मका विनाश नहीं हुआ; क्योंकि व्यक्ति-धर्मके पालनका सर्वोत्कृष्ट अन्तिम फल है परमात्माकी प्राप्ति । सो, राजा बलिको जैसी हुई है वैसी तो स्यात् ही किसीको हुई हो । राजा बलिके शयनगृहमें जितने द्वार हैं, उन सबमें प्रभु वरदानके कारण अनेक रूप धारण करके बलिको दर्शन देनेके लिये खड़े रहते हैं; क्योंकि बलिराजाने वरदान माँगा था कि जब मैं सोकर उठूँ तो जहाँ, जिस द्वारपर, मेरी नजर पड़े वहीं, उसी द्वारपर आपका दर्शन हो ।

समष्टि-व्यष्टि-धर्मके सामान्य-विशेष रूपकी साध्य-साधकता समझ ली जाय तो छलसे वृन्दाके पातिव्रत-धर्मको भंग करना आदि भगवान्‌की लीलाओंका रहस्य भी स्वयं ही समझमें आ जायगा; क्योंकि एक वृन्दाके पातिव्रत-धर्मकी ओटमें ही उसका पति अनेक स्त्रियोंके धर्मका विनाश कर रहा था । अतः भगवान्‌ने छलसे उसके पतिका रूप धारण कर वृन्दाके व्यष्टि-पातिव्रतधर्मको नष्ट कर समष्टि-पातिव्रत-धर्मकी रक्षा की थी । यहाँ भी गंभीरतासे देखा जाय तो वृन्दाको व्यष्टि-पातिव्रतधर्मके पालनका सर्वोत्कृष्ट परम फल परमपति परमात्माकी प्राप्ति जैसी हुई, वैसी तो शायद किसीको भी नहीं हुई; क्योंकि तुलसी-रूपा वृन्दाका संयोग शालिग्रामरूप भगवान्‌से सदा बना रहता है । अतः भगवान्‌के पूजन, भोग आदि सभी उपचारोंमें तुलसीका उपयोग अनिवार्य है ।

बलिको क्यों छला ? इस प्रश्नका संक्षिप्त उत्तर इतना ही है कि समष्टिधर्मकी स्थापनाके लिये छला । अतः वामन-अवतारमें भी गीता-(४ । ८) में कथित अवतार-मर्यादाके अनुरूप ही भगवान्‌ने कार्य किया है । फलतः वामनभगवान्‌की लीला और पुराणका स्वारस्य लोकमङ्गलकारी है ।

श्रीवामनपुराणकी उपादेयता

(परमश्रद्धेय स्वामी श्रीरामसुखदासजी महाराज)

मनुष्य-शरीर केवल परमात्माकी प्राप्तिके लिये ही मिला है । उसकी प्राप्तिके साधनोंका वर्णन वेदोंमें आता है, जो भगवान्‌के निःश्वास हैं—'यस्य निःश्वसितं वेदाः' । वेदोंके तात्पर्यको समझानेके लिये ही वेदव्यासजी महाराजने पुराणोंकी रचना की । पुराणोंमें इतिहास-(कथानकों-)के द्वारा आख्यान-उपाख्यान एवं वेदोंके विषयोंको ही सरलतासे समझाया गया है । जिन लोगोंका वेदोंमें अधिकार नहीं है, वे भी वेदोंके तत्त्वको सरलतासे समझ सकें, इसीलिये पुराणोंका प्रणयन किया गया है एवं वेदार्थ-निर्णयके लिये ही स्मृतियोंने भी आचरणका विधान किया है । पुराणों एवं स्मृतियोंको न जाननेसे वेदोंका ठीक अर्थ भी नहीं समझा जा सकता । सही तात्पर्य न समझनेवाले—अनजान मनुष्योंके द्वारा वेदोंकी मर्यादा नष्ट होती है । अतः वेदोंकी रक्षाके लिये पुराणों एवं स्मृतियोंका प्रकाशन हुआ, जिससे कि साधारण जनतातक वेदोंका तात्पर्य पहुँच जाय और वे उससे अपने जीवनको शुद्ध—निर्मल बनाकर उन्नति कर सकें ।

'कल्याण' अपने छप्पनवें वर्षके प्रथम अङ्कके रूपमें श्रीवामनपुराणाङ्क (विशेषाङ्क) निकाल रहा है, जो बहुत ही उपादेय है । वामनपुराणमें अनेक अच्छे-अच्छे प्रकरण हैं, जिनमें व्यवहारकी शिक्षाके साथ ही परमार्थ-सम्बन्धी बहुत-सी सार बातें बतायी गयी हैं । इस पुराणकी शिक्षाको जीवनमें उतारनेसे लोक और परलोक-विषयक कल्याण हो सकता है ।



वामनावतारी भगवान् विष्णु

• श्रीहरिः •

ॐ नमो भगवते त्रिविक्रमाय

अथ श्रीवामनपुराणम्

[अथ प्रथमोऽध्यायः]

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

भगवान् श्रीनारायण, मनुष्योंमें श्रेष्ठ नर, भगवती सरस्वती देवी और (पुराणोंके कर्ता) महर्षि व्यासजीको नमस्कार करके जय (पुराणों तथा महाभारत आदि ग्रन्थों)का उच्चारण (पठन) करना चाहिये[1] ।

त्रैलोक्यराज्यमाक्षिप्य बलेरिन्द्राय यो ददौ । श्रीधराय नमस्तस्मै छद्मवामनरूपिणे ॥ १ ॥
पुलस्त्यमृषिमासीनमाश्रमे वाग्विदां वरम् । नारदः परिपप्रच्छ पुराणं वामनाश्रयम् ॥ २ ॥
कथं भगवता ब्रह्मन् विष्णुना प्रभविष्णुना । वामनत्वं धृतं पूर्वं तन्ममाचक्ष्व पृच्छतः ॥ ३ ॥
कथं च वैष्णवो भूत्वा प्रह्लादो दैत्यसत्तमः । त्रिदशैर्युयुधे सार्धमत्र मे संशयो महान् ॥ ४ ॥
श्रूयते च द्विजश्रेष्ठ दक्षस्य दुहिता सती । शंकरस्य प्रिया भार्या बभूव वरवर्णिनी ॥ ५ ॥
किमर्थं सा परित्यज्य स्वशरीरं वरानना । जाता हिमवतो गेहे गिरीन्द्रस्य महात्मनः ॥ ६ ॥
पुनश्च देवदेवस्य पत्नीत्वमगमच्छुभा । एतन्मे संशयं छिन्धि सर्ववित् त्वं मतोऽसि मे ॥ ७ ॥
तीर्थानां चैव माहात्म्यं दानानां चैव सत्तम । व्रतानां विविधानां च विधिमाचक्ष्व मे द्विज ॥ ८ ॥

पहला अध्याय प्रारम्भ

(श्रीनारदजीका पुलस्त्य ऋषिसे वामनाश्रयी प्रश्न, शिवजीका लीलाचरित्र और जीमूतवाहन होना)

जिन्होंने बलिसे (भूमि, स्वर्ग और पाताल—इन) तीनों लोकोंके राज्यको छीनकर इन्द्रको दे दिया, उन मायामय वामनरूपधारी और लक्ष्मीको हृदयमें धारण करनेवाले विष्णुको नमस्कार है।

(एक बारकी बात है कि—) वाग्मियोंमें श्रेष्ठ विद्वान् पुलस्त्य ऋषि अपने आश्रममें बैठे हुए थे; (वहीं) नारदजीने उनसे वामनपुराणकी कथा (इस प्रकार) पूछी । उन्होंने कहा—ब्रह्मन् ! महाप्रभावशाली भगवान् विष्णुने कैसे वामनका अवतार ग्रहण किया था ? इसे आप मुझ जिज्ञासुको बतलायें । एक तो मेरी यह शङ्का है कि दैत्यवर्य प्रह्लादने विष्णुभक्त होकर भी देवताओंके साथ युद्ध कैसे किया और [illegible] । दूसरी जिज्ञासा यह है कि दक्षप्रजापतिकी पुत्री भगवती सती, जो भगवान् शङ्करकी प्रिय पत्नी थीं, उन श्रेष्ठ मुखवाली (सती)ने अपना शरीर त्यागकर पर्वतराज हिमालयके घरमें किसलिये जन्म लिया ? और पुनः वे

---

1 महाभारतके उल्लेखानुसार नर-नारायण बदरीवनमें स्थित परमात्मा ही हैं, जो बादमें अर्जुन और कृष्ण हुए । ये ही नारायणीय या भागवतधर्मके प्रधान प्रचारक हैं, अतः भागवतीय ग्रन्थोंमें सर्वत्र इन दोनोंको नमस्कार किया गया है । पुराण प्रवचनमें भी इस श्लोकको माङ्गलिक रूपमें पढ़नेकी प्राचीन प्रथा है ।

महाभारतका प्राचीन नाम 'जय' है पर इस श्लोकमें पुराणोंका भी ग्रहण किया गया है । भविष्यपुराणका वचन है— अष्टादश पुराणानि रामस्य चरितं तथा । कार्ष्णं वेदं पञ्चमं च यन्महाभारतं विदुः ॥
जयेति नाम चैतेषां प्रवदन्ति मनीषिणः । (भविष्यपुराण १ । [illegible] । ५[illegible])

अर्थात् अठारहों पुराण, रामायण और सम्पूर्ण (वेदार्थ) पाँचवाँ वेद, जिसे महाभारत-रूपमें जानते हैं—इन सबको मनीषीलोग 'जय' कहते हैं ।

कल्याणी देवदेव- (महादेव-) की पत्नी कैसे बनीं ? मैं मानता हूँ कि आपको सब कुछका ज्ञान है, अतः आप मेरी इस शंकाको दूर कर दें। साथ ही सत्पुरुषोंमें श्रेष्ठ हे द्विज! तीर्थों तथा दानोंकी महिमा और विविध व्रतोंकी अनुष्ठान-विधि भी मुझे बताइये ॥ १—८ ॥

एवमुक्तो नारदेन पुलस्त्यो मुनिसत्तमः। प्रोवाच वदतां श्रेष्ठो नारदं तपसो निधिम् ॥ ९ ॥

नारदजीके इस प्रकार कहनेपर मुनियोंमें मुख्य तथा वक्ताओंमें श्रेष्ठ तपोधन पुलस्त्यजी नारदजीसे कहने लगे ॥ ९ ॥

पुलस्त्य उवाच

पुराणं वामनं वक्ष्ये क्रमान्निखिलमादितः। अवधानं स्थिरं कृत्वा शृणुष्व मुनिसत्तम ॥ १० ॥
पुरा हैमवती देवी मन्दरस्थं महेश्वरम्। उवाच वचनं दृष्ट्वा ग्रीष्मकालमुपस्थितम् ॥ ११ ॥
ग्रीष्मः प्रवृत्तो देवेश न च ते विद्यते गृहम्। यत्र वातातपौ ग्रीष्मे स्थितयोर्नौ गमिष्यतः ॥ १२ ॥
एवमुक्तो भवान्या तु शंकरो वाक्यमब्रवीत्। निराश्रयोऽहं सुदति सदारण्यचरः शुभे ॥ १३ ॥

पुलस्त्यजी बोले—नारद! आपसे मैं सम्पूर्ण वामनपुराणकी कथा आदिसे (अन्ततक) वर्णन करूँगा। मुनिश्रेष्ठ! आप मनको स्थिर कर ध्यानसे सुनें[१]। प्राचीन समयमें देवी हैमवती-(सती-) ने ग्रीष्म-ऋतुका आगमन देखकर मन्दर पर्वतपर बैठे हुए भगवान् शंकरसे कहा—देवेश! ग्रीष्म-ऋतु तो आ गयी है, परंतु आपका कोई घर नहीं है, जहाँ हम दोनों ग्रीष्मकालमें निवास करते हुए वायु और तापजनित कठिन समयको बिता सकेंगे। सतीके ऐसा कहनेपर भगवान् शंकर बोले—हे सुन्दर दाँतोंवाली सति! मेरा कभी कोई घर नहीं रहा। मैं तो सदा वनोंमें ही घूमता रहता हूँ ॥ १०—१३ ॥

इत्युक्ता शंकरेणाथ वृक्षच्छायासु नारद। निदाघकालमनयत् समं शर्वेण सा सती ॥ १४ ॥
निदाघान्ते समुद्भूतो निर्जनाचरितोऽद्भुतः। घनान्धकारिताशो वै प्रावृट्कालोऽतिरागवान् ॥ १५ ॥
तं दृष्ट्वा दक्षतनुजा प्रावृट्कालमुपस्थितम्। प्रोवाच वाक्यं देवेशं सती सप्रणयं तदा ॥ १६ ॥

नारदजी! भगवान् शंकरके ऐसा कहनेपर सतीदेवीने उनके साथ वृक्षोंकी छायामें (जैसे-तैसे रहकर) निदाघ-(गर्मी-)का समय बिताया। फिर ग्रीष्मके अन्तमें अद्भुत वर्षाऋतु आ गयी, जो अत्यधिक रागको बढ़ानेवाली होती है और जिसमें प्रायः सबका आवागमन अवरुद्ध हो जाता है। (उस समय) मेघोंसे आवृत हो जानेसे दिशाएँ अन्धकारमय हो जाती हैं। उस वर्षाऋतुको आयी देखकर दक्ष-पुत्री सतीने प्रेमसे महादेवजीसे यह वचन कहा—॥ १४–१६ ॥

विवहन्ति वाता हृदयावदारणा गर्जन्त्यमी तोयधरा महेश्वर।
स्फुरन्ति नीलाभ्रगणेषु विद्युतो वाशन्ति केकारवमेव बर्हिणः ॥ १७ ॥
पतन्ति धारा गगनात् परिच्युता बका बलाकाश्च सरन्ति तोयदान्।
कदम्बसर्जार्जुनकेतकीद्रुमाः पुष्पाणि मुञ्चन्ति सुमारुताहताः ॥ १८ ॥
श्रुत्वैव मेघस्य दृढं तु गर्जितं त्यजन्ति हंसाश्च सरांसि तत्क्षणात्।
यथाश्रयान् योगिगणाः समन्तात् प्रवृद्धमूलानपि संत्यजन्ति ॥ १९ ॥

१–अग्निपुराणके प्रमाणानुसार वामनपुराणके वक्ता चतुर्मुख (ब्रह्माजी) हैं, पर यहाँ पुलस्त्यजी ऐसा उल्लेख नहीं करते कि 'पुराणं वामनं वक्ष्ये ब्रह्मणा च मया श्रुतम्।' इससे प्रतीत होता है कि एतत्-सम्बन्धी श्लोक अनुपलब्ध है। मत्स्यपुराणमें भी चतुर्मुख (ब्रह्मा) के वक्ता होनेका उल्लेख है—

'त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः। त्रिवर्गमभ्यधात्तच्च वामनं परिकीर्तितम् ॥'

इमानि यूथानि वने मृगाणां चरन्ति धावन्ति रमन्ति शंभो।
तथाचिराभाः सुतरां स्फुरन्ति पश्येह नीलेषु घनेषु देव।
नूनं समृद्धिं सलिलस्य दृष्ट्वा चरन्ति मृगास्तरुणद्रुमेषु ॥ २० ॥
उद्वृत्तवेगाः सहसैव निम्नगा जाताः शशाङ्काङ्कितचारुमौले।
किमत्र चित्रं यदनुज्ज्वलं जनं निषेव्य योषिद् भवति त्वशीला ॥ २१ ॥

महेश्वर! हृदयको विदीर्ण करनेवाली वायु वेगसे चल रही है। ये मेघ भी गर्जन कर रहे हैं, नीले मेघोंमें बिजलियाँ कौंध रही हैं और मयूरगण केकाध्वनि कर रहे हैं। आकाशसे गिरती हुई जलधाराएँ नीचे आ रही हैं। बगुले तथा बगुलोंकी पंक्तियाँ जलाशयोंमें तैर रही हैं। प्रचण्ड वायुके झोंके खाकर कदम्ब, सर्ज, अर्जुन तथा केतकीके वृक्ष पुष्पोंको गिरा रहे हैं—वृक्षोंसे फूल झड़ रहे हैं। मेघका गम्भीर गर्जन सुनकर हंस तुरंत जलाशयोंको छोड़कर चले जा रहे हैं, जिस प्रकार योगिजन अपने सब प्रकारसे समृद्ध घरको भी छोड़ देते हैं। शिवजी! वनमें मृगोंके ये यूथ आनन्दित होकर इधर-उधर दौड़ लगाकर खेल-कूदकर आनन्दित हो रहे हैं और देव! देखिये, नीले बादलोंमें विद्युत् भलीभाँति चमक रही है। लगता है, जलकी वृद्धिको देखकर मृगगण हरे-भरे सुपुष्ट नये वृक्षोंपर विचरण कर रहे हैं। नदियाँ सहसा उद्दाम (बड़े) वेगसे बहने लगी हैं। चन्द्रशेखर! ऐसे उत्तेजक समयमें यदि असद्वृत्त व्यक्तिके फंदेमें आकर स्त्री दुःशील हो जाती है तो इसमें क्या आश्चर्य ॥ १७–२१ ॥

नीलैश्च मेघैश्च समावृतं नभः पुष्पैश्च सर्जा मुकुलैश्च नीपाः।
फलैश्च बिल्वाः पयसा तथापगाः पत्रैः सपद्मैश्च महासरांसि ॥ २२ ॥
इतीदृशे शंकर दुःसहेऽद्भुते काले सुरौद्रे ननु ते ब्रवीमि।
गृहं कुरुष्वात्र महाचलोत्तमे सुनिर्वृता येन भवामि शंभो ॥ २३ ॥
इत्थं त्रिनेत्रः श्रुतिरामणीयकं श्रुत्वा वचो वाक्यमिदं बभाषे।
न मेऽस्ति वित्तं गृहसंचयार्थे मृगारिचर्मावरणं मम प्रिये ॥ २४ ॥
ममोपवीतं भुजगेश्वरः शुभे कर्णेऽपि पद्मश्च तथैव पिङ्गलः।
केयूरमेकं मम कम्बलस्त्वपि द्वितीयमन्यो भुजगो धनंजयः ॥ २५ ॥
नागस्तथैवाश्वतरो हि कङ्कणं सव्येतरे तक्षक उत्तरे तथा।
नीलोऽपि नीलाञ्जनतुल्यवर्णः श्रोणीतटे राजति सुप्रतिष्ठः ॥ २६ ॥

आकाश नीले बादलोंसे घिर गया है। इसी प्रकार पुष्पोंके द्वारा सर्ज, मुकुलों-(कलियों-) के द्वारा नीप (कदम्ब), फलोंके द्वारा बिल्व-वृक्ष एवं जलके द्वारा नदियाँ और कमल-पुष्पों एवं कमल-पत्रोंसे बड़े-बड़े सरोवर भी ढक गये हैं। हे शंकरजी! ऐसी दुःसह, अद्भुत तथा भयंकर दशामें आपसे प्रार्थना करती हूँ कि इस महान् तथा उत्तम पर्वतपर गृह-निर्माण कीजिये; हे शंभो! जिससे मैं सर्वथा निश्चिन्त हो जाऊँ। कानोंको प्रिय लगनेवाले सतीके इन वचनोंको सुनकर तीन नयनवाले भगवान् शंकरजी बोले—प्रिये! घर बनानेके लिये (और उसकी साज-सज्जाके लिये) मेरे पास धन नहीं है। मैं व्याघ्रके चर्मवस्त्रसे अपना शरीर ढकता हूँ। शुभे! (सूत्रोंके अभावमें) सर्पराज ही मेरा उपवीत (जनेऊ) बना है। पद्म और पिङ्गल नामके दो सर्प मेरे दोनों कानोंमें (कुण्डलका काम करते) हैं। कंबल और धनंजय नामके ये दो सर्प मेरी दोनों बाँहोंके बाजूबंद हैं। मेरे दाहिने और बाँयें हाथोंमें भी क्रमशः अश्वतर तथा तक्षक नाग कङ्कण बने हुए हैं। इसी प्रकार मेरी कमरमें नीलाञ्जनके वर्णवाला नील नामका सर्प अवस्थित होकर सुशोभित हो रहा है ॥ २२–२६ ॥

पुलस्त्य उवाच

इति वचनममोघं शंकरात्सा मृडानी श्रुतमपि नतुसत्यं श्रीमदाकर्ण्य भीता।
अवनितलमवेक्ष्य स्वामिनो वासकृच्छ्रात् परिवदति सरोषं लज्जयोच्छ्वस्य चोष्णम् ॥ २७ ॥

पुलस्त्यजी बोले—महादेवजीके इस प्रकार कठोर तथा ओजस्वी एवं सत्य होनेपर भी असत्य प्रतीत हो रहे वचनको सुनकर सतीजी बहुत डर गयीं और स्वामीके निवासकष्टको देखकर गरम साँस छोड़ती और पृथ्वीकी ओर देखती हुई (कुछ) क्रोध और लज्जासे इस प्रकार कहने लगीं—॥ २७ ॥

देव्युवाच

कथं हि देवदेवेश प्रावृट्कालो गमिष्यति। वृक्षमूले स्थिताया मे सुदुःखेन वदाम्यतः ॥ २८ ॥

सतीदेवी बोलीं—देवेश ! वृक्षके मूलमें दुःखपूर्वक रहकर भी मेरा वर्षाकाल कैसे व्यतीत होगा ! इसीलिये तो मैं आपसे (गृहके निर्माणकी बात) कहती हूँ ॥ २८ ॥

शंकर उवाच

घनावस्थितदेहायाः प्रावृट्कालः प्रयास्यति। यथाम्बुधारा न तव निपतिष्यन्ति विग्रहे ॥ २९ ॥

शंकरजी बोले—देवि ! मेघ-मण्डलके ऊपर अपने शरीरको स्थित कर तुम वर्षाकाल भलीभाँति व्यतीत कर सकोगी। इससे वर्षाकी जलधाराएँ तुम्हारे शरीरपर नहीं गिर पायेंगी ॥ २९ ॥

पुलस्त्य उवाच

ततो हरस्तद्घनखण्डमुन्नतमारुह्य तस्थौ सह दक्षकन्यया।
ततोऽभवन्नाम महेश्वरस्य जीमूतकेतुस्त्विति विश्रुतं दिवि ॥ ३० ॥

॥ इति श्रीवामनपुराणे प्रथमोऽध्यायः ॥ १ ॥

पुलस्त्यजी बोले—उसके बाद महादेवजी दक्षकन्या सतीके साथ आकाशमें उन्नत मेघमण्डलके ऊपर चढ़कर बैठ गये। तभीसे स्वर्गमें उन महादेवजीका नाम 'जीमूतकेतु' या 'जीमूतवाहन' विख्यात हो गया ॥ ३० ॥

॥ इस प्रकार श्रीवामनपुराणमें पहला अध्याय समाप्त हुआ ॥ १ ॥

[अथ द्वितीयोऽध्यायः]

पुलस्त्य उवाच

ततस्त्रिनेत्रस्य गतः प्रावृट्कालो घनोपरि। लोकानन्दकरी रम्या शरत् समभवन्मुने ॥ १ ॥

त्यजन्ति नीलाम्बुधरा नभस्तलं वृक्षांश्च कङ्काः सरितस्तटानि।
पद्माः सुगन्धं निलयानि वायसा रुरुर्विषाणं कलुषं जलाशयाः ॥ २ ॥
विकासमायान्ति च पङ्कजानि चन्द्रांशवो भान्ति लताः सुपुष्पाः।
नन्दन्ति हृष्टान्यपि गोकुलानि सन्तश्च संतोषमनुव्रजन्ति ॥ ३ ॥
सरःसु पद्मा गगने च तारका जलाशयेष्वेव तथा पयांसि।
सतां च चित्तं हि दिशां मुखैः समं वैमल्यमायान्ति शशाङ्ककान्तयः ॥ ४ ॥

दूसरा अध्याय प्रारम्भ

(शरदागम होनेपर शंकरजीका मन्दरपर्वतपर जाना और दक्षका यज्ञ)

पुलस्त्यजी बोले—इस प्रकार तीन नयनवाले भगवान् शिवका वर्षाकाल मेघोंपर बसते हुए ही व्यतीत हो गया। हे मुने ! तत्पश्चात् लोगोंको आनन्द देनेवाली रमणीय शरद् ऋतु आ गयी। इस ऋतुमें नीले मेघ

आकाशको और वायु वृक्षोंको छोड़कर अलग हो जाते हैं। नदियाँ भी तटको छोड़कर बहने लगती हैं। इसमें कमलपुष्प सुगन्ध फैलाते हैं, कौवे भी घोसलोंको छोड़ देते हैं। रुरुमृगोंके शृङ्ग गिर पड़ते हैं और जलाशय सर्वथा स्वच्छ हो जाते हैं। इस समय कमल विकसित होते हैं, शुभ्र चन्द्रमाकी किरणें आनन्ददायिनी होकर फैल जाती हैं, लताएँ पुष्पित हो जाती हैं, गौवें हृष्ट-पुष्ट होकर आनन्दसे विचरती हैं तथा संतोंको बड़ा सुख मिलता है। तालाबोंमें कमल, गगनमें तारागण, जलाशयोंमें निर्मल जल और दिशाओंके मुखमण्डलके साथ सज्जनोंका चित्त तथा चन्द्रमाकी ज्योति भी सर्वथा स्वच्छ एवं निर्मल हो जाती है ॥ १–४ ॥

एतादृशे हरः काले मेघपृष्ठाधिवासिनीम्। सतीमादाय शैलेन्द्रं मन्दरं समुपाययौ ॥ ५ ॥
ततो मन्दरपृष्ठेऽसौ स्थितः समशिलातले। रराम शंभुर्भगवान् सत्या सह महाद्युतिः ॥ ६ ॥
ततो व्यतीते शरदि प्रतिबुद्धे च केशवे। दक्षः प्रजापतिश्रेष्ठो यष्टुमारभत क्रतुम् ॥ ७ ॥
द्वादशैव स आदित्याञ्छक्रादींश्च सुरोत्तमान्। सकश्यपान् समामन्त्र्य सदस्यान् समचीकरत् ॥ ८ ॥

ऐसी शरद्-ऋतुमें शंकरजी मेघके ऊपर वास करनेवाली सतीको साथ लेकर श्रेष्ठ मन्दर पर्वतपर पहुँचे और महातेजस्वी (महाकान्तिमान्) भगवान् शंकर मन्दराचलके ऊपरी भागमें एक समतल शिलापर अवस्थित होकर सतीके साथ विश्राम करने लगे। उसके बाद शरद्-ऋतुके बीत जानेपर तथा भगवान् विष्णुके जग जानेपर प्रजापतियोंमें श्रेष्ठ दक्षने एक विशाल यज्ञका आयोजन किया। उन्होंने द्वादश आदित्यों तथा कश्यप आदि (ऋषियों) के साथ ही इन्द्र आदि श्रेष्ठ देवताओंको भी निमन्त्रित कर उन्हें यज्ञका सदस्य बनाया ॥ ५–८ ॥

अरुन्धत्या च सहितं वसिष्ठं शंसितव्रतम्। सहानसूययात्रिं च सह धृत्या च कौशिकम् ॥ ९ ॥
अहल्यया गौतमं च भरद्वाजममायया। चन्द्रया सहितं ब्रह्मन्नृषिमङ्गिरसं तथा ॥ १० ॥
आमन्त्र्य कृतवान्दक्षः सदस्यान् यज्ञसंसदि। विद्वान् गुणसंपन्नान् वेदवेदाङ्गपारगान् ॥ ११ ॥
धर्मं च [redacted] समाहूय भार्ययाऽहिंसया सह। निमन्त्र्य यज्ञवाटस्य द्वारपालत्वमादिशत् ॥ १२ ॥

नारदजी! उन्होंने अरुन्धतीसहित प्रशस्तव्रतधारी वसिष्ठको, अनसूया-सहित अत्रिमुनिको, धृतिके सहित कौशिक (विश्वामित्र) मुनिको, अहल्याके साथ गौतमको, अमायाके सहित भरद्वाजको और चन्द्राके साथ अङ्गिरा ऋषिको आमन्त्रित किया। विद्वान् दक्षने इन गुणसम्पन्न वेद-वेदाङ्गपारगामी विद्वान् ऋषियोंको निमन्त्रितकर उन्हें अपने यज्ञमें सदस्य बनाया। और, उन्होंने (प्रजापति दक्षने) यज्ञमें धर्मको भी उनकी पत्नी अहिंसाके साथ निमन्त्रितकर यज्ञमण्डपका द्वारपाल नियुक्त किया ॥ ९–१२ ॥

अरिष्टनेमिनं चक्रे इध्माहरणकारिणम्। भृगुं च मन्त्रसंस्कारे सम्यग् दक्षः प्रयुक्तवान् ॥ १३ ॥
तथा चन्द्रमसं देवं रोहिण्या सहितं शुचिम्। धनानामाधिपत्ये च युक्तवान् हि प्रजापतिः ॥ १४ ॥
जामातृदुहितॄंश्चैव दौहित्रांश्च प्रजापतिः। सशंकरां सतीं मुक्त्वा मखे सर्वान् न्यमन्त्रयत् ॥ १५ ॥

दक्षने अरिष्टनेमिको समिधा लानेका कार्य सौंपा और भृगुको समुचित मन्त्र-पाठमें नियुक्त किया। फिर दक्षप्रजापतिने रोहिणीसहित 'अर्थशुचि' चन्द्रमाको कोषाध्यक्षके पदपर नियुक्त किया। [redacted] प्रकार दक्षप्रजापतिने केवल शंकरसहित सतीको छोड़कर अपने सभी जामाताओं, पुत्रियों एवं दौहित्रोंको यज्ञमें आमन्त्रित किया ॥ १३–१५ ॥

नारद उवाच

किमर्थं लोकपतिना धनाध्यक्षो महेश्वरः । ज्येष्ठः श्रेष्ठो वरिष्ठोऽपि आद्योऽपि न निमन्त्रितः ॥१६॥

नारदजीने कहा (पूछा)—(पुलस्त्यजी महाराज !) लोकस्वामी दक्षने महेश्वरको सबसे बड़े, श्रेष्ठ, वरिष्ठ, सबके आदिमें रहनेवाले एवं समग्र ऐश्वर्योंके स्वामी होनेपर भी (यज्ञमें) क्यों नहीं निमन्त्रित किया ? ॥ १६ ॥

पुलस्त्य उवाच

ज्येष्ठः श्रेष्ठो वरिष्ठोऽपि आद्योऽपि भगवाञ्छिवः । कपालीति विदित्वेशो दक्षेण न निमन्त्रितः ॥१७॥

पुलस्त्यजीने कहा—(नारदजी !) ज्येष्ठ, श्रेष्ठ, वरिष्ठ तथा अग्रगामी होनेपर भी भगवान् शिवको कपाली जानकर प्रजापति दक्षने उन्हें (यज्ञमें) निमन्त्रित नहीं किया ॥ १७ ॥

नारद उवाच

किमर्थं देवताश्रेष्ठः शूलपाणिस्त्रिलोचनः । कपाली भगवान् जातः कर्मणा केन शंकरः ॥१८॥

नारदजीने (फिर) पूछा—(महाराज !) देवश्रेष्ठ शूलपाणि, त्रिलोचन भगवान् शंकर किस कर्मसे और किस प्रकार कपाली हो गये, यह बतलायें ॥ १८ ॥

पुलस्त्य उवाच

शृणुष्वावहितो भूत्वा कथामेतां पुरातनीम् । प्रोक्तामादिपुराणे च ब्रह्मणाऽव्यक्तमूर्त्तिना ॥१९॥
पुरा त्वेकार्णवं सर्वं जगत्स्थावरजङ्गमम् । नष्टचन्द्रार्कनक्षत्रं प्रणष्टपवनानलम् ॥२०॥
अप्रतर्क्यमविज्ञेयं भावाभावविवर्जितम् । निमग्नपर्वततरु तमोभूतं सुदुर्दशम् ॥२१॥
तस्मिन् स शेते भगवान् निद्रां वर्षसहस्रिकीम् । रात्र्यन्ते सृजते लोकान् राजसं रूपमास्थितः ॥२२॥

पुलस्त्यजीने कहा—नारदजी ! आप ध्यान देकर सुनें। यह पुरानी कथा आदिपुराणमें अव्यक्तमूर्ति ब्रह्माजीके द्वारा कही गयी है। (मैं उसी प्राचीन कथाको आपसे कहता हूँ।) प्राचीन समयमें समस्त स्थावर-जङ्गमात्मक जगत् एकीभूत महासमुद्रमें निमग्न (डूबा हुआ) था। चन्द्र, सूर्य, नक्षत्र, वायु एवं अग्नि—किसीका भी कोई (अलग) अस्तित्व नहीं था। 'भाव' एवं 'अभाव' से रहित जगत्‌की उस समयकी अवस्थाका कोई ठीक-ठीक ज्ञान, विचार, तर्कना या वर्णन सम्भव नहीं है। सभी पर्वत एवं वृक्ष जलमें निमग्न थे तथा सम्पूर्ण जगत् अन्धकारसे व्याप्त एवं दुर्दशाग्रस्त था। ऐसे समयमें भगवान् विष्णु हजारों वर्षोंकी निद्रामें शयन करते हैं एवं रात्रिके अन्तमें राजस रूप ग्रहणकर वे सभी लोकोंकी रचना करते हैं ॥ १९–२२ ॥

राजसः पञ्चवदनो वेदवेदाङ्गपारगः । स्रष्टा चराचरस्यास्य जगतोऽद्भुतदर्शनः ॥२३॥
तमोमयस्तथैवान्यः समुद्भूतस्त्रिलोचनः । शूलपाणिः कपर्दी च अक्षमालां च दर्शयन् ॥२४॥
ततो महात्मा ह्यसृजदहंकारं सुदारुणम् । येनाक्रान्तावुभौ देवौ तावेव ब्रह्मशंकरौ ॥२५॥
अहंकारावृतो रुद्रः प्रत्युवाच पितामहम् । को भवानिह संप्राप्तः केन सृष्टोऽसि मां वद ॥२६॥

इस चराचरात्मक जगत्‌का स्रष्टा भगवान् विष्णुका वह अद्भुत राजस स्वरूप पञ्चमुख एवं वेद-वेदाङ्गोंका ज्ञाता था। उसी समय तमोमय, त्रिलोचन, शूलपाणि, कपर्दी तथा रुद्राक्षमाला धारण किया हुआ एक अन्य पुरुष भी प्रकट हुआ। उसके बाद भगवान्‌ने अतिदारुण अहंकारकी रचना की, जिससे ब्रह्मा तथा शंकर—वे दोनों ही देवता आक्रान्त हो गये। अहंकारसे व्याप्त शिवने ब्रह्मासे कहा—तुम कौन हो और यहां कैसे आये हो ? तुम मुझे यह भी बतलाओ कि तुम्हारी सृष्टि किसने की है ? ॥ २३–२६ ॥

पितामहोऽप्यहंकारात् प्रत्युवाचाथ को भवान् । भवतो जनकः कोऽत्र जननी वा तदुच्यताम् ॥२७॥
इत्यन्योन्यं पुरा ताभ्यां ब्रह्मेशाभ्यां कलिप्रिय । परिवादोऽभवत् तत्र उ[illegible]ऽनघ ॥

भवानप्यन्तरिक्षं हि ज्ञानमात्रस्तदोत्पतत् । धारयन्नतुलां वीणां कुर्वन् किलकिलाध्वनिम् ॥२९॥
ततो विनिर्जितः शंभुर्मानिना पद्मयोनिना । तस्थावधोमुखो दीनो ग्रहाक्रान्तो यथा शशी ॥३०॥

(फिर) इसपर ब्रह्माने भी अहंकारसे उत्तर दिया—आप भी बतलाइये कि आप कौन हैं तथा आपके माता-पिता कौन हैं ? लोक-कल्याणके लिये कलहको प्रिय माननेवाले नारदजी ! इस प्रकार प्राचीनकालमें ब्रह्मा और शंकरके बीच एक-दूसरेसे दुर्विवाद हुआ । उसी समय आपका भी प्रादुर्भाव हुआ । आप उत्पन्न होते ही अनुपम वीणा धारण किये किलकिला शब्द करते हुए अन्तरिक्षकी ओर ऊपर चले गये । इसके बाद भगवान् शिव मानो ब्रह्माद्वारा पराजित-से होकर राहुग्रस्त चन्द्रमाके समान दीन एवं अधोमुख होकर खड़े हो गये ॥ २७-३० ॥

पराजिते लोककर्तौ देवेन परमेष्ठिना । क्रोधान्धकारितं वक्त्रं पञ्चमोऽथ मुखोऽब्रवीत् ॥३१॥
अहं ते प्रतिजानामि तमोमूर्ते त्रिलोचन । दिग्वासा वृषभारूढो लोकक्षयकरो भवान् ॥३२॥
इत्युक्तः शंकरः क्रुद्धो वदनं घोरचक्षुषा । निर्दग्धुकामस्त्वनिशं ददर्श भगवानजः ॥३३॥
ततस्त्रिनेत्रस्य समुद्भवन्ति वक्त्राणि पञ्चाथ सुदर्शनानि ।
श्वेतं च रक्तं कनकावदातं नीलं तथा पिङ्गजटं च शुभ्रम् ॥ ३४ ॥

(ब्रह्माके द्वारा) लोकपति (शंकर) के पराजित हो जानेपर क्रोधसे अन्धे हुए रुद्रसे (श्रीब्रह्माजीके) पाँचवें मुखने कहा—तमोमूर्ति त्रिलोचन ! मैं आपको जानता हूँ । आप दिगम्बर, वृषारोही एवं लोकोंको नष्ट करनेवाले (प्रलयंकारी) हैं । इसपर अजन्मा भगवान् शंकर अपने तीसरे घोर नेत्रद्वारा भस्म करनेकी इच्छासे ब्रह्माके उस मुखको एकटक देखने लगे । तदनन्तर श्रीशंकरके श्वेत, रक्त, स्वर्णिम, नील एवं पिंगल वर्णके सुन्दर पाँच मुख समुद्भूत हो गये ॥ ३१-३४ ॥

वक्त्राणि दृष्ट्वार्कसमानि सद्यः पैतामहं वक्त्रमुवाच वाक्यम् ।
समाहतस्याथ जलस्य बुद्बुदा भवन्ति किं तेषु पराक्रमोऽस्ति ॥ ३५ ॥
तच्छ्रुत्वा क्रोधयुक्तेन शंकरेण महात्मना । नखाग्रेण शिरश्छिन्नं ब्राह्मं परुषवादिनम् ॥ ३६ ॥
तच्छिन्नं शंकरस्यैव सव्ये करतलेऽपतत् । पतते न कदाचिच्च तच्छंकरकराच्छिरः ॥ ३७ ॥
अथ क्रोधावृतेनापि ब्रह्मणाद्भुतकर्मणा । सृष्टस्तु पुरुषो धीमान् कवची कुण्डली शरी ॥ ३८ ॥
धनुष्पाणिर्महाबाहुर्बाणशक्तिधरोऽव्ययः । चतुर्भुजो महातूणी आदित्यसमदर्शनः ॥ ३९ ॥

सूर्यके समान दीप्त (उन) मुखोंको देखकर पितामहके मुखने कहा—जलमें आघात करनेसे बुद्बुद तो उत्पन्न होते हैं, पर क्या उनमें कुछ शक्ति भी होती है ? यह सुनकर क्रोधभरे भगवान् शंकरने ब्रह्माके कठोर भाषण करनेवाले सिरको अपने नखके अग्रभागसे काट डाला; पर वह कटा हुआ ब्रह्माजीका सिर शंकरजीके ही बाम हथेलीपर जा गिरा एवं वह कपाल श्रीशंकरके उस हथेलीमें (इस प्रकार चिपक गया कि गिरानेपर भी) किसी प्रकार न गिरा । इसपर अद्भुतकर्मा ब्रह्माजी अत्यन्त क्रुद्ध हो गये । उन्होंने कवच-कुण्डल एवं शर धारण करनेवाले धनुर्धर विशाल बाहुवाले एक पुरुषकी रचना की । वह अव्यय, चतुर्भुज बाण, शक्ति और भारी तरकस धारण किये था तथा सूर्यके समान तेजस्वी दीख पड़ता था ॥ ३५-३९ ॥

स प्राह गच्छ दुर्बुद्धे मा त्वां शूलिन् निपातये । भवान् पापसमायुक्तः पापिष्ठं को जिघांसति ॥ ४० ॥
इत्युक्तः शंकरस्तेन पुरुषेण महात्मना । त्रपायुक्तो जगामाथ रुद्रो बदरिकाश्रमम् ॥ ४१ ॥
नरनारायणस्थानं पर्वते हि हिमाश्रये । सरस्वती यत्र पुण्या स्यन्दते सरितां वरा ॥ ४२ ॥

तत्र गत्वा च तं दृष्ट्वा नारायणमुवाच ह। भिक्षां प्रयच्छ भगवन् महाकापालिकोऽस्मि भोः॥ ४३॥
इत्युक्तो धर्मपुत्रस्तु रुद्रं वचनमब्रवीत्। सव्यं भुजं ताडयस्व त्रिशूलेन महेश्वर॥ ४४॥

उस नये पुरुषने शिवजीसे कहा—दुर्बुद्धि शूलधारी शंकर ! तुम शीघ्र (यहाँसे) चले जाओ, अन्यथा मैं तुम्हें मार डालूँगा। पर तुम पापयुक्त हो; भला, इतने बड़े पापीको कौन मारना चाहेगा ! जब उस महापुरुषने शंकरसे इस प्रकार कहा, तब शिवजी लज्जित होकर हिमालय पर्वतपर स्थित बदरिकाश्रमको चले गये, जहाँ नर-नारायणका स्थान है और जहाँ नदियोंमें श्रेष्ठ पवित्र सरस्वती नदी बहती है। वहाँ जाकर और उन नारायणको देखकर शंकरने कहा—भगवन् ! मैं महाकापालिक हूँ। आप मुझे भिक्षा दें। ऐसा कहनेपर धर्मपुत्र-(नारायण-) ने रुद्रसे कहा—महेश्वर ! तुम अपने त्रिशूलके द्वारा मेरी बायीं भुजापर ताड़ना करो॥ ४०—४४॥

नारायणवचः श्रुत्वा त्रिशूलेन त्रिलोचनः। सव्यं नारायणभुजं ताडयामास वेगवान्॥ ४५॥
त्रिशूलाभिहतान्मार्गात् तिस्रो धारा विनिर्ययुः। एका गगनमाक्रम्य स्थिता ताराभिमण्डिता॥ ४६॥
द्वितीया न्यपतद् भूमौ तां जग्राह तपोधनः। अत्रिस्तस्मात् समुद्भूतो दुर्वासा शंकरांशतः॥ ४७॥
तृतीया न्यपतद्धारा कपाले रौद्रदर्शने। तस्माच्छिशुः समभवत् संनद्धकवचो युवा॥ ४८॥

श्यामावदातः शरचापपाणिर्गर्जन्यथा प्रावृषि तोयदोऽसौ।
इत्थं ब्रुवन् कस्य विशातयामि स्कन्धाच्छिरस्तालफलं यथैव॥ ४९॥

शिवजीने नारायणकी बात सुनकर त्रिशूलद्वारा बड़े वेगसे उनकी वाम भुजापर आघात किया। त्रिशूलद्वारा (भुजापर) प्रताड़ित मार्गसे जलकी तीन धाराएँ निकल पड़ीं। एक धारा आकाशमें जाकर ताराओंसे मण्डित आकाशगङ्गा हुई; दूसरी धारा पृथ्वीपर गिरी, जिसे तपोधन अत्रिने (मन्दाकिनीके रूपमें) प्राप्त किया। शंकरके उसी अंशसे दुर्वासाका प्रादुर्भाव हुआ। तीसरी धारा भयानक दिखायी पड़नेवाले कपालपर गिरी, जिससे एक शिशु उत्पन्न हुआ। वह (जन्म लेते ही) कवच बाँधे, श्यामवर्णका युवक था। उसके हाथोंमें धनुष और बाण था। फिर वह वर्षाकालमें मेघ-गर्जनके समान कहने लगा—मैं किसके स्कन्धसे सिरको तालफलके सदृश काट गिराऊँ !॥ ४५—४९॥

तं शंकरोऽभ्येत्य वचो बभाषे धरं हि नारायणबाहुजातम्।
निपातयैनं नर दुष्टवाक्यं ब्रह्मात्मजं सूर्यशतप्रकाशम्॥ ५०॥
इत्येवमुक्तः स तु शंकरेण आद्यं धनुस्त्वाजगवं प्रसिद्धम्।
जग्राह तूणानि तथाऽक्षयाणि युद्धाय वीरः स मतिं चकार॥ ५१॥
ततः प्रयुद्धौ सुभृशं महाबलौ ब्रह्मात्मजो बाहुभवश्च शार्वः।
दिव्यं सहस्रं परिवत्सराणां ततो हरोऽभ्येत्य विरञ्चिमूचे॥ ५२॥
जितस्त्वदीयः पुरुषः पितामह नरेण दिव्याद्भुतकर्मणा बली।
महापृषत्कैरभिपत्य ताडितस्तदद्भुतं चेह दिशो दशैव॥ ५३॥
ब्रह्मा तमीशं वचनं बभाषे नेहास्य जन्मान्यजितस्य शंभो।
पराजितश्चेष्यतेऽसौ त्वदीयो नरो मदीयः पुरुषो महात्मा॥ ५४॥
इत्येवमुक्तो वचनं त्रिनेत्रश्चिक्षेप सूर्ये पुरुषं विरिञ्चेः।
नरं नरस्यैव महा स विग्रहे चिक्षेप धर्मप्रभवस्य देहे॥ ५५॥

॥ इति श्रीवामनपुराणे द्वितीयोऽध्यायः ॥ २ ॥

श्रीनारायणकी बाहुसे उत्पन्न उस पुरुषने समीप आकर शंकरसे कहा—हे नर! तुम सूर्यके समान नारायण, महाभाग, इन्होंने उत्पन्न इस पुरुषको मार डाला। शंकरजीने एवं महानर उन दोनोंने प्रसिद्ध आजगव नामक धनुष एवं अक्षय तूणीर ग्रहणकर युद्धका निश्चय किया। उसके बाद भगवान् शंकर और नारायणकी भुजासे उत्पन्न दोनों नरोंमें सहस्र दिव्य वर्षोंतक प्रचण्ड युद्ध होता रहा। तत्पश्चात् श्रीशंकरजीने ब्रह्मासे जाकर कहा—पितामह! यह एक अद्भुत बात है कि दिव्य एवं अद्भुत कर्मवाले (मेरे) नरने दसों दिशाओंमें व्याप्त महान् गणोंके सहित आपके पुरुषको जीत लिया। ब्रह्माने उन ईशसे कहा कि इस अनिरुद्धका जन्म यहाँ दूसरेके द्वारा पराजित होनेके लिये नहीं हुआ है। यदि किसीको पराजित कहा जाना अभीष्ट है तो वह नर ही है। यह पुरुष तो महायशस्वी है—ऐसा कहे जानेपर श्रीशंकरजीने अपने जीते पुरुषको सूर्यमण्डलमें फेंक दिया तथा ब्रह्माने उस नरको धर्मपुत्र नरके शरीरमें फेंक दिया ॥ ५०-५५ ॥

॥ इस प्रकार श्रीवामनपुराणमें दूसरा अध्याय समाप्त हुआ ॥ २ ॥



[अथ तृतीयोऽध्यायः]

पुलस्त्य उवाच

ततः करतले रुद्रः कपाले दारुणे स्थिते। संतापमगमद् ब्रह्मंश्चिन्तया व्याकुलेन्द्रियः ॥ १ ॥
ततः समागता रौद्रा नीलाञ्जनचयप्रभा। सरक्तमूर्धजा भीमा ब्रह्महत्या हरान्तिकम् ॥ २ ॥
तामागतां हरो दृष्ट्वा पप्रच्छ विकरालिनीम्। काऽसि त्वमागता रौद्रे केनाप्यर्थेन तद्वद ॥ ३ ॥
कपालिनमथोवाच ब्रह्महत्या सुदारुणा। ब्रह्मवध्याऽस्मि संप्राप्ता मां प्रतीच्छ त्रिलोचन ॥ ४ ॥

तीसरा अध्याय प्रारम्भ

(शंकरजीका ब्रह्महत्यासे छूटनेके लिये तीर्थोंमें भ्रमण, बदरिकाश्रममें नारायणकी स्तुति, वाराणसीमें ब्रह्महत्यासे मुक्ति एवं कपाली नाम पड़ना)

पुलस्त्यजी बोले—नारदजी! तत्पश्चात् शिवजीको अपने हाथमें भयंकर कपालके सट जानेसे बड़ी चिन्ता हुई। उनकी इन्द्रियाँ व्याकुल हो गयीं। उन्हें बड़ा संताप हुआ। उसके बाद काजलके समान नीले रंगकी एवं लाल वर्णके केशवाली भयंकर ब्रह्महत्या शंकरके निकट आयी। उस विकराल रूपवाली स्त्रीको आयी देखकर शंकरजीने पूछा—ओ भयावनी स्त्री! यह बतलाओ कि तुम कौन हो एवं किसलिये यहाँ आयी हो? इसपर उस अत्यन्त दारुण ब्रह्महत्याने उनसे कहा—मैं ब्रह्महत्या हूँ; हे त्रिलोचन! आप मुझे स्वीकार करें—इसलिये यहाँ आयी हूँ ॥ १-४ ॥

इत्येवमुक्त्वा वचनं ब्रह्महत्या विवेश ह। त्रिशूलपाणिनं रुद्रं सम्प्रतापितविग्रहम् ॥ ५ ॥
ब्रह्महत्याभिभूतश्च शर्वो बदरिकाश्रमम्। आगच्छन्न ददर्शाथ नरनारायणावृषी ॥ ६ ॥
अदृष्ट्वा धर्मतनयौ चिन्ताशोकसमन्वितः। जगाम यमुनां स्नातुं साऽपि शुष्कजलाऽभवत् ॥ ७ ॥
कालिन्दीं शुष्कसलिलां निरीक्ष्य वृषकेतनः। प्लक्षजां स्नातुमगमदन्तर्धानं च सा गता ॥ ८ ॥

ऐसा कहकर ब्रह्महत्या सन्तापसे जलते शरीरवाले त्रिशूलपाणि शिवके शरीरमें समा गयी। ब्रह्महत्यासे अभिभूत होकर शंकर बदरिकाश्रममें आये; किंतु वहाँ नर एवं नारायण ऋषियोंके उन्हें दर्शन नहीं हुए। धर्मके उन दोनों पुत्रोंको वहाँ न देखकर वे चिन्ता और शोकसे युक्त हो यमुनाजीमें स्नान करने गये; परंतु उनका जल भी सूख गया। यमुनाजीको निर्जल देखकर भगवान् शंकर प्लक्षजामें स्नान करने गये; किंतु वह भी लुप्त हो गयी ॥ ५-८ ॥

ततोऽनु पुष्करारण्यं मागधारण्यमेव च। सैन्धवारण्यमेवासौ गत्वा स्नातो यथेच्छया ॥ ९ ॥
तथैव नैमिषारण्यं धर्मारण्यं तथेश्वरः। स्नातो नैव च सा रौद्रा ब्रह्महत्या व्यमुञ्चत ॥ १० ॥
सरित्सु तीर्थेषु तथाश्रमेषु पुण्येषु देवायतनेषु शर्वः।
समायुतो योगयुतोऽपि पापान्नावाप मोक्षं जलदध्वजोऽसौ ॥ ११ ॥
ततो जगाम निर्विण्णः शंकरः कुरुजाङ्गलम्। तत्र गत्वा ददर्शाथ चक्रपाणिं खगध्वजम् ॥ १२ ॥
तं दृष्ट्वा पुण्डरीकाक्षं शङ्खचक्रगदाधरम्। कृताञ्जलिपुटो भूत्वा हरः स्तोत्रमुदीरयत् ॥ १३ ॥

फिर पुष्करारण्य, धर्मारण्य और सैन्धवारण्यमें जाकर उन्होंने बहुत समयतक स्नान किया। उसी प्रकार वे नैमिषारण्य तथा सिद्धपुरमें भी गये और स्नान किये; फिर भी उस भयंकर ब्रह्महत्याने उन्हें नहीं छोड़ा। जीमूतकेतु शंकरने अनेक नदियों, तीर्थों, आश्रमों एवं पवित्र देवायतनोंकी यात्रा की; पर योगी होनेपर भी वे पापसे मुक्ति न प्राप्त कर सके। तत्पश्चात् वे खिन्न होकर कुरुक्षेत्र गये। वहाँ जाकर उन्होंने गरुडध्वज चक्रपाणि-(विष्णु-)को देखा और उन शङ्ख-चक्र-गदाधारी पुण्डरीकाक्ष-(श्रीनारायण-) का दर्शनकर वे हाथ जोड़कर स्तुति करने लगे—॥ ९-१३ ॥

हर उवाच

नमस्ते देवतानाथ नमस्ते गरुडध्वज। शङ्खचक्रगदापाणे वासुदेव नमोऽस्तु ते ॥ १४ ॥
नमस्ते निर्गुणानन्त अप्रतर्क्याय वेधसे। ज्ञानाज्ञान निरालम्ब सर्वालम्ब नमोऽस्तु ते ॥ १५ ॥
रजोयुक्त नमस्तेऽस्तु ब्रह्ममूर्ते सनातन। त्वया सर्वमिदं नाथ जगत्सृष्टं चराचरम् ॥ १६ ॥
सत्त्वाधिष्ठित लोकेश विष्णुमूर्ते अधोक्षज। प्रजापाल महाबाहो जनार्दन नमोऽस्तु ते ॥ १७ ॥
तमोमूर्ते अहं ह्येष त्वदंशक्रोधसंभवः। गुणाभियुक्त देवेश सर्वव्यापिन् नमोऽस्तु ते ॥ १८ ॥

भगवान् शंकर बोले—हे देवताओंके स्वामी ! आपको नमस्कार है ! गरुडध्वज ! आपको प्रणाम है। शङ्ख-चक्र-गदाधारी वासुदेव ! आपको नमस्कार है। निर्गुण, अनन्त एवं अतर्कनीय विधाता ! आपको नमस्कार है। ज्ञानाज्ञानस्वरूप, स्वयं निराश्रय किंतु सबके आश्रय ! आपको नमस्कार है। रजोगुण, सनातन, ब्रह्ममूर्ति ! आपको नमस्कार है। नाथ ! आपने इस सम्पूर्ण चराचर विश्वकी रचना की है। सत्त्वगुणके आश्रय लोकेश ! विष्णुमूर्ति, अधोक्षज, प्रजापालक, महाबाहु, जनार्दन ! आपको नमस्कार है। हे तमोमूर्ति ! मैं आपके अंशभूत क्रोधसे उत्पन्न हूँ। हे महान् गुणवाले सर्वव्यापी देवेश ! आपको नमस्कार है ॥ १४-१८ ॥

भूमिस्त्वं जगतां नाथ जलाम्बरहुताशनः। वायुर्बुद्धिर्मनश्चापि शर्वरी त्वं नमोऽस्तु ते ॥ १९ ॥
धर्मो यज्ञस्तपः सत्यमहिंसा शौचमार्जवम्। क्षमा दानं दया लक्ष्मीर्ब्रह्मचर्यं त्वमीश्वर ॥ २० ॥
त्वं साङ्गाश्चतुरो वेदास्त्वं वेद्यो वेदपारगः। उपवेदा भवानीश सर्वोऽसि त्वं नमोऽस्तु ते ॥ २१ ॥
नमो नमस्तेऽच्युत चक्रपाणे नमोऽस्तु ते माधव मीनमूर्ते।
लोके भवान् कारुणिको मतो मे त्रायस्व मां केशव पापबन्धात् ॥ २२ ॥
ममाशुभं नाशय विग्रहस्थं यद् ब्रह्महत्याऽभिभवं बभूव।
दग्धोऽस्मि नष्टोऽस्म्यसमीक्ष्यकारी पुनीहि तीर्थोऽसि नमो नमस्ते ॥ २३ ॥

जगन्नाथ ! आप ही पृथ्वी, जल, आकाश, अग्नि, वायु, बुद्धि, मन एवं रात्रि हैं; आपको नमस्कार है। ईश्वर ! आप ही धर्म, यज्ञ, तप, सत्य, अहिंसा, पवित्रता, सरलता, क्षमा, दान, दया, लक्ष्मी एवं ब्रह्मचर्य हैं। हे ईश ! आप अङ्गोंसहित चारों वेद, वेद्य एवं वेदपारगामी हैं। आप ही उपवेद हैं तथा सभी कुछ

आप ही हैं; आपको नमस्कार है। अच्युत! चक्रपाणि! आपको बारंबार नमस्कार है। मीनमूर्तिधारी (मत्स्यावतारी) माधव! आपको नमस्कार है। मैं आपको लोकमें दयालु मानता हूँ। केशव! आप मेरे शरीरमें स्थित ब्रह्महत्यासे उत्पन्न अशुभको नष्ट कर मुझे पाप-बन्धनसे मुक्त करें। बिना विचार किये कार्य करनेवाला मैं दग्ध एवं नष्ट हो गया हूँ। आप साक्षात् तीर्थ हैं, अतः आप मुझे पवित्र करें। आपको बारंबार नमस्कार है ॥१९–२३॥

पुलस्त्य उवाच

इत्थं स्तुतश्चक्रधरः शंकरेण महात्मना । प्रोवाच भगवान् वाक्यं ब्रह्महत्याक्षयाय हि ॥ २४ ॥

पुलस्त्यजीने कहा—भगवान् शंकरद्वारा इस प्रकार स्तुत होनेपर चक्रधारी भगवान् विष्णु शंकरकी ब्रह्महत्याको नष्ट करनेके लिये उनसे वचन बोले—॥ २४ ॥

हरिरुवाच

महेश्वर शृणुष्वेमां मम वाचं कलस्वनाम् । ब्रह्महत्याक्षयकरीं शुभदां पुण्यवर्धनीम् ॥ २५ ॥
योऽसौ प्राङ्मण्डले पुण्ये मदंशप्रभवोऽव्ययः । प्रयागे वसते नित्यं योगशायीति विश्रुतः ॥ २६ ॥
चरणाद् दक्षिणात्तस्य विनिर्याता सरिद्वरा । विश्रुता वरणेत्येव सर्वपापहरा शुभा ॥ २७ ॥
सव्यादन्या द्वितीया च असिरित्येव विश्रुता । ते उभे तु सरिच्छ्रेष्ठे लोकपूज्ये बभूवतुः ॥ २८ ॥

भगवान् विष्णु बोले—महेश्वर! आप ब्रह्महत्याको नष्ट करनेवाली मेरी मधुर वाणी सुनें। यह शुभप्रद एवं पुण्यको बढ़ानेवाली है।

यहाँसे पूर्व प्रयागमें मेरे अंशसे उत्पन्न 'योगशायी' नामसे विख्यात देवता हैं। वे अव्यय—विकाररहित पुरुष हैं। वहाँ उनका नित्य निवास है। वहींसे उनके दक्षिण चरणसे 'वरणा' नामसे प्रसिद्ध श्रेष्ठ नदी निकली है। यह सब पापोंको हरनेवाली एवं पवित्र है। वहाँ उनके वाम पादसे 'असि' नामसे प्रसिद्ध एक दूसरी नदी भी निकली है। ये दोनों नदियाँ श्रेष्ठ एवं लोकपूज्य हैं ॥ २५–२८ ॥

ताभ्यां मध्ये तु यो देशस्तत्क्षेत्रं योगशायिनः । त्रैलोक्यप्रवरं तीर्थं सर्वपापप्रमोचनम् ।
न तादृशोऽस्ति गगने न भूम्यां न रसातले ॥ २९ ॥
तत्रास्ति नगरी पुण्या ख्याता वाराणसी शुभा । यस्यां हि भोगिनोऽपीश प्रयान्ति भवतो लयम् ॥ ३० ॥

विलासिनीनां रशनास्वनेन श्रुतिस्वनैर्ब्राह्मणपुंगवानाम् ।
शुचिस्वरत्वं गुरवो निशम्य हास्यादशास्यन्त मुहुर्मुहुस्तान् ॥ ३१ ॥
व्रजत्सु योषित्सु चतुष्पथेषु पदान्यलक्तारुणितानि दृष्ट्वा ।
ययौ शशी विस्मयमेव यस्यां किंस्वित् प्रयाता स्थलपद्मिनीयम् ॥ ३२ ॥
तुङ्गानि यस्यां सुरमन्दिराणि रुन्धन्ति चन्द्रं रजनीमुखेषु ।
दिवाऽपि सूर्यं पवनाप्लुताभिर्दीर्घाभिरेवं सुपताकिकाभिः ॥ ३३ ॥

उन दोनोंके मध्यका प्रदेश योगशायीका क्षेत्र है। वह तीनों लोकोंमें सर्वश्रेष्ठ तथा सभी पापोंसे छुड़ा देनेवाला तीर्थ है। उसके समान अन्य कोई तीर्थ आकाश, पृथ्वी एवं रसातलमें नहीं है। ईश! वहाँ पवित्र शुभप्रद विख्यात वाराणसी नगरी है, जिसमें भोगी लोग भी आपके लोकको प्राप्त करते हैं। श्रेष्ठ ब्राह्मणोंकी वेदध्वनि विलासिनी स्त्रियोंकी करधनीकी ध्वनिसे मिश्रित होकर मङ्गल स्वरका रूप धारण करती है। उस ध्वनिको सुनकर गुरुजन बारंबार उपहासपूर्वक उनका शासन करते हैं। जहाँ चौराहोंपर भ्रमण करनेवाली स्त्रियोंके अलक्त

([illegible]) में [illegible] वक्र भी हो जाता है और जहाँ रात्रिका आगमन होनेपर ऊँचे-ऊँचे देवमन्दिर चन्द्रमाका (मानो) अवरोध करते हैं एवं दिनमें पवनान्दोलित (हवासे लहराती हुई) दीर्घ पताकाओंसे सूर्य भी छिपे रहते हैं ॥ ३०-३३ ॥

भृङ्गाश्च यस्यां शशिकान्तभित्तौ प्रलोभ्यमानाः प्रतिबिम्बितेषु ।
आलेख्ययोषिद्विमलाननाब्जेष्वायान्ति मोहान्न च पुष्पकान्तरम् ॥ ३४ ॥
पराभवश्चापि पराजितेषु नरेषु संमोहनलेखनेन ।
यस्यां जलक्रीडनसंगतासु न स्त्रीषु शंभो गृहदीर्घिकासु ॥ ३५ ॥
न चैव कश्चित् परमन्दिराणि रुणद्धि शंभो सहसा ऋतेऽक्षान् ।
न चाबलानां तरसा पराक्रमं करोति यस्यां सुरतं हि मुक्त्वा ॥ ३६ ॥
पाशग्रन्थिर्गजेन्द्राणां दानच्छेदो मदच्युतः । यस्यां मानमदौ पुंसां करिणां यौवनागमे ॥ ३७ ॥

जिस (वाराणसी-) में चन्द्रकान्तमणिकी भित्तियोंपर प्रतिबिम्बित चित्रमें निर्मित स्त्रियोंके निर्मल मुख-कमलोंको देखकर भ्रमर उनपर भ्रमवश लुब्ध हो जाते हैं और दूसरे पुष्पोंकी ओर नहीं जाते; हे शम्भो! वहाँ सम्मोहनलेखनसे पराजित पुरुषोंमें तथा घरकी बावलियोंमें जलक्रीडाके लिये एकत्र हुई स्त्रियोंमें ही 'पराभव' देखा जाता है, अन्यत्र किसीका 'पराभव' (अपमान) नहीं होता; [illegible] (जुआके खेल-)के पासोंके सिवाय अन्य कोई भी दूसरेके 'पाश'-(बन्धन-)में नहीं डाला जाता तथा सुरत-समयके सिवाय स्त्रियोंके साथ कोई बलपूर्वक पराक्रम नहीं करता। जहाँ हाथियोंके बन्धनमें ही पाशग्रन्थि (रस्सीकी गाँठ) होती है, उनकी मदच्युतिमें (मदके चूनेमें) ही 'दानच्छेद' (मदकी धाराका टूटना) एवं नर हाथियोंके यौवनागममें ही 'मान' और 'मद' होते हैं, अन्यत्र नहीं; तात्पर्य यह कि दान देनेकी धारा निरन्तर चलती रहती है और अभिमानी एवं मदवाले लोग नहीं हैं ॥ ३४-३७ ॥

प्रियदोषाः सदा यस्यां कौशिका नेतरे जनाः । तारागणेऽकुलीनत्वं गद्ये वृत्तच्युतिर्विभो ॥ ३८ ॥
भूतिलुब्धा विलासिन्यो भुजंगपरिवारिताः । चन्द्रभूषितदेहाश्च यस्यां त्वमिव शंकर ॥ ३९ ॥
ईदृशायां सुरेशान वाराणस्यां महाश्रमे । वसते भगवाँल्लोलः सर्वपापहरो रविः ॥ ४० ॥
दशाश्वमेधं यत्प्रोक्तं मदंशो यत्र केशवः । तत्र गत्वा सुरश्रेष्ठ पापमोक्षमवाप्स्यसि ॥ ४१ ॥

विभो! जहाँ उल्लू ही सदा दोषा-(रात्रि-) प्रिय होते हैं, अन्य लोग दोषोंके प्रेमी नहीं हैं। तारागणोंमें ही अकुलीनता (पृथ्वीमें न छिपना) है, लोगोंमें कहीं अकुलीनताका नाम नहीं है; गद्यमें ही वृत्तच्युति (छन्दोभङ्ग) होती है, अन्यत्र वृत्त-(चरित्र-) च्युति नहीं दीखती। शंकर! वहाँकी विलासिनियाँ आपके सदृश (भस्म) 'भूतिलुब्धा' [illegible] 'भुजंग-(सर्प-) परिवारिता' एवं 'चन्द्रभूषितदेहा' होती हैं। (यहाँ पक्षान्तरमें—विलासिनियोंके पक्षमें—संगतिके लिये, 'भूति' पद 'भस्म' और 'धन' के अर्थमें, 'भुजङ्ग' पद 'सर्प' एवं 'जार' के अर्थमें तथा 'चन्द्र' पद 'चन्द्रहार'के अर्थमें प्रयुक्त है।) सुरेशान! इस प्रकारकी वाराणसीके महान् आश्रममें सभी पापोंको दूर करनेवाले भगवान् लोल नामके सूर्य निवास करते हैं। सुरश्रेष्ठ! वहीं दशाश्वमेध नामका स्थान है तथा वहीं मेरे अंशस्वरूप केशव स्थित हैं। वहाँ जाकर आप पापसे छुटकारा प्राप्त करेंगे ॥ ३८-४१ ॥

* [illegible] निषेध करके, [illegible]

इत्येवमुक्तो गरुडध्वजेन वृषध्वजस्तं शिरसा प्रणम्य।
जगाम वेगाद् गरुडो यथाऽसौ वाराणसीं पापविमोचनाय॥ ४२ ॥
गत्वा सुपुण्यां नगरीं सुतीर्थां दृष्ट्वा च लोलं सदशाश्वमेधम्।
स्नात्वा च तीर्थेषु विमुक्तपापः स केशवं द्रष्टुमुपाजगाम॥ ४३ ॥
केशवं शङ्करो दृष्ट्वा प्रणिपत्येदमब्रवीत्। त्वत्प्रसादाद् हृषीकेश ब्रह्महत्या क्षयं गता॥ ४४ ॥
नेदं कपालं देवेश मद्धस्तं परिमुञ्चति। कारणं वेद्मि न च तदेतन्मे वक्तुमर्हसि॥ ४५ ॥

भगवान् विष्णुके ऐसा कहनेपर शिवजीने उन्हें मस्तक झुकाकर प्रणाम किया । फिर वे गरुड़के समान तेज वेगसे वाराणसी गये । वहाँ परमपवित्र तथा तीर्थभूत नगरीमें जाकर दशाश्वमेध तथा 'लोल' नामसे स्थित भगवान् लोलार्कका[1] दर्शन किया तथा (वहाँके) तीर्थोंमें स्नान कर और पापमुक्त होकर वे (वरुणा-संगमपर) केशवका दर्शन करने गये । उन्होंने केशवका दर्शन करके प्रणामकर कहा—हृषीकेश ! आपके प्रसादसे ब्रह्महत्या तो नष्ट हो गयी, पर देवेश ! यह कपाल मेरे हाथको नहीं छोड़ रहा है । इसका कारण मैं नहीं जानता । आप ही मुझे यह बतला सकते हैं ॥ ४२-४५ ॥

पुलस्त्य उवाच

महादेववचः श्रुत्वा केशवो वाक्यमब्रवीत्। विद्यते कारणं रुद्र तत्सर्वं कथयामि ते॥ ४६ ॥
योऽसौ ममाग्रतो दिव्यो ह्रदः पद्मोत्पलैर्युतः। एष तीर्थवरः पुण्यो देवगन्धर्वपूजितः॥ ४७ ॥
एतस्मिन्प्रवरे तीर्थे स्नानं शंभो समाचर। स्नातमात्रस्य चाद्यैव कपालं परिमोक्ष्यति॥ ४८ ॥
ततः कपाली लोके च ख्यातो रुद्र भविष्यसि। कपालमोचनेत्येवं तीर्थं चेदं भविष्यति॥ ४९ ॥

पुलस्त्यजी बोले—महादेवका वचन सुनकर केशवने यह वचन कहा—रुद्र ! इसका समस्त कारण मैं तुम्हें बतलाता हूँ । मेरे सामने कमलोंसे भरा यह जो दिव्य सरोवर है, यह पवित्र तथा तीर्थोंमें श्रेष्ठ है एवं देवताओं तथा गन्धर्वोंसे पूजित है । शिवजी ! आप इस परम श्रेष्ठ तीर्थमें स्नान करें । स्नान करनेमात्रसे आज ही यह कपाल (आपके हाथको) छोड़ देगा । इससे रुद्र ! संसारमें आप 'कपाली' नामसे प्रसिद्ध होंगे । तथा यह तीर्थ भी 'कपालमोचन' नामसे प्रसिद्ध होगा ॥ ४६-४९ ॥

पुलस्त्य उवाच

एवमुक्तः सुरेशेन केशवेन महेश्वरः। कपालमोचने सस्नौ वेदोक्तविधिना मुने॥ ५० ॥
स्नातस्य तीर्थे त्रिपुरान्तकस्य परिच्युतं हस्ततलात् कपालम्।
नाम्ना बभूवाथ कपालमोचनं तत्तीर्थवर्यं भगवत्प्रसादात्॥ ५१ ॥

॥ इति श्रीवामनपुराणे तृतीयोऽध्यायः ॥ ३ ॥

पुलस्त्यजी बोले—मुने ! सुरेश्वर केशवके ऐसा कहनेपर महेश्वरने कपालमोचनतीर्थमें वेदोक्त विधिसे स्नान किया । उस तीर्थमें स्नान करते ही उनके हाथसे वह कपाल गिर गया । तभीसे भगवान्‌की कृपासे उस उत्तम तीर्थका नाम 'कपालमोचन'[2] पड़ा ॥ ५०-५१ ॥

॥ इस प्रकार श्रीवामनपुराणमें तीसरा अध्याय समाप्त हुआ ॥ ३ ॥

१-लोलार्कके सम्बन्धमें विशेष जानकारीके लिये देखिये मूलांकके १०८ में व ११०वें पृष्ठमें प्रकाशित विवरण ।
२-कपालमोचन तीर्थ काशीके पश्चिममें बकरियाकुण्डसे १ मीलपर स्थित है । इस सम्बन्धमें द्रष्टव्य तीर्थाङ्क पृ० ११२४ ।

[अथ चतुर्थोऽध्यायः]

पुलस्त्य उवाच

एवं कपाली संजातो देवर्षे भगवान्हरः। अनेन कारणेनासौ दक्षेण न निमन्त्रितः ॥ १ ॥
कपालिजायेति सतीं विज्ञायाथ प्रजापतिः। यज्ञे चार्हापि दुहिता दक्षेण न निमन्त्रिता ॥ २ ॥
एतस्मिन्नन्तरे देवीं द्रष्टुं गौतमनन्दिनी। जया जगाम शैलेन्द्रं मन्दरं चारुकन्दरम् ॥ ३ ॥
तामागतां सती दृष्ट्वा जयामेकामुवाच ह। किमर्थं विजया नागाज्जयन्ती चापराजिता ॥ ४ ॥

चौथा अध्याय प्रारम्भ

(विजयाकी मौसी सतीसे दक्ष-यज्ञकी वार्ता, सतीका प्राण-त्याग; शिवका क्रोध एवं उनके गणोंद्वारा दक्ष-यज्ञका विध्वंस)

पुलस्त्यजी बोले—देवर्षे! भगवान् शिव इस प्रकार कपाली नामसे ख्यात हुए और इसी कारण वे दक्षके द्वारा निमन्त्रित नहीं हुए। प्रजापति दक्षने सतीको अपनी पुत्री होनेपर भी कपालीकी पत्नी समझकर निमन्त्रणके योग्य न मानकर उन्हें यज्ञमें नहीं बुलाया। इसी बीच देवीका दर्शन करनेके लिये गौतम-पुत्री जया सुन्दर गुफावाले पर्वतश्रेष्ठ मन्दरपर गयी। जयाको वहाँ अकेली आयी देखकर सती बोलीं—विजये! जयन्ती और अपराजिता यहाँ क्यों नहीं आयीं? ॥ १–४ ॥

सा देव्या वचनं श्रुत्वा उवाच परमेश्वरीम्। गता निमन्त्रिताः सर्वा मखे मातामहस्य ताः ॥ ५ ॥
समं पित्रा गौतमेन मात्रा चैवाप्यहल्यया। अहं समागता द्रष्टुं त्वां तत्र गमनोत्सुका ॥ ६ ॥
किं त्वं न व्रजसे तत्र तथा देवो महेश्वरः। नामन्त्रितासि तातेन उताहोस्विद् व्रजिष्यसि ॥ ७ ॥
गतास्तु ऋषयः सर्वे ऋषिपत्न्यः सुरास्तथा। मातृष्वसः शशाङ्कश्च सपत्नीको गतः क्रतुम् ॥ ८ ॥
चतुर्दशेषु लोकेषु जन्तवो ये चराचराः। निमन्त्रिताः क्रतौ सर्वे किं नासि त्वं निमन्त्रिता ॥ ९ ॥

देवीके वचनको सुनकर विजयाने उन सती परमेश्वरीसे कहा—अपने पिता गौतम और माता अहल्याके साथ वे मातामहके सत्र-(यज्ञ-)में निमन्त्रित होकर चली गयी हैं। वहाँ जानेके लिये उत्सुक मैं आपसे मिलने आयी हूँ। क्या आप तथा भगवान् शिव वहाँ नहीं जा रहे हैं? क्या पिताजीने आपको नहीं बुलाया है? अथवा आप वहाँ जायेंगी? सभी ऋषि, ऋषि-पत्नियाँ तथा देवगण वहाँ गये हैं। हे मातृष्वसः (मौसी)! पत्नीके सहित शशाङ्क भी उस यज्ञमें गये हैं। चौदहों लोकोंके समस्त चराचर प्राणी उस यज्ञमें निमन्त्रित हुए हैं। क्या आप निमन्त्रित नहीं हैं? ॥ ५–९ ॥

पुलस्त्य उवाच

जयायास्तद्वचः श्रुत्वा वज्रपातसमं सती। मन्युनाऽभिप्लुता ब्रह्मन् पञ्चत्वमगमत् ततः ॥ १० ॥
जया मृतां सतीं दृष्ट्वा क्रोधशोकपरिप्लुता। मुञ्चन्ती वारि नेत्राभ्यां सस्वरं विललाप ह ॥ ११ ॥
आक्रन्दितध्वनिं श्रुत्वा शूलपाणिस्त्रिलोचनः। आः किमेतदितीत्युक्त्वा जयाभ्याशमुपागतः ॥ १२ ॥
आगतो ददृशे देवीं लतामिव वनस्पतेः। कृत्तां परशुना भूमौ श्लथाङ्गीं पतितां सतीम् ॥ १३ ॥
देवीं निपतितां दृष्ट्वा जयां पप्रच्छ शंकरः। किमियं पतिता भूमौ निकृत्तेव लता सती ॥ १४ ॥
सा शंकरवचः श्रुत्वा जया वचनमब्रवीत्। श्रुत्वा मखस्थां दक्षस्य भगिन्यः पतिभिः सह ॥ १५ ॥
आदित्याद्याँस्त्रिलोकेश गतं शक्रादिभिः सुरैः। मातृष्वसा विपन्नेयमन्तर्दुःखेन दह्यती ॥ १६ ॥

पुलस्त्यजी बोले—ब्रह्मन्! (नारदजी!) वज्रपातके समान जयाकी उस बातको सुनकर क्रोध एवं दुःखसे भरकर सतीने प्राण छोड़ दिये। सतीको मरी हुई देखकर क्रोध एवं दुःखसे भरी जया आँसू बहाते हुए जोर-जोरसे विलाप

करने लगी। रोनेकी करुणध्वनि सुनकर शूलपाणि भगवान् शिव 'अरे क्या हुआ, क्या हुआ'—ऐसा कहकर उसके पास गये। वहाँ पहुँचकर उन्होंने फरसेसे कटी वृक्षपर चढ़ी लताकी तरह सतीको भूमिपर मरी पड़ी देखा तो जयासे पूछा—ये सती कटी लताकी तरह भूमिपर क्यों पड़ी हुई हैं? शिवके वचनको सुनकर जया बोली—हे त्रिलोकेश्वर! दक्षके यज्ञमें अपने-अपने पतिके साथ बहनोंका एवं इन्द्र आदि देवोंके साथ आदित्योंका निमन्त्रित होकर उपस्थित होना सुनकर आन्तरिक दुःख (की ज्वाला)में दग्ध हो गयी। इससे मेरी मौसी बहन (सती)के प्राण निकल गये॥ १०—१६॥

पुलस्त्य उवाच

एतच्छ्रुत्वा वचो रौद्रं रुद्रः क्रोधाप्लुतो बभौ। क्रुद्धस्य सर्वगात्रेभ्यो निश्चेरुः सहसार्चिषः॥१७॥
ततः क्रोधात् त्रिनेत्रस्य गात्ररोमोद्भवा मुने। गणाः सिंहमुखा जाता वीरभद्रपुरोगमाः॥१८॥
गणैः परिवृतस्तस्मान्मन्दराद्धिमसाह्वयम्। गतः कनखलं तस्माद् यत्र दक्षोऽयजत् क्रतुम्॥१९॥
ततो गणानामधिपो वीरभद्रो महाबलः। दिशि प्रतीच्युत्तरायां तस्थौ शूलधरो मुने॥२०॥

पुलस्त्यजीने कहा—जयाके इस भयंकर (अमङ्गल) वचनको सुनकर शिवजी अत्यन्त क्रुद्ध हो गये। उनके शरीरसे सहसा अग्निकी तेज ज्वालाएँ निकलने लगीं। मुने! इसके बाद क्रोधके कारण त्रिनेत्र भगवान् शिवके शरीरके रोमोंसे सिंहके समान मुखवाले वीरभद्र आदि बहुत-से रुद्रगण उत्पन्न हो गये। अपने गणोंसे घिरे भगवान् शिव मंदर पर्वतसे हिमालयपर गये और वहाँसे कनखल चले गये, जहाँ दक्ष यज्ञ कर रहे थे। इसके बाद सभी गणोंमें अग्रणी महाबली वीरभद्र शूल धारण किये पश्चिमोत्तर (वायव्य) दिशामें चले गये॥ १७—२०॥

जया क्रोधाद् गदां गृह्य पूर्वदक्षिणतः स्थिता। मध्ये त्रिशूलधृक् शर्वस्तस्थौ क्रोधान्महामुने॥२१॥
मृगारिवदनं दृष्ट्वा देवाः शक्रपुरोगमाः। ऋषयो यक्षगन्धर्वाः किमिदं त्वित्यचिन्तयन्॥२२॥
ततस्तु धनुरादाय शरांश्चाशीविषोपमान्। द्वारपालस्तदा धर्मो वीरभद्रमुपाद्रवत्॥२३॥
तमापतन्तं सहसा धर्मं दृष्ट्वा गणेश्वरः। करेणैकेन जग्राह त्रिशूलं वह्निसन्निभम्॥२४॥
कार्मुकं च द्वितीयेन तृतीयेनाथ मार्गणान्। चतुर्थेन गदां गृह्य धर्ममभ्यद्रवद् गणः॥२५॥

महामुने! क्रोधसे गदा लेकर जया पूर्व-दक्षिण दिशा (अग्निकोण)में खड़ी हो गयी और मध्यमें क्रोधसे भरे त्रिशूल लिये शंकर खड़े हो गये। सिंहवदन-(वीरभद्र-)को देखकर इन्द्र आदि देवता, ऋषि, यक्ष एवं गन्धर्वगण सोचने लगे कि यह क्या है! तदनन्तर द्वारपाल धर्म धनुष एवं सर्पके समान बाणोंको लेकर वीरभद्रकी ओर दौड़े। सहसा धर्मको आता हुआ देखकर गणेश्वर एक हाथमें अग्निके सदृश त्रिशूल, दूसरे हाथमें धनुष, तीसरे हाथमें बाण और चौथे हाथमें गदा लेकर उनकी ओर दौड़ पड़े॥ २१—२५॥

ततश्चतुर्भुजं दृष्ट्वा धर्मराजो गणेश्वरम्। तस्थावष्टभुजो भूत्वा नानायुधधरोऽव्ययः॥२६॥
खड्गचर्मगदाप्रासपरश्वधवराङ्कुशैः। चापमार्गणभृत्तस्थौ हन्तुकामो गणेश्वरम्॥२७॥
गणेश्वरोऽपि संक्रुद्धो हन्तुं धर्मं सनातनम्। ववर्ष मार्गणांस्तीक्ष्णान् यथा प्रावृषि तोयदः॥२८॥
तावन्योन्यं महात्मानौ शरचापधरौ मुने। रुधिरारुणसिक्ताङ्गौ किंशुकाविव रेजतुः॥२९॥

इसके बाद धर्मराजने चतुर्भुज गणेश्वरको देख और नानाप्रकारके अस्त्र-शस्त्रोंसे सज्जित हो तथा आठ भुजाओंको धारणकर उनका सामना किया और गणोंके स्वामी वीरभद्रपर प्रहार करनेकी इच्छासे वे अपने हाथोंमें ढाल, तलवार, गदा, भाला, फरसा, अङ्कुश, धनुष एवं बाण लेकर खड़े हो गये। गणेश्वर वीरभद्र भी अत्यन्त क्रुद्ध होकर

... जैसे वर्षाकालके मेघ, सदृश उनके ऊपर भीषण बाणोंकी वर्षा करने लगे। मुने! खूनसे लिपटे शरीरवाले (अथवा लाल शरीरवाले) वे दोनों महात्मा पलाश-पुष्पके समान दीखने लगे ॥ २६–२९ ॥

ततो वरास्त्रैर्गणनायकेन जितः स धर्मः तरसा प्रसह्य।
पराङ्मुखोऽभूद्विमना मुनीन्द्र स वीरभद्रः प्रविवेश यज्ञम् ॥ ३० ॥

यज्ञवाटं प्रविष्टं तं वीरभद्रं गणेश्वरम्। दृष्ट्वा तु सहसा देवा उत्तस्थुः सायुधा मुने ॥ ३१ ॥
वसवोऽष्टौ महाभागा ग्रहा नव सुदारुणाः। इन्द्राद्या द्वादशादित्या रुद्रास्त्वेकादशैव हि ॥ ३२ ॥
विश्वेदेवाश्च साध्याश्च सिद्धगन्धर्वपन्नगाः। यक्षाः किंपुरुषाश्चैव खगाश्चक्रधरास्तथा ॥ ३३ ॥
राजा वैवस्वताद् वंशाद् धर्मकीर्तिस्तु विश्रुतः। सोमवंशोद्भवश्चोग्रो भोजकीर्तिर्महाभुजः ॥ ३४ ॥
दितिजा दानवाश्चान्ये येऽन्ये तत्र समागताः। ते सर्वेऽभ्यद्रवन् रौद्रं वीरभद्रमुदायुधाः ॥ ३५ ॥

मुनिराज! इसके बाद श्रेष्ठ शस्त्रोंके कारण वीरभद्रसे पराजित होकर यमराज खिन्न होकर पीछे हट गये। इधर वीरभद्र यज्ञशालामें घुस गये। मुने! गणेश्वर वीरभद्रको यज्ञमण्डपमें घुसते देखकर सहसा सभी देवता अस्त्र-शस्त्र लेकर उठ खड़े हुए। महाभाग आठों वसु, अत्यन्त दारुण नवों ग्रह, इन्द्र आदि दिक्पाल, द्वादश आदित्य, एकादश रुद्र, विश्वेदेव, साध्यगण, सिद्ध, गन्धर्व, पन्नग, यक्ष, किंपुरुष, विहंगम, चक्रधर, वैवस्वत-वंशीय प्रसिद्ध राजा धर्मकीर्ति, चन्द्रवंशीय महाबाहु, उग्र बलशाली राजा भोजकीर्ति, दैत्य-दानव तथा वहाँ आये हुए अन्य सभी लोग आयुध लेकर रौद्र वीरभद्रकी ओर दौड़ पड़े ॥ ३०–३५ ॥

तानापतत एवाशु चापबाणधरो गणः। अभिदुद्राव वेगेन सर्वानेव शरोत्करैः ॥ ३६ ॥
ते शस्त्रवर्षमतुलं गणेशाय समुत्सृजन्। गणेशोऽपि वरास्त्रैस्तान् प्रचिच्छेद बिभेद च ॥ ३७ ॥
शरैः शस्त्रैश्च सततं वध्यमाना महात्मना। वीरभद्रेण देवाद्या अवहारमकुर्वत ॥ ३८ ॥
ततो विवेश गणपो यज्ञमध्यं सुविस्तृतम्। जुह्वाना ऋषयो यत्र हवींषि प्रवितन्वते ॥ ३९ ॥

धनुष-बाण धारण किये गणोंने उन देवताओंके आते ही उनपर वेगपूर्वक शस्त्रोंद्वारा आक्रमण कर दिया। इधर देवताओंने भी वीरभद्रके ऊपर अतुलनीय बाणोंकी वर्षा की। गणनायक वीरभद्रने देवताओंके अस्त्रोंको छिन्न-भिन्न कर डाला। महात्मा वीरभद्रद्वारा विविध बाणों और अस्त्रोंसे आहत होकर देवता आदि रणभूमिसे भाग चले। अब गणपति वीरभद्र सुविस्तृत यज्ञके मध्यमें प्रविष्ट हुए, जहाँ मुनिगण यज्ञकुण्डमें हविकी आहुति दे रहे थे ॥ ३६–३९ ॥

ततो महर्षयो दृष्ट्वा मृगेन्द्रवदनं गणम्। भीता होत्रं परित्यज्य जग्मुः शरणमच्युतम् ॥ ४० ॥
तानार्तांश्चक्रभृद् दृष्ट्वा महर्षींस्त्रस्तमानसान्। न भेतव्यमितीत्युक्त्वा समुत्तस्थौ वरायुधः ॥ ४१ ॥
समानम्य ततः शार्ङ्गं शरानग्निशिखोपमान्। मुमोच वीरभद्राय कायावरणदारणान् ॥ ४२ ॥
ते तस्य कायमासाद्य अमोघा वै हरेः शराः। निपेतुर्भुवि भग्नाशा नास्तिकादिव याचकाः ॥ ४३ ॥

तब वे महर्षि सिंहमुख वीरभद्रको देखकर भयसे हवन छोड़कर विष्णुकी शरणमें चले गये। चक्रधारी विष्णु भयभीत महर्षियोंको दुःखी देखकर 'डरो मत' ऐसा कहकर अपने श्रेष्ठ अस्त्र लेकर खड़े हो गये और अपने शार्ङ्ग धनुषको चढ़ाकर वीरभद्रके ऊपर शरीरको विदीर्ण करनेवाले अग्निशिखाके तुल्य बाणोंकी वर्षा करने लगे। पर श्रीहरिके वे अमोघ (सफल) बाण वीरभद्रके शरीरपर पहुँचकर भी पृथ्वीपर ऐसे (यों ही व्यर्थ होकर) गिर पड़े, जैसे कि याचक नास्तिकके पाससे विफल—निराश होकर लौट जाता है ॥ ४०–४३ ॥

शरांस्त्वमोघान्मोघत्वमापन्नान्वीक्ष्य केशवः। दिव्यैरस्त्रैर्वीरभद्रं प्रच्छादयितुमुद्यतः ॥ ४४ ॥
तानस्त्रान्वासुदेवेन प्रक्षिप्तान्गणनायकः। वारयामास शूलेन गदया मार्गणैस्तथा ॥ ४५ ॥
दृष्ट्वा विफलान्यस्त्राणि गदां चिक्षेप माधवः। त्रिशूलेन समाहत्य पातयामास भूतले ॥ ४६ ॥
मुसलं वीरभद्राय प्रचिक्षेप हलायुधः। लाङ्गलं च गणेशोऽपि गदया प्रत्यवारयत् ॥ ४७ ॥
मुसलं सगदं दृष्ट्वा लाङ्गलं च निवारितम्। वीरभद्राय चिक्षेप चक्रं क्रोधात् खगध्वजः ॥ ४८ ॥

तदनन्तर (अपने) बाणोंको व्यर्थ होते देखकर भगवान् विष्णु पुनः वीरभद्रको दिव्य अस्त्रोंसे ढकनेके लिये तैयार हो गये। वासुदेवद्वारा प्रयुक्त उन अस्त्रोंको गणश्रेष्ठ वीरभद्रने शूल, गदा और बाणोंसे रोककर निरस्त कर दिया। भगवान् विष्णुने अपने अस्त्रोंको व्यर्थ होते देखकर उनपर गदासे प्रहार किया। किंतु वीरभद्रने उसे भी अपने त्रिशूलसे मारकर पृथ्वीपर गिरा दिया। हलायुधने वीरभद्रपर मूसल और हल फेंका जिसे वीरभद्रने गदासे निवारित कर दिया। गदाके सहित मूसल और हलको नष्ट हुआ देखकर गरुडध्वज विष्णुने क्रोधसे वीरभद्रके ऊपर सुदर्शनचक्र चला दिया ॥ ४४–४८ ॥

तमापतन्तं शतसूर्यकल्पं सुदर्शनं वीक्ष्य गणेश्वरस्तु।
शूलं परित्यज्य जगार चक्रं यथा मधुं मीनवपुः सुरेन्द्र ॥ ४९ ॥
चक्रे निगीर्णे गणनायकेन क्रोधातिरक्तोऽसितचारुनेत्रः।
मुरारिरभ्येत्य गणाधिपेन्द्रमुत्क्षिप्य वेगाद् भुवि निष्पिपेष ॥ ५० ॥
हरिबाहूरुवेगेन विनिष्पिष्टस्य भूतले। सहितं रुधिरोद्गारैर्मुखाच्चक्रं विनिर्गतम् ॥ ५१ ॥
ततो निःसृतमालोक्य चक्रं कैटभनाशनः। समादाय हृषीकेशो वीरभद्रं मुमोच ह ॥ ५२ ॥

तदनन्तर वीरभद्रने सैकड़ों सूर्योंके सदृश सुदर्शन चक्रको अपनी ओर आते देखकर तो शूलको छोड़कर चक्रको उसी प्रकार निगल लिया जैसे मीनशरीरधारी विष्णु मधुदैत्यको निगल गये थे। वीरभद्रद्वारा चक्रके निगल लिये जानेपर विष्णुके सुन्दर लाल नेत्र क्रोधसे लाल हो गये। वे उसके निकट पहुँच गये और उसे वेगसे उठा लिया तथा पृथ्वीपर पटककर उसे पीसने लगे। भगवान् विष्णुकी भुजाओं और जाँघोंके प्रबल वेगसे भूतलमें पड़े हुए वीरभद्रके मुखसे रुधिरके फौवारेके साथ चक्र बाहर निकल आया। चक्रको मुखसे निकला देखकर भगवान् विष्णुने उसे ले लिया और वीरभद्रको छोड़ दिया ॥ ४९–५२ ॥

हृषीकेशेन मुक्तस्तु वीरभद्रो जटाधरम्। गत्वा निवेदयामास वासुदेवपराक्रमम् ॥ ५३ ॥
ततो जटाधरो दृष्ट्वा गणेशं शोणिताप्लुतम्। निःश्वसन्तं यथा नागं क्रोधं चक्रे तदाव्ययः ॥ ५४ ॥
ततः क्रोधाभिभूतेन वीरभद्रोऽथ शम्भुना। पूर्वोद्दिष्टे तदा स्थाने सायुधस्तु निवेशितः ॥ ५५ ॥
वीरभद्रमथादिश्य भद्रकालीं च शंकरः। विवेश क्रोधताम्राक्षो यज्ञवाटं त्रिशूलभृत् ॥ ५६ ॥
ततस्तु देवप्रवरे जटाधरे त्रिशूलपाणौ त्रिपुरान्तकारिणि।
दक्षस्य यज्ञं विशति क्षयंकरे जातो ऋषीणां प्रवरो हि साध्वसः ॥ ५७ ॥

॥ इति श्रीवामनपुराणे चतुर्थोऽध्यायः ॥ ४ ॥

भगवान् विष्णुद्वारा छोड़ दिये गये वीरभद्रने जटाधारी शिवके निकट जाकर वासुदेवके दुर्धर्ष पराक्रमका वर्णन किया। फिर वीरभद्रको खूनसे लथपथ तथा नागके सदृश निःश्वास लेते (हाँफते) देखकर अव्यय जटाधर (शंकर)ने क्रोध किया। इसके बाद क्रोधसे तिलमिलाये शंकरने अस्त्र-सज्जित वीरभद्रको पहले बताये स्थानपर बैठा दिया। वे त्रिशूलधर

शंकर वीरभद्र तथा भद्रकालीको आदेश देकर क्रोधसे लाल आँखें किये यज्ञमण्डपमें प्रविष्ट हुए। त्रिपुर नामक राक्षसको मारनेवाले उन त्रिशूलधारी त्रिपुरारि देवश्रेष्ठ जटाधरके दक्ष-यज्ञमें प्रवेश करते ही ऋषियोंमें भारी भय उत्पन्न हो गया ॥ ५३-५७ ॥

॥ इस प्रकार श्रीवामनपुराणमें चौथा अध्याय समाप्त हुआ ॥ ४ ॥

[अथ पञ्चमोऽध्यायः]

पुलस्त्य उवाच

जटाधरं हरिर्दृष्ट्वा क्रोधादारक्तलोचनम्। तस्मात् स्थानादपाक्रम्य कुब्जाम्रेऽन्तर्हितः स्थितः ॥ १ ॥
वसवोऽष्टौ हरं दृष्ट्वा सुस्रुवुर्वेगतो मुने। सा तु जाता सरिच्छ्रेष्ठा सीता नाम सरस्वती ॥ २ ॥
एकादश तथा रुद्रास्त्रिनेत्रा वृषकेतनाः। कान्दिशीका लयं जग्मुः समभ्येत्यैव शंकरम् ॥ ३ ॥
विश्वेऽश्विनौ च साध्याश्च मरुतोऽनलभास्कराः। समासाद्य पुरोडाशं भक्षयन्तो महामुने ॥ ४ ॥

पाँचवाँ अध्याय प्रारम्भ

(दक्ष-यज्ञका विध्वंस, देवताओंका प्रताड़न, शंकरके कालरूप और राश्यादि रूपोंमें स्वरूप-कथन)

पुलस्त्यजी बोले—जटाधारी भगवान् शिवको क्रोधसे आँखें लाल किये देखकर भगवान् विष्णु उस स्थानसे हटकर कुब्जाम्र (ऋषिकेश-) में छिप गये। मुने! क्रुद्ध शिवको देखकर आठ वसु तेजीसे पिघलने लगे। इस कारण वहाँ सीता नामकी श्रेष्ठ नदी प्रवाहित हुई। वहाँ पूजाके लिये स्थित त्रिनेत्रधारी ग्यारहों रुद्र भयके मारे इधर-उधर भागते हुए शंकरके निकट जाकर उनमें ही लीन हो गये। महामुनि नारद! शंकरको निकट आते देख विश्वेदेवगण, अश्विनीकुमार, साध्यवृन्द, वायु, अग्नि एवं सूर्य पुरोडाश खाते हुए भाग गये ॥ १—४ ॥

चन्द्रः सममृक्षगणैर्निशां समुपदर्शयन्। उत्पत्याथ गगनं स्वमधिष्ठानमास्थितः ॥ ५ ॥
कश्यपाद्याश्च ऋषयो जपन्तः शतरुद्रियम्। पुष्पाञ्जलिपुटा भूत्वा प्रणताः संस्थिता मुने ॥ ६ ॥
असकृद् दक्षदयिता दृष्ट्वा रुद्रं बलाधिकम्। शक्रादीनां सुरेशानां कृपणं विललाप ह ॥ ७ ॥
ततः क्रोधाभिभूतेन शंकरेण महात्मना। तलप्रहारैरमरा बहवो विनिपातिताः ॥ ८ ॥

फिर तो ताराओंके साथ चन्द्रमा रात्रिको प्रकाशित करते हुए आकाशमें ऊपर जाकर अपने स्थानपर स्थित हो गये। इधर कश्यप आदि ऋषि शतरुद्रिय (मन्त्र-) का जप करते हुए अञ्जलिमें पुष्प लेकर विनीतभावसे खड़े हो गये। इन्द्रादि सभी देवताओंसे अधिक बली रुद्रको देखकर दक्ष-पत्नी अत्यन्त दीन होकर बार-बार करुण विलाप करने लगी। इधर क्रुद्ध भगवान् शंकरने थप्पड़ोंके प्रहारसे अनेक देवताओंको मार गिराया ॥ ५—८ ॥

पादप्रहारैरपरे त्रिशूलेनापरे मुने। दृष्ट्यग्निना तथैवान्ये देवाद्याः प्रलयीकृताः ॥ ९ ॥
ततः पूषा हरं वीक्ष्य विनिघ्नन्तं सुरासुरान्। क्रोधाद् बाहू प्रसार्याथ प्रदुद्राव महेश्वरम् ॥१०॥
तमापतन्तं भगवान् संनिरीक्ष्य त्रिलोचनः। बाहुभ्यां प्रतिजग्राह करेणैकेन शंकरः ॥११॥
कराभ्यां प्रगृहीतस्य शंभुनांशुमतोऽपि हि। कराङ्गुलिभ्यो निश्चेरुरसृग्धाराः समन्ततः ॥१२॥

मुने! शंकरने कुछ अन्य देवताओंको पैरोंके प्रहारसे, कुछको त्रिशूलसे और कुछको अपने तृतीय नेत्रकी अग्निद्वारा नष्ट कर दिया। इसके बाद देव एवं असुरोंका संहार करते हुए शंकरको देखकर पूषादेवता (अत्यन्त

सूर्य) क्रोधपूर्वक दोनों बाहोंको फैलाकर शिवजीकी ओर दौड़े। त्रिलोचन शिवने उन्हें अपनी ओर आते देख एक ही हाथसे उनकी दोनों भुजाओंको पकड़ लिया। शिवद्वारा सूर्यकी पकड़ी गयी दोनों भुजाओंकी अङ्गुलियोंसे चारों ओर रक्तकी धारा प्रवाहित होने लगी॥ ९–१२॥

ततो वेगेन महता अंशुमन्तं दिवाकरम्। भ्रामयामास सततं सिंहो मृगशिशुं यथा॥ १३॥
भ्रामितस्यातिवेगेन नारदांशुमतोऽपि हि। भुजौ ह्रस्वत्वमापन्नौ त्रुटितस्नायुबन्धनौ॥ १४॥
रुधिराप्लुतसर्वाङ्गमंशुमन्तं महेश्वरः। संनिरीक्ष्योत्ससर्जैनमन्यतोऽभिजगाम ह॥ १५॥
ततस्तु पूषा विहसन् दशनानि विदर्शयन्। प्रोवाचैह्येहि कापालिन् पुनः पुनरथेश्वरम्॥ १६॥

फिर भगवान् शिव दिवाकर सूर्यदेवको अत्यन्त वेगसे ऐसे घुमाने लगे जैसे सिंह हिरन-शावकको घुमाता (दौड़ाता) है। नारदजी! अत्यन्त वेगसे घुमाये गये सूर्यकी भुजाओंके स्नायुबन्ध टूट गये और वे (स्नायुएँ) बहुत छोटी—नष्टप्राय हो गयीं। सूर्यके सभी अङ्गोंको रक्तसे लथपथ देखकर उन्हें छोड़कर शंकरजी दूसरी ओर चले गये। उसी समय हँसते एवं दाँत दिखाते हुए पूषा देवता (बारह आदित्योंमेंसे एक सूर्य) कहने लगे—ओ कपालिन्! आओ, इधर आओ।॥ १३–१६॥

ततः क्रोधाभिभूतेन पूष्णो वेगेन शंभुना। मुष्टिनाहत्य दशनाः पातिता धरणीतले॥ १७॥
भग्नदन्तस्तथा पूषा शोणिताभिप्लुताननः। पपात भुवि निःसंज्ञो वज्राहत इवाचलः॥ १८॥
भगोऽभिवीक्ष्य पूषाणं पतितं रुधिरोक्षितम्। नेत्राभ्यां घोररूपाभ्यां वृषध्वजमवैक्षत॥ १९॥
त्रिपुरघ्नस्ततः क्रुद्धस्तलेनाहत्य चक्षुषी। निपातयामास भुवि क्षोभयन्सर्वदेवताः॥ २०॥

इसपर क्रुद्ध रुद्रने वेगपूर्वक मुक्केसे मारकर पूषाके दाँतोंको धरतीपर गिरा दिया। इस प्रकार दाँत टूटने एवं रक्तसे लथपथ होकर पूषा देवता वज्रसे नष्ट हुए पर्वतके समान बेहोश होकर पृथ्वीपर गिर पड़े। इस प्रकार गिरे हुए पूषाको रुधिरसे लथपथ देखकर भग देवता (तृतीय सूर्यभेद) भयंकर नेत्रोंसे शिवजीको देखने लगे। इससे क्रुद्ध त्रिपुरान्तक शिवने सभी देवताओंको क्षुब्ध करते हुए हथेलीसे पीटकर भगकी दोनों आँखें पृथ्वीपर गिरा दीं॥ १७–२०॥

ततो दिवाकराः सर्वे पुरस्कृत्य शतक्रतुम्। मरुद्भिश्च हुताशैश्च भयाज्जग्मुर्दिशो दश॥ २१॥
प्रतियातेषु देवेषु प्रह्लादाद्या दितीश्वराः। नमस्कृत्य ततः सर्वे तस्थुः प्राञ्जलयो मुने॥ २२॥
ततस्तं यज्ञवाटं तु शंकरो घोरचक्षुषा। ददर्श दग्धुं कोपेन सर्वांश्चैव सुरासुरान्॥ २३॥
ततो निलिल्यिरे वीराः प्रणेमुर्दुद्रुवुस्तथा। भयादन्ये हरं दृष्ट्वा गता वैवस्वतक्षयम्॥ २४॥

फिर क्या था! सभी दसों सूर्य इन्द्रको आगे कर मरुद्गणों तथा अग्नियोंके साथ भयसे दसों दिशाओंमें भाग गये। मुने! देवताओंके चले जानेपर प्रह्लाद आदि दैत्य महेश्वरको प्रणामकर अञ्जलि बाँधकर खड़े हो गये। इसके बाद शंकर उस यज्ञमण्डपको तथा सभी देवासुरोंको दग्ध करनेके लिये क्रोधपूर्ण घोर दृष्टिसे देखने लगे। इधर दूसरे वीर महादेवको देखकर भयसे जहाँ-तहाँ छिप गये। कुछ लोग प्रणाम करने लगे, कुछ भाग गये और कुछ तो भयसे ही सीधे यमपुरी पहुँच गये॥ २१–२४॥

त्रयोऽप्यग्नित्रिभिर्नेत्रैर्दुःसहं समवैक्षत। दृष्टमात्रास्त्रिनेत्रेण भस्मीभूताभवन् क्षणात्॥ २५॥
अग्नौ प्रणष्टे यज्ञोऽपि भूत्वा दिव्यवपुर्मृगः। दुद्राव विक्लवगतिर्दक्षिणासहितोऽम्बरे॥ २६॥

ततोऽनुगम्याथ मृगं धावमानस्य वेगवान् । शरं पाशुपतं कृत्वा कालरूपी महेश्वरः ॥२७॥
अर्धेन यज्ञवाटान्ते जटाधर इति श्रुतः । अर्धेन गगने शर्वः कालरूपी च कथ्यते ॥२८॥

फिर भगवान् शिवने अपने तीनों नेत्रोंसे तीनों अग्नियों-(आहवनीय, गार्हपत्य और दक्षिणाग्नि-) को देखा । उनके देखने ही वे अग्नियाँ क्षणभरमें नष्ट हो गयीं । उनके नष्ट होनेपर यज्ञ भी मृगका शरीर धारण कर आकाशमें दक्षिणाके साथ नक्षत्ररूपसे भाग गया । कालरूपी वेगवान् भगवान् शिव धनुषको झुकाकर उसपर पाशुपत बाण संधानकर उस मृगके पीछे दौड़े और आधे रूपसे तो यज्ञशालामें स्थित हुए, जिनका नाम 'जटाधर' पड़ा । तथा आधे दूसरे रूपसे वे आकाशमें स्थित होकर 'काल' कहलाये ॥ २५-२८ ॥

नारद उवाच

कालरूपी त्वयाख्यातः शंभुर्गगनगोचरः । लक्षणं च स्वरूपं च सर्वं व्याख्यातुमर्हसि ॥२९॥

नारदजी बोले -(मुने !) आपने आकाशमें स्थित शिवको कालरूपी कहा है । आप उनके सम्पूर्ण स्वरूप और लक्षणोंकी भी व्याख्या कर दें ॥ २९ ॥

पुलस्त्य उवाच

स्वरूपं त्रिपुरघ्नस्य वदिष्ये कालरूपिणः । येनाम्बरं मुनिश्रेष्ठ व्याप्तं लोकहितेप्सुना ॥ ३० ॥
यत्राश्विनी च भरणी कृत्तिकायास्तथांशकः । मेषो राशिः कुजक्षेत्रं तच्छिरः कालरूपिणः ॥ ३१ ॥
आग्नेयांशास्त्रयो ब्रह्मन् प्राजापत्यं कवेर्गृहम् । सौम्यार्द्धं वृषनामेदं वदनं परिकीर्तितम् ॥ ३२ ॥
मृगार्धमार्द्रादित्यांशास्त्रयः सौम्यगृहं त्विदम् । मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिनः ॥ ३३ ॥

पुलस्त्यजीने कहा—मुनिवर ! मैं त्रिपुरको मारनेवाले कालरूपी उन शंकरके स्वरूपको (वास्तविक रूपको) बतलाता हूँ । उन्होंने लोकोंकी भलाईकी इच्छासे ही आकाशको व्याप्त किया है । सम्पूर्ण अश्विनी तथा भरणी नक्षत्र एवं कृत्तिकाके एक चरणसे युक्त भौमका क्षेत्र मेष राशि ही कालरूपी महादेवका सिर कही गयी है । ब्रह्मन् ! इसी प्रकार कृत्तिकाके तीन चरण, सम्पूर्ण रोहिणी नक्षत्र एवं मृगशिराके दो चरण, यह शुक्रकी वृष राशि ही उनका मुख है । मृगशिराके शेष दो चरण, सम्पूर्ण आर्द्रा और पुनर्वसुके तीन चरण बुधकी (प्रथम) निवासस्थान मिथुन राशि आकाशमें स्थित शिवकी दोनों भुजाएँ हैं ॥ ३०-३३ ॥

आदित्यांशश्च पुष्यं च आश्लेषा शशिनो गृहम् । राशिः कर्कटको नाम पार्श्वे मखविनाशिनः ॥ ३४ ॥
पित्र्यर्क्षं भगदैवत्यमुत्तरांशश्च केसरी । सूर्यक्षेत्रं विभोर्ब्रह्मन् हृदयं परिगीयते ॥ ३५ ॥
उत्तरांशास्त्रयः पाणिश्चित्रार्धं कन्यका त्विदम् । सोमपुत्रस्य सद्मैतद् द्वितीयं जठरं विभोः ॥ ३६ ॥
चित्रांशद्वितयं स्वातिर्विशाखायांशकत्रयम् । द्वितीयं शुक्रसदनं तुला नाभिरुदाहृता ॥ ३७ ॥

इसी प्रकार पुनर्वसुका अन्तिम चरण, सम्पूर्ण पुष्य और अश्लेषा नक्षत्रोंवाला चन्द्रमाका क्षेत्र कर्क राशि यज्ञविनाशक शंकरके दोनों पार्श्व कहे गये हैं । ब्रह्मन् ! सम्पूर्ण मघा, सम्पूर्ण पूर्वाफाल्गुनी और उत्तराफाल्गुनीका प्रथम चरण, सूर्यकी सिंह राशि शंकरका हृदय कही जाती है । उत्तराफाल्गुनीके तीन चरण, सम्पूर्ण हस्त एवं चित्राके दो पहले चरण, बुधकी द्वितीय राशि, कन्या राशि शंकरका उदर है । चित्राके शेष दो चरण, सम्पूर्ण स्वाती एवं विशाखाके तीन चरणोंसे युक्त शुक्रका दूसरा क्षेत्र तुला राशि महादेवकी नाभि है ॥ ३४-३७ ॥

विशाखांशमनूराधा ज्येष्ठा भौमगृहं त्विदम्। द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः॥ ३८॥
मूलं पूर्वोत्तरांशश्च देवाचार्यगृहं धनुः। ऊरुयुग्ममीशस्य अमरर्षे प्रगीयते॥ ३९॥
उत्तरांशास्त्रयो ऋक्षं श्रवणं मकरो मुने। धनिष्ठार्धं शनिक्षेत्रं जानुनी परमेष्ठिनः॥ ४०॥
धनिष्ठार्धं शतभिषा प्रौष्ठपद्यांशकत्रयम्। सौरेः सद्मापरमिदं कुम्भो जङ्घे च विश्रुते॥ ४१॥

विशाखाका एक चरण, सम्पूर्ण अनुराधा और ज्येष्ठा नक्षत्र, मङ्गलका द्वितीय क्षेत्र वृश्चिक राशि कालरूपी महादेवका उपस्थ है। सम्पूर्ण मूल, पूरा पूर्वाषाढ़ और उत्तराषाढ़की प्रथमचरणवाली धनु राशि जो बृहस्पतिका क्षेत्र है, महेश्वरके दोनों ऊरु हैं। मुने! उत्तराषाढ़के शेष तीन चरण, सम्पूर्ण श्रवण नक्षत्र और धनिष्ठाके दो पूर्व चरणोंकी मकर राशि शनिका क्षेत्र और परमेष्ठी महेश्वरके दोनों घुटने हैं। धनिष्ठाके दो चरण, सम्पूर्ण शतभिष और पूर्वभाद्रपदके तीन चरणवाली कुम्भ राशि शनिका द्वितीय गृह और शिवकी दो जङ्घाएँ हैं॥ ३८-४१॥

प्रौष्ठपद्यांशमेकं तु उत्तरा रेवती तथा। द्वितीयं जीवसदनं मीनस्तु चरणावुभौ॥ ४२॥
एवं कृत्वा कालरूपं त्रिनेत्रो यज्ञं क्रोधान्मार्गणैराजघान।
विद्धश्चासौ वेदनाबुद्धिमुक्तः खे संतस्थौ तारकाभिश्चिताङ्गः॥ ४३॥

पूर्वभाद्रपदके शेष एक चरण, सम्पूर्ण उत्तरभाद्रपद और सम्पूर्ण रेवती नक्षत्रोंवाला बृहस्पतिका द्वितीय क्षेत्र एवं मीन राशि उनके दो चरण हैं। इस प्रकार कालरूप धारणकर शिवने क्रोधपूर्वक हरिणरूपधारी यज्ञको बाणोंसे मारा। उसके बाद बाणोंसे विद्ध होकर, किंतु वेदनाकी अनुभूति न करता हुआ, वह यज्ञ ताराओंसे घिरे शरीरवाला होकर आकाशमें स्थित हो गया॥ ४२-४३॥

नारद उवाच

राशयो गदिता ब्रह्मंस्त्वया द्वादश वै मम। तेषां विशेषतो ब्रूहि लक्षणानि स्वरूपतः॥ ४४॥

नारदजीने कहा—ब्रह्मन्! आपने मुझसे बारहों राशियोंका वर्णन किया। अब विशेष रूपसे उनके स्वरूपके अनुसार लक्षणोंको बतलायें॥ ४४॥

पुलस्त्य उवाच

स्वरूपं तव वक्ष्यामि राशीनां शृणु नारद। यादृशा यत्र संचारा यस्मिन् स्थाने वसन्ति च॥ ४५॥
मेषः समानमूर्तिश्च अजाविकधनादिषु। संचारस्थानमेवास्य धान्यरत्नाकरादिषु॥ ४६॥
नवशाद्वलसंछन्नवसुधायां च सर्वशः। नित्यं चरति फुल्लेषु सरसां पुलिनेषु च॥ ४७॥
वृषः सदृशरूपो हि चरते गोकुलादिषु। तस्याधिवासभूमिस्तु कृषीवलधराश्रयः॥ ४८॥

पुलस्त्यजी बोले—नारदजी! आपको मैं राशियोंका स्वरूप बतलाता हूँ; सुनिये। वे जैसी हैं तथा जहाँ संचार और निवास करती हैं वह सभी वर्णित करता हूँ। मेष राशि भेड़के समान आकारवाली है। बकरी, भेड़, धन-धान्य एवं रत्नाकरादि इसके संचार-स्थान हैं तथा नवदूर्वासे आच्छादित समस्त पृथ्वी एवं पुष्पित वनस्पतियोंसे युक्त सरोवरोंके पुलिनोंमें यह नित्य संचरण करता है। वृषभके समान स्वरूपवाली वृषराशि गोकुलादिमें विचरण करती है तथा कृषकोंकी भूमि इसका निवासस्थान है॥ ४५-४८॥

स्त्रीपुंसयोः समं रूपं शय्यासनपरिग्रहः। वीणावाद्यधृङ् मिथुनं गीतनर्तकशिल्पिषु॥ ४९॥
स्थितः क्रीडारतिर्नित्यं विहारावनिरस्य तु। मिथुनं नाम विख्यातं राशिर्द्वैधात्मकः स्थितः॥ ५०॥

कर्कटः कुलीरेण समः सलिलस्थः प्रकीर्तितः। केदारवापीपुलिने विविक्तावनिरेव च ॥ ५१ ॥
सिंहस्तु पर्वतारण्यदुर्गकन्दरभूमिषु। वसते व्याधपल्लीषु गह्वरेषु गुहासु च ॥ ५२ ॥

मिथुन राशि एक स्त्री और एक पुरुषके साथ-साथ रहनेके समान रूपवाली है। यह शय्या और आसनोंपर स्थित है। पुरुष-स्त्रीके हाथोंमें वीणा एवं (अन्य) वाद्य हैं। इस राशिका संचरण गानेवालों, नाचनेवालों एवं शिल्पियोंमें होता है। इस द्विस्वभाव राशिको मिथुन कहते हैं। इस राशिका निवास क्रीडास्थल एवं विहार-भूमियोंमें होता है। कर्क राशि केकड़ेके रूपके समान रूपवाली है एवं जलमें रहनेवाली है। जलसे पूर्ण क्यारी एवं नदी-तीर अथवा बालुका एवं एकान्त भूमि इसके रहनेके स्थान हैं। सिंह राशिका निवास वन, पर्वत, दुर्गमस्थान, कन्दरा, व्याधोंके स्थान, गुफा आदि होता है ॥ ४९-५२ ॥

व्रीहिप्रदीपिकाकरा नावारूढा च कन्यका। चरते स्त्रीरतिस्थाने वसते नड्वलेषु च ॥ ५३ ॥
तुलापाणिश्च पुरुषो वीथ्यापणविचारकः। नगराध्वानशालासु वसते तत्र नारद ॥ ५४ ॥
श्वभ्रवल्मीकसंचारी वृश्चिको वृश्चिकाकृतिः। विषगोमयकीटादिपाषाणादिषु संस्थितः ॥ ५५ ॥
धनुस्तुरङ्गजघनो दीप्यमानो धनुर्धरः। वाजिशूरास्त्रविद्वीरः स्थायी गजरथादिषु ॥ ५६ ॥

कन्या राशि अन्न एवं दीपक हाथमें लिये हुए है तथा नौकापर आरूढ़ है। यह स्त्रियोंके रतिस्थान और सरपत, कण्डा आदिमें विचरण करती है। नारद! तुला राशि हाथमें तुला लिये हुए पुरुषके रूपमें गलियों और बाजारोंमें विचरण करती है तथा नगरों, मार्गों एवं भवनोंमें निवास करती है। वृश्चिक राशिका आकार बिच्छू-जैसा है। यह गड्ढे एवं वल्मीक आदिमें विचरण करती है। यह विष, गोबर, कीट एवं पत्थर आदिमें भी निवास करती है। धनु राशिकी जंघा घोड़ेके समान है। यह ज्योतिःस्वरूप एवं धनुष लिये है। यह घुड़सवारी, वीरताके कार्य एवं अस्त्र-शस्त्रोंका ज्ञाता तथा शूर है। गज एवं रथ आदिमें इसका निवास होता है ॥ ५३-५६ ॥

मृगास्यो मकरो ब्रह्मन् वृषस्कन्धेक्षणाङ्गजः। मकरोऽसौ नदीचारी वसते च महोदधौ ॥ ५७ ॥
रिक्तकुम्भश्च पुरुषः स्कन्धधारी जलाप्लुतः। द्यूतशालाचरः कुम्भः स्थायी शौण्डिकसद्मसु ॥ ५८ ॥
मीनद्वयमथासक्तं मीनस्तीर्थाब्धिसंचरः। वसते पुण्यदेशेषु देवब्राह्मणसद्मसु ॥ ५९ ॥
लक्षणा गदितास्तुभ्यं मेषादीनां महामुने। न कस्यचित् त्वयाख्येयं गुह्यमेतत्पुरातनम् ॥ ६० ॥
एतन् मया ते कथितं सुरर्षे यथा त्रिनेत्रः प्रममाथ यज्ञम्।
पुण्यं पुराणं परमं पवित्रमाख्यानवान्पापहरं शिवं च ॥ ६१ ॥

॥ इति श्रीवामनपुराणे पञ्चमोऽध्यायः ॥ ५ ॥

ब्रह्मन्! मकर राशिका मुख मृगके मुख-सदृश एवं कंधे वृषके कन्धोंके तुल्य तथा नेत्र हाथीके नेत्रके समान है। यह राशि नदीमें विचरण करती तथा समुद्रमें विश्राम करती है। कुम्भ राशि रिक्त घड़ेको कंधेपर लिये जलसे भीगे पुरुषके समान है। इसका संचार-स्थान द्यूतगृह एवं सुरालय (मद्यशाला) है। मीन राशि दो संयुक्त मछलियोंके आकारवाली है। यह तीर्थस्थान एवं समुद्र-तटमें संचरण करती है। इसका निवास पवित्र देशों, देवालयों एवं ब्राह्मणोंके घरोंमें होता है। महामुने! मैंने आपको मेषादि राशियोंका लक्षण बतलाया। आप इस प्राचीन रहस्यको किसी अन्यसे न बतलाइयेगा। देवर्षे! भगवान् शिवने जिस प्रकार यज्ञको प्रमथित किया, उसका मैंने आपसे वर्णन कर दिया। इस प्रकार मैंने आपसे श्रेष्ठतम, परम पवित्र, पापहारी एवं कल्याण-कारक परम पुराण पुण्य आख्यानका वर्णन किया ॥ ५७-६१ ॥

॥ इस प्रकार श्रीवामनपुराणमें पाँचवाँ अध्याय समाप्त हुआ ॥ ५ ॥

[अथ षष्ठोऽध्यायः]

पुलस्त्य उवाच

हृद्यो ब्रह्मणो योऽसौ धर्मो दिव्यवपुर्मुने । दाक्षायणी तस्य भार्या तस्यामजनयत्सुतान् ॥ १ ॥
हरिं कृष्णं च देवर्षे नारायणनरौ तथा । योगाभ्यासरतौ नित्यं हरिकृष्णौ बभूवतुः ॥ २ ॥
नरनारायणौ चैव जगतो हितकाम्यया । तप्येतां च तपः सौम्यौ पुराणावृषिसत्तमौ ॥ ३ ॥
प्रालेयाद्रिं समागम्य तीर्थे बदरिकाश्रमे । गृणन्तौ तत्परं ब्रह्म गङ्गाया विपुले तटे ॥ ४ ॥

छठा अध्याय प्रारम्भ

(नर-नारायणकी उत्पत्ति, तपश्चर्या, बदरिकाश्रमकी वसन्ती शोभा, काम-दाह और कामको अनङ्गताका वर्णन)

पुलस्त्यजी बोले—मुने ! ब्रह्माजीके हृदयसे जो दिव्यदेहधारी धर्म प्रकट हुआ था, उसने दक्षकी पुत्री 'मूर्ति' नामकी भार्यासे हरि, कृष्ण, नर और नारायण नामक चार पुत्रोंको उत्पन्न किया[1] । देवर्षे ! इनमें हरि और कृष्ण ये दो तो नित्य योगाभ्यासमें निरत हो गये और पुरातन ऋषि शान्तात्मा नर तथा नारायण संसारके कल्याणके लिये हिमालय पर्वतपर जाकर बदरिकाश्रम तीर्थमें गङ्गाके निर्मल तटपर (परब्रह्मका नाम ॐकारका जप करते हुए) तप करने लगे ॥ १–४ ॥

[illegible] च जगदेतच्चराचरम् । तापितं तपसा ब्रह्मञ्छक्रः क्षोभं तदा ययौ ॥ ५ ॥
संक्षुब्धस्तपसा ताभ्यां क्षोभणाय शतक्रतुः । रम्भाद्याप्सरसः श्रेष्ठाः प्रेषयत्स महाश्रमम् ॥ ६ ॥
कन्दर्पश्च सुदुर्धर्षश्चूताङ्कुरमहायुधः । समं सहचरेणैव वसन्तेनाश्रमं गतः ॥ ७ ॥
ततो माधवकन्दर्पौ ताश्चैवाप्सरसो वराः । बदर्याश्रममागम्य विचिक्रीडुर्यथेच्छया ॥ ८ ॥

ब्रह्मन् ! नर-नारायणकी दुष्कर तपस्यासे सारा स्थावर-जङ्गमात्मक यह जगत् तपित हो गया । इससे इन्द्र विक्षुब्ध हो उठे । उन दोनोंकी तपस्यासे अत्यन्त व्यग्र इन्द्रने उन्हें मोहित करनेके लिये रम्भा आदि श्रेष्ठ अप्सराओंको उनके विशाल आश्रममें भेजा । कामदेवके आयुधोंमें अशोक, आम्रादिकी मंजरियाँ विशेष प्रभावक हैं । इन्हें तथा अपने सहयोगी वसन्त ऋतुको साथ लेकर वह भी उस आश्रममें गया । अब वे वसन्त, कामदेव तथा श्रेष्ठ अप्सराएँ—ये सब बदरिकाश्रममें जाकर निर्बाध क्रीड़ा करने लग गये ॥ ५–८ ॥

ततो वसन्ते संप्राप्ते किंशुका ज्वलनप्रभाः । निष्पत्राः सततं रेजुः शोभयन्तो धरातलम् ॥ ९ ॥
शिशिरं नाम मातङ्गं विदार्य नखरैरिव । वसन्तकेसरी प्राप्तः पलाशकुसुमैर्मुने ॥ १० ॥
मया तुषारौघकरी निर्जितः स्वेन तेजसा । तमेव हसतेत्युच्चैः वसन्तः कुन्दकुड्मलैः ॥ ११ ॥
वनानि कर्णिकाराणां पुष्पितानि विरेजिरे । यथा नरेन्द्रपुत्राणि कनकाभरणानि हि ॥ १२ ॥

तब वसन्त ऋतुके आ जानेपर अग्नि-शिखाके सदृश कान्तिवाले पलाश पत्रहीन होकर सर्वदा पृथ्वीकी शोभा बढ़ाते हुए सुशोभित होने लगे । मुने ! वसन्तरूपी सिंह मानो पलाश-कुसुमरूपी नखोंसे शिशिररूपी गजराजको विदीर्ण कर वहाँ अपना साम्राज्य जमा चुका था । वह सोचने लगा—मैंने अपने तेजसे तुषार-समूह-रूपी हाथीको जीत लिया है और वह कुन्दकी कलियोंके बहाने उसका उपहास भी करने लगा है । इधर सुवर्णके अलंकारोंसे मण्डित राजकुमारोंके समान पुष्पित कचनार-अमलतासके वन सुशोभित होने लगे ॥ ९–१२ ॥

1–यह कथा भागवत २ । ७ । ६ आदिमें विशेष स्पष्टरूपसे कही गयी है । किन्तु वहाँ भी देखें ।

तेषामनु तथा नीपाः किङ्करा इव रेजिरे। स्वामिसंलब्धसंमाना भृत्या राजसुतानिव ॥ १३॥
रक्ताशोकवना भान्ति पुष्पिताः सहसोज्ज्वलाः। भृत्या वसन्तनृपतेः संग्रामे सृक्क्षुता इव ॥ १४॥
मृगवृन्दाः पिञ्जरिता राजन्ते गहने वने। पुलकाभिर्वृता यद्वत् सज्जनाः सुहृदागमे ॥ १५॥
मञ्जरीभिर्विराजन्ते नदीकूलेषु वेतसाः। वक्तुकामा इवाङ्गुल्या कोऽस्माकं सदृशो नगः ॥ १६॥

जैसे राजपुत्रोंके पीछे उनके द्वारा सम्मानित सेवक खड़े रहते हैं, वैसे ही उन (चम्पक-वनों)के पीछे-पीछे कदम्ब-वृक्ष सुशोभित हो रहे थे। इसी प्रकार लाल अशोक आदिके समूह भी सहसा पुष्पित एवं उद्भासित हो सुशोभित होने लगे। (ऐसा लगता था) मानो ऋतुराज वसन्तके अनुयायी युद्धमें रक्तसे लथपथ हो रहे हों। घने वनमें पीले रंगके हरिण इस प्रकार सुशोभित हो रहे थे जिस प्रकार सुहृद्के आनेसे सज्जन (आनन्दसे) पुलकित होकर सुशोभित होते हैं। नदीके तटोंपर अपनी मंजरियोंके द्वारा बेतस ऐसे सुशोभित हो रहे थे मानो वे अंगुलियोंके द्वारा यह कहना चाहते हैं कि हमारे सदृश अन्य कौन वृक्ष है ॥ १३-१६ ॥

रक्ताशोककरा तन्वी देवर्षे किंशुकाङ्घ्रिका। नीलाशोककचा श्यामा विकासिकमलानना ॥ १७ ॥
नीलेन्दीवरनेत्रा च ब्रह्मन् बिल्वफलस्तनी। प्रफुल्लकुन्ददशना मञ्जरीकरशोभिता ॥ १८ ॥
बन्धुजीवाधरा शुभ्रा सिन्दुवारनखाद्भुता। पुंस्कोकिलस्वना दिव्या अङ्कोलवसना शुभा ॥ १९ ॥
बर्हिवृन्दकलापा च सारसस्वरनूपुरा। प्राग्वंशरशना ब्रह्मन् मत्तहंसगतिस्तथा ॥ २० ॥
पुत्रजीवांशुका भृङ्गरोमराजिविराजिता। वसन्तलक्ष्मीः सम्प्राप्ता ब्रह्मन् बदरिकाश्रमे ॥ २१ ॥
ततो नारायणो दृष्ट्वा आश्रमस्यानवद्यताम्। समीक्ष्य च दिशः सर्वास्ततोऽनङ्गमपश्यत ॥ २२ ॥

देवर्षे! जो दिव्य पतली एवं यौवनसे भरी वसन्त-लक्ष्मी उस बदरिकाश्रममें प्रकट हुई थी, उसके मानो रक्ताशोक ही हाथ, पलाश ही चरण, नीलाशोक केशपाश, विकसित कमल ही मुख और नीलकमल ही नेत्र थे। उसके बिल्वफल मानो स्तन, कुन्दपुष्प दन्त, मञ्जरी हाथ, दुपहरियाफूल अधर, सिन्दुवार नख, नर कोकिलका स्वर वाणी। मोरोंके पंख वस्त्र, मयूरसमूह आभूषण, सारस नूपुरध्वनि और आश्रमके किनारे करधनी थे। उसके मत्त हंस गति, पुत्रजीव पुष्प वस्त्र और भ्रमर मानो रोमपंक्तिरूपमें विराजित थे। तब नारायणने आश्रमकी अद्भुत मनोहरता देखकर सभी दिशाओंकी ओर देखा और फिर कामदेवको भी देखा ॥ १७—२२ ॥

नारद उवाच

कोऽसावनङ्गो ब्रह्मर्षे तस्मिन् बदरिकाश्रमे। यं ददर्श जगन्नाथो देवो नारायणोऽव्ययः ॥ २३ ॥

नारदजीने पूछा—ब्रह्मर्षे! जिसे भगवान् अव्यय नारायणने बदरिकाश्रममें देखा था, वह अनङ्ग (काम) कौन है? ॥ २३ ॥

पुलस्त्य उवाच

कन्दर्पो हर्षतनयो योऽसौ कामो निगद्यते। स शंकरेण संदग्धो ह्यनङ्गत्वमुपागतः ॥ २४ ॥

पुलस्त्यजीने कहा—यह कन्दर्प हर्षका पुत्र है, इसे ही काम कहा जाता है। शंकर (की नेत्राग्नि-) द्वारा भस्म होकर यह अनङ्ग हो गया ॥ २४ ॥

नारद उवाच

किमर्थं कामदेवोऽसौ देवदेवेन शंभुना। दग्धस्तु कारणे कस्मिन्नेतद्व्याख्यातुमर्हसि ॥ २५ ॥

नारदजीने पूछा—पुलस्त्यजी! अब यह बतलायें कि देवाधिदेव शंकरने कामदेवको किस कारणसे भस्म किया? ॥ २५ ॥

पुलस्त्य उवाच

यदा दक्षसुता प्रह्वन् सती याता यमक्षयम्। विनाश्य दक्षयज्ञं तं विचचार त्रिलोचनः ॥ २६ ॥
ततो वृषध्वजं दृष्ट्वा कन्दर्पः कुसुमायुधः। अपत्नीकं तदाऽस्त्रेण उन्मादेनाभ्यताडयत् ॥ २७ ॥
ततो हरः शरेणाथ उन्मादेनाशु ताडितः। विचचार ततोन्मत्तः काननानि सरांसि च ॥ २८ ॥
स्मरन् सतीं महादेवस्तथोन्मादेन ताडितः। न शर्म लेभे देवर्षे बाणविद्ध इव द्विपः ॥ २९ ॥

पुलस्त्यजीने कहा—प्रह्वन्! दक्ष-पुत्री सतीके प्राणत्याग करनेपर शिवजी दक्ष-यज्ञका ध्वंस कर (जहाँ-तहाँ) विचरण करने लगे। तब शिवजीको स्त्रीरहित देखकर पुष्पायुध कामदेवने उनपर अपना 'उन्मादन'-नामक अस्त्र छोड़ा। [redacted] उन्मादन-बाणसे आहत होकर शिवजी उन्मत्त होकर वनों और सरोवरोंमें घूमने लगे। देवर्षे! बाणविद्ध गजके समान उन्मादसे व्यथित महादेव सतीका स्मरण करते हुए बड़े अशान्त हो रहे थे—उन्हें चैन नहीं था ॥ २६-२९ ॥

ततः पपात देवेशः कालिन्दीसरितं मुने। निमग्ने शंकरे आपो दग्धाः कृष्णत्वमागताः ॥ ३० ॥
तदाप्रभृति कालिन्द्या भृङ्गाञ्जननिभं जलम्। आस्यन्दत् पुण्यतीर्था सा केशपाशमिवावनेः ॥ ३१ ॥
ततो नदीषु पुण्यासु सरस्सु च नदेषु च। पुलिनेषु च रम्येषु वापीषु नलिनीषु च ॥ ३२ ॥
पर्वतेषु च रम्येषु काननेषु च सानुषु। विचरन् स्वेच्छया नैव शर्म लेभे महेश्वरः ॥ ३३ ॥

मुने! उसके बाद शिवजी यमुना नदीमें कूद पड़े। उनके जलमें निमज्जन करनेसे उस नदीका जल काला हो गया। उस समयसे कालिन्दी नदीका जल भृङ्ग और अञ्जनके सदृश कृष्णवर्णका हो गया एवं वह पवित्र तीर्थोंवाली नदी पृथ्वीके केशपाशके सदृश प्रवाहित होने लगी। उसके बाद पवित्र नदियों, सरोवरों, नदों, रमणीय नदी-तटों, वापियों, कमलवनों, पर्वतों, मनोहर काननों तथा पर्वत-शृङ्गोंपर स्वेच्छापूर्वक विचरण करते हुए भगवान् शिव कहीं भी शान्ति नहीं प्राप्त कर सके ॥ ३०-३३ ॥

क्षणं गायति देवर्षे क्षणं रोदिति शंकरः। क्षणं ध्यायति तन्वङ्गीं दक्षकन्यां मनोरमाम् ॥ ३४ ॥
ध्यात्वा क्षणं प्रस्वपिति क्षणं स्वप्नायते हरः। स्वप्ने तथेदं गदति तां दृष्ट्वा दक्षकन्यकाम् ॥ ३५ ॥
निर्घृणे तिष्ठ किं मूढे त्यजसे मामनिन्दिते। मुग्धे त्वया विरहितो दग्धोऽस्मि मदनाग्निना ॥ ३६ ॥
सति सत्यं प्रकुपिता मा कोपं कुरु सुन्दरि। पादप्रणामावनतमभिभाषितुमर्हसि ॥ ३७ ॥

देवर्षे! वे कभी गाने, कभी रोने और कभी कृशाङ्गी सुन्दरी सतीका ध्यान करने लगते। ध्यान करके कभी सोने और कभी स्वप्न देखने लगते थे। स्वप्नावस्थामें सतीको देखकर वे इस प्रकार कहते थे—निर्दये! ठहरो, हे मूढे! मुझे क्यों छोड़ रही हो? हे अनिन्दिते! हे मुग्धे! तुम्हारे विरहमें मैं कामाग्निसे दग्ध हो रहा हूँ। हे सति! क्या तुम वस्तुतः क्रुद्ध हो? सुन्दरि! क्रोध मत करो। मैं तुम्हारे चरणोंमें अवनत होकर प्रणाम करता हूँ। तुम्हें मेरे साथ बात तो करनी ही चाहिये ॥ ३४-३७ ॥

श्रूयसे दृश्यसे नित्यं स्पृश्यसे वन्द्यसे प्रिये। आलिङ्ग्यसे च सततं किमर्थं नाभिभाषसे ॥ ३८ ॥
विलपन्तं जनं दृष्ट्वा कृपा कस्य [redacted] जायते। विशेषेण पतिं बाले ननु त्वमतिनिर्घृणा ॥ ३९ ॥
त्वयोक्तानि वचांस्येवं पूर्वं मम कृशोदरि। विना त्वया न जीवेयं तदसत्यं त्वया कृतम् ॥ ४० ॥
एह्येहि कामसंतप्तं परिष्वज सुलोचने। नान्यथा नश्यते तापः सत्येनापि शपे प्रिये ॥ ४१ ॥

शिवजी भागने लगे । उसके बाद कामदेवके द्वारा पीछा किये जानेपर महादेवजी घोर दारुवनमें चले गये, जहाँ ऋषिगण अपनी पत्नियोंके साथ निवास करते थे ॥ ५५–५८ ॥

ते चापि ऋषयः सर्वे दृष्ट्वा मूर्ध्ना नताभवन् । ततस्तान् प्राह भगवान् भिक्षा मे प्रतिदीयताम् ॥ ५९ ॥
ततस्ते मौनिनस्तस्थुः सर्व एव महर्षयः । तदाश्रमाणि सर्वाणि परिचक्राम नारद ॥ ६० ॥
तं प्रविष्टं तदा दृष्ट्वा भार्गवात्रेययोषितः । प्रक्षोभमगमन् सर्वा हीनसत्त्वाः समन्ततः ॥ ६१ ॥
ऋते त्वरुन्धतीमेकामनसूयां च भामिनीम् । एताभ्यां भर्तृपूजासु तच्चिन्तासु स्थितं मनः ॥ ६२ ॥

उन ऋषियोंने भी उन्हें देखकर सिर झुकाकर प्रणाम किया । फिर भगवान्ने उनसे कहा—आपलोग मुझे भिक्षा दीजिये । इसपर सभी महर्षि मौन रह गये । नारदजी ! इसपर महादेवजी सभी आश्रमोंमें घूमने लगे । उस समय उन्हें आश्रममें आया हुआ देख पतिव्रता अरुन्धती और अनुसूयाको छोड़कर ऋषियोंकी समस्त पत्नियाँ प्रक्षुब्ध एवं सत्त्वहीन हो गयीं । पर अरुन्धती और अनुसूया पतिसेवामें ही लगी रहीं ॥ ५९–६२ ॥

ततः संक्षुभिताः सर्वा यत्र याति महेश्वरः । तत्र प्रयान्ति कामार्त्ता मदविह्वलितेन्द्रियाः ॥ ६३ ॥
त्यक्त्वाश्रमाणि शून्यानि स्वानि ता मुनियोषितः । अनुजग्मुर्यथा मत्तं करिण्य इव कुञ्जरम् ॥ ६४ ॥
ततस्तु ऋषयो दृष्ट्वा भार्गवाङ्गिरसो मुने । क्रोधान्विताब्रुवन्सर्वे लिङ्गोऽस्य पततां भुवि ॥ ६५ ॥
ततः पपात देवस्य लिङ्गं पृथ्वीं विदारयन् । अन्तर्धानं जगामाथ त्रिशूली नीललोहितः ॥ ६६ ॥

अब शिवजी जहाँ-जहाँ जाते थे, वहाँ-वहाँ संक्षुभित, कामार्त एवं मदसे विकल इन्द्रियोंवाली स्त्रियाँ भी जाने लगीं । मुनियोंकी वे स्त्रियाँ अपने आश्रमोंको सूना छोड़ उनका इस प्रकार अनुसरण करने लगीं, जैसे करेणु मदमत्त गजका अनुसरण करे । मुने ! यह देखकर ऋषिगण क्रुद्ध हो गये एवं कहा कि इनका लिङ्ग भूमिपर गिर जाय । फिर तो महादेवका लिङ्ग पृथ्वीको विदीर्ण करता हुआ गिर गया एवं तब नीललोहित त्रिशूली अन्तर्धान हो गये ॥ ६३–६६ ॥

ततः स पतितो लिङ्गो विभिद्य वसुधातलम् । रसातलं विवेशाशु ब्रह्माण्डं चोर्ध्वतोऽभिनत् ॥ ६७ ॥
ततश्चचाल पृथिवी गिरयः सरितो नगाः । पातालभुवनाः सर्वे जङ्गमाजङ्गमैर्वृताः ॥ ६८ ॥
संक्षुब्धान् भुवनान् दृष्ट्वा भूर्लोकादीन् पितामहः । जगाम माधवं द्रष्टुं क्षीरोदं नाम सागरम् ॥ ६९ ॥
तत्र दृष्ट्वा हृषीकेशं प्रणिपत्य च भक्तितः । उवाच देव भुवनाः किमर्थं क्षुभिता विभो ॥ ७० ॥

वह पृथ्वीपर गिरा लिंग उसका भेदन कर तुरंत रसातलमें प्रविष्ट हो गया एवं ऊपरकी ओर भी उसने विश्व-ब्रह्माण्डका भेदन कर दिया । इसके बाद पृथ्वी, पर्वत, नदियाँ, पादप तथा चराचरसे पूर्ण समस्त पाताललोक काँप उठे । पितामह ब्रह्मा भूर्लोक आदि भुवनोंको संक्षुब्ध देखकर श्रीविष्णुसे मिलने क्षीरसागर पहुँचे । वहाँ उन्हें देख भक्तिपूर्वक प्रणाम कर ब्रह्माने कहा—देव ! समस्त भुवन विक्षुब्ध कैसे हो गये हैं ? ॥ ६७–७० ॥

अथोवाच हरिर्ब्रह्मन् शार्वो लिङ्गो महर्षिभिः । पातितस्तस्य भारार्त्ता संचचाल वसुंधरा ॥ ७१ ॥
ततस्तदद्भुततमं श्रुत्वा देवः पितामहः । तत्र गच्छाम देवेश एवमाह पुनः पुनः ॥ ७२ ॥
ततः पितामहो देवः केशवश्च जगत्पतिः । आजग्मतुस्तमुद्देशं यत्र लिङ्गं भवस्य तत् ॥ ७३ ॥
ततोऽनन्तं हरिर्लिङ्गं दृष्ट्वारुह्य खगेश्वरम् । पातालं प्रविवेशाथ विस्मयान्तरितो विभुः ॥ ७४ ॥

इसपर श्रीहरिने कहा—ब्रह्मन् ! महर्षियोंने शिवके लिङ्गको गिरा दिया है । उसके भारसे कष्टमें पड़ी हुई पृथ्वी विचलित हो रही है । इसके बाद ब्रह्माजी इस अद्भुत बातको सुनकर देवेश ! हमलोग वहाँ चलें—

ऐसा बार-बार कहने लगे। फिर ब्रह्मा और जगत्पति विष्णु वहाँ पहुँचे, जहाँ शंकरका लिङ्ग गिरा था। वहाँ उस अनन्त लिङ्गको देखकर आश्चर्यचकित होकर हरि गरुड़पर सवार हो उसका पता लगानेके लिये पातालमें प्रविष्ट हुए॥ ७१-७४॥

ब्रह्मा पद्मविमानेन ऊर्ध्वमाक्रम्य सर्वतः। नैवान्तमलभद् ब्रह्मन् विस्मितः पुनरागतः॥ ७५॥
विष्णुर्गत्वाऽथ पातालान् सप्त लोकपरायणः। चक्रपाणिर्विनिष्क्रान्तो लेभेऽन्तं न महामुने॥ ७६॥
विष्णुः पितामहश्चोभौ हरलिङ्गं समेत्य हि। कृताञ्जलिपुटौ भूत्वा स्तोतुं देवं प्रचक्रतुः॥ ७७॥

नारदजी! ब्रह्माजी अपने पद्मयानके द्वारा सम्पूर्ण ऊर्ध्वाकाशको लाँघ गये, पर उस लिङ्गका अन्त नहीं पा सके और आश्चर्यचकित होकर वे लौट आये। मुने! इसी प्रकार जब चक्रपाणि भगवान् विष्णु भी सातों पातालोंमें प्रवेश कर उस लिङ्गका बिना अन्त पाये ही वहाँसे बाहर आये, तब ब्रह्मा, विष्णु दोनों शिवलिङ्गके पास जाकर हाथ जोड़कर उनकी स्तुति करने लगे॥ ७५-७७॥

हरिपितामहावूचतुः

नमोऽस्तु ते शूलपाणे नमोऽस्तु वृषभध्वज। जीमूतवाहन कवे शर्व त्र्यम्बक शंकर॥ ७८॥
महेश्वर महेशान सुवर्णाक्ष वृषाकपे। दक्षयज्ञक्षयकर कालरूप नमोऽस्तु ते॥ ७९॥
त्वमादिरस्य जगतस्त्वं मध्यं परमेश्वर। भवानन्तश्च भगवान् सर्वगस्त्वं नमोऽस्तु ते॥ ८०॥

ब्रह्मा-विष्णु बोले—शूलपाणि! आपको प्रणाम है। वृषभध्वज! जीमूतवाहन! कवि! शर्व! त्र्यम्बक! शंकर! आपको प्रणाम है। महेश्वर! महेशान! सुवर्णाक्ष! वृषाकपे! दक्ष-यज्ञ-विध्वंसक! कालरूप शिव! आपको प्रणाम है। परमेश्वर! आप इस जगत्के आदि, मध्य एवं अन्त हैं। आप षडैश्वर्यपूर्ण भगवान् सर्वत्रगामी या सर्वत्र व्याप्त हैं। आपको प्रणाम है॥ ७८-८०॥

पुलस्त्य उवाच

एवं संस्तूयमानस्तु तस्मिन् दारुवने हरः। स्वरूपी ताविदं वाक्यमुवाच वदतां वरः॥ ८१॥

पुलस्त्यजी बोले—उस दारुवनमें इस प्रकार स्तुति किये जानेपर वक्ताओंमें श्रेष्ठ हरने अपने स्वरूपमें प्रकट होकर (अर्थात् मूर्तिमान् होकर) उन दोनोंसे इस प्रकार कहा—॥ ८१॥

हर उवाच

किमर्थं देवतानाथौ परिभूतक्रमं त्विह। मां स्तुवाते भृशार्त्तस्थं कामतापितविग्रहम्॥ ८२॥

भगवान् शंकर बोले—आप दोनों सभी देवताओंके स्वामी हैं। आपलोग थके-थकेसे हुए तथा कामाग्निसे दग्ध और मुझ सब प्रकारसे अत्यन्त पीड़ितकी क्यों स्तुति कर रहे हैं?॥ ८२॥

देवावूचतुः

भवतः पातितं लिङ्गं यदेतद् भुवि शंकर। एतत् प्रगृह्यतां भूयः अतो देव स्तुवावहे॥ ८३॥

इसपर ब्रह्मा-विष्णु दोनों बोले—शिवजी! पृथ्वीपर आपका जो यह लिङ्ग गिराया गया है, उसे पुनः आप ग्रहण करें। इसीलिये हम आपकी स्तुति कर रहे हैं॥ ८३॥

हर उवाच

यद्यर्चयन्ति त्रिदशा मम लिङ्गं सुरोत्तमौ। तदेतत्प्रतिगृह्णीयां नान्यथेति कथंचन॥ ८४॥
ततः प्रोवाच भगवानेवमस्त्विति केशवः। ब्रह्मा स्वयं च जग्राह लिङ्गं कनकपिङ्गलम्॥ ८५॥

शिवजी भागने लगे। इसके बाद कामदेवके द्वारा पीछा किये जानेपर महादेवजी घोर दारुवनमें चले गये, जहाँ ऋषिगण अपनी पत्नियोंके साथ निवास करते थे ॥ ५५–५८ ॥

ते चापि ऋषयः सर्वे दृष्ट्वा मूर्ध्ना नताभवन्। ततस्तान् प्राह भगवान् भिक्षा मे प्रतिदीयताम् ॥ ५९ ॥
ततस्ते मौनिनस्तस्थुः सर्व एव महर्षयः। तदाश्रमाणि सर्वाणि परिचक्राम नारद ॥ ६० ॥
तं प्रविष्टं तदा दृष्ट्वा भार्गवात्रेययोषितः। प्रक्षोभमगमन् सर्वा हीनसत्त्वाः समन्ततः ॥ ६१ ॥
ऋते त्वरुन्धतीमेकामनसूयां च भामिनीम्। पत्याभ्यां भर्तृपूजासु तच्चिन्तासु स्थितं मनः ॥ ६२ ॥

उन ऋषियोंने भी उन्हें देखकर सिर झुकाकर प्रणाम किया। फिर भगवान्‌ने उनसे कहा—आपलोग मुझे भिक्षा दीजिये। इसपर सभी महर्षि मौन रह गये। नारदजी ! इसपर महादेवजी सभी आश्रमोंमें घूमने लगे। उस समय उन्हें आश्रममें आया हुआ देख पतिव्रता अरुन्धती और अनसूयाको छोड़कर ऋषियोंकी समस्त पत्नियाँ प्रक्षुब्ध एवं सत्त्वहीन हो गयीं। पर अरुन्धती और अनसूया पतिसेवामें ही लगी रहीं ॥ ५९–६२ ॥

ततः संक्षुभिताः सर्वा यत्र याति महेश्वरः। तत्र प्रयान्ति कामार्त्ता मदविह्वलितेन्द्रियाः ॥ ६३ ॥
त्यक्त्वाश्रमाणि शून्यानि स्वानि ता मुनियोषितः। अनुजग्मुर्यथा मत्तं करिण्य इव कुञ्जरम् ॥ ६४ ॥
ततस्तु ऋषयो दृष्ट्वा भार्गवाङ्गिरसो मुने। क्रोधान्विताब्रुवन्सर्वे लिङ्गोऽस्य पततां भुवि ॥ ६५ ॥
ततः पपात देवस्य लिङ्गं पृथ्वीं विदारयन्। अन्तर्धानं जगामाथ त्रिशूली नीललोहितः ॥ ६६ ॥

अब शिवजी जहाँ-जहाँ जाते थे, वहाँ-वहाँ संक्षुभित, कामार्त एवं मदसे विकल इन्द्रियोंवाली स्त्रियाँ भी जाने लगीं। मुनियोंकी वे स्त्रियाँ अपने आश्रमोंको सूना छोड़ उनका इस प्रकार अनुसरण करने लगीं, जैसे करेणु मदमत्त गजका अनुसरण करे। मुने ! यह देखकर ऋषिगण क्रुद्ध हो गये एवं कहा कि इनका लिङ्ग भूमिपर गिर जाय। फिर तो महादेवका लिङ्ग पृथ्वीको विदीर्ण करता हुआ गिर गया एवं तब नीललोहित त्रिशूली अन्तर्धान हो गये ॥ ६३–६६ ॥

ततः स पतितो लिङ्गो विभिद्य वसुधातलम्। रसातलं विवेशाशु ब्रह्माण्डं चोर्ध्वतोऽभिनत् ॥ ६७ ॥
ततश्चचाल पृथिवी गिरयः सरितो नगाः। पातालभुवनाः सर्वे जङ्गमाजङ्गमैर्वृताः ॥ ६८ ॥
संक्षुब्धान् भुवनान् दृष्ट्वा भूर्लोकादीन् पितामहः। जगाम माधवं द्रष्टुं क्षीरोदं नाम सागरम् ॥ ६९ ॥
तत्र दृष्ट्वा हृषीकेशं प्रणिपत्य च भक्तितः। उवाच देव भुवनाः किमर्थं क्षुभिता विभो ॥ ७० ॥

वह पृथ्वीपर गिरा लिङ्ग उसका भेदन कर तुरंत रसातलमें प्रविष्ट हो गया एवं ऊपरकी ओर भी उसने विश्व-ब्रह्माण्डका भेदन कर दिया। इसके बाद पृथ्वी, पर्वत, नदियाँ, पादप तथा चराचरसे पूर्ण समस्त पाताललोक काँप उठे। पितामह ब्रह्मा भूर्लोक आदि भुवनोंको संक्षुब्ध देखकर श्रीविष्णुसे मिलने क्षीरसागर पहुँचे। वहाँ उन्हें देख भक्तिपूर्वक प्रणाम कर ब्रह्माने कहा—देव ! समस्त भुवन विक्षुब्ध कैसे हो गये हैं ? ॥ ६७–७० ॥

अथोवाच हरिर्ब्रह्मन् शार्वो लिङ्गो महर्षिभिः। पातितस्तस्य भारार्ता संचचाल वसुंधरा ॥ ७१ ॥
ततस्तदद्भुततमं श्रुत्वा देवः पितामहः। तत्र गच्छाम देवेश एवमाह पुनः पुनः ॥ ७२ ॥
ततः पितामहो देवः केशवश्च जगत्पतिः। आजग्मतुस्तमुद्देशं यत्र लिङ्गं भवस्य तत् ॥ ७३ ॥
ततोऽनन्तं हरिर्लिङ्गं दृष्ट्वारुह्य खगेश्वरम्। पातालं प्रविवेशाथ विस्मयान्तरितो विभुः ॥ ७४ ॥

इसपर श्रीहरिने कहा—ब्रह्मन् ! महर्षियोंने शिवके लिङ्गको गिरा दिया है। उसके भारसे कष्टमें पड़ी हुई पृथ्वी विचलित हो रही है। इसके बाद ब्रह्माजी इस अद्भुत वचनको सुनकर देवेश ! हमलोग वहाँ चलें—

ऐसा बार-बार कहने लगे। फिर ब्रह्मा और जगत्पति विष्णु वहाँ पहुँचे, जहाँ शंकरका लिङ्ग गिरा था। वहाँ उस अनन्त लिङ्गको देखकर आश्चर्यचकित होकर हरि गरुड़पर सवार हो उसका पता लगानेके लिये पातालमें प्रविष्ट हुए ॥ ७१-७४ ॥

ब्रह्मा पद्मविमानेन ऊर्ध्वमाक्रम्य सर्वतः। नैवान्तमलभद् ब्रह्मन् विस्मितः पुनरागतः ॥ ७५ ॥
विष्णुर्गत्वाऽथ पातालान् सप्त लोकपरायणः। चक्रपाणिर्विनिष्क्रान्तो लेभेऽन्तं न महामुने ॥ ७६ ॥
विष्णुः पितामहश्चोभौ हरलिङ्गं समेत्य हि। कृताञ्जलिपुटौ भूत्वा स्तोतुं देवं प्रचक्रतुः ॥ ७७ ॥

नारदजी ! ब्रह्माजी अपने पद्मयानके द्वारा सम्पूर्ण ऊर्ध्वकाशको लाँघ गये, पर उस लिङ्गका अन्त नहीं पा सके और आश्चर्यचकित होकर वे लौट आये। मुने ! इसी प्रकार जब चक्रपाणि भगवान् विष्णु भी सातों पातालोंमें प्रवेश कर उस लिङ्गका बिना अन्त पाये ही वहाँसे बाहर आये, तब ब्रह्मा, विष्णु दोनों शिवलिङ्गके पास जाकर हाथ जोड़कर उनकी स्तुति करने लगे ॥ ७५-७७ ॥

हरिब्रह्माणावूचतुः

नमोऽस्तु ते शूलपाणे नमोऽस्तु वृषभध्वज। जीमूतवाहन कवे शर्व त्र्यम्बक शंकर ॥ ७८ ॥
महेश्वर महेशान सुवर्णाक्ष वृषाकपे। दक्षयज्ञक्षयकर कालरूप नमोऽस्तु ते ॥ ७९ ॥
त्वमादिरस्य जगतस्त्वं मध्यं परमेश्वर। भवानन्तश्च भगवान् सर्वगस्त्वं नमोऽस्तु ते ॥ ८० ॥

ब्रह्मा-विष्णु बोले—शूलपाणिजी ! आपको प्रणाम है। वृषभध्वज ! जीमूतवाहन ! कवि ! शर्व ! त्र्यम्बक ! शंकर ! आपको प्रणाम है। महेश्वर ! महेशान ! सुवर्णाक्ष ! वृषाकपे ! दक्ष-यज्ञ-विध्वंसक ! कालरूप शिव ! आपको प्रणाम है। परमेश्वर ! आप इस जगत्के आदि, मध्य एवं अन्त हैं। आप षडैश्वर्यपूर्ण भगवान् सर्वत्रगामी या सर्वव्यापक हैं। आपको प्रणाम है ॥ ७८-८० ॥

पुलस्त्य उवाच

एवं संस्तूयमानस्तु तस्मिन् दारुवने हरः। स्वरूपी ताविदं वाक्यमुवाच वदतां वरः ॥ ८१ ॥

पुलस्त्यजी बोले—उस दारुवनमें इस प्रकार स्तुति किये जानेपर वक्ताओंमें श्रेष्ठ हरने अपने स्वरूपमें प्रकट होकर (अर्थात् मूर्तिमान् होकर) उन दोनोंने इस प्रकार कहा—॥ ८१ ॥

हर उवाच

किमर्थं देवतानाथौ परिभूतक्रमं त्विह। मां स्तुवाते भृशास्वस्थं कामानलविनिर्दहत् ॥ ८२ ॥

भगवान् शंकर बोले—आप दोनों सभी देवताओंके स्वामी हैं। आपलोग जलते-जलते थके हुए तथा कामाग्निसे दग्ध और मुझ सब प्रकारसे अस्वस्थ व्यक्तिकी क्यों स्तुति कर रहे हैं ? ॥ ८२ ॥

देवावूचतु

भवतः पातितं लिङ्गं यदेतद् भुवि शंकर। एतत् प्रगृह्यतां भूयः अतो देव स्तुवावहे ॥ ८३ ॥

इसपर ब्रह्मा-विष्णु दोनों बोले—शिवजी ! पृथ्वीपर आपका जो यह लिङ्ग गिराया गया है, उसे पुनः आप ग्रहण करें। इसीलिये हम आपकी स्तुति कर रहे हैं ॥ ८३ ॥

हर उवाच

यद्यर्चयन्ति त्रिदशा मम लिङ्गं सुरोत्तमौ। तदेतत्प्रतिगृह्णीयां नान्यथेति कथंचन ॥ ८४ ॥
ततः प्रोवाच भगवानेवमस्त्विति केशवः। [illegible]

[अथ सप्तमोऽध्यायः]

पुलस्त्य उवाच

ततोऽनङ्गं विभुर्दृष्ट्वा ब्रह्मन् नारायणो मुनिः । प्रहस्यैवं वचः प्राह कन्दर्प इह आस्यताम् ॥ १ ॥
तदक्षुब्धत्वमीक्ष्यास्य कामो विस्मयमागतः । वसन्तोऽपि महाचिन्तां जगामाशु महामुने ॥ २ ॥
ततश्चाप्सरसो दृष्ट्वा स्वागतेनाभिपूज्य च । वसन्तमाह भगवानेह्येहि स्थीयतामिति ॥ ३ ॥
ततो विहस्य भगवान् मञ्जरीं कुसुमावृताम् । आदाय प्राक्सुवर्णाङ्गीमूर्वोर्बालां विनिर्ममे ॥ ४ ॥
ऊरूद्भवां स कन्दर्पो दृष्ट्वा सर्वाङ्गसुन्दरीम् । अमन्यत तदाऽनङ्गः किमियं सा प्रिया रतिः ॥ ५ ॥

सातवाँ अध्याय प्रारम्भ

(उर्वशीकी उत्पत्ति-कथा, प्रह्लाद-प्रसंग—नरनारायणसे संवाद एवं युद्धोपक्रम)

पुलस्त्यजी बोले—नारदजी! उसके बाद समर्थ नारायण ऋषि कामदेवको देखकर हँसते हुए यों बोले—काम! तुम यहाँ बैठो। काम उनकी उस अक्षुब्धता (स्थिरता) को देखकर चकित हो गया। महामुने! वसन्तको भी उस समय बड़ी चिन्ता हुई। फिर अप्सराओंकी ओर देखकर स्वागतके द्वारा उनकी पूजा कर भगवान् नारायणने वसन्तसे कहा—आओ बैठो। उसके पश्चात् भगवान् नारायण मुनिने हँसकर एक फूलसे भरी मञ्जरी ली और अपने ऊरुपर एक सुवर्ण अङ्गवाली तरुणीका चित्र लिखकर उसकी सजीव रचना कर दी। नारायणकी जाँघसे उत्पन्न उस सर्वाङ्ग सुन्दरीको देखकर कामदेव मनमें सोचने लगा—क्या यह सुन्दरी मेरी पत्नी रति है! ॥ १–५ ॥

तदेव वदनं चारु स्वक्षिभ्रुकुटिलालकम् । सुनासावंशाधरोष्ठमालोकनपरायणम् ॥ ६ ॥
तावेवाहार्यविरलौ पीवरौ मग्नचूचुकौ । राजेतेऽस्याः कुचौ पीनौ सज्जनाविव संहतौ ॥ ७ ॥
तदेव तनु चार्वङ्ग्या वलित्रयविभूषितम् । उदरं राजते श्लक्ष्णं रोमावलिविभूषितम् ॥ ८ ॥
रोमावली च जघनाद् यान्ती स्तनतटं त्वियम् । राजते भृङ्गमालेव पुलिनात् कमलाकरम् ॥ ९ ॥

इसकी वैसी ही सुन्दर आँखें, भौंहें एवं कुटिल अलकें हैं। इसका वैसा ही मुखमण्डल, वैसी सुन्दर नासिका, वैसा वक्ष और वैसा ही इसका अधरोष्ठ भी सुन्दर है। इसे देखनेसे तृप्ति नहीं होती है। यतिके समान ही मनोहर तथा अत्यन्त मग्न चूचुकवाले स्थूल (मांसल) स्तन दो सज्जन पुरुषोंके सदृश परस्पर मिले हैं। इस सुन्दरीका वैसा ही कृश, त्रिवलीयुक्त, कोमल तथा रोमावलिवाला उदर भी शोभित हो रहा है। उदरपर नीचेसे ऊपरकी ओर स्तन तटतक जाती हुई इसकी रोमराजि सरोवरआदिके तटसे कमलवृन्दकी ओर जाती हुई भ्रमर-पङ्क्तिके समान सुशोभित हो रही है ॥ ६–९ ॥

जघनं त्वतिविस्तीर्णं भात्यस्या रशनावृतम् । क्षीरोदमथने नद्धं भुजङ्गेनेव मन्दरम् ॥ १० ॥
कदलीस्तम्भसदृशैरूर्ध्वमूलैरथोरुभिः । विभाति सा सुचार्वङ्गी पद्मकिञ्जल्कसंनिभा ॥ ११ ॥
जानुनी गूढगुल्फे च शुभे जङ्घे त्वरोमशे । विभातोऽस्यास्तथा पादावलक्तकसमत्विषौ ॥ १२ ॥
इति संचिन्तयन् कामस्तामनिन्दितलोचनाम् । कामातुरोऽसौ संजातः किमुतान्यो जनो मुने ॥ १३ ॥

इसकी करधनीसे मण्डित स्थूल जघन-प्रदेश क्षीरसागरके मन्थनके समयमें वासुकि नागसे वेष्टित मन्दर-पर्वतके समान सुशोभित हो रहा है। कदली-स्तम्भके समान ऊर्ध्वमूल ऊरुओंवाली कमलके केसरके समान गौर-वर्णकी यह सुन्दरी है। इसके दोनों घुटने, गूढगुल्फ, रोमरहित सुन्दर जंघा तथा अलक्तकके समान कान्तिवाले दोनों पैर अत्यन्त सुशोभित हो रहे हैं। मुने! इस प्रकार उस सुन्दरीके विषयमें सोचते हुए जब यह कामदेव स्वयं कामातुर हो गया तो फिर अन्य पुरुषोंकी तो बात ही क्या थी ॥ १०–१३ ॥

माधवोऽप्युर्वशीं दृष्ट्वा व्यचिन्तयत नारद। किंस्वित् पाकनरेन्द्रस्य राजधानी स्वयं स्थिता॥ १४॥
आयाता शशिनो नूनमियं कान्तिर्निशाक्षये। रविरश्मिभयान्नारीभूता शरणमागता॥ १५॥
इत्थं सञ्चिन्तयन्नेव अप्सरस्याप्सरोगणम्। तस्थौ मुनिरिव ध्यानमास्थित स च माधवः॥ १६॥
ततः स विस्मितान् सर्वान् कन्दर्पादीन् महामुने। दृष्ट्वा प्रोवाच वचनं स्मितं कृत्वा शुभस्वरः॥ १७॥
इयं ममोरुसम्भूता कामाप्सरस माधव। नीयतां सुरलोकाय दीयतां वासवाय च॥ १८॥
इत्युक्ताः कम्पमानास्ते जग्मुर्गृह्योर्वशीं दिवम्। सहस्राक्षाय तां प्रादात् रूपयौवनशालिनीम्॥ १९॥
आचख्युश्चरितं ताभ्यां धर्मजाभ्यां महामुने। देवराजाय कामाद्यास्ततोऽभूद् विस्मयः परः॥ २०॥
एतादृशं हि चरितं ख्यातिमभ्यां जगाम ह। पातालेषु तथा मर्त्ये दिग्गणेषु जगाम च॥ २१॥

नारदजी! अब भगवान् भी उस उर्वशीको देखकर सोचने लगे कि क्या यह साक्षात् इन्द्रकी राजधानी ही यहाँ आकर उपस्थित हो गयी है? अथवा रात्रिके अन्त होनेपर सूर्यकी किरणोंके डरसे मानो स्वयं चन्द्रिका ही शरणमें आ गयी है। इस प्रकार सोचते हुए अप्सराओंको देखकर भगवान् मुनिके सदृश ध्यानस्थ हो गये। महामुने! उसके बाद शुभस्वर नारायण मुनिने कामादि सभीको चकित देखकर हँसते हुए कहा—हे काम, हे अप्सराओ, हे वसन्त! यह अप्सरा मेरी जाँघसे उत्पन्न हुई है। इसे तुमलोग देवलोकमें ले जाओ और इन्द्रको दे दो। उनके ऐसा कहनेपर वे सभी भयसे काँपते हुए उर्वशीको लेकर स्वर्गमें चले गये और उस रूपयौवनशालिनी अप्सराको इन्द्रको दे दिया। महामुने! उन कामादिने इन्द्रसे उन दोनों धर्मके पुत्रों (नर-नारायण) के चरित्रको कहा, जिससे इन्द्रको बड़ा विस्मय हुआ। नर और नारायणके इस चरित्रकी चर्चा आगे सर्वत्र बढ़ती गयी तथा वह पाताल, मर्त्यलोक एवं सभी दिशाओंमें व्याप्त हो गयी॥ १४—२१॥

एकदा निहते रौद्रे हिरण्यकशिपौ मुने। अभिषिक्तस्तदा राज्ये प्रह्लादो नाम दानवः॥ २२॥
तस्मिञ्छासति दैत्येन्द्रे देवब्राह्मणपूजके। मखानि भुवि राजानो यजन्ते विधिवत्तदा॥ २३॥
ब्राह्मणाश्च तपो धर्मं तीर्थयात्राश्च कुर्वते। वैश्याश्च पशुवृत्तिस्थाः शूद्राः शुश्रूषणे रताः॥ २४॥

मुने! एक बारकी बात है। जब भयंकर हिरण्यकशिपु मारा गया तब प्रह्लाद नामक दानव राज्यासनपर बैठा। वह देवता और ब्राह्मणोंका पूजक था। उसके शासनकालमें पृथ्वीपर राजा लोग विधिपूर्वक यज्ञानुष्ठान करते थे। ब्राह्मण लोग तपस्या, धर्म-कार्य और तीर्थयात्रा, वैश्य लोग पशुपालन तथा शूद्र लोग सबकी सेवा प्रेमसे करते थे॥ २२—२४॥

चातुर्वर्ण्यं ततः स्वे स्वे आश्रमे धर्मकर्मणि। आवर्तत ततो देवा वृत्त्या युक्ताभवन् मुने॥ २५॥
ततस्तु च्यवनो नाम भार्गवेन्द्रो महातपाः। जगाम नर्मदां स्नातुं तीर्थं वैयाकुलेश्वरम्॥ २६॥
तत्र दृष्ट्वा महादेवं नद्यां स्नातुमवातरत्। अवतीर्णं जग्राह नागः केकरलोहितः॥ २७॥
गृहीतस्तेन नागेन सस्मार मनसा हरिम्। संस्मृते पुण्डरीकाक्षे निर्विषोऽभून्महोरगः॥ २८॥

मुने! इस प्रकार चारों वर्ण अपने आश्रममें स्थित रहकर धर्म-कार्यमें लगे रहते थे। इससे देवता भी अपने कार्यमें संलग्न हो गये।[1] उसी समय ब्राह्मणोंमें श्रेष्ठ भार्गववंशी महातपस्वी च्यवन नामक ऋषि नर्मदाके नकुलेश्वर तीर्थमें स्नान करने गये। वहाँ वे महादेवका दर्शनकर नदीमें स्नान करनेके लिये उतरे। जलमें उतरते ही ऋषिको एक भूरे वर्णके साँपने पकड़ लिया। उस साँपद्वारा पकड़ लिये जानेपर ऋषिने अपने मनमें

१—देवताओंके चर्चाका वर्णन सुकेशी-उपाख्यानमें आगे आया है।

विष्णु भगवान्‌का स्मरण किया। जनार्दन भगवान् श्रीहरिको स्मरण करनेपर वह महान् सर्प विषहीन हो गया ॥ २५-२८ ॥

नीतस्तेनातिरौद्रेण पन्नगेन रसातलम्। निर्विषश्चापि तत्याज च्यवनं भुजगोत्तमः ॥२९॥
संत्यक्तमात्रो नागेन च्यवनो भार्गवोत्तमः। चचार नागकन्याभिः पूज्यमानः समन्ततः ॥३०॥
विचरन् प्रविवेशाथ दानवानां महत् पुरम्। संपूज्यमानो दैत्येन्द्रैः प्रह्लादोऽथ ददर्श तम् ॥३१॥
भृगुपुत्रे महातेजाः पूजां चक्रे यथार्हतः। संपूजितोपविष्टश्च पृष्टश्चागमनं प्रति ॥३२॥

फिर उस भयंकर विषहीन सर्पने च्यवन मुनिको रसातलमें ले जाकर छोड़ दिया। सर्पने भार्गवश्रेष्ठ च्यवनको मुक्त कर दिया। फिर वे नागकन्याओंसे पूजित होते हुए चारों ओर विचरण करने लगे। वहाँ घूमते हुए वे दानवोंके विशाल नगरमें प्रविष्ट हुए। इसके बाद श्रेष्ठ दैत्योंद्वारा पूजित प्रह्लादने उन्हें देखा। महातेजस्वी प्रह्लादने भृगुपुत्रकी यथायोग्य पूजा की। पूजाके बाद उनके बैठनेपर प्रह्लादने उनसे उनके आगमनका कारण पूछा ॥२९-३२॥

स चोवाच महाराज महातीर्थं महाफलम्। स्नातुमेवागतोऽस्म्यद्य द्रष्टुं चैवाकुलीश्वरम् ॥ ३३ ॥
नद्यामेवावतीर्णोऽस्मि गृहीतश्चाहिना बलात्। समानीतोऽस्मि पाताले दृष्टश्चात्र भवानपि ॥ ३४ ॥
एतच्छ्रुत्वा तु वचनं च्यवनस्य दितीश्वरः। प्रोवाच धर्मसंयुक्तं स वाक्यं वाक्यकोविदः ॥ ३५ ॥

उन्होंने कहा—महाराज! आज मैं महाफलदायक महातीर्थमें स्नान एवं नकुलीशरका दर्शन करने आया था। वहाँ नदीमें उतरते ही एक नागने मुझे बलात् पकड़ लिया। वही मुझे पातालमें लाया और मैंने यहाँ आपको भी देखा। च्यवनकी इस बातको सुनकर सुन्दर वचन बोलनेवाले दैत्योंके ईश्वर (प्रह्लाद) ने धर्मसंयुक्त यह वाक्य कहा ॥ ३३-३५ ॥

प्रह्लाद उवाच

भगवन् कानि तीर्थानि पृथिव्यां कानि चाम्बरे। रसातले च कानि स्युरेतद् वक्तुं त्वमर्हसि ॥३६॥

प्रह्लादने पूछा—भगवन्! कृपा करके मुझे बतलाइये कि पृथ्वी, आकाश और पातालमें कौन-कौनसे (महान्) तीर्थ हैं? ॥ ३६ ॥

च्यवन उवाच

पृथिव्यां नैमिषं तीर्थमन्तरिक्षे च पुष्करम्। चक्रतीर्थं महाबाहो रसातलतले विदुः ॥३७॥

(प्रह्लादके वचनको सुनकर) च्यवनजीने कहा—महाबाहो! पृथ्वीमें नैमिषारण्यतीर्थ, अन्तरिक्षमें पुष्कर, और पातालमें चक्रतीर्थ प्रसिद्ध हैं ॥ ३७ ॥

पुलस्त्य उवाच

श्रुत्वा तद्भार्गववचो दैत्यराजो महामुने। नैमिषं गन्तुकामस्तु दानवानिदमब्रवीत् ॥३८॥

पुलस्त्यजीने कहा—महामुने! भार्गवकी इसी बातको सुनकर दैत्यराज प्रह्लादने नैमिषतीर्थमें जानेके लिये इच्छा प्रकट की और दानवोंसे यह बात कही ॥ ३८ ॥

प्रह्लाद उवाच

उत्तिष्ठध्वं गमिष्यामः स्नातुं तीर्थं हि नैमिषम्। द्रक्ष्यामः पुण्डरीकाक्षं पीतवाससमच्युतम् ॥३९॥

प्रह्लाद बोले—उठो, हम सभी नैमिषतीर्थमें स्नान करने जायँगे तथा वहाँ पीताम्बरधारी एवं कमलके समान नेत्रोंवाले भगवान् अच्युत (विष्णु)के दर्शन करेंगे ॥ ३९ ॥

❀

पुलस्त्य उवाच

इत्युक्ता दानवेन्द्रेण सर्वे ते दैत्यदानवाः। चक्रुरुद्योगमतुलं निर्जग्मुश्च रसातलात्॥४०॥
ते समभ्येत्य दैतेया दानवाश्च महाबलाः। नैमिषारण्यमागत्य स्नानं चक्रुर्मुदान्विताः॥४१॥
ततो दितीश्वरः श्रीमान् मृगव्यां स चचार ह। चरन् सरस्वतीं पुण्यां ददर्श विमलोदकाम्॥४२॥
तस्याऽदूरे महाशाखं शालवृक्षं शरैश्चितम्। ददर्श बाणानपरान् मुखे लग्नान् परस्परम्॥४३॥

पुलस्त्यजीने कहा—दैत्यराज प्रह्लादके ऐसा कहनेपर वे सभी दैत्य और दानव रसातलसे बाहर निकले एवं अनुपमेय उद्योगमें लग गये। उन महाबलवान् दितिपुत्रों एवं दानवोंने नैमिषारण्यमें आकर आनन्दपूर्वक स्नान किया। इसके बाद श्रीमान् दैत्यश्रेष्ठ प्रह्लाद मृगया (आखेट या शिकार) के लिये वनमें घूमने लगे। वहाँ घूमते हुए उन्होंने पवित्र एवं निर्मल जलवाली सरस्वती नदीको देखा। वहीं समीप ही बाणोंसे भरा-भरा किये बड़ी-बड़ी शाखाओंवाले एक शाल वृक्षको देखा। वे सभी बाण एक-दूसरेके मुखसे लगे हुए थे ॥ ४०–४३ ॥

ततस्तानद्भुताकारान् बाणान् नागोपवीतकान्। दृष्ट्वाऽतुलं तदा चक्रे क्रोधं दैत्येश्वरः किल॥४४॥
स ददर्श ततो दूरात् कृष्णाजिनधरौ मुनी। समुन्नतजटाभारौ तपस्यासक्तमानसौ॥४५॥
तयोश्च पार्श्वयोर्दिव्ये धनुषी लक्षणान्विते। शार्ङ्गमाजगवं चैव अक्षय्यौ च महेषुधी॥४६॥
तौ दृष्ट्वाऽमन्यत तदा दाम्भिकाविति दानवः। ततः प्रोवाच वचनं तावुभौ पुरुषोत्तमौ॥४७॥

तब उन अद्भुत आकारवाले नागोपवीत (सर्पोंसे लिपटे) बाणोंको देखकर दैत्येश्वरको बड़ा क्रोध हुआ। फिर उन्होंने दूरसे ही काले मृगचर्मको धारण किये हुए बड़ी-बड़ी जटाओंवाले तथा तपस्यामें लगे दो मुनियोंको देखा। उन दोनोंकी बगलमें सुलक्षण शार्ङ्ग और आजगव नामक दो दिव्य धनुष एवं दो अक्षय तथा बड़े-बड़े तरकस रखे हुए थे। उन दोनोंको इस प्रकार देखकर दानवराज प्रह्लादने उन्हें दम्भसे युक्त समझा। फिर उन्होंने उन दोनों श्रेष्ठ पुरुषोंसे कहा—॥ ४४–४७ ॥

किं भवद्भ्यां समारब्धं दम्भं धर्मविनाशनम्। क्व तपः क्व जटाभारः क्व चेमौ प्रवरायुधौ॥४८॥
अथोवाच नरो दैत्यं का ते चिन्ता दितीश्वर। सामर्थ्ये सति यः कुर्यात् तत्सम्पद्येत तस्य हि॥४९॥
अथोवाच दितीशस्तौ का शक्तिर्युवयोरिह। मयि तिष्ठति दैत्येन्द्रे धर्मसेतुप्रवर्तके॥५०॥
नरस्तं प्रत्युवाचाथ आवाभ्यां शक्तिरर्जिता। न कश्चिच्छक्नुयाद् योद्धुं नरनारायणौ युधि॥५१॥

आप दोनों यह धर्मविनाशक दम्भपूर्ण कार्य क्यों कर रहे हैं ? कहाँ तो आपकी यह तपस्या और जटाभार, कहाँ ये दोनों श्रेष्ठ अस्त्र ? इसपर नरने उनसे कहा—दैत्येश्वर ! तुम उसकी चिन्ता क्यों कर रहे हो ? सामर्थ्य रहनेपर कोई भी व्यक्ति जो कर्म करता है, उसे वही शोभा देता है। तब दितीश्वर प्रह्लादने उन दोनोंसे कहा—धर्मसेतुके स्थापित करनेवाले मुझ दैत्येन्द्रके रहते यहाँ आप लोग (सामर्थ्यवाले) क्या कर सकते हैं ? इसपर नरने उन्हें उत्तर दिया—हमने पर्याप्त शक्ति प्राप्त कर ली है। हम नर और नारायण—दोनोंसे कोई भी युद्ध नहीं कर सकता ॥ ४८–५१ ॥

दैत्येश्वरस्ततः क्रुद्धः प्रतिज्ञामारुरोह च। यथा कथञ्चिज्जेष्यामि नरनारायणौ रणे॥५२॥
इत्येवमुक्त्वा वचनं महात्मा दितीश्वरः स्थाप्य बलं वनान्ते।
वितत्य चापं गुणमाविकृष्य तलध्वनिं घोरतरं चकार॥५३॥
ततो नरस्त्वाजगवं हि चापमानम्य बाणान् सुबहूञ्छिताग्रान्।
मुमोच तानप्रतिमैः पृषत्कैश्चिच्छेद दैत्यस्तपनीयपुङ्खैः॥५४॥

छिन्नान् समालोक्य नरः पृषत्कान् दैत्येश्वरेणाप्रतिमेन संख्ये ।
क्रुद्धः समानम्य महाधनुस्ततो मुमोच चान्यान् विविधान् पृषत्कान् ॥ ५५ ॥

इसपर दैत्येश्वरने क्रुद्ध होकर प्रतिज्ञा कर दी कि मैं युद्धमें जिस किसी भी प्रकार आप नर और नारायण दोनोंको जीतूँगा । ऐसी प्रतिज्ञाकर दैत्येश्वर प्रह्लादने वनकी सीमापर अपनी सेना खड़ी कर दी और धनुषको फैलाकर उसपर डोरी चढ़ायी तथा भयंकर करतलध्वनि की—ताल ठोंकी । इसपर नरने भी आजगव धनुषको चढ़ाकर बहुत-से तेज बाण छोड़े । परंतु प्रह्लादने अनेक स्वर्ण-पुंखवाले अप्रतिम बाणोंसे उन बाणोंको काट डाला । फिर नरने युद्धमें अप्रतिम दैत्येश्वरके द्वारा बाणोंको नष्ट हुआ देख क्रुद्ध होकर अपने महान् धनुषको चढ़ाकर पुनः अन्य अनेक तीक्ष्ण बाण छोड़े ॥ ५२—५५ ॥

एकं नरो द्वौ दितिजेश्वरश्च त्रीन् धर्मसूनुश्चतुरो दितीशः ।
नरस्तु बाणान् प्रमुमोच पञ्च षड् दैत्यनाथो निशितान् पृषत्कान् ॥ ५६ ॥
सप्तर्षिमुख्यो द्विरथ दैत्यो नरस्तु षट् त्रीणि च दैत्यमुख्ये ।
षट्त्रीणि चैकं च दितीश्वरेण मुक्तानि बाणानि नराय विप्र ॥ ५७ ॥
एकं च षट् पञ्च नरेण मुक्तास्त्वष्टौ शराः सप्त च दानवेन ।
षट् सप्त चाष्टौ नव षण्नरेण द्विसप्ततिं दैत्यपतिः ससर्ज ॥ ५८ ॥
शतं नरस्त्रीणि शतानि दैत्यः षड् धर्मपुत्रो दश दैत्यराजः ।
ततोऽप्यसंख्येयतरान् हि बाणान् मुमोचतुस्तौ सुभृशं हि कोपात् ॥ ५९ ॥

नरके एक बाण छोड़नेपर प्रह्लादने दो बाण छोड़े; नरके तीन बाण छोड़नेपर प्रह्लादने चार बाण छोड़े । इसके बाद पुनः नरने पाँच बाण और फिर दैत्यश्रेष्ठ प्रह्लादने छः तेज बाण छोड़े । विप्र ! नरके सात बाण छोड़नेपर दैत्यने आठ बाण छोड़े । नरके नव बाण छोड़नेपर प्रह्लादने उनपर दस बाण छोड़े । नरके बारह बाण छोड़नेपर दानवने पंद्रह बाण छोड़े । नरके छत्तीस बाण छोड़नेपर दैत्यपतिने बहत्तर बाण चलाये । नरके सौ बाणोंपर दैत्यने तीन सौ बाण चलाये । धर्मपुत्रके छः सौ बाणोंपर दैत्यराजने एक हजार बाण छोड़े । फिर तो उन दोनोंने अत्यन्त क्रोधसे (एक दूसरेपर) असंख्य बाण छोड़े ॥ ५६—५९ ॥

ततो नरो बाणगणैरसंख्यैरवास्तरद् भूमिमथो दिशः खम् ।
स चापि दैत्यप्रवरः पृषत्कैश्चिच्छेद वेगात् तपनीयपुङ्खैः ॥ ६० ॥
ततः पतत्त्रिभिर्वीरौ सुभृशं नरदानवौ । युद्धे वरास्त्रैर्युध्येतां घोररूपैः परस्परम् ॥ ६१ ॥
ततस्तु दैत्येन वरास्त्रपाणिना चापे नियुक्तं तु पितामहास्त्रम् ।
माहेश्वरास्त्रं पुरुषोत्तमेन समं समाहत्य निपेततुस्तौ ॥ ६२ ॥
ब्रह्मास्त्रं तु प्रशमिते प्रह्लादः क्रोधमूर्च्छितः । गदां प्रगृह्य तरसा प्रचस्कन्द रथोत्तमात् ॥ ६३ ॥

उसके बाद नरने असंख्य बाणोंसे पृथ्वी, आकाश और दिशाओंको ढक दिया । फिर दैत्यप्रवर प्रह्लादने स्वर्णपुंखवाले बाणोंसे बड़े वेगसे छेदकर उनके बाणोंको काट दिया । तब नर और दानव दोनों वीर बाणों तथा भयंकर श्रेष्ठ अस्त्रोंसे परस्पर युद्ध करने लगे । इसके बाद दैत्यने हाथमें ब्रह्मास्त्र लेकर उस धनुषपर नियोजित कर चला दिया एवं उन पुरुषोत्तमने भी माहेश्वरास्त्रका प्रयोग कर दिया । वे दोनों अस्त्र परस्पर एक दूसरेसे टक्कर खाकर गिर पड़े । ब्रह्मास्त्रके व्यर्थ होनेपर क्रोधसे मूर्च्छित हुए प्रह्लाद वेगसे गदा लेकर उत्तम रथसे कूद पड़े ॥ ६०—६३ ॥

गदापाणिं समायान्तं दैत्यं नारायणस्तदा। दृष्ट्वाऽथ पृष्ठतश्चक्रे नरं योद्धुमनाः स्वयम्॥६४॥
ततो दितीशः सगदः समाद्रवत् सशार्ङ्गपाणिं तपसां निधानम्।
ख्यातं पुराणर्षिमुदारविक्रमं नारायणं नारद लोकपालम्॥६५॥

॥ इति श्रीवामनपुराणे सप्तमोऽध्यायः॥७॥

ऋषि नारायणने उस समय दैत्यको हाथमें गदा लिये अपनी ओर आते देखकर स्वयं युद्ध करनेकी इच्छासे नरको पीछे हटा दिया। नारदजी! तब प्रह्लादजी गदा लेकर तपोनिधान, शार्ङ्गधनुषको धारण करनेवाले, प्रसिद्ध पुरातन ऋषि, महापराक्रमशाली, लोकपाल नारायणकी ओर दौड़ पड़े॥ ६४-६५॥

॥ इस प्रकार श्रीवामनपुराणमें सातवाँ अध्याय समाप्त हुआ॥७॥

[अथाष्टमोऽध्यायः]

पुलस्त्य उवाच

शार्ङ्गपाणिनमायान्तं दृष्ट्वाऽग्रे दानवेश्वरः। परिभ्राम्य गदां वेगान्मूर्ध्नि साध्यमताडयत्॥१॥
ताडितस्याथ गदया धर्मपुत्रस्य नारद। नेत्राभ्यामपतद् वारि वह्निवर्णनिभं भुवि॥२॥
मूर्ध्नि नारायणस्यापि सा गदा दानवार्पिता। जगाम शतधा ब्रह्मन् शैलशृङ्गे यथाऽशनिः॥३॥
ततो निवृत्य दैत्येन्द्रः समास्थाय रथं द्रुतम्। आदाय कार्मुकं वीरस्तूणाद् बाणं समाददे॥४॥

आठवाँ अध्याय प्रारम्भ

(प्रह्लाद और नारायणका तुमुल युद्ध, भक्तिसे विजय)

पुलस्त्यजी बोले—प्रह्लादने जब हाथमें शार्ङ्गधनुष लिये भगवान् नारायणको सामनेसे आते देखा तो अपनी गदा घुमाकर वेगसे उनके सिरपर प्रहार कर दिया। नारदजी! गदासे प्रताडित होनेपर नारायणके नेत्रोंसे आगके स्फुलिङ्गके समान आँसू पृथ्वीपर गिरने लगे। ब्रह्मन्! पर्वतकी चोटीपर गिरकर जैसे वज्र टूट जाता है, उसी प्रकार दानवद्वारा नारायणके सिरपर चलायी गयी वह गदा भी सैकड़ों टुकड़े हो गयी। उसके बाद शीघ्रतापूर्वक लौटकर वीर दैत्येन्द्रने रथपर आरूढ़ हो धनुष लेकर अपनी तरकससे बाण निकाल लिया॥ १-४॥

आनम्य चापं वेगेन गार्ध्रपत्राञ्छिलीमुखान्। मुमोच साध्याय तदा क्रोधान्धकारिताननः॥५॥
तानापतत एवाशु बाणांश्चन्द्रार्धसंनिभान्। चिच्छेद बाणैरपरैर्निर्बिभेद च दानवम्॥६॥
ततो नारायणं दैत्यो दैत्यं नारायणः शरैः। आविध्येतां तदाऽन्योन्यं मर्मभिद्भिरजिह्मगैः॥७॥
ततोऽम्बरे संनिपातो देवानामभवन्मुने। दिदृक्षूणां तदा युद्धं लघु चित्रं च सुष्ठु च॥८॥

फिर वेगसे प्रह्लादने शीघ्रतासे धनुषको चढ़ाकर गृध्रके पंखवाले अनेक बाणोंको नारायणकी ओर चलाया। नारायणने भी बड़ी शीघ्रतासे अपनी ओर आ रहे उन अर्धचन्द्र-तुल्य बाणोंको अपने बाणोंसे काट डाला और कुछ दूसरे बाणोंसे प्रह्लादको विद्ध कर दिया। तब दैत्यने नारायणको और नारायणने दैत्यको—एक-दूसरेको—मर्मभेदी एवं सीधे चलनेवाले बाणोंसे बेध दिया। मुने! उस समय शीघ्रतापूर्वक हो रहे इस अद्भुत विचित्र एवं सुन्दर युद्धको देखनेकी इच्छासे देवताओंका समूह आकाशमें एकत्र हो गया॥ ५-८॥

ततः सुराणां दुन्दुभयस्त्ववाद्यन्त महास्वनाः। पुष्पवर्षमनोरम्यं मुमुचुः साध्यदैत्ययोः॥९॥
ततः पश्यत्सु देवेषु गगनस्थेषु तावुभौ। अयुध्येतां महेष्वासौ प्रेक्षकप्रीतिवर्धनम्॥१०॥

बबन्धतुस्तदाकाशं तावुभौ शरवृष्टिभिः। दिशश्च विदिशश्चैव छादयेतां शरोत्करैः ॥ ११ ॥
ततो नारायणश्चापं समाकृष्य महामुने। बिभेद मार्गणैस्तीक्ष्णैः प्रह्लादं सर्वमर्मसु ॥ १२ ॥
तथा दैत्येश्वरः क्रुद्धश्चापमानम्य वेगवान्। बिभेद हृदये बाह्वोर्वदने च नरोत्तमम् ॥ १३ ॥

उसके बाद बड़े जोरसे बजनेवाले नगाड़ोंको बजाकर देवताओंने भगवान् नारायणके और दैत्यके ऊपर अनुपमरूपसे पुष्पोंकी वर्षा की। फिर उन दोनों धनुर्धारियोंने आकाशमें स्थित देवताओंके सामने दर्शकोंको आनन्द देनेवाला (दिलचस्प) अनूठा युद्ध किया। उस समय उन दोनोंने बाणोंकी वृष्टिसे आकाशको मानो बाँध दिया और बाणवृष्टिसे दिशाओं एवं विदिशाओंको ढक दिया। महामुनि नारदजी! तब नारायणने धनुषको खींचकर तेज बाणोंसे प्रह्लादके सभी मर्मस्थलोंमें प्रहार किया और फुर्तीवाले दैत्येश्वरने क्रोधपूर्वक धनुषको चढ़ाकर नरोत्तमके हृदय, दोनों भुजाओं और मुँहको भी (बाणोंसे) बेध दिया ॥ ९–१३ ॥

ततोऽस्यतो दैत्यपतेः कार्मुकं मुष्टिबन्धनात्। चिच्छेदैकेन बाणेन चन्द्रार्धाकारवर्चसा ॥ १४ ॥
अपास्य धनुश्छिन्नं चापमादाय चापरम्। अधिज्यं लाघवात् कृत्वा ववर्ष निशिताञ्छरान् ॥ १५ ॥
तानप्यस्य शरान् साध्यश्छित्त्वा बाणैरवारयत्। कार्मुकं च क्षुरप्रेण चिच्छेद पुरुषोत्तमः ॥ १६ ॥
छिन्नं छिन्नं धनुर्दैत्यस्त्वन्यदन्यत्समाददे। समादत्ते तदा साध्यो मुने चिच्छेद लाघवात् ॥ १७ ॥

जो बिना विशेष प्रयोजनके—खीर, खिचड़ी एवं मांसका भोजन करते हैं, उनके मुँहमें जलता हुआ लोहेका पिण्ड डाला जाता है। जो पापियोंद्वारा की गयी गुरु, देवता, ब्राह्मण और वेदोंकी निन्दाको सुनते हैं, उन नीच मनुष्योंके कानोंमें धर्मराजके किंकर अग्निवर्ण लोहेकी कीलें बार-बार ठोंकते रहते हैं। जो प्याऊ (पौसर), देवमन्दिर, बगीचा, ब्राह्मणगृह, सभा, मठ, कुआँ, बावली एवं तडागको तोड़कर नष्ट करते हैं, उन मनुष्योंके विलाप करते रहनेपर भी भयंकर यमकिंकर सुतीक्ष्ण छुरिकाओंद्वारा उनकी चमड़ी उधेड़ते हैं—उनकी देहसे चर्मको काटकर पृथक् करते रहते हैं ॥ २०–२४ ॥

गोब्राह्मणार्कमग्निं च ये वै मेहन्ति मानवाः । तेषां गुदेन चान्त्राणि विनिष्कृन्तन्ति वायसाः ॥ २५ ॥
स्वपोषणपरो यस्तु परित्यजति मानवः । पुत्रभृत्यकलत्रादिबन्धुवर्गमकिञ्चनम्
दुर्भिक्षे संभ्रमे चापि स श्वभोज्ये निपात्यते ॥ २६ ॥

शरणागतं ये त्यजन्ति ये च बन्धनपालकाः। पतन्ति यन्त्रपीडे ते ताड्यमानास्तु किंकरैः॥ २७॥
क्लेशयन्ति हि विप्रादीन् ये ह्यकर्मसु पापिनः। ते पिष्यन्ते शिलापेषे शोष्यन्तेऽपि च शोषकैः॥ २८॥

जो गाय, ब्राह्मण, सूर्य और अग्निके सम्मुख मल-मूत्रादिका त्याग करते हैं, उनकी गुदासे कौए उनकी आँतोंको नोच-नोचकर काटते हैं। जो दुर्भिक्ष (अकाल) एवं विप्लवके समय अकिंचन, पुत्र, भृत्य एवं कलत्र (स्त्री) आदि बन्धुवर्गको छोड़कर आत्म-पोषण करता है, वह यमदूतोंद्वारा श्वभोजन नामक नरकमें डाला जाता है। जो रक्षाके लिये शरणमें आये व्यक्तिका परित्याग करता है, वह मनुष्य बन्दीगृह-रक्षक यमदूतोंके द्वारा पीटे जाते हुए यन्त्रपीड नामक नरकमें गिरते हैं। जो लोग ब्राह्मणोंको कुकर्ममें लगाकर उन्हें क्लेश देते हैं, वे पापी मनुष्य शिलाओंपर पीसे जाते हैं और अग्नि-सूर्य आदिद्वारा शोषित भी किये जाते हैं॥ २५—२८॥

न्यासापहारिणः पापा बध्यन्ते निगडैरपि। क्षुत्क्षामाः शुष्कताल्वोष्ठाः पात्यन्ते वृश्चिकाशने॥ २९॥
पर्वमैथुनिनः पापाः परदाररताश्च ये। ते वह्नितप्तां कूटाग्रामालिङ्गन्ते च शाल्मलीम्॥ ३०॥
उपाध्यायमधःकृत्य यैरधीतं द्विजाधमैः। तेषामध्यापको यश्च स शिलां शिरसा वहेत्॥ ३१॥
मूत्रश्लेष्मपुरीषाणि यैरुत्सृष्टानि वारिणि। ते पात्यन्ते च विण्मूत्रे दुर्गन्धे पूयपूरिते॥ ३२॥

जो धरोहरको चुरा लेते हैं, उन्हें बेड़ी लगाकर भूखसे पीड़ित एवं सूखे तालु और ओठकी अवस्थामें वृश्चिकाशन नामक नरकमें गिराया जाता है। जो पर्वोंमें मैथुन करते तथा परस्त्री-संग करते हैं, उन पापियोंको वह्नितप्त कीलोंवाले शाल्मलिका (विवशतासे) आलिङ्गन करना पड़ता है। जो द्विज उपाध्यायको स्वयंकी अपेक्षा निम्नासनपर बैठाकर अध्ययन करता है, उन अधम द्विजों एवं उनके अध्यापकको शिरपर शिला वहन करनी पड़ती है। जो जलमें मूत्र, कफ एवं मलका त्याग करते हैं, उन्हें दुर्गन्धयुक्त विष्ठा और पीबसे पूर्ण विण्मूत्रनामक नरकमें गिराया जाता है॥ २९—३२॥

श्राद्धातिथ्यमन्योन्यं यैर्भुक्तं भुवि मानवैः। परस्परं भक्षयन्ते मांसानि स्वानि बालिशाः॥ ३३॥
वेदवह्निगुरुत्यागी भार्यापित्रोस्तथैव च। गिरिशृङ्गादधःपातं पात्यन्ते यमकिंकरैः॥ ३४॥
पुनर्भूपतयो ये च कन्याविध्वंसकाश्च ये। तद्गर्भश्राद्धभुग् यश्च कृमीन्भक्षेत्पिपीलिकाः॥ ३५॥
चाण्डालादन्त्यजाद्वापि प्रतिगृह्णाति दक्षिणाम्। याजको यजमानश्च सो श्मान्तः स्थूलकीटकः॥ ३६॥

जो इस संसारमें श्राद्धके अवसरपर अतिथिके निमित्त तैयार किये गये पदार्थको परस्पर भक्षण कर लेते हैं, उन मूर्खोंको परलोकमें एक-दूसरेका मांस खाना पड़ता है। जो वेद, अग्नि, गुरु, भार्या, पिता एवं माताका त्याग करते हैं, उन्हें यमदूत गिरिशिखरके ऊपरसे नीचे गिराते हैं। जो विधवासे विवाह कराते, अविवाहित कन्याको दूषित करते एवं उक्त प्रकारसे उत्पन्न व्यक्तियोंकी सन्तानके यहाँ श्राद्धमें भोजन करते हैं, उन्हें कृमि तथा पिपीलिकाका भक्षण करना पड़ता है। जो ब्राह्मण चाण्डाल और अन्त्यजोंसे दक्षिणा लेते हैं उन्हें उनके यजमानको पत्थरोंमें रहनेवाला स्थूल कीट बनना पड़ता है॥ ३३—३६॥

पृष्ठमांसादिनो मूढास्तथैवोत्कोचजीविनः। क्षिप्यन्ते वृकभक्षे ते नरके रजनीचर॥ ३७॥
स्वर्णस्तेयी च ब्रह्मघ्नः सुरापी गुरुतल्पगः। तथा गोभूमिहर्त्तारो गोस्त्रीबालहनाश्च ये॥ ३८॥
एते नरा द्विजा ये च गोषु विक्रयिणस्तथा। सोमविक्रयिणो ये च वेदविक्रयिणस्तथा॥ ३९॥
कूटसभ्यास्त्वशौचाश्च नित्यनैमित्तनाशकाः। कूटसाक्ष्यप्रदा ये च ते महारौरवे स्थिताः॥ ४०॥

राक्षस ! जो पीठपीछे शिकायत करते हैं—चुगली करते एवं घूस लेते हैं, उन्हें वृकभक्ष नामक नरकमें डाला जाता है । इसी प्रकार सोना चुरानेवाले, ब्रह्महत्यारे, मद्यपी, गुरुपत्नीगामी, गाय तथा भूमिकी चोरी करनेवाले एवं स्त्री तथा बालकको मारनेवाले मनुष्यों तथा गो, सोम एवं वेदका विक्रय करनेवाले, दम्भी, टेढ़ी भाषामें झूठी गवाही देनेवाले तथा पवित्रताके आचरणको छोड़ देनेवाले और नित्य एवं नैमित्तिक कर्मोंके नाश करनेवाले द्विजोंको महारौरव नामक नरकमें रहना पड़ता है ॥ ३७—४० ॥

दशवर्षसहस्राणि तावत् तामिस्रके स्थिताः । तावच्चैवान्धतामिस्रे असिपत्रवने ततः ॥ ४१ ॥
तावच्चैव घटीयन्त्रे तप्तकुम्भे ततः परम् । प्रपातो भवते तेषां यैरिदं दुष्कृतं कृतम् ॥ ४२ ॥
ये त्वेते नरका रौद्रा रौरवाद्यास्तवोदिताः । ते सर्वे क्रमशः प्रोक्ताः कृतघ्ने लोकनिन्दिते ॥ ४३ ॥

उपर्युक्त प्रकारके पापियोंको दस हजार वर्ष तामिस्र नरकमें तथा उतने ही वर्षोंतक अन्धतामिस्र और असिपत्रवन नामक नरकमें रहनेके बादमें भी—उतने ही वर्षोंतक घटीयन्त्र और तप्तकुम्भमें रहना पड़ता है । जिन भयङ्कर रौरव आदि नरकोंमें हमने तुमसे वर्णन किया है, वे सभी लोक-निन्दित कृतघ्नोंको बारी-बारीसे प्राप्त होते रहते हैं ॥ ४१—४३ ॥

यथा सुराणां प्रवरो जनार्दनो यथा गिरीणामपि शैशिराद्रिः ।
यथा युधानां प्रवरं सुदर्शनं यथा खगानां विनतातनूजः ॥
महोरगाणां प्रवरोऽप्यनन्तो यथा च भूतेषु मही प्रधाना ॥ ४४ ॥
नदीषु गङ्गा जलजेषु पद्मं सुरारिमुख्येषु हराङ्घ्रिभक्तः ।
क्षेत्रेषु यद्वत्कुरुजाङ्गलं वरं तीर्थेषु यद्वत् प्रवरं पृथूदकम् ॥ ४५ ॥
सरस्सु चैवोत्तरमानसं यथा वनेषु पुण्येषु हि नन्दनं यथा ।
लोकेषु यद्वत्सदनं विरिञ्चेः सत्यं यथा धर्मविधिक्रियासु ॥ ४६ ॥
यथाश्वमेधः प्रवरः क्रतूनां पुत्रो यथा स्पर्शवतां वरिष्ठः ।
तपोधनानामपि कुम्भयोनिः श्रुतिर्वरा यद्वदिहागमेषु ॥ ४७ ॥
मुख्यः पुराणेषु यथैव मात्स्यः स्वायंभुवोक्तिस्त्वपि संहितासु ।
मनुः स्मृतीनां प्रवरो यथैव तिथीषु दर्शो विषुवेषु दानम् ॥ ४८ ॥

जैसे देवताओंमें श्रीविष्णु, पर्वतोंमें हिमालय, अस्त्रोंमें सुदर्शन, पक्षियोंमें गरुड, महान् सर्पोंमें अनन्तनाग तथा भूतोंमें पृथ्वी श्रेष्ठ है, नदियोंमें गङ्गा, जलमें उत्पन्न होनेवालोंमें कमल, देवशत्रु दैत्योंमें महादेवके चरणोंका भक्त और क्षेत्रोंमें जैसे कुरुजाङ्गल और तीर्थोंमें पृथूदक हैं, सरोवरोंमें उत्तरमानस, पवित्र वनोंमें नन्दनवन, लोकोंमें ब्रह्मलोक, धर्म-कार्योंमें सत्य प्रधान है तथा जैसे यज्ञोंमें अश्वमेध, छूनेयोग्य (स्पर्शसुख) पदार्थोंमें पुत्र सुखदायक है; तपस्वियोंमें अगस्त्य, आगम शास्त्रोंमें वेद श्रेष्ठ है; जैसे पुराणोंमें मत्स्यपुराण, संहिताओंमें स्वायम्भुवसंहिता, स्मृतियोंमें मनुस्मृति, तिथियोंमें अमावस्या और विषुवों अर्थात् मेष और तुला राशिमें सूर्यके संक्रमण संक्रान्तिके अवसरपर दिया गया दान श्रेष्ठ होता है ॥ ४४—४८ ॥

तेजस्विनां यद्वदिहार्क उक्तो ऋक्षेषु चन्द्रो जलधिर्हृदेषु ।
भवान् यथा राक्षससत्तमेषु पाशेषु नागस्तिमितेषु बन्धः ॥

धान्येषु शालिर्द्विपदेषु विप्रः चतुष्पदे गोः श्वपदां मृगेन्द्रः।
पुष्पेषु जाती नगरेषु काञ्ची नारीषु रम्भाऽऽश्रमिणां गृहस्थः॥ ५० ॥
कुशस्थली श्रेष्ठतमा पुरेषु देशेषु सर्वेषु च मध्यदेशः।
फलेषु चूतो मुकुलेष्वशोकः सर्वौषधीनां प्रवरा च पथ्या॥ ५१ ॥
मूलेषु कन्दः प्रवरो यथोक्तो व्याधिष्वजीर्णं क्षणदाचरेन्द्र।
श्वेतेषु दुग्धं प्रवरं यथैव कार्पासिकं प्रावरणेषु यद्वत्॥ ५२ ॥

जैसे तेजस्वियोंमें सूर्य, नक्षत्रोंमें चन्द्रमा, जलाशयोंमें समुद्र, अच्छे राक्षसोंमें आप और निश्चेष्ट करनेवाले पाशोंमें नागपाश श्रेष्ठ हैं एवं जैसे धानोंमें शालि, दो पैरवालोंमें ब्राह्मण, चौपायोंमें गाय, जंगली जानवरोंमें सिंह, फूलोंमें जाती (चमेली), नगरोंमें काञ्ची, नारियोंमें रम्भा और आश्रमियोंमें गृहस्थ श्रेष्ठ हैं; जैसे सप्तपुरियोंमें द्वारका, समस्त देशोंमें मध्यदेश, फलोंमें आम, मुकुलोंमें अशोक और जड़ी-बूटियोंमें हरीतकी सर्वश्रेष्ठ है; हे निशाचर! जैसे मूलोंमें कन्द, रोगोंमें अपच, श्वेत वस्तुओंमें दुग्ध और वस्त्रोंमें रूईके कपड़े श्रेष्ठ हैं; ॥ ४९–५२ ॥

कलासु मुख्या गणितज्ञता च विज्ञानमुख्येषु यथेन्द्रजालम्।
शाकेषु मुख्या त्वपि काकमाची रसेषु मुख्यं लवणं यथैव॥ ५३ ॥
तुङ्गेषु तालो नलिनीषु पम्पा वनौकसेष्वेव च ऋक्षराजः।
महीरुहेष्वेव यथा वटश्च यथा हरो ज्ञानवतां वरिष्ठः॥ ५४ ॥
यथा सतीनां हिमवत्सुता हि यथार्जुनीनां कपिला वरिष्ठा।
यथा वृषाणामपि नीलवर्णो यथैव सर्वेष्वपि दुःसहेषु।
दुर्गेषु रौद्रेषु निशाचरेश नृपातनं वैतरणी प्रधाना॥ ५५ ॥
पापीयसां तद्वदिह कृतघ्नः सर्वेषु पापेषु निशाचरेन्द्र।
ब्रह्मघ्नगोघ्नादिषु निष्कृतिर्हि विद्येत नैवास्य तु दुष्टचारिणः।
न निष्कृतिश्चास्ति कृतघ्नवृत्तेः सुहृत्कृतं नाशयतोऽब्दकोटिभिः॥ ५६ ॥

॥ इति श्रीवामनपुराणे द्वादशोऽध्यायः ॥ १२ ॥

निशाचर! जैसे कलाओंमें गणितका जानना, विज्ञानोंमें इन्द्रजाल, शाकोंमें मकोय, रसोंमें नमक, ऊँचे पेड़ोंमें ताड़, कमल-सरोवरोंमें पंपासर, वनैले जीवोंमें भालू, वृक्षोंमें वट, ज्ञानियोंमें महादेव वरिष्ठ हैं; जैसे सतियोंमें हिमालयकी पुत्री पार्वती, गौओंमें काली गाय, बैलोंमें नील रंगका बैल, सभी दुःसह (कठिन) एवं भयंकर नरकोंमें वैतरणी नृपातन प्रधान है, उसी प्रकार हे निशाचरेन्द्र! पापियोंमें कृतघ्न प्रधानतम पापी होता है। ब्रह्महत्या एवं गोहत्या आदि पापोंकी निष्कृति तो हो जाती है, पर दुराचारी पापी एवं मित्रद्रोही कृतघ्नका करोड़ों वर्षोंमें भी निस्तार नहीं होता ॥ ५३–५६ ॥

॥ इस प्रकार श्रीवामनपुराणमें बारहवाँ अध्याय समाप्त हुआ ॥ १२ ॥

[अथ त्रयोदशोऽध्यायः]

सुकेशिरुवाच

भवद्भिरुदिता घोरा पुष्करद्वीपसंस्थितिः । जम्बूद्वीपस्य संस्थानं कथयन्तु महर्षयः ॥ १ ॥

तेरहवाँ अध्याय प्रारम्भ

(सुकेशिके प्रश्नके उत्तरमें ऋषियोंका जम्बू-द्वीपकी स्थिति और उसमें स्थित पर्वत तथा नदियोंका वर्णन)

सुकेशीने कहा—आदरणीय ऋषियो ! आपलोगोंने पुष्करद्वीपके भयंकर अवस्थानका वर्णन किया, अब आपलोग (कृपाकर) जम्बूद्वीपकी स्थितिका वर्णन करें ॥ १ ॥

ऋषय ऊचुः

जम्बूद्वीपस्य संस्थानं कथ्यमानं निशामय । नवभेदं सुविस्तीर्णं स्वर्गमोक्षफलप्रदम् ॥ २ ॥
मध्ये त्विलावृतो वर्षो भद्राश्वः पूर्वतोऽद्भुतः । पूर्वे उत्तरतश्चापि हिरण्यो राक्षसेश्वर ॥ ३ ॥
पूर्वदक्षिणतश्चापि किंनरो वर्ष उच्यते । भारतो दक्षिणे प्रोक्तो हरिर्दक्षिणपश्चिमे ॥ ४ ॥
पश्चिमे केतुमालश्च रम्यकः पश्चिमोत्तरे । उत्तरे च कुरुर्वर्षः कल्पवृक्षसमावृतः ॥ ५ ॥

ऋषियोंने कहा—राक्षसेश्वर ! (अब) तुम हमलोगोंसे जम्बूद्वीपकी स्थितिका वर्णन सुनो । यह द्वीप अत्यन्त विशाल है और नव भागोंमें विभक्त है । यह स्वर्ग एवं मोक्ष-फलको देनेवाला है । जम्बूद्वीपके बीचमें इलावृत-वर्ष, पूर्वमें अद्भुत भद्राश्ववर्ष तथा पूर्वोत्तरमें हिरण्यकवर्ष है । पूर्व-दक्षिणमें किंनरवर्ष, दक्षिणमें भारतवर्ष तथा दक्षिण-पश्चिममें हरिवर्ष बताया गया है । इसके पश्चिममें केतुमालवर्ष, पश्चिमोत्तरमें रम्यकवर्ष और उत्तरमें कल्प-वृक्षसे समावृत कुरुवर्ष है ॥ २–५ ॥

पुण्या रम्या नवैवैते वर्षाः शालकटंकट । इलावृताद्या ये चाष्टौ वर्षं मुक्त्वैव भारतम् ॥ ६ ॥
न तेष्वस्ति युगावस्था जरामृत्युभयं न च ।
तेषां स्वाभाविकी सिद्धिः सुखप्राया ह्ययत्नतः । विपर्ययो न तेष्वस्ति नोत्तमाधममध्यमाः ॥ ७ ॥
यदेतद् भारतं वर्षं नवद्वीपं निशाचर । सागरान्तरिताः सर्वे अगम्याश्च परस्परम् ॥ ८ ॥
इन्द्रद्वीपः कसेरुमांस्ताम्रवर्णो गभस्तिमान् । नागद्वीपः कटाहश्च सिंहलो वारुणस्तथा ॥ ९ ॥
अयं तु नवमस्तेषां द्वीपः सागरसंवृतः । कुमाराख्यः परिख्यातो द्वीपोऽयं दक्षिणोत्तरः ॥ १० ॥

सुकेशि ! ये नव पवित्र और रमणीय वर्ष हैं । भारतवर्षके अतिरिक्त इलावृतादि आठ वर्षोंमें युगावस्था तथा जरामृत्युका भय नहीं होता । उन वर्षोंमें बिना प्रयत्नके स्वभावतः बड़ी-बड़ी सिद्धियाँ मिलती हैं । उनमें उत्तम, मध्यम, अधम आदि किसी प्रकारका कोई भेद नहीं है । निशाचर ! इस भारतवर्षके भी नव उपद्वीप हैं । ये सभी द्वीप समुद्रासे घिरे हैं और परस्पर अगम्य हैं । भारतवर्षके नव उपद्वीपोंके नाम इस प्रकार हैं—इन्द्रद्वीप, कसेरुमान्, ताम्रवर्ण, गभस्तिमान्, नागद्वीप, कटाह, सिंहल और वारुण । नवाँ मुख्य यह कुमारद्वीप भारत-सागरसे लगा हुआ दक्षिणसे उत्तरकी ओर फैला है । ॥ ६–१० ॥

पूर्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः । आन्ध्रा दक्षिणतो वीर तुरुष्कास्त्वपि चोत्तरे ॥ ११ ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्तरवासिनः । इज्यायुद्धवणिज्याद्यैः कर्मभिः कृतपावनाः ॥ १२ ॥
तेषां संव्यवहारश्च एभिः कर्मभिरिष्यते । स्वर्गापवर्गप्राप्तिश्च पुण्यं पापं तथैव च ॥ १३ ॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः ॥ १४ ॥

वीर ! भारतवर्षके पूर्वकी सीमापर किरात, पश्चिममें यवन, दक्षिणमें आन्ध्र तथा उत्तरमें तुरुष्कलोग निवास करते हैं। इसके बीचमें ब्राह्मण, क्षत्रिय, वैश्य एवं शूद्रलोग रहते हैं। यज्ञ, युद्ध एवं वाणिज्य आदि कर्मोंके द्वारा वे सभी पवित्र हो गये हैं। उनका व्यवहार, स्वर्ग और अपवर्ग- (मोक्ष-) की प्राप्ति तथा पाप एवं पुण्य इन्हीं (यज्ञादि) कर्मोंद्वारा होते हैं। इस वर्षमें महेन्द्र, मलय, सह्य, शुक्तिमान्, ऋक्ष, विन्ध्य एवं पारियात्र नामवाले सात मुख्य कुल पर्वत हैं ॥ ११–१४ ॥

तथान्ये शतसाहस्रा भूधरा मध्यवासिनः । विस्तारोच्छ्रायिणो रम्या विपुलाः शुभसानवः ॥ १५ ॥
कोलाहलः स वैभ्राजो मन्दरो दर्दुराचलः । वातंधमो वैद्युतश्च मैनाकः सरसस्तथा ॥ १६ ॥
तुङ्गप्रस्थो नागगिरिस्तथा गोवर्धनाचलः । उज्जायनः पुष्पगिरिरर्बुदो रैवतस्तथा ॥ १७ ॥
ऋष्यमूकः सगोमन्तश्चित्रकूटः कृतस्मरः । श्रीपर्वतः कोङ्कणश्च शतशोऽन्येऽपि पर्वताः ॥ १८ ॥

इसके मध्यमें अन्य लाखों पर्वत हैं जो अत्यन्त विस्तृत, उत्तुङ्ग (ऊँचे) रम्य एवं सुन्दर शिखरोंसे सुशोभित हैं। यहाँ कोलाहल, वैभ्राज, मन्दार गिरि, दर्दुर, वातंधम, वैद्युत, मैनाक, सरस, तुङ्गप्रस्थ, नागगिरि, गोवर्धन, उज्जयन्त (गिरनार), पुष्पगिरि, अर्बुद (आबू), रैवत, ऋष्यमूक, गोमन्त (गोवाका पर्वत), चित्रकूट, कृतस्मर, श्रीपर्वत, कोङ्कण तथा अन्य सैकड़ों पर्वत भी विराज रहे हैं ॥ १५–१८ ॥

तैर्विमिश्रा जनपदा म्लेच्छा आर्याश्च भागशः । तैः पीयन्ते सरिच्छ्रेष्ठा यास्ताः सम्यङ्निशामय ॥ १९ ॥
सरस्वती पञ्चरूपा कालिन्दी सहिरण्वती । शतद्रुश्चन्द्रिका नीला वितस्तैरावती कुहूः ॥ २० ॥
मधुरा देविका चैव उशीरा धातकी रसा । गोमती धूतपापा च बाहुदा सदृषद्वती ॥ २१ ॥
निश्चीरा गण्डकी चित्रा कौशिकी च वधूसरा । सरयूश्च सलौहित्या हिमवत्पादनिःसृताः ॥ २२ ॥

उनसे संयुक्त आर्यों और म्लेच्छोंके विभागोंके अनुसार जनपद हैं। यहाँके निवासी जिन उत्तम नदियोंके जल पीते हैं उनका वर्णन भलीभाँति सुनो। पाँच रूपवाली सरस्वती, यमुना, हिरण्वती, सतलज, चन्द्रिका, नीला, वितस्ता, ऐरावती, कुहू, मधुरा, देविका, उशीरा, धातकी, रसा, गोमती, धूतपापा, बाहुदा, दृषद्वती, निश्चीरा, गण्डकी, चित्रा, कौशिकी, वधूसरा, सरयू तथा लौहित्या—ये नदियाँ हिमालयकी तलहटीसे निकली हैं ॥ १९–२२ ॥

वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च । पर्णाशा नन्दिनी चैव पावनी च मही तथा ॥ २३ ॥
पारा चर्मण्वती लूपी विदिशा वेणुमत्यपि । सिप्रा ह्यवन्ती च तथा पारियात्राश्रयाः स्मृताः ॥ २४ ॥
शोणो महानदश्चैव नर्मदा सुरसा कृपा । मन्दाकिनी दशार्णा च चित्रकूटापवाहिका ॥ २५ ॥
चित्रोत्पला वै तमसा करमोदा पिशाचिका । तथान्या पिप्पलश्रोणी विपाशा वञ्जुलावती ॥ २६ ॥
सत्सन्तजा शुक्तिमती मञ्जिष्ठा कृत्तिमा वसुः । ऋक्षपादप्रसूता च तथान्या बालुवाहिनी ॥ २७ ॥

वेदस्मृति, वेदवती, वृत्रघ्नी, सिन्धु, पर्णाशा, नन्दिनी, पावनी, मही, पारा, चर्मण्वती, लूपी, विदिशा, वेणुमती, सिप्रा तथा अवन्ती—ये नदियाँ पारियात्र पर्वतसे निकली हुई हैं। महानद शोण, नर्मदा, सुरसा, कृपा, मन्दाकिनी, दशार्णा, चित्रकूटा, अपवाहिका, चित्रोत्पला, तमसा, करमोदा, पिशाचिका, पिप्पलश्रोणी, विपाशा, वञ्जुलावती, सत्सन्तजा, शुक्तिमती, मञ्जिष्ठा, कृत्तिमा, वसु और बालुवाहिनी—ये नदियाँ तथा दूसरी जो बालुका बहानेवाली हैं, ऋक्षपर्वतकी तलहटीसे निकली हुई हैं ॥ २३–२७ ॥

शिवा पयोष्णी निर्विन्ध्या तापी सनिषधावती । वेणा वैतरणी चैव सिनीबाहुः कुमुद्वती ॥ २८ ॥
तोया चैव महागौरी दुर्गन्धा वाशिला तथा । विन्ध्यपादप्रसूताश्च नद्यः पुण्यजलाः शुभाः ॥ २९ ॥

गोदावरी भीमरथी कृष्णा वेणा सरस्वती। तुङ्गभद्रा सुप्रयोगा वाह्या कावेरिरेव च ॥ ३० ॥
दुग्धोदा नलिनी रेवा वारिसेना कलस्वना। एतास्त्वपि महानद्यः सह्यपादविनिर्गताः ॥ ३१ ॥

शिप्रा, पयोष्णी (पैनगंगा), निर्विन्ध्या (कालीसिंध), तापी, निषधावती, वेणा, वैतरणी, सिनीवाली, कुमुद्वती, तोया, महागौरी, दुर्गन्धा तथा वाशिला—ये पवित्र जलवाली कल्याणकारिणी नदियाँ विन्ध्यपर्वतसे निकली हुई हैं। गोदावरी, भीमरथी, कृष्णा, वेणा, सरस्वती, तुङ्गभद्रा, सुप्रयोगा, वाह्या, कावेरी, दुग्धोदा, नलिनी, रेवा (नर्मदा), वारिसेना तथा कलस्वना—ये महानदियाँ सह्यपर्वतके पाद-(नीचे)से निकली हैं ॥२८-३१॥

कृतमाला ताम्रपर्णी वञ्जुला चोत्पलावती। सिनी चैव सुदामा च शुक्तिमत्प्रभवास्त्विमाः ॥ ३२ ॥
सर्वाः पुण्याः सरस्वत्यः पापप्रशमनास्तथा। जगतो मातरः सर्वाः सर्वाः सागरयोषितः ॥ ३३ ॥
अन्याः सहस्रशश्चान्याः क्षुद्रनद्यो हि राक्षस। सदाकालवहाश्चान्याः प्रावृट्कालवहास्तथा।
उदङ्मध्योद्भवा देशाः पिबन्ति स्वेच्छया शुभाः ॥ ३४ ॥
मत्स्याः कुशट्टाः कुणिकुण्डलाश्च पाञ्चालकाश्याः सह कोसलाभिः ॥ ३५ ॥
वृकाः शबरकौवीराः सभूलिङ्गा जनास्त्विमे। शकाश्चैव समशका मध्यदेश्या जनास्त्विमे ॥ ३६ ॥

कृतमाला, ताम्रपर्णी, वञ्जुला, उत्पलावती, सिनी तथा सुदामा—ये नदियाँ शुक्तिमान् पर्वतसे निकली हुई हैं। ये सभी नदियाँ पवित्र, पापोंका प्रशमन करनेवाली, जगत्‌की माताएँ तथा सागरकी पत्नियाँ हैं। राक्षस[1]! इनके अतिरिक्त भारतमें अन्य हजारों छोटी नदियाँ भी बहती हैं। इनमें कुछ तो सदैव प्रवाहित होनेवाली हैं। उत्तर एवं मध्यके देशोंके निवासी इन पवित्र नदियोंके जलको स्वेच्छया पान करते हैं। मत्स्य, कुशट्ट, कुणि, कुण्डल, पाञ्चाल, काशी, कोसल, वृक, शबर, कौवीर, भूलिङ्ग, शक तथा मशक-जातियोंके मनुष्य मध्यदेशमें रहते हैं ॥ ३२-३६ ॥

वाह्लीका वाटधानाश्च आभीराः कालतोयकाः। अपरान्तास्तथा शूद्राः पह्लवाश्च सखेटकाः ॥ ३७ ॥
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः। शातद्रवा ललित्थाश्च पारावतसमूषकाः ॥ ३८ ॥
माठरोदकधाराश्च कैकेया दशमास्तथा। क्षत्रियाः प्रातिवैश्याश्च वैश्यशूद्रकुलानि च ॥ ३९ ॥
काम्बोजा दरदाश्चैव बर्बरा ह्यङ्गलौकिकाः। चीनाश्चैव तुषाराश्च बहुधा बाह्यतोदराः ॥ ४० ॥
आत्रेयाः सभरद्वाजाः प्रस्थलाश्च दशेरकाः। लम्पकास्तावका रामाः शूलिकास्तङ्गणैः सह ॥ ४१ ॥
औरसाश्चालिमद्राश्च किरातानां च जातयः। तामसाः क्रममासाश्च सुपार्श्वाः पुण्ड्रकास्तथा ॥ ४२ ॥
कुलूताः कुहुका ऊर्णास्तूर्णीपादाः सकुक्कुटाः। माण्डव्या मालवीयाश्च उत्तरापथवासिनः ॥ ४३ ॥

वाह्लीक, वाटधान, आभीर, कालतोयक, अपरान्त, शूद्र, पह्लव, खेटक, गान्धार, यवन, सिन्धु, सौवीर, मद्रक, शातद्रव, ललित्थ, पारावत, मूषक, माठर, उदकधार, कैकेय, दशम, क्षत्रिय, प्रातिवैश्य तथा वैश्य एवं शूद्रोंके कुल, काम्बोज, दरद, बर्बर, अङ्गलौकिक, चीन, तुषार, बहुधा, बाह्यतोदर, आत्रेय, भरद्वाज, प्रस्थल, दशेरक, लम्पक, तावक, राम, शूलिक, तङ्गण, औरस, अलिमद्र, किरातोंकी जातियाँ, तामस, क्रममास, सुपार्श्व, पुण्ड्रक, कुलूत, कुहुक, ऊर्ण, तूर्णीपाद, कुक्कुट, माण्डव्य एवं मालवीय—ये जातियाँ उत्तर भारतमें निवास करती हैं ॥ ३७-४३ ॥

१—मनुस्मृति (८ । ४१) में भी जाति जनपदादि धर्म मान्य हैं। इन्हें विस्तारसे समझनेके लिए [illegible] आदि देखना चाहिये।

अङ्गा वङ्गा मुद्गरकास्त्वन्तर्गिरिबहिर्गिराः । तथा प्रवङ्गा वाङ्गेया मांसादा बलदन्तिकाः ॥ ४४ ॥
ब्रह्मोत्तराः प्राविजया भार्गवाः केशबर्बराः । प्राग्ज्योतिषाश्च शूद्राश्च विदेहास्ताम्रलिप्तकाः ॥ ४५ ॥
माला मगधगोनन्दाः प्राच्या जनपदास्त्विमे । पुण्ड्राश्च केरलाश्चैव चौडाः कुल्याश्च राक्षस ॥ ४६ ॥
जातुषा मूषिकादाश्च कुमारादा महाशकाः । महाराष्ट्रा माहिषिकाः कालिङ्गाश्चैव सर्वशः ॥ ४७ ॥
आभीराः सह नैषीका आरण्याः शबराश्च ये । बलिन्ध्या विन्ध्यमौलेया वैदर्भा दण्डकैः सह ॥ ४८ ॥
पौरिकाः सौशिकाश्चैव अश्मका भोगवर्धनाः । वैषिकाः कुन्दला अन्ध्रा उद्भिदा नलकारकाः ।
दाक्षिणात्या जनपदास्त्विमे शालकटङ्कट ॥ ४९ ॥

अङ्ग (भागलपुर), वंग एवं मुद्गरव (मुंगेर), अन्तर्गिरि, बहिर्गिर, प्रवङ्ग, वाङ्गेय, मांसाद, बलदन्तिक, ब्रह्मोत्तर, प्राविजय, भार्गव, केशवर्बर, प्राग्ज्योतिष, शूद्र, विदेह, ताम्रलिप्तक, माला, मगध एवं गोनन्द—ये पूर्वके जनपद हैं । हे राक्षस ! हे शालकटंकट ! पुण्ड्र, केरल, चौड, कुल्य, जातुष, मूषिकाद, कुमाराद, महाशक, महाराष्ट्र, माहिषिक, कालिङ्ग (उड़ीसा) आभीर, नैषीक, आरण्य, शबर, बलिन्ध्य, विन्ध्यमौलेय, वैदर्भ, दण्डक, पौरिक, सौशिक, अश्मक, भोगवर्धन, वैषिक, कुन्दल, अन्ध्र, उद्भिद एवं नलकारक—ये दक्षिणके जनपद हैं ॥ ४४–४९ ॥

शूर्पारका कारिवना दुर्गास्तालीकटैः सह । पुलीयाः ससिनीलाश्च तापसास्तामसास्तथा ॥ ५० ॥
कारस्करास्तु रमिनो नासिक्यान्तरनर्मदाः । भारुकच्छाः समाहेयाः सह सारस्वतैरपि ॥ ५१ ॥
वात्सेयाश्च सुराष्ट्राश्च आवन्त्याश्चार्बुदैः सह । इत्येते पश्चिमामाशां स्थिता जानपदा जनाः ॥ ५२ ॥
कारुषाश्चैकलव्याश्च मेकलाश्चोत्कलैः सह । उत्तमर्णा दशार्णाश्च भोजाः किकवरैः सह ॥ ५३ ॥
तोशला कोशलाश्चैव त्रैपुराश्चैल्लिकास्तथा । तुरुसास्तुम्बराश्चैव वहनाः नैषधैः सह ॥ ५४ ॥
अनूपास्तुण्डिकेराश्च वीतहोत्रास्त्ववन्तयः । सुकेशे विन्ध्यमूलस्थास्त्विमे जनपदाः स्मृताः ॥ ५५ ॥

सुकेशि ! शूर्पारक (बम्बईका क्षेत्र), कारिवन, दुर्ग, तालीकट, पुलीय, ससिनील, तापस, तामस, कारस्कर, रमी, नासिक्य, अन्तर, नर्मद, भारकच्छ, माहेय, सारस्वत, वात्सेय, सुराष्ट्र, आवन्त्य एवं अर्बुद—ये पश्चिम दिशामें स्थित जनपदोंके निवासी हैं । कारुष, एकलव्य, मेकल, उत्कल, उत्तमर्ण, दशार्ण, भोज, किंकवर, तोशल, कोशल, त्रैपुर, ऐल्लिक, तुरुस, तुम्बर, वहन, नैषध, अनूप, तुण्डिकेर, वीतहोत्र एवं अवन्ती—ये सभी जनपद विन्ध्याचलके मूलमें (उपत्यका—तराईमें) स्थित हैं ॥ ५०–५५ ॥

अथो देशान् प्रवक्ष्यामः पर्वताश्रयिणस्तु ये । निराहारा हंसमार्गाः कुपथास्तङ्गणाः खशाः ॥ ५६ ॥
कुथप्रावरणाश्चैव ऊर्णाः पुण्याः सहूहुकाः । त्रिगर्ताश्च किराताश्च तोमराः शिशिराद्रिकाः ॥ ५७ ॥
इमे तवोक्ता विषयाः सुविस्तराद् द्वीपे कुमारे रजनीचरेश ।
एतेषु देशेषु च देशधर्मान् संकीर्त्यमानाञ्छृणु तत्त्वतो हि ॥ ५८ ॥

॥ इति श्रीवामनपुराणे त्रयोदशोऽध्यायः ॥ १३ ॥

अच्छा, अब हम पर्वताश्रित प्रदेशोंके नामोंका वर्णन करेंगे । उनके नाम इस प्रकार हैं—निराहार, हंसमार्ग, कुपथ, तंगण, खश, कुथप्रावरण, ऊर्ण, पुण्य, हूहुक, त्रिगर्त, किरात, तोमर एवं शिशिराद्रिक । निशाचर ! तुमसे कुमारद्वीपके इन देशोंका विस्तारसे हमलोगोंने वर्णन किया । अब हम इन देशोंमें वर्तमान देश-धर्मोंका यथार्थतः वर्णन करेंगे, उसे सुनो ॥ ५६–५८ ॥

॥ इस प्रकार श्रीवामनपुराणमें तेरहवाँ अध्याय समाप्त हुआ ॥ १३ ॥

[अथ चतुर्दशोऽध्यायः]

ऋषय ऊचुः

अहिंसा सत्यमस्तेयं दानं क्षान्तिर्दमः शमः । अकार्पण्यं च शौचं च तपश्च रजनीचर ॥ १ ॥
दशाङ्गो राक्षसश्रेष्ठ धर्मोऽसौ सार्ववर्णिकः । ब्राह्मणस्यापि विहिता चातुराश्रम्यकल्पना ॥ २ ॥

चौदहवाँ अध्याय प्रारम्भ

(दशाङ्ग धर्म, आश्रम-धर्म और सदाचार-स्वरूपका वर्णन)

ऋषिगण बोले—राक्षसश्रेष्ठ ! अहिंसा, सत्य, अस्तेय (चोरी न करना), दान, क्षमा, दम (इन्द्रिय-निग्रह), शम, अकार्पण्य, शौच एवं तप—धर्मके ये दसों अङ्ग सभी वर्णोंके लिये उपदिष्ट हैं । ब्राह्मणोंके लिये तो चार आश्रमोंका और भी विधान विहित किया गया है ॥ १–२ ॥

सुकेशिरुवाच

विप्राणां चातुराश्रम्यं विस्तरान्मे तपोधनाः । आचक्षध्वं न मे तृप्तिः शृण्वतः प्रतिपद्यते ॥ ३ ॥

सुकेशि बोला—तपोधनो ! ब्राह्मणोंके लिये विहित चारों आश्रमोंके नियम आदिको आपलोग विस्तारसे कहें । मुझे इसे सुनते हुए तृप्ति नहीं हो रही है—मैं और भी सुनना चाहता हूँ ॥ ३ ॥

ऋषय ऊचुः

कृतोपनयनः सम्यग् ब्रह्मचारी गुरौ वसेत् । तत्र धर्मोऽस्य यस्तं च कथ्यमानं निशामय ॥ ४ ॥
स्वाध्यायोऽथाग्निशुश्रूषा स्नानं भिक्षाटनं तथा । गुरोर्निवेद्य तच्चाद्यमनुज्ञातेन सर्वदा ॥ ५ ॥
गुरोः कर्मणि सोद्योगः सम्यक्प्रीत्युपपादनम् । तेनाहूतः पठेच्चैव तत्परो नान्यमानसः ॥ ६ ॥
एकं द्वौ सकलान् वापि वेदान् प्राप्य गुरोर्मुखात् । अनुज्ञातो वरं दत्त्वा गुरवे दक्षिणां ततः ॥ ७ ॥
गार्हस्थ्याश्रमकामस्तु गार्हस्थ्याश्रममावसेत् । वानप्रस्थाश्रमं वाऽपि चतुर्थं स्वेच्छयात्मनः ॥ ८ ॥

ऋषिगण बोले—सुकेशि ! ब्रह्मचारी ब्राह्मण भलीभाँति उपनयन-संस्कार कराकर गुरुके गृहपर निवास करे । वहाँके जो कर्तव्य हैं, उन्हें बतलाया जा रहा है, तुम उन्हें सुनो । उनके कर्तव्य हैं—स्वाध्याय, दैनिक हवन, स्नान, भिक्षा माँगना और उसे गुरुको निवेदित करके तथा उनसे आज्ञा प्राप्त कर भोजन करना, गुरुके कार्य-हेतु उद्यत रहना, सम्यक् रूपसे गुरुमें भक्ति रखना, उनके बुलानेपर तत्पर एवं एकाग्रचित्त होकर पढ़ना (—ये ब्राह्मण ब्रह्मचारीके धर्म हैं) । गुरुके मुखसे एक, दो या सभी वेदोंका अध्ययन कर गुरुको धन तथा दक्षिणा देकरके उनसे आज्ञा प्राप्त कर गृहस्थाश्रममें जानेका इच्छुक (शिष्य) गृहस्थ आश्रममें प्रवेश करे अथवा अपनी इच्छाके अनुसार वानप्रस्थ या संन्यासका अवलम्बन करे ॥ ४–८ ॥

तत्रैव वा गुरोर्गेहे द्विजो निष्ठामवाप्नुयात् । गुरोरभावे तत्पुत्रे तच्छिष्ये तत्सुतं विना ॥ ९ ॥
शुश्रूषन् निरभिमानो ब्रह्मचर्याश्रमं वसेत् । एवं जयति मृत्युं स द्विजः पालकटङ्कट ॥ १० ॥
उपावृत्तस्ततस्तस्माद् गृहस्थाश्रमकाम्यया । असमानर्षिकुलजां कन्यामुद्वहेद् निशाचर ॥ ११ ॥
स्वकर्मणा धनं लब्ध्वा पितृदेवातिथीनपि । सम्यक् संप्रीणयेद् भक्त्या सदाचाररतो द्विजः ॥ १२ ॥

अथवा ब्राह्मण ब्रह्मचारी वहीं गुरुके घरमें ब्रह्मचर्यकी निष्ठा प्राप्त करे अर्थात् जीवनपर्यन्त ब्रह्मचारी [illegible] । गुरुके अभावमें उनके पुत्र एवं पुत्र न हो तो उनके शिष्यके समीप निवास करे । राक्षस सुकेशि ! अभि[illegible] अथ

करते हुए ब्रह्मचर्याश्रममें रहे। इस प्रकार अनुष्ठान करनेवाला द्विज मृत्युको जीत लेता है। हे निशाचर! वहाँकी अवधि समाप्त कर ब्रह्मचारी द्विज गृहस्थाश्रमकी कामनासे अपने गोत्रसे भिन्न गोत्रके ऋषिवाले कुलमें उत्पन्न कन्यासे विवाह करे। सदाचारमें रत द्विज अपने नियत कर्मद्वारा धनोपार्जनकर पितरों, देवों एवं अतिथियोंको अपनी भक्तिसे अच्छी तरह तृप्त करे॥ ९-१२॥

सुकेशिरुवाच

सदाचारो निगदितो युष्माभिर्मम सुव्रताः। लक्षणं श्रोतुमिच्छामि कथयध्वं तमद्य मे॥ १३॥

(ब्रह्मचारी ब्राह्मणके नियमोंको सुननेके बाद) सुकेशिने कहा—श्रेष्ठ व्रतवाले ऋषियो! आपलोगोंने मुझसे इसके पूर्व सदाचारका वर्णन किया है। सदाचारका लक्षण क्या है? अब मैं उसे सुनना चाहता हूँ। कृपया मुझसे उसका वर्णन करें॥ १३॥

ऋषय ऊचुः

सदाचारो निगदितस्तव योऽस्माभिरादरात्। लक्षणं तस्य वक्ष्यामस्तच्छृणुष्व निशाचर॥ १४॥
गृहस्थेन सदा कार्यमाचारपरिपालनम्। न ह्याचारविहीनस्य भद्रमत्र परत्र च॥ १५॥
यज्ञदानतपांसीह पुरुषस्य न भूतये। भवन्ति यः समुल्लङ्घ्य सदाचारं प्रवर्तते॥ १६॥
दुराचारो हि पुरुषो नेह नामुत्र नन्दते। कार्यो यत्नः सदाचारे आचारो हन्त्यलक्षणम्॥ १७॥

ऋषियोंने कहा—राक्षस! हमलोगोंने तुमसे श्रद्धापूर्वक जिस सदाचारका वर्णन किया है, उसका (अब) लक्षण बतलाते हैं; तुम उसे सुनो। गृहस्थको आचारका सदा पालन करना चाहिये। आचारहीन व्यक्तिका इस लोक और परलोकमें कल्याण नहीं होता है। सदाचारका उल्लङ्घन कर लोक-व्यवहार तथा शास्त्र-व्यवहार करनेवाले पुरुषके यज्ञ, दान एवं तप कल्याणकर नहीं होते। दुराचारी पुरुष इस लोक तथा परलोकमें सुख नहीं पाता। अतः आचार-पालनमें सदा तत्पर रहना चाहिये। आचार दुर्लक्षणोंको नष्ट कर देता है॥ १४-१७॥

तस्य स्वरूपं वक्ष्यामः सदाचारस्य राक्षस। शृणुष्वैकमनास्तच्च यदि श्रेयोऽभिवाञ्छसि॥ १८॥
धर्मोऽस्य मूलं धनमस्य शाखा पुष्पं च कामः फलमस्य मोक्षः।
असौ सदाचारतरुः सुकेशिन् संसेवितो येन स पुण्यभोक्ता॥ १९॥
ब्राह्मे मुहूर्ते प्रथमं विबुध्येदनुस्मरेद् देववरान् महर्षीन्।
प्राभातिकं मङ्गलमेव वाच्यं यदुक्तवान् देवपतिस्त्रिनेत्रः॥ २०॥

राक्षस! हम उस (पूर्व) सदाचारका स्वरूप कहते हैं। यदि तुम कल्याण चाहते हो तो एकाग्रचित्त होकर उसे सुनो। सुकेशिन्! सदाचारका मूल धर्म है, धन इसकी शाखा है, काम (मनोरथ) इसका पुष्प है एवं मोक्ष इसका फल है—ऐसे सदाचाररूपी वृक्षका जो सेवन करता है, वह पुण्यभोगी बन जाता है। मनुष्योंको ब्राह्ममुहूर्तमें उठकर सर्वप्रथम श्रेष्ठ देवों एवं महर्षियोंका स्मरण करना चाहिये तथा देवाधिदेव महादेवद्वारा कथित प्रभात-कालीन मङ्गलस्तोत्रका पाठ करना चाहिये॥ १८-२०॥

सुकेशिरुवाच

किं तदुक्तं सुप्रभातं शंकरेण महात्मना। प्रभाते यत् पठन्मर्त्यो मुच्यते पापबन्धनात्॥ २१॥

सुकेशिने पूछा—ऋषियो! महादेव शंकरने कौन-सा 'सुप्रभात' कहा है कि जिसका प्रातःकाल पाठ करनेसे मनुष्य पाप-बन्धनसे मुक्त हो जाता है?॥ २१॥

ऋषय ऊचुः

श्रूयतां राक्षसश्रेष्ठ सुप्रभातं हरोदितम्। श्रुत्वा स्मृत्वा पठित्वा च सर्वपापैः प्रमुच्यते॥ २२॥

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च।
गुरुश्च शुक्रः सह भानुजेन कुर्वन्तु सर्वे मम सुप्रभातम्॥ २३॥
भृगुर्वसिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहः सगौतमः।
रैभ्यो मरीचिश्च्यवनो ऋभुश्च कुर्वन्तु सर्वे मम सुप्रभातम्॥ २४॥
सनत्कुमारः सनकः सनन्दनः सनातनोऽप्यासुरिपिङ्गलौ च।
सप्त स्वराः सप्त रसातलाश्च कुर्वन्तु सर्वे मम सुप्रभातम्॥ २५॥

ऋषिगण बोले—राक्षसश्रेष्ठ! महादेवजीद्वारा वर्णित 'सुप्रभात'स्तोत्रको सुनो। इसको सुनने, स्मरण करने और पढ़नेसे मनुष्य सभी पापोंसे मुक्त हो जाता है। (स्तुति इस प्रकार है—) 'ब्रह्मा, विष्णु, शङ्कर ये देवता तथा सूर्य, चन्द्रमा, मङ्गल, बुध, बृहस्पति, शुक्र और शनैश्चर ये ग्रह—सभी मेरे प्रातःकालको मङ्गलमय बनायें। भृगु, वसिष्ठ, क्रतु, अङ्गिरा, मनु, पुलस्त्य, पुलह, गौतम, रैभ्य, मरीचि, च्यवन तथा ऋभु—ये सभी (ऋषि) मेरे प्रातःकालको मङ्गलमय बनायें। सनत्कुमार, सनक, सनन्दन, सनातन, आसुरि, पिङ्गल, सातों स्वर एवं सातों रसातल—ये सभी मेरे प्रातःकालको मङ्गलमय बनायें॥ २२—२५॥

पृथ्वी सगन्धा सरसास्तथापः स्पर्शश्च वायुर्ज्वलनः सतेजाः।
नभः सशब्दं महता सहैव यच्छन्तु सर्वे मम सुप्रभातम्॥ २६॥
सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवराश्च सप्त।
भूरादि कृत्वा भुवनानि सप्त ददन्तु सर्वे मम सुप्रभातम्॥ २७॥
इत्थं प्रभाते परमं पवित्रं पठेत् स्मरेद्वा शृणुयाच्च भक्त्या।
दुःस्वप्ननाशोऽनघ सुप्रभातं भवेच्च सत्यं भगवत्प्रसादात्॥ २८॥
ततः समुत्थाय विचिन्तयेत धर्मं तथार्थं च विहाय शय्याम्।
उत्थाय पश्चाद्धरिरित्युदीर्य गच्छेत् तदोत्सर्गविधिं हि कर्तुम्॥ २९॥

गन्धगुणवाली पृथ्वी, रसगुणवाला जल, स्पर्शगुणवाली वायु, तेजोगुणवाली अग्नि, शब्दगुणवाला आकाश एवं महत्तत्त्व—ये सभी मेरे प्रातःकालको मङ्गलमय बनायें। सातों समुद्र, सातों कुलपर्वत, सप्तर्षि, सातों श्रेष्ठ द्वीप और भू आदि सातों लोक—ये सभी प्रभातकालमें मुझे मङ्गल प्रदान करें।' इस प्रकार प्रातःकालमें परम पवित्र सुप्रभात-स्तोत्रको भक्तिपूर्वक पढ़े, स्मरण करे अथवा सुने। निष्पाप! ऐसा करनेसे भगवान्की कृपासे निश्चय ही उसके दुःस्वप्नका नाश होता है तथा सुन्दर प्रभात होता है। इसके बाद उठकर धर्म तथा अर्थके विषयमें चिन्तन करे और शय्या-त्याग करनेके बाद 'हरि'का नाम लेकर उत्सर्ग-विधि (शौच आदि) करनेके लिये जाय॥ २६-२९॥

न देवगोब्राह्मणवह्निमार्गे न राजमार्गे न चतुष्पथे च।
कुर्यादथोत्सर्गमपीह गोष्ठे पूर्वापरां चैव समाश्रितो गाम्॥ ३०॥
ततस्तु शौचार्थमुपाहरेन्मृदं गुदे त्रयं पाणितले च सप्त।
तथोभयोः पञ्च चतुस्तथैकां लिङ्गे तथैकां मृदमाहरेत॥ ३१॥
नान्तर्जलाद्राक्षस मूषिकस्थलात् शौचावशिष्टा शरणात् तथान्या।
वल्मीकमृच्चापि हि शौचनाय ग्राह्या सदाचारविदा नरेण॥ ३२॥
उदङ्मुखः प्राङ्मुखो वापि विद्वान् प्रक्षाल्य पादौ भुवि संनिविष्टः।
समाचमेदद्भिरफेनिलाभिरादौ परिमृज्य मुखं द्विरद्भिः॥ ३३॥

मल-त्याग देवता, गौ, ब्राह्मण और अग्निके मार्ग, राजपथ (सड़क) और चौराहेपर, गोशालामें तथा पूर्व या पश्चिम दिशाकी ओर मुख करके न करे। मलत्यागके बाद फिर शुद्धिके लिये मिट्टी ग्रहण करे और मलद्वारमें तीन बार, बाएँ हाथमें सात बार तथा दोनों हाथोंमें दस बार एवं लिङ्गमें एक बार मिट्टी लगाये। राक्षस! सदाचार जाननेवाले मनुष्यको जलके भीतरसे, चूहेकी बिलसे, दूसरोंके शौचसे बची हुई एवं गृहसे मिट्टी नहीं लेनी चाहिये। दीमककी बाँबीसे भी शुद्धिके लिये मिट्टी नहीं लेनी चाहिये। विद्वान् पुरुष पैर धोनेके पश्चात् उत्तर या पूर्वमुख बैठकर फेन-रहित जलसे पहले मुखको दो बार धोये; फिर धोनेके बाद आचमन करे ॥ ३०—३३ ॥

ततः स्पृशेत्खानि शिरः करेण संध्यामुपासीत ततः क्रमेण।
केशांस्तु संशोध्य च दन्तधावनं कृत्वा तथा दर्पणदर्शनं च ॥ ३४ ॥
कृत्वा शिरःस्नानमथाङ्गिकं वा संपूज्य तोयेन पितॄन् सदेवान्।
होमं च कृत्वालभनं शुभानां कृत्वा बहिर्निर्गमनं प्रशस्तम् ॥ ३५ ॥
दूर्वादधिसर्पिरथोदकुम्भं धेनुं सवत्सां वृषभं सुवर्णम्।
मृद्गोमयं स्वस्तिकमक्षतानि लाजामधु ब्राह्मणकन्यकां च ॥ ३६ ॥
श्वेतानि पुष्पाण्यथ शोभनानि हुताशनं चन्दनमर्कबिम्बम्।
अश्वत्थवृक्षं च समालभेत ततस्तु कुर्यान्निजजातिधर्मम् ॥ ३७ ॥

आचमन करनेके बाद अपनी इन्द्रियों तथा सिरको हाथसे स्पर्श कर क्रमशः केश-संशोधन, दन्तधावन एवं दर्पण-दर्शन कर संध्योपासन करे। शिरःस्नान (सिरसे पैरतक स्नान) अथवा अर्धस्नान कर पितरों एवं देवताओंका जलसे पूजन करनेके पश्चात् हवन एवं माङ्गलिक वस्तुओंका स्पर्श कर बाहर निकलना प्रशस्त होता है। दूर्वा, दधि, घृत, जलपूर्ण कलश, बछड़ेके साथ गाय, बैल, सुवर्ण, मिट्टी, गोबर, स्वस्तिक चिह्न, अक्षत, लाजा, मधुका स्पर्श करे और ब्राह्मणकी कन्या एवं सूर्यबिम्बका दर्शन करे तथा सुन्दर श्वेतपुष्प, अग्नि, चन्दनका दर्शन कर अश्वत्थ (पीपल) वृक्षका स्पर्श करनेके बाद अपने जाति-धर्म (अपने वर्णके लिये नियतकर्म) का पालन करे ॥ ३४—३७ ॥

देशानुशिष्टं कुलधर्ममग्र्यं स्वगोत्रधर्मं न हि संत्यजेत।
तेनार्थसिद्धिं समुपाचरेत नासत्प्रलापं न च सत्यहीनम् ॥ ३८ ॥
न निष्ठुरं नागमशास्त्रहीनं वाक्यं वदेत्साधुजनेन येन।
निन्द्यो भवेन्नैव च धर्मभेदी सङ्गं न चासत्सु नरेषु कुर्यात् ॥ ३९ ॥
संध्यासु वर्ज्यं सुरतं दिवा च सर्वासु योनीषु पराबलासु।
आगारशून्येषु महीतलेषु रजस्वलास्वेव जलेषु वीर ॥ ४० ॥
वृथाऽटनं वृथा दानं वृथा च पशुमारणम्। न कर्त्तव्यं गृहस्थेन वृथा दारपरिग्रहम् ॥ ४१ ॥

देश-विहित धर्म, श्रेष्ठ कुलधर्म और गोत्रधर्मका त्याग नहीं करना चाहिये, उसीसे अर्थकी सिद्धि करनी चाहिये। असत्प्रलाप, सत्यरहित, निष्ठुर और वेद-आगमशास्त्रसे असंगत वाक्य कभी न कहे, जिससे साधुजनोंद्वारा निन्दित होना पड़े। किसीके धर्मको हानि न पहुँचाये एवं बुरे लोगोंका सङ्ग भी न करे। वीर! सन्ध्या एवं दिनके समय रति नहीं करनी चाहिये। सभी योनियोंकी परस्त्रियोंमें गृहहीन पृथ्वीपर, रजस्वला स्त्रीमें तथा जलमें सुरतव्यापार वर्जित है। गृहस्थको व्यर्थ भ्रमण, व्यर्थ दान, व्यर्थ पशुवध तथा व्यर्थ दार-परिग्रह नहीं करना चाहिये ॥ ३८—४१ ॥

वृथाऽटनान्नित्यहानिर्वृथादानाद्धनक्षयः । वृथा पशुघ्नः प्राप्नोति पातकं नरकप्रदम् ॥ ४२ ॥
संतत्या हानिरश्लाघ्या वर्णसंकरतो भयम् । भेतव्यं च भवेल्लोके वृथादारपरिग्रहात् ॥ ४३ ॥
परस्वे परदारे च न कार्या बुद्धिरुत्तमैः । परस्वं नरकायैव परदाराश्च मृत्यवे ॥ ४४ ॥
नेक्षेत् परस्त्रियं नग्नां न सम्भाषेत तस्करान् । उदक्यादर्शनं स्पर्शं संभाषं च विवर्जयेत् ॥ ४५ ॥

व्यर्थ घूमनेसे नित्यकर्मकी हानि होती है तथा वृथा दानसे धनकी हानि होती है और वृथा पशुवध करनेवाला नरक प्राप्त करानेवाले पापको प्राप्त होता है । अवैध स्त्री-संग्रहसे सन्तानकी निन्दनीय हानि, वर्णसंकरका भय तथा लोकमें भी भय होता है । उत्तम व्यक्ति परधन तथा परस्त्रीमें बुद्धि न लगाये । परधन नरक देनेवाला और परस्त्री मृत्युका कारण होती है । परस्त्रीको नग्नावस्थामें न देखे, चोरोंसे बातचीत न करे एवं रजस्वला स्त्रीको न तो देखे, न उसका स्पर्श ही करे और न उससे बातचीत ही करे ॥ ४२—४५ ॥

नैकासने तथा स्थेयं सोदर्या परजायया । तथैव स्यान्न मातुश्च तथा स्वदुहितुस्त्वपि ॥ ४६ ॥
न च स्नायीत वै नग्नो न शयीत कदाचन । दिग्वाससोऽपि न तथा परिभ्रमणमिष्यते ॥
भिन्नासनभाजनादीन् दूरतः परिवर्जयेत् ॥ ४७ ॥

नन्दासु नाभ्यङ्गमुपाचरेत क्षौरं च रिक्तासु जयासु मांसम् ।
पूर्णासु योषित्परिवर्जयेत भद्रासु सर्वाणि समाचरेत ॥ ४८ ॥
नाभ्यङ्गमर्के न च भूमिपुत्रे क्षौरं च शुक्रे रविजे च मांसम् ।
बुधेषु योषिन्न समाचरेत शेषेषु सर्वाणि सदैव कुर्यात् ॥ ४९ ॥

अपनी बहन तथा परस्त्रीके साथ एक आसनपर न बैठे । इसी प्रकार अपनी माता तथा कन्याके साथ भी एक आसनपर न बैठे । नग्न होकर स्नान और शयन न करे । वस्त्रहीन होकर इधर-उधर न घूमे, । टूटे आसन और बर्तन आदिको अलग रख दे । नन्दा (प्रतिपद्, षष्ठी और एकादशी) तिथियोंमें तेलसे मालिश न करे । रिक्ता (चतुर्थी, नवमी और चतुर्दशी) तिथियोंमें क्षौर कर्म न करे (न कराये) तथा जया (तृतीया, अष्टमी और त्रयोदशी) तिथियोंमें फलका गूदा नहीं खाना चाहिये । पूर्णा (पञ्चमी, दशमी और पूर्णिमा) तिथियोंमें स्त्रीका सम्पर्क न करे तथा भद्रा (द्वितीया, सप्तमी और द्वादशी) तिथियोंमें सभी कार्य करे । रविवार एवं मङ्गलवारको तेलकी मालिश, शुक्रवारको क्षौरकर्म, नहीं कराना चाहिये (न करना चाहिये) । शनिवारको फलका गूदा न खाये तथा बुधवारको स्त्री वर्ज्य है । शेष दिनोंमें सभी कार्य सदैव कर्तव्य हैं ॥ ४६—४९ ॥

चित्रासु हस्ते श्रवणे न तैलं क्षौरं विशाखास्वभिजित्सु वर्ज्यम् ।
मूले मृगे भाद्रपदासु मांसं योषिन्मघाकृत्तिकयोत्तरासु ॥ ५० ॥
सदैव वर्ज्यं शयनमुदक्शिरास्तथा प्रतीच्यां रजनीचरेत् ।
भुञ्जीत नैवेह च दक्षिणामुखो न च प्रतीच्यामभिभोजनीयम् ॥ ५१ ॥
देवालयं चैत्यतरुं चतुष्पथं विद्याधिकं चापि गुरुं प्रदक्षिणम् ।
माल्यान्नपानं वसनानि यत्नतो नान्यैर्धृतांश्चापि हि धारयेद् बुधः ॥ ५२ ॥
स्नायाच्छिरःस्नानतया च नित्यं न कारणं चैव विना निशासु ।
ग्रहोपरागे स्वजनापयाते मुक्त्वा च जन्मर्क्षगते शशाङ्के ॥ ५३ ॥

चित्रा, हस्त और श्रवण नक्षत्रोंमें तेल तथा विशाखा और अभिजित नक्षत्रोंमें क्षौर-कार्य नहीं करना-कराना चाहिये । मूल, मृगशिरा, पूर्वभाद्रपद और उत्तराभाद्रपदमें गूदा-भक्षण तथा मघा, कृत्तिका और तीनों उत्तरा (उत्तराफाल्गुनी,

उत्तराषाढ़ा, उत्तराभाद्रपदा) में स्त्री-सहवास न करे। राक्षसराज ! उत्तर एवं पश्चिमकी ओर सिर करके शयन नहीं करना चाहिये। दक्षिण एवं पश्चिममुख भोजन नहीं करना चाहिये। देवमन्दिर, चैत्य-वृक्ष, देवताके समान पूज्य पीपल आदिके वृक्ष, चौराहे, अपनेसे अधिक विद्वान् तथा गुरुकी प्रदक्षिणा करे। बुद्धिमान् व्यक्ति यत्नपूर्वक दूसरेके द्वारा व्यवहृत माला, अन्न और वस्त्रका व्यवहार न करे। नित्य सिरके ऊपरसे स्नान करे। ग्रहोपराग (ग्रहणके समय) और स्वजनकी मृत्यु तथा जन्म-नक्षत्रमें चन्द्रमाके रहनेके अतिरिक्त समयमें रात्रिमें बिना विशेष कारण स्नान नहीं करना चाहिये ॥ ५०-५३ ॥

नाभ्यक्तिं कायमुपस्पृशेच्च स्नातो न केशान् विधुनीत चापि।
गात्राणि चैवाम्बरपाणिना च स्नातो विमृज्याद् रजनीचरेश ॥ ५४ ॥
वसेच्च देशेषु सुराजकेषु सुसंहितेष्वेव जनेषु नित्यम्।
अक्रोधना न्यायपरा अमत्सराः कृषीवला ह्योषधयश्च यत्र ॥ ५५ ॥
श्वापस्तु वैद्यो धनिकश्च यत्र सच्छ्रोत्रियस्तत्र वसेत नित्यम् ॥ ५६ ॥
न तेषु देशेषु वसेत बुद्धिमान् सदा नृपो दण्डरुचिस्त्वशक्तः।
जनोऽपि नित्योत्सवबद्धवैरः सदा जिगीषुश्च निशाचरेन्द्र ॥ ५७ ॥

राक्षसेश्वर ! तेल-मालिश किये हुए किसीके शरीरका स्पर्श नहीं करना चाहिये। स्नानके बाद बालोंको उसी समय कंघीसे न झाड़े। मनुष्यको वहाँ रहना चाहिये जहाँका राजा धर्मात्मा हो एवं जनवर्गमें समता हो, लोग क्रोधी न हों, न्यायी हों, परस्परमें डाह न हो, खेती करनेवाले किसान और ओषधियाँ हों। जहाँ चतुर वैद्य, धनी-मानी दानी, श्रेष्ठ श्रोत्रिय विद्वान् हों वहाँ निवास करना चाहिये। जिस देशका राजा प्रजाको मात्र दण्ड ही देना चाहता हो तथा उत्सवोंमें जन-समाजमें नित्य किसी-न-किसी प्रकारका वैर-विद्वेष हो एवं लड़ाई-झगड़ा करनेकी ही लालसा हो, निर्बल मनुष्यको ऐसे स्थानपर नहीं रहना चाहिये ॥ ५४-५७ ॥

ऋषय ऊचुः

यच्च वर्ज्यं महाबाहो सदा धर्मस्थितैर्नरैः। यद् भोज्यं च समुद्दिष्टं कथयिष्यामहे वयम् ॥ ५८ ॥
भोज्यमन्नं पर्युषितं स्नेहाक्तं चिरसंभृतम्। अस्नेहा व्रीहयः श्लक्ष्णा विकाराः पयसस्तथा ॥ ५९ ॥
तद्वद् द्विदलकादीनि भोज्यानि मनुरब्रवीत् ॥ ६० ॥

ऋषियोंने कहा—महाबाहो ! जो पदार्थ धर्मात्मा व्यक्तियोंके लिये सदैव त्याज्य है एवं जो भोज्य है, हम उनका वर्णन कर रहे हैं। तेल, घी आदि स्निग्ध पदार्थोंसे पकाया गया अन्न बासी एवं बहुत पहलेका बने रहनेपर भी भोज्य (खानेयोग्य) है तथा सूखे भूने हुए चावल एवं दूधके विकार—दही, घी आदि भी बासी एवं पुराने होनेपर भी भक्ष्य—खाने योग्य हैं। इसी प्रकार मनुने चने, अरहर, मसूर आदिके भूने (तले) हुए दालको भी अधिक कालतक भोजनके योग्य बतलाये हैं ॥ ५८-६० ॥

मणिरत्नप्रवालानां तद्वन्मुक्ताफलस्य च। शैलदारुमयानां च तृणमूलौषधान्यपि ॥ ६१ ॥
शूर्पधान्याजिनानां च संहतानां च वाससाम्। वल्कलानामशेषाणामम्बुना शुद्धिरिष्यते ॥ ६२ ॥
सस्नेहानामथोष्णेन तिलकल्केन वारिणा। कार्पासिकानां वस्त्राणां शुद्धिः स्यात्सह भस्मना ॥ ६३ ॥
नागदन्तास्थिशृङ्गाणां तक्षणाच्छुद्धिरिष्यते। पुनः पाकेन भाण्डानां मृण्मयानां च मेध्यता ॥ ६४ ॥
शुचि भैक्षं कारुहस्तः पण्यं योषिन्मुखं तथा। रथ्यागतमविज्ञातं दासवर्गेण यत्कृतम् ॥ ६५ ॥
वाक्प्रशस्तं चिरातीतमनेकान्तरितं लघु। चेष्टितं बालवृद्धानां बालस्य च मुखं शुचि ॥ ६६ ॥

(यहाँसे आगे अब द्रव्य-शुद्धि बतलाते हैं।) मणि, रत्न, प्रवाल (मूँगा), मोती, पत्थर और धातुओंके बने बर्तन, तृण, मूल तथा ओषधियाँ, सूप (दाल), धान्य, मृगचर्म, सिले हुए वस्त्र एवं वृक्षोंके सभी भागोंकी शुद्धि जलसे होती है। तेल-घृत आदिसे मलिन पात्रोंकी शुद्धि उष्ण जल तथा तिलकल्क (खली)से एवं पाषाणके बर्तनोंकी शुद्धि भस्मसे (पत्थर कोयले आदिकी राखसे) होती है। हाथीके दाँत, हड्डी और सींगकी बनी चीजोंकी शुद्धि तरासनेसे (खरादनेसे) होती है। मिट्टीके बर्तन पुनः आगमें जलानेसे शुद्ध होते हैं। भिक्षान्न, कारीगरोंका हाथ, विक्रेय वस्तु, स्त्री-मुख, अज्ञात वस्तु, ग्रामके मध्य मार्ग या चौराहेसे लायी जानेवाली तथा नौकरोंद्वारा निर्मित वस्तुएँ पवित्र मानी गयी हैं। वचनद्वारा प्रशंसित, पुराना, अनेकानेक जनोंसे होती हुई लायी जानेवाली छोटी वस्तुएँ, बालकों और वृद्धोंद्वारा किया गया कर्म तथा शिशुका मुख शुद्ध होता है॥ ६१-६६॥

कर्मान्ताङ्गारशालासु स्तनंधयसुताः स्त्रियः। वाग्विप्रुषो द्विजेन्द्राणां संतप्ताश्चाम्बुबिन्दवः॥ ६७॥
भूमिर्विशुध्यते खाननदाहमार्जनगोक्रमैः। लेपादुल्लेखनात् सेकाद् वेश्मसंमार्जनार्चनात्॥ ६८॥
केशकीटावपन्नेऽन्ने गोघ्राते मक्षिकान्विते। मृदम्बुभस्मक्षाराणि प्रक्षेप्तव्यानि शुद्धये॥ ६९॥
औदुम्बराणां चाम्लेन क्षारेण त्रपुसीसयोः। भस्माम्बुभिश्च कांस्यानां शुद्धिः प्लावो द्रवस्य च॥ ७०॥

कर्मशाला, अन्तर्गृह एवं अग्निशालामें दूधमुँहे बच्चोंको ली हुई स्त्रियाँ, सम्भाषण करते हुए विद्वान् ब्राह्मणोंके मुखके छींटे तथा उष्ण जलके बिन्दु पवित्र होते हैं। पृथ्वीकी शुद्धि खोदने, जलाने, झाड़ू देने, गौओंके चलने, लीपने, खरोंचने तथा सींचनेसे होती है और गृहकी शुद्धि झाड़ू देने, जलके छिड़कने तथा पूजा आदिसे होती है। केश, कीट पड़े हुए और मक्खीके बैठ जानेपर तथा गायके द्वारा सूँघे जानेपर अन्नकी शुद्धिके लिये उसपर जल, भस्म, क्षार या मृत्तिका छिड़कनी चाहिये। ताम्रपात्रकी शुद्धि खटाईसे, जस्ते और सीसेकी क्षारके द्वारा, काँसेकी वस्तुएँ भस्म और जलके द्वारा तथा तरल पदार्थ कुछ अंशको बहा देनेसे शुद्ध हो जाते हैं॥ ६७-७०॥

अमेध्याक्तस्य मृत्तोयैर्गन्धापहरणेन च। अन्येषामपि द्रव्याणां शुद्धिर्गन्धापहारतः॥ ७१॥
मातुः प्रस्रवणे वत्सः शकुनिः फलपातने। गर्दभो भारवाहित्वे श्वा मृगग्रहणे शुचिः॥ ७२॥
रथ्याकर्दमतोयानि नावः पथि तृणानि च। मारुतेनैव शुद्ध्यन्ति पक्वेष्टकचितानि च॥ ७३॥
शृतं द्रोणाढकस्यान्नममेध्याभिप्लुतं भवेत्। अग्रमुद्धृत्य संत्याज्यं शेषस्य प्रोक्षणं स्मृतम्॥ ७४॥
उपवासं त्रिरात्रं वा दूषितान्नस्य भोजने। अज्ञाते ज्ञातपूर्वे च नैव शुद्धिर्विधीयते॥ ७५॥

अपवित्र वस्तुसे मिले पदार्थ जल और मिट्टीसे धोने तथा दुर्गन्ध दूर कर देनेसे शुद्ध होते हैं। अन्य (गन्धवाले) पदार्थोंकी शुद्धि भी गन्ध दूर करनेसे होती है। माताके स्तनको प्रस्तुत कराने (पेन्हाने) में बछड़ा, वृक्षसे फल गिरानेमें पक्षी, बोझा ढोनेमें गधा और शिकार पकड़नेमें कुत्ता शुद्ध (माना गया) है। मार्गके कीचड़ और जल, नाव तथा रास्तेकी घास तृण एवं पके हुए ईंटोंके समूह वायुके द्वारा ही शुद्ध हो जाते हैं। यदि एक द्रोण (ढाई सेरसे अधिक) पके अन्नको अपवित्र वस्तुसे सम्पर्क हो जाय तो उसके ऊपरका अंश निकाल कर फेंक देना एवं शेषपर जल छिड़क देना चाहिये। इससे उसकी शुद्धि हो जाती है। अज्ञानवश दूषित अन्न खा लेनेपर तीन रात्रिका उपवास करनेसे शुद्धि हो जानेका विधान है, किंतु ज्ञानपूर्वक दूषित अन्न खानेपर शुद्धि नहीं हो सकती॥ ७१-७५॥

१-द्रव्यशुद्धिका यह प्रकरण मनुस्मृति ५। ११० -१४६ तथा याज्ञवल्क्यस्मृति १। १८२ -१९७ श्लोकोंके भी प्रायः इसी भावका है।

उदक्याश्वाननग्नांश्च सूतिकान्त्यावसायिनः। स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिणः ॥ ७६ ॥
सस्नेहमस्थि संस्पृश्य सवासाः स्नानमाचरेत्। आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य च ॥ ७७ ॥
न लङ्घयेत्पुरीषासृक्ष्ठीवनोद्वर्तनानि च। गृहादुच्छिष्टविण्मूत्रे पादाम्भांसि क्षिपेद् बहिः ॥ ७८ ॥
पञ्चपिण्डाननुद्धृत्य न स्नायात् परवारिणि। स्नायीत देवखातेषु सरोह्रदसरित्सु च ॥ ७९ ॥

रजस्वला स्त्री, कुत्ता, नग्न (दिगम्बर साधु[1]), प्रसूता स्त्री, चाण्डाल और शववाहकोंका स्पर्श हो जानेपर अपवित्र हुए व्यक्तिको पवित्र होनेके लिये स्नान करना चाहिये। मज्जायुक्त हड्डीके छू जानेपर वस्त्रसहित स्नान करना चाहिये, किंतु सूखी हड्डीका स्पर्श होनेपर आचमन करने, गो-स्पर्श तथा सूर्यदर्शन करनेमात्रसे ही शुद्धि हो जाती है। विष्ठा, रक्त, थूक एवं उबटनका उल्लङ्घन नहीं करना चाहिये। जूठे पदार्थ, विष्ठा, मूत्र एवं पैर धोनेके जलको घरसे बाहर फेंक देना चाहिये। दूसरेके द्वारा निर्मित बावली आदिमें मिट्टीके पाँच टुकड़ोंके निकाले बिना स्नान नहीं करना चाहिये। (मुख्यतः) देव-निर्मित झीलोंमें, ताल-तलैयों और नदियोंमें स्नान करना चाहिये ॥ ७६–७९ ॥

नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत् कदाचन। नालपेद् जनविद्विष्टं वीरहीनां तथा स्त्रियम् ॥ ८० ॥
देवतापितृसच्छास्त्रयज्ञवेदादिनिन्दकैः। कृत्वा तु स्पर्शमालापं शुद्ध्यते कमावलोकनात् ॥ ८१ ॥
अभोज्याः सूतिकाषण्ढमार्जाराखुश्वकुक्कुटाः। पतितापविद्धनग्नाश्चाण्डालाधमाश्च ये ॥ ८२ ॥

बुद्धिमान् पुरुष बाग-बगीचोंमें असमयमें कभी न ठहरे। लोगोंसे द्वेष रखनेवाले व्यक्ति तथा पति-पुत्रसे रहित स्त्रीसे वार्तालाप नहीं करना चाहिये। देवता, पितरों, भले शास्त्रों (पुराण, धर्मशास्त्र, रामायण आदि), यज्ञ एवं वेदादिके निन्दकोंका स्पर्श और उनके साथ वार्तालाप करनेपर मनुष्य अपवित्र हो जाता है, वह सूर्यदर्शन करनेपर शुद्ध होता है उसकी शुद्धि भगवान् सूर्यके समक्ष उपस्थान करके अपने किये हुए स्पर्श और वार्तालाप कर्मके त्याग तथा पश्चात्ताप करनेसे होती है। सूतिक, नपुंसक, बिलाव, चूहा, कुत्ते, मुर्गे, पतित, नग्न (विधर्मी) (इनके लक्षण आगे बतलाये जायँगे) समाजसे बहिष्कृत, और जो चाण्डाल आदि अधम प्राणी हैं उनके यहाँ भोजन नहीं करना चाहिये ॥ ८०–८२ ॥

सुकेशिरुवाच

भवद्भिः कीर्तिताऽभोज्या य एते सूतिकादयः। अमीषां श्रोतुमिच्छामि तत्त्वतो लक्षणानि हि ॥ ८३ ॥

सुकेशि बोला—ऋषियो! आपलोगोंने जिन सूतिक आदिका अन्न अभक्ष्य कहा है, मैं उनके लक्षण विस्तारसे सुनना चाहता हूँ ॥ ८३ ॥

ऋषय ऊचुः

ब्राह्मणी ब्राह्मणस्यैव याऽवरोधत्वमागता। तावुभौ सूतिकेत्युक्तौ तयोरन्नं विगर्हितम् ॥ ८४ ॥
न जुहोत्युचिते काले न स्नाति न ददाति च। पितृदेवार्चनाद्धीनः स षण्ढः परिगीयते ॥ ८५ ॥
दम्भार्थं जपते यश्च तप्यते यजते तथा। न परत्रार्थमुद्युक्तो स मार्जारः प्रकीर्तितः ॥ ८६ ॥
विभवे सति नैवाश्नाति न ददाति जुहोति च। तमाहुराखुं तस्यान्नं भुक्त्वा कृच्छ्रेण शुद्ध्यति ॥ ८७ ॥

ऋषियोंने कहा—सुकेशि! अन्य ब्राह्मणके साथ ब्राह्मणीके व्यभिचारित होनेपर उन दोनोंको ही 'सूतिक' कहा जाता है। उन दोनोंका अन्न निन्दित है। उचित समयपर हवन, स्नान और दान न करनेवाला तथा पितरों एवं देवताओंकी पूजासे रहित व्यक्तिको ही यहाँ 'षण्ढ' या नपुंसक कहा गया है। दम्भके लिये जप, तप और यज्ञ करनेवाले तथा परलोकार्थ उद्योग न करनेवाले व्यक्तिको यहाँ 'मार्जार' या 'बिलाव' कहा गया है। ऐश्वर्य रहते

1. पद्मपुराण आदिमें नग्न धर्मनिरपेक्ष-पाखण्डीका लक्षण है।

हुए भोग, दान एवं हवन न करनेवालेको 'आखु' (चूहा) कहते हैं । उनका अन्न खानेवाला मनुष्य कृच्छ्रव्रत करनेसे शुद्ध होता है ॥ ८४–८७ ॥

य परेषां हि मर्माणि निकृन्तन्निव भाषते । नित्यं परगुणद्वेषी स श्वान इति कथ्यते ॥ ८८ ॥
सभागतानां यः सभ्यः पक्षपातं समाश्रयेत् । तमाहुः कुक्कुटं देवास्तस्याप्यन्नं विगर्हितम् ॥ ८९ ॥
स्वधर्मं यः समुत्सृज्य परधर्मं समाश्रयेत् । अनापदि स विद्वद्भिः पतितः परिकीर्त्यते ॥ ९० ॥
देवत्यागी पितृत्यागी गुरुभक्त्यरतस्तथा । गोब्राह्मणस्त्रीवधकृदपविद्धः स कीर्त्यते ॥ ९१ ॥

दूसरोंका मर्म भेदन करते हुए बातचीत करनेवाले तथा दूसरेके गुणोंसे द्वेष करनेवालेको 'श्वान' या 'कुत्ता' कहा गया है। सभामें आगत व्यक्तियोंमें जो सभ्य व्यक्ति पक्षपात करता है उसे देवताओंने 'कुक्कुट' (मुर्गा) कहा है, उसका भी अन्न निन्दित है। विपत्तिकालके अतिरिक्त अन्य समयमें अपना धर्म छोड़कर दूसरेका धर्म ग्रहण करनेवालेको विद्वानोंने 'पतित' कहा है। देवत्यागी, पितृत्यागी, गुरुभक्तिसे विमुख तथा गौ, ब्राह्मण एवं स्त्रीकी हत्या करनेवालेको 'अपविद्ध' कहा जाता है ॥ ८८–९१ ॥

येषां कुले न वेदोऽस्ति न शास्त्रं नैव च व्रतम् । ते नग्नाः कीर्तिताः सद्भिस्तेषामन्नं विगर्हितम् ॥ ९२ ॥
आशार्तानामदाता च दातुश्च प्रतिषेधकः । शरणागतं यस्त्यजति स चाण्डालोऽधमो नरः ॥ ९३ ॥
यो बान्धवैः परित्यक्तः साधुभिर्ब्राह्मणैरपि । कुण्डाशी यश्च तस्यान्नं भुक्त्वा चान्द्रायणं चरेत् ॥ ९४ ॥
यो नित्यकर्मणो हानिं कुर्यान्नैमित्तिकस्य च । भुक्त्वान्नं तस्य शुद्ध्येत त्रिरात्रोपोषितो नरः ॥ ९५ ॥

जिनके कुलमें वेद, शास्त्र एवं व्रत नहीं हैं, उन्हें सज्जन लोग 'नग्न' कहते हैं। उनका अन्न निन्दित है। आशा रखनेवालोंको न देनेवाला, दाताको मना करनेवाला तथा शरणागतका परित्याग करनेवाला अधम मनुष्य 'चाण्डाल' कहा जाता है। बान्धवों, साधुओं एवं ब्राह्मणोंसे त्यागा गया तथा कुण्ड (पतिके जीवित रहनेपर परपुरुषसे उत्पन्न पुत्र) के यहाँ अन्न खानेवालेको चान्द्रायण व्रत करना चाहिये। नित्य और नैमित्तिक कर्म न करनेवाले व्यक्तिका अन्न खानेपर मनुष्य तीन राततक उपवास करनेसे शुद्ध होता है ॥ ९२–९५ ॥

गणकस्य निषादस्य गणिकाभिषजोस्तथा । कदर्यस्यापि शुद्ध्येत त्रिरात्रोपोषितो नरः ॥ ९६ ॥
नित्यस्य कर्मणो हानिः केवलं मृतजन्मसु । न तु नैमित्तिकोच्छेदः कर्तव्यो हि कथंचन ॥ ९७ ॥
जाते पुत्रे पितुः स्नानं सचैलस्य विधीयते । मृते च सर्वबन्धूनामित्याह भगवान् भृगुः ॥ ९८ ॥
प्रेताय सलिलं देयं बहिर्दग्ध्वा तु गोत्रजैः । प्रथमेऽह्नि चतुर्थे वा सप्तमे वाऽस्थिसंचयम् ॥ ९९ ॥

गणक (ज्योतिषी), निषाद (मल्लाह), वेश्या, वैद्य तथा कृपणका अन्न खानेपर भी मनुष्य तीन दिन उपवास करनेपर शुद्ध होता है। घरमें जन्म या मृत्यु होनेपर नित्यकर्म रुक जाते हैं, किंतु नैमित्तिक कर्म कभी बंद नहीं करना चाहिये। भगवान् भृगुने कहा है कि पुत्र उत्पन्न होनेपर पिताके लिये एवं मरनेपर सभी बन्धुओंके लिये वस्त्रके साथ स्नान करना चाहिये। ग्रामके बाहर शवदाह करना चाहिये। तदनन्तर सगोत्र लोग प्रेतके उद्देश्यसे जलदान (तिलाञ्जलि) करें तथा पहले दिन या चौथे या सातवें दिन अस्थि-संचयन करें ॥ ९६–९९ ॥

ऊर्ध्वं संचयनात्तेषामङ्गस्पर्शो विधीयते । सोदकैस्तु क्रिया कार्या संशुद्धैस्तु सपिण्डजैः ॥१००॥
विषोद्बन्धनशस्त्राम्बुवह्निपातमृतेषु च । बाले प्रव्राजि संन्यासे देशान्तरमृते तथा ॥१०१॥
सद्यः शौचं भवेद्वीर तच्चाप्युक्तं चतुर्विधम् । गर्भस्रावे तदेवोक्तं पूर्णकालेन चेतरे ॥१०२॥
ब्राह्मणानामहोरात्रं क्षत्रियाणां दिनत्रयम् । षड्रात्रं चैव वैश्यानां शूद्राणां द्वादशाह्निकम् ॥१०३॥

अस्थि-चयनके बाद अङ्ग-स्पर्शका विधान है । शुद्ध होकर सोदकों (चौदह पीढ़ीके अन्तर्गतके लोगों) एवं सपिण्डजों (सात पीढ़ीके अंदरके लोगों-) को और्ध्वदैहिक क्रिया (मरनेके बाद की जानेवाली विहित क्रिया) करनी चाहिये । हे वीर ! विष, बन्धन, शस्त्र, जल, अग्नि और गिरनेसे मृत्युके होनेपर तथा बालक, परिव्राजक, संन्यासीकी एवं किसी व्यक्तिकी दूर देशमें मृत्यु होनेपर तत्काल शुद्धि हो जाती है । वह शुद्धि भी चार प्रकारकी कही गयी है । गर्भस्रावमें भी शीघ्र ही शुद्धि होती है । अन्य अशौच पूरे समयपर ही दूर होते हैं । (वह सद्यः शौच) ब्राह्मणोंका एक अहोरात्रका, क्षत्रियोंका तीन दिनोंका, वैश्योंका छः दिनोंका एवं शूद्रोंका बारह दिनोंका होता है ॥ १००–१०३ ॥

दशद्वादशमासार्द्धमाससंख्यैर्दिनैश्च तैः । स्वाः स्वाः कर्मक्रियाः कुर्युः सर्वे वर्णा यथाक्रमम् ॥१०४॥
प्रेतमुद्दिश्य कर्त्तव्यमेकोद्दिष्टं विधानतः । सपिण्डीकरणं कार्यं प्रेते आवत्सरान्तरे ॥१०५॥
ततः पितृत्वमापन्ने दर्शपूर्णादिभिः शुभैः । प्रीणनं तस्य कर्त्तव्यं यथा श्रुतिनिदर्शनात् ॥१०६॥
पितुरर्थं समुद्दिश्य भूमिदानादिकं स्वयम् । कुर्यात्तेनास्य सुप्रीताः पितरो यान्ति राक्षस ॥१०७॥

सभी वर्णोंके लोग (ब्राह्मण, क्षत्रिय, वैश्य और शूद्र) क्रमशः दस, बारह, पंद्रह दिन एवं एक मासके अन्तरपर अपनी-अपनी क्रियाएँ करें । प्रेतके उद्देश्यसे विधिके अनुसार एकोद्दिष्ट श्राद्ध करना चाहिये । मरनेके एक वर्ष बीत जानेपर मनुष्यको सपिण्डीकरण श्राद्ध करना चाहिये । उसके बाद प्रेतके पितर हो जानेपर अमावास्या और पूर्णिमा तिथिके दिन वेदविहित विधिसे उनका तर्पण करना चाहिये । राक्षस ! पिताके उद्देश्यसे स्वयं भूमि-दान आदि करे, जिससे पितृगण इसके ऊपर प्रसन्न हो जायँ ॥ १०४–१०७ ॥

यद् यदिष्टतमं किंचिद् यच्चास्य दयितं गृहे । तत्तद् गुणवते देयं तदेवाक्षयमिच्छता ॥१०८॥
अध्येतव्या त्रयी नित्यं भाव्यं च विदुषा सदा । धर्मतो धनमाहार्यं यष्टव्यं चापि शक्तितः ॥१०९॥
यच्चापि कुर्वतो नात्मा जुगुप्सामेति राक्षस । तत् कर्त्तव्यमशङ्केन यन्न गोप्यं महाजने ॥११०॥
एवमाचरतो लोके पुरुषस्य गृहे सतः । धर्मार्थकामसंप्राप्तिं परत्रेह च शोभनम् ॥१११॥

व्यक्तिकी जीवित-अवस्थामें घरमें जो-जो पदार्थ उसको अत्यन्त अभिलषित एवं प्रिय रहा हो, उसकी अक्षयताकी कामना करते हुए गुणवान् पात्रको दान देना चाहिये । सदा त्रयी अर्थात् ऋक्, यजुः और सामवेदका अध्ययन करना चाहिये, विद्वान् बनना चाहिये, धर्मपूर्वक धनार्जन एवं यथाशक्ति यज्ञ करना चाहिये । राक्षस ! मनुष्यको जिस कार्यके करनेसे कर्त्ताकी आत्मा निन्दित न हो एवं जो कार्य बड़े लोगोंसे छिपाने योग्य न हो ऐसा कार्य निःशङ्क (आसक्तिरहित) होकर करना चाहिये । इस प्रकारके आचरण करनेवाले पुरुषके गृहस्थ होनेपर भी उसे धर्म, अर्थ एवं कामकी प्राप्ति होती है तथा वह व्यक्ति इस लोक और परलोकमें कल्याणका भागी होता है ॥ १०८–१११ ॥

एष तूद्देशतः प्रोक्तो गृहस्थाश्रम उत्तमः । वानप्रस्थाश्रमं धर्मं प्रवक्ष्यामोऽवधार्यताम् ॥११२॥
अपत्यसंततिं दृष्ट्वा प्राज्ञो देहस्य चानतिम् । वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणम् ॥११३॥
तत्रारण्योपभोगैश्च तपोभिश्चात्मकर्षणम् । भूमौ शय्या ब्रह्मचर्यं पितृदेवातिथिक्रिया ॥११४॥
होमस्त्रिषवणं स्नानं जटावल्कलधारणम् । वन्यस्नेहनिषेवित्वं वानप्रस्थविधिस्त्वयम् ॥११५॥

ऋषियोंने सुकेशि से कहा—सुकेशि ! अबतक हमने संक्षेपमें उत्तम गृहस्थाश्रमका वर्णन किया है। अब हम वानप्रस्थ-आश्रमके धर्मका वर्णन करेंगे, उसे ध्यानपूर्वक सुनो। बुद्धिमान् व्यक्ति पुत्रकी सन्तान (पौत्र) और अपने शरीरकी शिथिल अवस्था देखकर अपने आत्माकी शुद्धिके लिये वानप्रस्थ-आश्रमको ग्रहण करे। वहाँ अरण्यमें उत्पन्न मूल-फल आदिसे अपना जीवन-यापन करते हुए तपद्वारा शरीरका शोषण करे। इस आश्रममें भूमिपर शयन, ब्रह्मचर्यका पालन एवं पितर, देवता तथा अतिथियोंकी पूजा करे। हवन, तीनों काल—प्रातः, मध्याह्न, सायंकाल—स्नान, जटा और वल्कलका धारण तथा वन्य पदार्थोंसे निरन्तर रहना—ऐसा यत्न करे। यही वानप्रस्थ-आश्रमकी विधि है ॥ ११२–११५ ॥

सर्वसङ्गपरित्यागो ब्रह्मचर्यममानिता। जितेन्द्रियत्वमावासे नैकस्मिन् वसतिश्चिरम् ॥११६॥
अनारम्भस्तथाहारो भैक्षान्नं नातिकोपिता। आत्मज्ञानावबोधेच्छा तथा चात्मावलोकनम् ॥११७॥
चतुर्थे त्वाश्रमे धर्मा अस्माभिस्ते प्रकीर्तिताः। वर्णधर्माणि चान्यानि निशामय निशाचर ॥११८॥
गार्हस्थ्यं ब्रह्मचर्यं च वानप्रस्थं त्रयाश्रमाः। क्षत्रियस्यापि कथिता ये चाचारा द्विजस्य हि ॥११९॥

(चतुर्थ आश्रम-(संन्यास-)के धर्म ये हैं—) सभी प्रकारकी आसक्तियोंका त्याग, ब्रह्मचर्य, अहंकारका अभाव, जितेन्द्रियता, एक स्थानपर अधिक समयतक न रहना, उद्योगका अभाव, भिक्षान्न भोजन, क्रोधका त्याग, आत्मज्ञानकी इच्छा तथा आत्मदर्शन। निशाचर ! हमने तुमसे चतुर्थ आश्रम-(संन्यास)के इन धर्मोंका वर्णन किया। अब अन्य वर्णधर्मोंको सुनो। क्षत्रियोंके लिये भी गार्हस्थ्य, ब्रह्मचर्य एवं वानप्रस्थ—इन तीन आश्रमों एवं ब्राह्मणोंके लिये विहित आचारोंका विधान है ॥ ११६–११९ ॥

वैखानसत्वं गार्हस्थ्यमाश्रमद्वितयं विशः। गार्हस्थ्यमुत्तमं त्वेकं शूद्रस्य क्षणदाचर ॥१२०॥
स्वानि वर्णाश्रमोक्तानि धर्माणीह न हापयेत्। यो हापयति तस्यासौ परिकुप्यति भास्करः ॥१२१॥
कुपितः कुलनाशाय ईश्वरो रोगवृद्धये। भानुर्वै यतते तस्य नरस्य क्षणदाचर ॥१२२॥
तस्मात् स्वधर्मं न हि संत्यजेत न हापयेच्चापि हि नात्मवंशम्।
यः संत्यजेच्चापि निजं हि धर्मं तस्मै प्रकुप्येत दिवाकरस्तु ॥१२३॥

राक्षस ! वैश्यजातिके लिये गार्हस्थ्य एवं वानप्रस्थ—इन दो आश्रमोंका विधान है तथा शूद्रके लिये एकमात्र उत्तम गृहस्थ आश्रमका ही नियम है। अपने वर्ण और आश्रमके लिये विहित धर्मोंका इस लोकमें त्याग नहीं करना चाहिये। जो इनका त्याग करता है, उसपर सूर्य भगवान् क्रुद्ध होते हैं। निशाचर ! भगवान् भास्कर क्रुद्ध होकर उस मनुष्यकी रोगवृद्धि एवं उसके कुलका नाश करनेके लिये प्रयत्न करते हैं। अतः मनुष्य स्वधर्मका न तो त्याग करे और न अपने वंशकी हानि होने दे। जो मनुष्य अपने धर्मका त्याग करता है उसपर भगवान् सूर्य क्रोध करते हैं ॥ १२०–१२३ ॥

पुलस्त्य उवाच

इत्येवमुक्तो मुनिभिः सुकेशी प्रणम्य तान् ब्रह्मनिधीन् महर्षीन्।
जगाम चोत्पत्य पुरं स्वकीयं मुहुर्मुहुर्धर्ममवेक्षमाणः ॥१२४॥

॥ इति श्रीवामनपुराणे चतुर्दशोऽध्यायः ॥ १४ ॥

पुलस्त्यजी बोले—मुनियोंके ऐसा कहनेके बाद सुकेशी उन ब्रह्मज्ञानी महर्षियोंको बारम्बार प्रणामकर धर्मका चिन्तन करते हुए उड़कर अपने पुरको चला गया ॥१२४॥

॥ इस प्रकार श्रीवामनपुराणमें चौदहवाँ अध्याय समाप्त हुआ ॥ १४ ॥

[अथ पञ्चदशोऽध्यायः]

पुलस्त्य उवाच

ततः सुकेशिर्देवर्षे गत्वा स्वपुरमुत्तमम्। समाहूयाब्रवीत् सर्वान् राक्षसान् धार्मिकं वचः ॥ १ ॥
अहिंसा सत्यमस्तेयं शौचमिन्द्रियसंयमः। दानं दया च क्षान्तिश्च ब्रह्मचर्यममानिता ॥ २ ॥
शुभा सत्या च मधुरा वाङ् नित्यं सत्क्रियारतिः। सदाचारनिषेवित्वं परलोकप्रदायकाः ॥ ३ ॥
इत्यूचुर्मुनयो मह्यं धर्ममाद्यं पुरातनम्। सोऽहमाज्ञापये सर्वान् क्रियतामविकल्पतः ॥ ४ ॥

पन्द्रहवाँ अध्याय प्रारम्भ

(दैत्योंका धर्म एवं सदाचारका पालन, सुकेशीके नगरका उत्थान-पतन, वरुणा-असीकी महिमा, लोलार्क-प्रसंग)

पुलस्त्यजी बोले—देवर्षे! उसके बाद अपने उत्तम नगरमें जाकर सुकेशीने सभी राक्षसोंको बुलाकर उनसे धर्मकी बात बतलायी। (सुकेशिने कहा—) अहिंसा, सत्य, चोरीका सर्वथा त्याग, पवित्रता, इन्द्रियसंयम, दान, दया, क्षमा, ब्रह्मचर्य, अहंकारका न करना, प्रिय, सत्य और मधुर वाणी बोलना, सदा सत्कार्योंमें अनुराग रखना एवं सदाचारका पालन करना—ये सब धर्म परलोकमें सुख देनेवाले हैं। मुनियोंने इस प्रकारके आदिकाल-के पुरातन धर्मको मुझे बतलाया है। मैं तुमलोगोंको आज्ञा देता हूँ कि तुमलोग बिना किसी हिचकके इन सभी धर्मोंका आचरण करो ॥ १–४ ॥

पुलस्त्य

ततः सुकेशिवचनात् सर्व एव निशाचराः। त्रयोदशाङ्गं ते धर्मं चक्रुर्मुदितमानसाः ॥ ५ ॥
ततः प्रवृद्धिं सुतरामगच्छन्त निशाचराः। पुत्रपौत्रार्थसंयुक्ताः सदाचारसमन्विताः ॥ ६ ॥
तज्ज्योतिस्तेजसस्तेषां राक्षसानां महात्मनाम्। गन्तुं नाशक्नुवन् सूर्यो नक्षत्राणि न चन्द्रमाः ॥ ७ ॥
ततस्त्रिभुवने ब्रह्मन् निशाचरपुरोऽभवत्। दिवा चन्द्रस्य सदृशः क्षणदायां च सूर्यवत् ॥ ८ ॥

पुलस्त्यजीने कहा—उसके बाद सुकेशीके वचनसे सभी राक्षस प्रसन्न-चित्त होकर (अहिंसा आदि) तेरह अङ्गवाले धर्मका आचरण करने लगे। इससे राक्षसोंकी सभी प्रकारकी अच्छी उन्नति हुई। वे पुत्र-पौत्र तथा अर्थ-धर्म-सदाचार आदिसे सम्पन्न हो गये। उन महान् राक्षसोंके तेजके सामने सूर्य, नक्षत्र और चन्द्रमाकी गति एवं कान्ति क्षीण-सी दीखने लगी। ब्रह्मन्! उसके बाद निशाचरोंकी नगरी तीनों लोकोंमें दिनमें चन्द्रमाके समान और रातमें सूर्यके समान चमकने लगी ॥ ५–८ ॥

न ज्ञायते गतिर्व्योम्नि भास्करस्य ततोऽम्बरे। शशाङ्कमिति तेजस्त्वादमन्यन्त पुरोत्तमम् ॥ ९ ॥
स्वं विकासं विमुञ्चन्ति निशामिति व्यचिन्तयन्। कमलाकरेषु कमला मित्रमित्यवगम्य हि।
रात्रौ विकसिता ब्रह्मन् विभूतिं दातुमीप्सवः ॥ १० ॥
कौशिका रात्रिसमयं बुद्ध्वा निरगमन् किल। तान् वायसास्तदा ज्ञात्वा दिवा निघ्नन्ति कौशिकान् ॥ ११ ॥
स्नातकास्त्वापगास्वेव स्नानजप्यपरायणाः। आकण्ठमग्नास्तिष्ठन्ति रात्रौ ज्ञात्वाऽथ वासरम् ॥ १२ ॥

(फलतः) अब आकाशमें सूर्यकी गतिका (चलनेका) पता नहीं लगता था। लोग उस श्रेष्ठ नगरको नगरके तेजके कारण आकाशमें चन्द्रमा समझने लग गये। ब्रह्मन्! सरोवरके कमल दिनको रात्रि समझकर विकसित नहीं होते थे। पर वे रात्रिमें सुकेशीके पुरको सूर्य समझकर विभूति प्रदान करनेकी इच्छासे विकसित होने लगे। इसी प्रकार उल्लू भी दिनको रात समझकर बाहर निकल आये और कौए दिनमें आये जानकर उन उल्लुओंको मारने लगे।

स्नान करनेवाले लोग भी रात्रिको दिन समझकर गलेतक सुने बदन होकर स्नान करने और एक जप करते हुए जलमें खड़े रहे ॥ ९—१२ ॥

न व्ययुज्यन्त चक्राश्च तदा वै पुरदर्शने । मन्यमानास्तु दिवसमिदमुच्चैर्ब्रुवन्ति च ॥ १३ ॥
नूनं कान्ताविहीनेन केनचिच्चक्रपक्षिणा । उत्सृष्टं जीवितं शून्ये फूत्कृत्य सरितस्तटे ॥ १४ ॥
ततोऽनुकम्पयाविष्टो विवस्वांस्तीव्ररश्मिभिः । संतापयञ्जगत् सर्वं नास्तमेति कथंचन ॥ १५ ॥
अन्ये वदन्ति चक्राह्वो नूनं कश्चिन् मृतो भवेत् । तत्कान्तया तपस्तप्तं भर्तृशोकार्तया घन ॥ १६ ॥
आराधितस्तु भगवांस्तपसा वै दिवाकरः । तेनासौ शशिनिर्जेता नास्तमेति रविर्ध्रुवम् ॥ १७ ॥

उस समय सुकेशीके नगरके (सूर्यवत्) दर्शन होनेसे चकवा-चकई पक्षियोंको दिन मानकर परस्पर अलग नहीं होते थे । वे उच्चस्वरसे कहते—निश्चय ही किसी पत्नीसे विहीन चक्रवाक पक्षीने एकान्तमें नदी-तटपर फूत्कार करके जीवन त्याग दिया है । इसीसे दयार्द्र सूर्य अपनी तेज किरणोंसे जगत्‌को तपाते हुए किसी प्रकार अस्त नहीं हो रहे हैं । दूसरे कहते हैं—निश्चय ही कोई चक्रवाक मर गया है और पतिके शोकमें उसकी दुःखिनी कान्ताने भारी तप किया है । इसीलिये निश्चय ही उसकी तपस्यासे प्रसन्न हुए एवं चन्द्रमाको जीतनेवाले भगवान् सूर्य अस्त नहीं हो रहे हैं ॥ १३—१७ ॥

यज्विनां होमशालासु सह ऋत्विग्भिरध्वरे । प्रावर्तयन्त कर्माणि रात्रावपि महामुने ॥ १८ ॥
महाभागवताः पूजां विष्णोः कुर्वन्ति भक्तितः । रवौ शशिनि चैवान्ये ब्रह्मणोऽन्ये हरस्य च ॥ १९ ॥
कामिनश्चाप्यमन्यन्त साधु चन्द्रमसा कृतम् । यदियं रजनी रम्या कृता सततकौमुदी ॥ २० ॥

महामुने ! उन दिनों यज्ञशालाओंमें ऋत्विजोंके साथ यजमान लोग रात्रिमें भी यज्ञकर्म करनेमें लगे रहते थे । विष्णुके भक्तलोग भक्तिपूर्वक सदा विष्णुकी पूजा करते रहते एवं दूसरे लोग सूर्य, चन्द्र, ब्रह्मा और शिवकी आराधनामें लगे रहते थे । कामी लोग यह मानने लगे कि चन्द्रमाने रात्रिको निरन्तरके लिये अपनी ज्योत्स्ना-मयी बना दिया, अच्छा हुआ ॥ १८–२० ॥

अन्ये ब्रुवँल्लोकगुरुरस्माभिश्चक्रभृद् वशी । निर्व्याजेन महागन्धैरर्चितः कुसुमैः शुभैः ॥ २१ ॥
सह लक्ष्म्या महायोगी नभस्यादिचतुर्ष्वपि । अशून्यशयना नाम द्वितीया सर्वकामदा ॥ २२ ॥
तेनासौ भगवान् प्रीतः प्रादाच्छयनमुत्तमम् । अशून्यं च महाभोगैरनस्तमितगोचरम् ॥ २३ ॥
अन्येऽब्रुवन् ध्रुवं देव्या रोहिण्या शशिनः क्षयम् । दृष्ट्वा तप्तं तपो घोरं रुद्राराधनकाम्यया ॥ २४ ॥
पुण्यायामक्षयाष्टम्यां वेदोक्तविधिना स्वयम् । तुष्टेन शंभुना दत्तं वरं चास्यै यदृच्छया ॥ २५ ॥

दूसरे लोग कहने लगे कि इन लोगोंने श्रावण आदि चार महीनोंमें शुद्धभावसे अति सुगन्धित पवित्र पुष्पोंद्वारा महालक्ष्मीके साथ सुदर्शनचक्रको धारण करनेवाले भगवान् विष्णुकी पूजा की है । इसी अवसरमें सर्वकामदा अशून्यशयना द्वितीया तिथि होती है । उसीमें प्रसन्न होकर भगवानने अशून्य तथा महाभोगोंसे परिपूर्ण उत्तम सदन प्रदान किया है । दूसरे कहते कि देवी रोहिणीने चन्द्रमाका क्षय देखकर निश्चय ही रुद्रकी आराधना करनेकी अभिलाषासे परम पवित्र अक्षय अष्टमी तिथिमें वेदोक्त विधिसे कठिन तपस्या की है, जिससे सन्तुष्ट होकर भगवान् शंकरने उसे अपनी इच्छासे वर दिया है ॥ २१–२५ ॥

अन्येऽब्रुवन् चन्द्रमसा ध्रुवमाराधितो हरिः । व्रतेनेह त्वखण्डेन तेनाखण्डः शशी दिवि ॥ २६ ॥
अन्ये ब्रुवञ्शशाङ्केन ध्रुवं रक्षा कृतात्मनः । पदद्वयं समभ्यर्च्य विष्णोरमिततेज

तेनासौ दीप्तिमांश्चन्द्रः परिभूय दिवाकरम्। अस्माकमानन्दकरो दिवा तपति सूर्यवत्॥ २८॥
लक्ष्यते कारणैरन्यैर्बहुभिः सत्यमेव हि। शशाङ्कनिर्जितः सूर्यो न विभाति यथा पुरा॥ २९॥

दूसरे लोग कहते—चन्द्रमाने निश्चय ही अखण्ड-व्रतका आचरण करके भगवान् हरिको आराधित किया है। उससे आकाशमें चन्द्रमा अखण्डरूपसे प्रकाशित हो रहा है। दूसरोंने कहा—चन्द्रमाने अत्यधिक तेजवाले श्रीविष्णुके चरणयुगलकी विधिवत् पूजा करके अपनी रक्षा की है। उससे तेजस्वी चन्द्रमा सूर्यपर विजय प्राप्त करके हमें आनन्द देते हुए दिनमें सूर्यकी भाँति दीप्तिमान् हो रहे हैं। अन्य अनेक प्रकारके कारणोंसे सचमुच यह लक्षित हो रहा है कि चन्द्रमाके द्वारा पराजित हुए सूर्य पूर्ववत् दीप्तिवाले नहीं दीख रहे हैं॥ २६–२९॥

यथामी कमलाः श्लक्ष्णा रणद्भृङ्गगणावृताः। विकचाः प्रतिभासन्ते जातः सूर्योदयो ध्रुवम्॥ ३०॥
यथा चामी विभाजन्ति विकचाः कुमुदाकराः। अतो विज्ञायते चन्द्र उदितश्च प्रतापवान्॥ ३१॥
एवं संभाषतां तत्र सूर्यो वाक्यानि नारद। अमन्यत किमेतद्धि लोको वक्ति शुभाशुभम्॥ ३२॥
एवं संचिन्त्य भगवान् दध्यौ ध्यानं दिवाकरः। आसमन्ताज्जगद् ग्रस्तं त्रैलोक्यं रजनीचरैः॥ ३३॥

इधर ये सुन्दर कमल खिले हैं और उनपर भौंरे गुंजार कर रहे हैं। भ्रमर-समूहसे आवृत ये सुन्दर कमल विकसित दिखलायी पड़ रहे हैं; अतः निश्चय ही सूर्योदय हुआ है। और इधर ये कुमुदवृन्द खिले हुए हैं; अतः लगता है कि प्रतापवान् चन्द्रमा उदित हुआ है। नारदजी! इस प्रकार वार्ता करनेवालोंके वाक्योंको सुनकर सूर्य सोचने लगे कि ये लोग इस प्रकार शुभाशुभ वचन क्यों बोल रहे हैं! भगवान् दिवाकर ऐसा विचारकर ध्यानमग्न हो गये और उन्होंने देखा कि समस्त त्रैलोक्य चारों ओरसे राक्षसोंद्वारा ग्रस्त हो गया है॥ ३०–३३॥

ततस्तु भगवाञ्ज्ञात्वा तेजसोऽप्यसहिष्णुताम्। निशाचरस्य वृद्धिं तामचिन्तयत योगवित्॥ ३४॥
ततोऽपश्यद्धि तान् सर्वान् सदाचाररताञ्शुचीन्। देवब्राह्मणपूजासु संसक्तान् धर्मसंयुतान्॥ ३५॥
ततस्तु रक्षःक्षयकृत् तिमिरद्विपकेसरी। महांशुनखरः सूर्यस्तद्विघातमचिन्तयत्॥ ३६॥
ज्ञात्वा च ततश्छिद्रं राक्षसानां दिवस्पतिः। स्वधर्मविच्युतिर्नाम सर्वधर्मविघातकृत्॥ ३७॥

तब योगी भगवान् भास्कर राक्षसोंकी वृद्धि तथा तेजकी असहनीयताको जानकर स्वयं चिन्तन करने लगे। उन्हें यह ज्ञात हुआ कि सभी राक्षस सदाचार-परायण, पवित्र, देवता और ब्राह्मणोंकी पूजामें अनुरक्त तथा धार्मिक हैं। इसके बाद राक्षसोंको नष्ट करनेवाले तथा अन्धकाररूपी हाथीके लिये तेज किरणरूपी नखवाले सिंहके समान सूर्य उनके विनाशके विषयमें चिन्तन करने लगे। अन्तमें सूर्यको राक्षसोंके अपने धर्मसे गिरनेका मूल कारण मालूम हुआ, जो समस्त धर्मोंका विनाशक है॥ ३४–३७॥

ततः क्रोधाभिभूतेन भानुना रिपुभेदिभिः। भानुभी राक्षसपुरं तद् दृष्टं च यथेच्छया॥ ३८॥
स भानुना तदा दृष्टः क्रोधाध्मातेन चक्षुषा। निपपाताम्बराद् भ्रष्टः क्षीणपुण्य इव ग्रहः॥ ३९॥
पतमानं समालोक्य पुरं शालकटङ्कटः। नमो भवाय शर्वाय इदमुच्चैरुदीरयत्॥ ४०॥
तमाक्रन्दितमाकर्ण्य चारणा गगनेचराः। हा हेति चुक्रुशुः सर्वे हरभक्तः पतत्यसौ॥ ४१॥

तब क्रोधसे अभिभूत सूर्यने शत्रुओंके भेदन करनेवाली अपनी किरणोंद्वारा भलीभाँति उस राक्षसको देखा। उस समय सूर्यद्वारा क्रोधभरी दृष्टिसे देखे जानेके कारण वह नगर नष्ट हुए पुण्यवाले ग्रहके समान आकाशसे नीचे गिर पड़ा। अपने नगरको गिरते देखकर शालकटंकट-(सुकेशी-)ने ऊँचे स्वरसे चीखनेके स्वरमें

'नमो भवाय शर्वाय' यह कहा। उसकी उस चीत्कारको सुनकर गगनमें विचरण करनेवाले सभी चारण चिल्लाने लगे—हाय हाय! हाय हाय! यह शिव भक्त तो नीचे गिर रहा है॥ ३८–४१॥

तच्चारणवचः शर्वः श्रुतवान् सर्वगोऽव्ययः। श्रुत्वा संचिन्तयामास केनासौ पात्यते भुवि॥ ४२॥
ज्ञातवान् देवपतिना सहस्रकिरणेन तत्। पातितं राक्षसपुरं ततः क्रुद्धस्त्रिलोचनः॥ ४३॥
क्रुद्धस्तु भगवन्तं तं भानुमन्तमपश्यत। दृष्टमात्रस्त्रिनेत्रेण निपपात ततोऽम्बरात्॥ ४४॥
गगनात् स परिभ्रष्टः पथि वायुनिषेविते। यदृच्छया निपतितो यन्त्रमुक्तो यथोपलः॥ ४५॥

सर्वत्र व्याप्त और अविनाशी शिव शङ्करने चारणोंके उस वचनको सुना और फिर सोचने लगे—यह नगर किसके द्वारा पृथ्वीपर गिराया जा रहा है। उन्होंने यह जान लिया कि देवोंके पति सहस्रकिरणवाले सूर्यद्वारा राक्षसोंका यह पुर गिराया गया है। इससे त्रिलोचन शंकर क्रुद्ध हो गये और उन्होंने भगवान् सूर्यको देखा। त्रिनेत्रधारी शंकरके देखते ही वे सूर्य आकाशसे नीचे आ गिरे। आकाशसे नीचे वायुमण्डलमार्गमें वे इस प्रकार गिरे जैसे यन्त्रके द्वारा कोई पत्थर फेंका गया हो॥ ४२–४५॥

ततो वायुपथान्मुक्तः किंशुकोज्ज्वलविग्रहः। निपपातान्तरिक्षात् स वृतः किन्नरचारणैः॥ ४६॥
चारणैर्वेष्टितो भानुः प्रविभात्यम्बरात् पतन्। अर्धपक्वं यथा तालात् फलं कपिभिरावृतम्॥ ४७॥
ततस्तु ऋषयोऽभ्येत्य प्रत्यूचुर्भानुमालिनम्। निपतस्व हरिक्षेत्रे यदि श्रेयोऽभिवाञ्छसि॥ ४८॥
ततोऽब्रवीत् पतन्नेव विवस्वांस्तांस्तपोधनान्। किं तत् क्षेत्रं हरेः पुण्यं वदध्वं शीघ्रमेव मे॥ ४९॥

फिर पलाश-पुष्पके समान आभावाले सूर्य वायुमण्डलसे अलग होकर किन्नरों एवं चारणोंसे भरे अन्तरिक्षसे नीचे गिर गये। उस समय आकाशसे नीचे गिरते हुए सूर्य चारणोंसे घिरे हुए ऐसे लग रहे थे, जैसे तालवृक्षसे गिरनेवाला अधपका तालफल कपियोंसे घिरा हो। तब मुनियोंने किरणमाली भगवान् सूर्यदेवके समीप आकर उनसे कहा कि यदि तुम कल्याण चाहते हो तो विष्णुके क्षेत्रमें गिरो। गिरते हुए ही सूर्यने (ऐसा सुनकर) उन तपस्वियोंसे पूछा—विष्णुभगवान्का वह पवित्र क्षेत्र कौन-सा है? आपलोग उसे मुझे शीघ्र बतलायें॥ ४६–४९॥

तमूचुर्मुनयः सूर्यं शृणु क्षेत्रं महाफलम्। साम्प्रतं वासुदेवस्य भावि तच्छंकरस्य च॥ ५०॥
योगशायिनमारभ्य यावत् केशवदर्शनम्। एतत् क्षेत्रं हरेः पुण्यं नाम्ना वाराणसी पुरी॥ ५१॥
तच्छ्रुत्वा भगवान् भानुर्भवनेत्राग्नितापितः। वरणायास्तथैवास्यास्त्वन्तरे निपपात [illegible]॥ ५२॥
ततः प्रदह्यति तनौ निमज्ज्यास्यां लुलन् रविः। वरणायां समभ्येत्य न्यमज्जत यथेच्छया॥ ५३॥

इसपर मुनियोंने सूर्यसे बतलाया—सूर्यदेव! आप [illegible] देनेवाले उस क्षेत्रका विवरण सुनिये। इस समय वह क्षेत्र वासुदेवका क्षेत्र है, किंतु भविष्यमें वह शंकरका क्षेत्र होगा। योगशायीसे प्रारम्भ कर केशवदर्शनतक क्षेत्र हरिका पवित्र क्षेत्र है, इसका नाम वाराणसीपुरी है। उसे सुनकर शिवजीकी नेत्राग्निसे संतप्त होते हुए भगवान् सूर्य वरणा और असी इन दोनों नदियोंके बीचमें गिरे। उसके बाद शरीरके जलते रहनेसे [illegible] हुए सूर्य असी नदीमें स्नान करनेके बाद वरुणा नदीमें इच्छानुकूल स्नान किये॥ ५०–५३॥

भूयोऽसिं वरणां भूयो भूयोऽपि वरणामसिम्। लुलंस्त्रिनेत्राग्न्यार्तो भ्रमतेऽलातचक्रवत्॥
एतस्मिन्नन्तरे ब्रह्मन् ऋषयो यक्षराक्षसाः। नागा विद्याधराश्चापि पक्षिणोऽप्सरस्[illegible]

१–अब भी वरुणा और असी नदियाँ वाराणसीके [illegible] छिपे हुए हैं। असी [illegible] है, पर वरुणा सदा सम्पूर्ण रहती है।

यावन्तो भास्कररथे भूतप्रेतादयः स्थिताः। तावन्तो ब्रह्मसदनं गता वेदयितुं मुने ॥ ५६ ॥
ततो ब्रह्मा सुरपतिः सुरैः सार्धं समभ्यगात्। रम्यं महेश्वरावासं मन्दरं रविकारणात् ॥ ५७ ॥
गत्वा दृष्ट्वा च देवेशं शंकरं शूलपाणिनम्। प्रसाद्य भास्करार्थाय वाराणस्यामुपानयत् ॥ ५८ ॥

इस प्रकार शंकरके तीसरे नेत्रकी अग्निसे दग्ध होकर वे बारंबार असि और वरुणा नदियोंकी ओर अलातचक्र (लुकाठीके मण्डल)के समान चक्कर काटने लगे। मुने! इस बीच ऋषि, यक्ष, राक्षस, नाग, विद्याधर, पक्षी, अप्सराएँ और भास्करके रथमें जितने भूत-प्रेत आदि थे, वे सभी इसे ज्ञापित करनेके लिये ब्रह्मलोकमें गये। तब सुरपति इन्द्र, ब्रह्मा देवताओंके साथ सूर्यकी शान्तिके लिये महेश्वरके आवास-स्थान मन्दर पर्वतपर गये। वहाँ जाकर तथा देवेश शूलपाणि भगवान् शिवका दर्शन करनेके बाद भगवान् ब्रह्माजी भास्करके लिये उन्हें (शिवजीको) प्रसन्न कर उन्हें (सूर्यको) वाराणसीमें लाये ॥ ५४–५८ ॥

ततो दिवाकरं भूयः पाणिनादाय शंकरः। कृत्वा नामास्य लोलेति रथमारोपयत् पुनः ॥ ५९ ॥
आरोपिते दिनकरे ब्रह्माऽभ्येत्य सुकेशिनम्। सबान्धवं सनगरं पुनरारोपयद् दिवि ॥ ६० ॥
समारोप्य सुकेशिं च परिष्वज्य च शंकरम्। प्रणम्य केशवं देवं वैराजं स्वगृहं गतः ॥ ६१ ॥
एवं पुरा नारद भास्करेण पुरं सुकेशेर्भुवि संनिपातितम्।
दिवाकरो भूमितले भवेन क्षिप्तस्तु दृष्ट्या न च संप्रदग्धः ॥ ६२ ॥
आरोपितो भूमितलाद् भवेन भूयोऽपि भानुः प्रतिभासनाय।
स्वयंभुवा चापि निशाचरेन्द्रस्त्वारोपितः खे सपुरः सबन्धुः ॥ ६३ ॥

॥ इति श्रीवामनपुराणे पञ्चदशोऽध्यायः ॥ १५ ॥

फिर भगवान् शंकरने सूर्य भगवान्‌को हाथमें लेकर उनका नाम 'लोल' रख दिया और उन्हें पुनः उनके रथपर स्थापित कर दिया। दिनकरके अपने रथमें आरूढ़ हो जानेपर ब्रह्मा सुकेशीके पास गये एवं उसे भी पुनः बान्धवों और नगरसहित आकाशमें पूर्ववत् स्थापित कर दिया। सुकेशीको पुनः आकाशमें स्थापित करनेके बाद ब्रह्माजी शंकरका आलिङ्गन एवं केशवदेवको प्रणाम कर अपने वैराज नामक लोकमें चले गये। नारदजी! प्राचीन समयमें इस प्रकार सूर्यने सुकेशीके नगरको पृथ्वीपर गिराया एवं महादेवने भगवान् सूर्यको अपने तृतीय नेत्रकी अग्निसे दग्ध न कर केवल भूमितलपर गिरा ही दिया था। फिर शंकरने सूर्यको प्रतिभासित होनेके लिये भूमितलसे आकाशमें स्थित किया और ब्रह्माने निशाचरराजको उसके पुर और बन्धुओंके साथ आकाशमें फिर संस्थापित कर दिया ॥ ५९–६३ ॥

॥ इस प्रकार श्रीवामनपुराणमें पन्द्रहवाँ अध्याय समाप्त हुआ ॥ १५ ॥

[अथ षोडशोऽध्यायः]

नारद उवाच

यानेतान् भगवान् प्राह कामिभिः शशिनं प्रति। आराधनाय देवाभ्यां हरीशाभ्यां वदस्व तान् ॥ १ ॥

सोलहवाँ अध्याय प्रारम्भ

(देवताओंकी शयन-तिथियों और उनके अशून्यशयन आदि व्रतों एवं शिव-पूजनका वर्णन)

नारदजीने कहा—पुलस्त्यजी! आपने चन्द्रमाके प्रति कामियोंद्वारा वर्णित श्रीहरि और शंकरकी आराधनाके लिये जिन व्रतोंका उल्लेख किया है उनका वर्णन करें ॥ १ ॥

*

पुलस्त्य उवाच

शृणुष्व कामिभिः प्रोक्तान् व्रतान् पुण्यान् कलिप्रिय। आराधनाय शर्वस्य केशवस्य च धीमतः॥ २॥
यदा त्वाषाढी संयाति व्रजते चोत्तरायणम्। तदा स्वपिति देवेशो भोगिभोगे श्रियः पतिः॥ ३॥
प्रतिसुप्ते विभौ तस्मिन् देवगन्धर्वगुह्यकाः। देवानां मातरश्चापि प्रसुप्ताश्चाप्यनुक्रमात्॥ ४॥

पुलस्त्यजी बोले—लोक-कल्याणके लिये कलहको भी इष्ट माननेवाले कलि (कलह)प्रिय नारदजी! आप महादेव और बुद्धिमान् श्रीहरिकी आराधनाके लिये कामियोंद्वारा कहे गये पवित्र व्रतोंका वर्णन सुनें। जब आषाढ़ी पूर्णिमा बीत जाती है एवं उत्तरायण चलता रहता है, तब लक्ष्मीपति भगवान् विष्णु भोगिभोग (शेषशय्या) पर सो जाते हैं। उन विष्णुके सो जानेपर देवता, गन्धर्व, गुह्यक एवं देवमाताएँ भी क्रमशः सो जाती हैं॥ २—४॥

नारद उवाच

कथयस्व सुरादीनां शयने विधिमुत्तमम्। सर्वमनुक्रमेणैव पुरस्कृत्य जनार्दनम्॥ ५॥

नारदने कहा—जनार्दनसे लेकर अनुक्रमसे देवता आदिके शयनकी सब उत्तम विधि मुझे बतलाइये॥ ५॥

पुलस्त्य उवाच

मिथुनाभिगते सूर्ये शुक्लपक्षे तपोधन। एकादश्यां जगत्स्वामी शयनं परिकल्पयेत्॥ ६॥
शेषाहिभोगपर्यङ्कं कृत्वा सम्पूज्य केशवम्। कृत्वोपवीतकं चैव सम्यक्सम्पूज्य वै द्विजान्॥ ७॥
अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः। लब्ध्वा पीताम्बरधरः स्वस्तिनिद्रां समानयेत्॥ ८॥

पुलस्त्यजी बोले—तपोधन नारदजी! आषाढ़के शुक्लपक्षमें सूर्यके मिथुन राशिमें चले जानेपर एकादशी तिथिके दिन जगदीश्वर विष्णुकी शय्याकी परिकल्पना करनी चाहिये। उस शय्यापर शेषनागके शरीर और फणकी रचना कर यज्ञोपवीतयुक्त श्रीकेशव (की प्रतिमा) की पूजा कर ब्राह्मणोंकी आज्ञासे स्वयं एवं पवित्रतापूर्वक रहते हुए स्वयं भी पीताम्बर धारण कर द्वादशी तिथिमें सुखपूर्वक उन्हें सुलाना चाहिये॥ ६—८॥

त्रयोदश्यां ततः कामः स्वपते शयने शुभे। कदम्बानां सुगन्धानां कुसुमैः परिकल्पिते॥ ९॥
चतुर्दश्यां ततो यक्षाः स्वपन्ति सुखशीतले। सौवर्णपङ्कजकृते सुखास्तीर्णोपधानके॥ १०॥
पौर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे। वैयाघ्रे च जटाभारं समुद्ग्रथ्यान्यचर्मणा॥ ११॥
ततो दिवाकरो राशिं संप्रयाति च कर्कटम्। ततोऽमराणां रजनी भवति दक्षिणायनम्॥ १२॥

इसके बाद त्रयोदशी तिथिमें सुगन्धित कदम्बके पुष्पोंसे बनी पवित्र शय्यापर कामदेव शयन करते हैं। फिर चतुर्दशीको सुशीतल स्वर्णपङ्कजसे निर्मित सुखदायकरूपमें बिछाये गये एवं तकियेवाली शय्यापर यक्षलोग शयन करते हैं। पूर्णमासी तिथिको चर्मवस्त्र धारणकर उमानाथ शंकर एक-दूसरे चर्मद्वारा जटाभार बाँधकर व्याघ्र चर्मकी शय्यापर सोते हैं। उसके बाद जब सूर्य कर्क राशिमें गमन करते हैं तब देवताओंके लिये रात्रिस्वरूप दक्षिणायनका आरम्भ हो जाता है॥ ९—१२॥

ब्रह्मा प्रतिपदि तथा नीलोत्पलमयेऽनघ। तल्पे स्वपिति लोकानां दर्शयन् मार्गमुत्तमम्॥ १३॥
विश्वकर्मा द्वितीयायां तृतीयायां गिरेः सुता। विनायकश्चतुर्थ्यां तु पञ्चम्यामपि धर्मराट्॥ १४॥
षष्ठ्यां स्कन्दः प्रस्वपिति सप्तम्यां भगवान् रविः। कात्यायनी तथाष्टम्यां नवम्यां कमलालया॥ १५॥
दशम्यां भुजगेन्द्राश्च स्वपन्ते वायुभोजनाः। एकादश्यां तु कृष्णायां साध्या ब्रह्मन् ॥१६॥

निष्पाप नारदजी! लोगोंको उत्तम मार्ग दिखलाते हुए ब्रह्माजी (श्रावण कृष्ण) प्रतिपदाको नीले कमलकी शय्यापर सो जाते हैं। विश्वकर्मा द्वितीयाको, पार्वतीजी तृतीयाको, गणेशजी चतुर्थीको, धर्मराज पञ्चमीको, कार्तिकेयजी षष्ठीको, सूर्य भगवान् सप्तमीको, दुर्गादेवी अष्टमीको, लक्ष्मीजी नवमीको, वायु पीनेवाले श्रेष्ठ सर्प दशमीको और साध्यगण कृष्णपक्षकी एकादशीको सो जाते हैं॥ १३-१६॥

एष क्रमस्ते गदितो नभाद्यौ स्वपने मुने। स्वपत्सु तत्र देवेषु प्रावृट्कालः समाययौ॥ १७॥
कङ्काः बलाकाभिरारोहन्ति नभोत्तमान्।
वायसाश्चापि कुर्वन्ति नीडानि ऋषिपुंगव। वायसाश्च स्वपन्त्येते ऋतौ गर्भभरालसाः॥ १८॥
यस्यां तिथ्यां प्रस्वपिति विश्वकर्मा प्रजापतिः। द्वितीया सा शुभा पुण्या अशून्यशयनोदिता॥ १९॥
तस्यां तिथावर्च्य हरिं श्रीवत्साङ्कं चतुर्भुजम्। पर्यङ्कस्थं समं लक्ष्म्या गन्धपुष्पादिभिर्मुने॥ २०॥
ततो देवाय शय्यायां फलानि प्रक्षिपेत् क्रमात्। सुरभीणि निवेद्येत्थं विज्ञाप्यो मधुसूदनः॥ २१॥

मुने! इस प्रकार हमने तुम्हें श्रावण आदिके महीनोंमें देवताओंके सोनेका क्रम बतलाया। देवोंके सो जानेपर वर्षाकालका आगमन हो जाता है। ऋषिश्रेष्ठ! (तब) बलाकाओं (बगुलोंके झुंडों)के साथ कङ्क पक्षी ऊँचे पर्वतोंपर चढ़ जाते हैं तथा कौए घोंसले बनाने लगते हैं। इस ऋतुमें मादा कौएँ गर्भभारके कारण आलस्यसे सोती हैं। प्रजापति विश्वकर्मा जिस द्वितीया तिथिमें सोते हैं वह कल्याणकारिणी पवित्र तिथि अशून्यशयना द्वितीया तिथि कही जाती है। मुने! उस तिथिमें लक्ष्मीके साथ पर्यङ्कस्थ श्रीवत्सनामक चिह्न धारण करनेवाले चतुर्भुज विष्णुभगवान्की गन्ध-पुष्पादिके द्वारा पूजाके हेतु शय्यापर क्रमशः फल तथा सुगन्ध-द्रव्य निवेदित कर उनसे इस प्रकार प्रार्थना करे कि—॥ १७-२१॥

यथा हि लक्ष्म्या न वियुज्यसे त्वं त्रिविक्रमानन्त जगन्निवास।
तथा त्वशून्यं शयनं सदैव अस्माकमेवेह तव प्रसादात्॥ २२॥
यथा त्वशून्यं तव देव तल्पं समं हि लक्ष्म्या वरदाच्युतेश।
सत्येन तेनामितवीर्य विष्णो गार्हस्थ्यनाशो मम नास्तु देव॥ २३॥
इत्युच्चार्य प्रणम्येशं प्रसाद्य च पुनः पुनः। भुञ्जीत देवर्षे तैलक्षारविवर्जितम्॥ २४॥
द्वितीयेऽह्नि द्विजाग्र्याय फलान् दद्याद् विचक्षणः। लक्ष्मीधरः प्रीयतां मे इत्युच्चार्य निवेदयेत्॥ २५॥

हे त्रिविक्रम! हे अनन्त!! हे जगन्निवास!!! जिस प्रकार आप लक्ष्मीसे कभी अलग नहीं होते, उसी प्रकार आपकी कृपासे हमारी शय्या भी कभी शून्य न हो। हे देव! हे वरद! हे अच्युत! हे ईश! हे अमितवीर्यशाली विष्णो! आपकी शय्या लक्ष्मीसे शून्य नहीं होती, उसी सत्यके प्रभावसे हमारी भी गृहस्थीके नाशका अवसर न आवे—पत्नीका वियोग न हो। देवर्षे! इस प्रकार स्तुति करनेके बाद भगवान् विष्णुको प्रणामद्वारा बार-बार प्रसन्नकर रात्रिमें तेल एवं नमकसे रहित भोजन करे। दूसरे दिन बुद्धिमान् व्यक्ति, भगवान् लक्ष्मीधर मेरे ऊपर प्रसन्न हों—यह वाक्य उच्चारण कर श्रेष्ठ ब्राह्मणको फलोंका दान दे॥ २२-२५॥

अनेन तु विधानेन चातुर्मास्यव्रतं चरेत्। यावद् वृश्चिकराशिस्थः प्रतिभाति दिवाकरः॥ २६॥
ततो विबुध्यन्ति सुराः क्रमशः क्रमशो मुने। तुलास्थेऽर्के हरिः कामः शिवः पश्चाद्विबुध्यते॥ २७॥
तत्र दानं द्वितीयायां मूर्तिर्लक्ष्मीधरस्य तु। सशय्यास्तरणोपेता यथा विभवमात्मनः॥ २८॥
एष व्रतस्तु प्रथमः प्रोक्तस्तव महामुने। यस्मिश्चीर्णे वियोगस्तु न भवेदिह कस्यचित्॥ २९॥

जबतक सूर्य वृश्चिक राशिपर रहते हैं, तबतक इसी विधिसे चातुर्मास्य-व्रतका पालन किया जाना चाहिये। मुने! उसके बाद क्रमशः देवता जागते हैं। सूर्यके तुलाराशिमें स्थित होनेपर विष्णु जाग जाते हैं। उसके बाद काम और शिव जागते हैं। उसके पश्चात् द्वितीयाके दिन अपने विभवके अनुसार बिछौनेवाली शय्याके साथ लक्ष्मीधरकी मूर्तिका दान करे। महामुने! इस प्रकार मैंने आपको यह प्रथम व्रत बतलाया, जिसका आचरण करनेपर इस संसारमें किसीको वियोग नहीं होता। २६—२९॥

नभस्ये मासि च तथा या स्यात्कृष्णाष्टमी शुभा। युक्ता मृगशिरेणैव सा तु कालाष्टमी स्मृता॥ ३०॥
तस्यां सर्वेषु लिङ्गेषु तिथौ स्वपिति शंकरः। वसते संनिधाने तु तत्र पूजाऽक्षया स्मृता॥ ३१॥
तत्र स्नायीत वै विद्वान् गोमूत्रेण जलेन च। स्नातः संपूजयेत् पुष्पैर्धत्तूरस्य त्रिलोचनम्॥ ३२॥
धूपं केसरनिर्यासं नैवेद्यं मधुसर्पिषी।
प्रीयतां मे विरूपाक्षस्त्वित्युच्चार्य च दक्षिणाम्। विप्राय दद्यान्नैवेद्यं सहिरण्यं द्विजोत्तम॥ ३३॥

इसी प्रकार भाद्रपद मासमें मृगशिरा नक्षत्रसे युक्त जो पवित्र कृष्णाष्टमी होती है उसे कालाष्टमी माना गया है। उस तिथिमें भगवान् शंकर समस्त लिङ्गोंमें सोते एवं उनके संनिधानमें निवास करते हैं। इस अवसरपर की गयी शंकरजीकी पूजा अक्षय मानी गयी है। उस तिथिमें विद्वान् मनुष्यको चाहिये कि गोमूत्र और जलसे स्नान करे। स्नानके बाद धतूरके पुष्पोंसे शंकरकी पूजा करे। द्विजोत्तम! केसरके गोंदका धूप तथा मधु एवं घृतका नैवेद्य अर्पित करनेके बाद 'विरूपाक्ष (त्रिनेत्र) मेरे ऊपर प्रसन्न हों'—यह कहकर ब्राह्मणको दक्षिणा तथा सुवर्णके साथ नैवेद्य प्रदान करे॥ ३०—३३॥

तद्वदाश्वयुजे मासि उपवासी जितेन्द्रियः।
नवम्यां गोमयस्नानं कुर्यात्पूजां तु पङ्कजैः। धूपयेत् सर्जनिर्यासं नैवेद्यं मधुमोदकैः॥ ३४॥
कृतोपवासस्त्वष्टम्यां नवम्यां स्नानमाचरेत्। प्रीयतां मे हिरण्याक्षो दक्षिणा सतिला स्मृता॥ ३५॥
कार्तिके पयसा स्नानं करवीरेण चार्चनम्। धूपं श्रीवासनिर्यासं नैवेद्यं मधुपायसम्॥ ३६॥
सनैवेद्यं च रजतं दातव्यं दानमग्रजे। प्रीयतां भगवान् स्थाणुरिति वाच्यमनिष्ठुरम्॥ ३७॥

इसी प्रकार आश्विन मासमें नवमी तिथिको इन्द्रियोंको वशमें करके उपवास रहकर गोबरसे स्नान करनेके पश्चात् कमलोंसे पूजन करे तथा सर्ज वृक्षके निर्यास (गोंद) का धूप एवं मधु और मोदकका नैवेद्य अर्पित करे। अष्टमीको उपवास करके नवमीको स्नान करनेके बाद 'हिरण्याक्ष मेरे ऊपर प्रसन्न हों'—यह कहते हुए तिलके साथ दक्षिणा प्रदान करे। कार्तिकमें दुग्धस्नान तथा कनेरके पुष्पसे पूजा करे और सरल वृक्षकी गोंदका धूप तथा मधु एवं खीर नैवेद्य अर्पितकर विनयपूर्वक 'भगवान् शिव मेरे ऊपर प्रसन्न हों'—यह उच्चारण करते हुए ब्राह्मणको नैवेद्यके साथ रजतका दान करे॥ ३४—३७॥

कृत्वोपवासमष्टम्यां नवम्यां स्नानमाचरेत्। मासि मार्गशिरे स्नानं दध्नार्चा भद्रया स्मृता॥ ३८॥
धूपं श्रीवृक्षनिर्यासं नैवेद्यं मधुनोदनम्।
संनिवेद्या रक्तशालिर्दक्षिणा परिकीर्तिता। नमोऽस्तु प्रीयतां शर्वस्त्विति वाच्यं च पण्डितैः॥ ३९॥
पौषे स्नानं च हविषा पूजा स्यात्तगरैः शुभैः। धूपो मधुकनिर्यासो नैवेद्यं मधु शष्कुली॥ ४०॥
समुद्गा दक्षिणा प्रोक्ता प्रीणनाय जगद्गुरोः। वाच्यं नमस्ते देवेश त्र्यम्बकेति प्रकीर्तयेत्॥ ४१॥

मार्गशीर्ष (अगहन) मासमें अष्टमी तिथिको उपवास करके नवमी तिथिमें दहीसे स्नान करना चाहिये। इस समय 'भद्रा' ओषधिके द्वारा पूजाका विधान है। पण्डित व्यक्ति श्रीवृक्षके गोंदका धूप एवं मधु

और ओदनका नैवेद्य देकर 'शर्व (शिवजी) को नमस्कार है, वे मेरे ऊपर प्रसन्न हों'—यह कहते हुए रक्तशालि (लाल चावल) की दक्षिणा प्रदान करे—ऐसा कहा गया है। पौष मासमें घृतका स्नान तथा सुन्दर तगर-पुष्पोंद्वारा पूजा करनी चाहिये। फिर महुएके वृक्षकी गोंदका धूप देकर मधु एवं पूड़ीका नैवेद्य अर्पित करे और 'हे देवेश त्र्यम्बक! आपको नमस्कार है'—यह कहते हुए शंकरजीकी प्रसन्नताके लिये मूँगसहित दक्षिणा प्रदान करे॥ ३८–४१॥

माघे कुशोदकस्नानं मृगमदेन चार्चनम्। धूपः कदम्बनिर्यासो नैवेद्यं सतिलोदनम्॥ ४२॥
पयोभक्तं सनैवेद्यं सरुक्मं प्रतिपादयेत्। प्रीयतां मे महादेव उमापतिरितीरयेत्॥ ४३॥
एवमेव समुद्दिष्टं षड्भिर्मासैस्तु पारणम्। पारणान्ते त्रिनेत्रस्य स्नपनं कारयेत्क्रमात्॥ ४४॥
गोरोचनायाः सहिता गुडेन देवं समालभ्य च पूजयेत।
प्रीयस्व दीनोऽस्मि भवन्तमीश, मच्छोकनाशं प्रकुरुष्व योग्यम्॥ ४५॥

माघमासमें कुशके जलसे स्नान करे और मृगमद (कस्तूरीसे) अर्चन करे। उसके बाद कदम्ब वृक्षके गोंदका धूप देकर तिल एवं ओदन (भात) का नैवेद्य अर्पित करनेके पश्चात् 'महादेव उमापति मेरे ऊपर प्रसन्न हों'—यह कहते हुए सुवर्णके साथ दूध एवं भातकी दक्षिणा प्रदान करनी चाहिये। इस प्रकार छः मासके बाद (प्रथम) पारणकी विधि कही गयी है। पारणके अन्तमें त्रिनेत्रधारी महादेवका क्रमसे स्नान-कार्य सम्पन्न कराये। गोरोचनके सहित गुड़द्वारा महादेवकी प्रतिमाका अनुलेपन कर उसकी पूजा करे तथा इस प्रकार प्रार्थना करे कि—'हे ईश! मैं दीन हूँ तथा आपकी शरणमें हूँ; आप मेरे ऊपर प्रसन्न हों तथा मेरे दुःख-शोकका नाश करें'॥ ४२–४५॥

ततस्तु फाल्गुने मासि कृष्णाष्टम्यां यतव्रत। उपवासं समुदितं कर्तव्यं द्विजसत्तम॥ ४६॥
द्वितीयेऽह्नि ततः स्नानं पञ्चगव्येन कारयेत्। पूजयेत्कुन्दकुसुमैर्धूपयेत् चन्दनं त्वपि॥ ४७॥
नैवेद्यं सघृतं दद्यात् ताम्रपात्रे गुडोदनम्।
दक्षिणां च द्विजातिभ्यो नैवेद्यसहितां मुने। वासोयुगं प्रीणयेच्च रुद्रमुच्चार्य ॥ ४८॥
चैत्रे चोदुम्बरफलैः स्नानं मन्दारकार्चनम्। गुग्गुलुं महिषाख्यं च घृताक्तं धूपयेद् बुधः॥ ४९॥
समोदकं तथा सर्पिः प्रीणनं विनिवेदयेत्। दक्षिणा च सनैवेद्यं मृगाजिनमुदाहृतम्॥ ५०॥
नाट्येश्वर नमस्तेऽस्तु इदमुच्चार्य नारद। प्रीणनं देवनाथाय कुर्याच्छ्रद्धासमन्वितः॥ ५१॥

व्रतधारी द्विजश्रेष्ठ! इसके बाद फाल्गुन मासकी कृष्णाष्टमीको उपवास करना चाहिये। दूसरे दिन नवमीको पञ्चगव्यसे भगवान् शिवको स्नान कराये तथा कुन्दद्वारा अर्चनकर चन्दनका धूप और ताम्रपात्रमें घृतसहित गुड और ओदनका नैवेद्य प्रदान करे। उसके बाद 'रुद्र' शब्दका उच्चारण कर ब्राह्मणोंको नैवेद्यके साथ दक्षिणा तथा दो वस्त्र प्रदान कर महादेवको प्रसन्न करे। चैत्र मासमें गूलरके फलके जलसे स्नान कराये और मदारके फूलोंसे पूजा करे। उसके बाद बुद्धिमान् व्यक्ति घृतमिश्रित 'महिष' नामक गुग्गुलसे धूप देकर मोदकके साथ घृत उनकी प्रसन्नताके लिये अर्पित करे एवं 'नाट्येश्वर(भगवान्)को नमस्कार है'—यह कहते हुए नैवेद्यसहित दक्षिणारूपमें मृगचर्म प्रदान करे। इस प्रकार पूर्ण श्रद्धायुक्त होकर महादेवजीको प्रसन्न करे॥ ४६–५१॥

वैशाखे स्नानमुदितं सुगन्धकुसुमाम्भसा। पूजनं शंकरस्योक्तं चूतमञ्जरिभिर्विभो॥ ५२॥
धूपं सर्जाज्ययुक्तं च नैवेद्यं सफलं घृतम्। नामजप्यमपीशस्य कालघ्नेति विपश्चिता॥ ५३॥

जलकुम्भान् सनैवेद्यान् ब्राह्मणाय निवेदयेत्। सोपवीनान् सहान्नाद्यांस्तच्चित्तैस्तत्परायणैः॥ ५४॥
ज्येष्ठे स्नानं चामलकैः पूजार्ककुसुमैस्तथा। धूपयेत्तत्त्रिनेत्रं च आयत्यां पुष्टिकारकम्॥ ५५॥
सक्तूंश्च सघृतान् देवे दध्नाकान् विनिवेदयेत्। उपानद्युगलं छत्रं दानं दद्याच्च भक्तिमान्॥ ५६॥
नमस्ते भगनेत्रघ्न पूष्णो दशननाशन। इदमुच्चारयेद्भक्त्या प्रीणनाय जगत्पतेः॥ ५७॥

नारदजी! वैशाखमासमें सुगन्धित पुष्पोंके जलसे स्नान तथा आमकी मञ्जरियोंसे शंकरके पूजनका विधान है। इस समय घी-मिले सर्ज वृक्षके गोंदका धूप तथा फलसहित घृतका नैवेद्य अर्पित करना चाहिये। बुद्धिमान् व्यक्तिको इस समय श्रीशिवके 'कालघ्न' नामका जप करना चाहिये और तल्लीनतापूर्वक ब्राह्मणको नैवेद्य, उपवीत (जनेऊ) एवं अन्न आदिके साथ पानीसे भरा घड़ा दक्षिणा देनी चाहिये। ज्येष्ठ मासमें आँवलेके जलसे स्नान कराये तथा मन्दारके पुष्पोंसे उनकी पूजा करे। उसके बाद त्रिनेत्रधारी पुष्टि-कर्ता श्रीशिवको धूपदानमें धूप दिखलाये। फिर घी तथा दही मिला सत्तूका नैवेद्य अर्पित करे। जगत्पतिके प्रीत्यर्थ 'हे पूषाके दाँत तोड़नेवाले भगनेत्रघ्न शिव! आपको नमस्कार है'—यह कहकर भक्तिपूर्वक छत्र एवं उपानद्युगल (एक जोड़ा जूता) दक्षिणामें प्रदान करना चाहिये॥ ५२—५७॥

आषाढे स्नानमुदितं श्रीफलैरर्चनं तथा। धत्तूरकुसुमैः शुक्लैर्धूपयेत् सिह्लकं तथा॥ ५८॥
नैवेद्या सघृताः पूपाः दक्षिणा सघृता यवाः। नमस्ते दक्षयज्ञघ्न इदमुच्चैरुदीरयेत्॥ ५९॥
श्रावणे मृगभोज्येन स्नानं कृत्वाऽर्चयेद्धरम्। श्रीवृक्षपत्रैः सफलैर्धूपं दद्यात् तथागुरुम्॥ ६०॥
नैवेद्यं सघृतं दद्याद् दधि पूपान् समोदकान्। दध्योदनं सकृसरं माषधाना सशष्कुलीः॥ ६१॥
दक्षिणां श्वेतवृषभं धेनुं च कपिलां शुभाम्।
कनकं रक्तवसनं प्रदद्याद् ब्राह्मणाय हि। गङ्गाधरेति जप्तव्यं नाम शंभोश्च पण्डितैः॥ ६२॥

आषाढमासमें बिल्वके जलसे भगवान् शिवको स्नान कराये तथा धतूरेके उजले पुष्पोंसे उनकी पूजा करे; सिल्हक (सिलारस वृक्षका गोंद)का धूप दे और घृतके सहित मालपूएका नैवेद्य अर्पित करे एवं—हे दक्षके यज्ञका विनाश करनेवाले शंकर! आपको नमस्कार है—यह ऊँचे स्वरसे उच्चारण करे। श्रावण मासमें मृगभोज्य (जटामांसी)के जलसे स्नान कराकर फलयुक्त बिल्वपत्रोंसे महादेवकी पूजा करे तथा अगुरुका धूप दे। उसके बाद घृतयुक्त पूप, मोदक, दधि, दध्योदन, उड़दकी दाल, भुना हुआ जौ एवं कचौड़ीका नैवेद्य अर्पित करनेके बाद बुद्धिमान् व्यक्ति ब्राह्मणको श्वेत बैल, शुभा कपिला (भूरी) गौ, स्वर्ण एवं रक्तवस्त्रकी दक्षिणा दे। पण्डितोंको चाहिये कि शिवजीके 'गङ्गाधर' इस नामका जप करें॥५८—६२॥

अर्माभिः षड्भिरपरैर्मासैः पारणमुत्तमम्।
एवं संवत्सरं पूर्णं सम्पूज्य वृषभध्वजम्। अक्षयान् लभते कामान् महेश्वरवचो यथा॥ ६३॥
इदमुक्तं व्रतं पुण्यं सर्वाक्षयकरं शुभम्। स्वयं रुद्रेण देवर्षे तत्तथा न तदन्यथा॥ ६४॥

॥ इति श्रीवामनपुराणे षोडशोऽध्यायः ॥ १६॥

इन दूसरे ६ महीनोंके अनन्तर द्वितीय पारण होता है। इस प्रकार एक वर्षतक वृषभध्वज (शिवजी)का पूजन कर महेश्वरके वचनानुसार मनुष्य अक्षय कामनाओंको प्राप्त करता है। स्वयं भगवान् शंकरने यह कल्याणकारी पवित्र एवं सभी पुण्योंको अक्षय करनेवाला व्रत बतलाया था। यह जैसा कहा गया है, वैसा ही है। यह कभी व्यर्थ नहीं जाता॥ ६३-६४॥

॥ इस प्रकार श्रीवामनपुराणमें सोलहवाँ अध्याय समाप्त हुआ॥ १६॥

[अथ सप्तदशोऽध्यायः]

पुलस्त्य उवाच

मासि चाश्वयुजे ब्रह्मन् यदा पद्मं जगत्पतेः। नाभ्या निर्याति हि तदा देवेष्वेतान्यथोऽभवन् ॥ १ ॥
कंदर्पस्य कराग्रे तु कदम्बश्चारुदर्शनः। तेन तस्य परा प्रीतिः कदम्बेन विवर्द्धते ॥ २ ॥
यक्षाणामधिपस्यापि मणिभद्रस्य नारद। वटवृक्षः समभवत् तस्मिंस्तस्य रतिः सदा ॥ ३ ॥
महेश्वरस्य हृदये धत्तूरविटपः शुभः। संजातः स च शर्वस्य रतिकृत् तस्य नित्यशः ॥ ४ ॥

सत्रहवाँ अध्याय प्रारम्भ

(देवाङ्गोंसे तरुओंकी उत्पत्ति, अखण्डव्रत-विधान, विष्णु-पूजा, विष्णुपञ्जरस्तोत्र और महिषका प्रसङ्ग)

पुलस्त्यजी बोले—नारदजी ! आश्विन मासमें जब जगत्पति (विष्णु)की नाभिसे कमल निकला, तब अन्य देवताओंसे भी ये वस्तुएँ उत्पन्न हुईं—कामदेवके करतलके अग्रभागमें सुन्दर कदम्ब वृक्ष उत्पन्न हुआ। इसीलिये कदम्बसे उसे बड़ी प्रीति रहती है। नारदजी ! यक्षोंके राजा मणिभद्रसे वटवृक्ष उत्पन्न हुआ, अतः उन्हें उसके प्रति विशेष प्रेम है। भगवान् शंकरके हृदयपर सुन्दर धतूर-वृक्ष उत्पन्न हुआ, अतः वह शिवजीको सदा प्यारा है ॥ १—४ ॥

ब्रह्मणो मध्यतो देहाज्जातो मरकतप्रभः। खदिरः कण्टकी श्रेयानभवद्विश्वकर्मणः ॥ ५ ॥
गिरिजायाः करतले कुन्दगुल्मस्त्वजायत। गणाधिपस्य कुम्भस्थो राजते सिन्धुवारकः ॥ ६ ॥
यमस्य दक्षिणे पार्श्वे पालाशो दक्षिणोत्तरे। कृष्णोदुम्बरको रुद्राज्जातः क्षोभकरो वृषः ॥ ७ ॥
स्कन्दस्य बन्धुजीवस्तु रवेरश्वत्थ एव च। कात्यायन्याः शमी जाता बिल्वो लक्ष्म्याः करेऽभवत् ॥ ८ ॥

ब्रह्माजीके शरीरके बीचसे मरकतमणिके समान खैरवृक्षकी उत्पत्ति हुई और विश्वकर्माके शरीरसे सुन्दर कटैया उत्पन्न हुआ। गिरिनन्दिनी पार्वतीके करतलपर कुन्द लता उत्पन्न हुई और गणपतिके कुम्भ देशसे सेंदुवार-वृक्ष उत्पन्न हुआ। यमराजकी दाहिनी बगलसे पलाश तथा बायीं बगलसे गूलरका वृक्ष उत्पन्न हुआ। रुद्रसे उद्विग्न करनेवाला वृष (ओषधि-विशेष)की उत्पत्ति हुई। इसी प्रकार स्कन्दसे बन्धुजीव, सूर्यसे पीपल, कात्यायनी दुर्गासे शमी और लक्ष्मीजीके हाथसे बिल्ववृक्ष उत्पन्न हुआ ॥ ५—८ ॥

नागानां पतये ब्रह्मञ्छरस्तम्बो व्यजायत। वासुकेर्विस्तृते पुच्छे पृष्ठे दूर्वा सितासिता ॥ ९ ॥
साध्यानां हृदये जातो वृक्षो हरितचन्दनः। एवं जातेषु सर्वेषु तेन तत्र रतिर्भवेत् ॥ १० ॥
तत्र रम्ये शुभे काले या शुक्लैकादशी भवेत्। तस्यां सम्पूजयेद् विष्णुं तेन खण्डोऽस्य पूर्यते ॥ ११ ॥
पुष्पैः पत्रैः फलैर्वापि गन्धवर्णरसान्वितैः। ओषधीभिश्च मुख्याभिर्यावत्स्याच्छरदागमः ॥ १२ ॥

नारदजी ! इसी प्रकार शेषनागसे सरपत, वासुकिनागकी पुच्छ और पीठपर श्वेत एवं कृष्ण दूर्वा उत्पन्न हुई। साध्योंके हृदयमें हरिचन्दनवृक्ष उत्पन्न हुआ। इस प्रकार उत्पन्न होनेसे उन सभी वृक्षोंमें उन-उन देवताओंका प्रेम होता है।

उस रमणीय सुन्दर समयमें शुक्लपक्षकी जो एकादशी तिथि होती है उसमें भगवान् विष्णुकी पूजा करनी चाहिये। इससे पूजाकी न्यूनता दूर हो जाती है। शरत्कालकी उपस्थितितक गन्ध, वर्ण और रसयुक्त पत्र, पुष्प एवं फलों तथा मुख्य ओषधियोंसे भगवान् विष्णुकी पूजा करनी चाहिये ॥ ९—१२ ॥

घृतं तिला व्रीहियवा हिरण्यकनकादि यत्। मणिमुक्ताप्रवालानि वस्त्राणि विविधानि च ॥ १३ ॥
रसानि स्वादुकट्वम्लकषायलवणानि च। तिक्तानि च निवेद्यानि तान्यखण्डानि यानि हि ॥ १४ ॥
तत्पूजार्थं प्रदातव्यं केशवाय महात्मने। यदा संवत्सरं पूर्णमखण्डं भवते गृहे ॥ १५ ॥
कृतोपवासो देवर्षे द्वितीयेऽहनि संयतः। स्नानेन तेन स्नायीत येनाखण्डं हि वत्सरम् ॥ १६ ॥

घी, तिल, चावल, जौ, चाँदी, सोना, मणि, मुक्ता, मूँगा तथा नाना प्रकारके वस्त्र, स्वादु, कटु, अम्ल, कषाय, लवण और तिक्त रस आदि वस्तुओंको अखण्डितरूपसे महात्मा केशवकी पूजाके लिये अर्पित करना चाहिये। इस प्रकार पूजा करते हुए वर्षको बितानेपर घरमें पूर्ण समृद्धि होती है। देवर्षे! जितेन्द्रिय होकर दूसरे दिन उपवास करके जिससे वर्ष अखण्डित रहे इसलिये इस प्रकार स्नान करे—॥ १३–१६ ॥

सिद्धार्थकैस्तिलैर्वापि तेनैवोद्वर्तनं स्मृतम्।
हविषा पद्मनाभस्य स्नानमेव समाचरेत्। होमे तदेव गदितं दाने शक्तिर्निजा द्विज ॥ १७ ॥
पूजयेताथ कुसुमैः पादादारभ्य केशवम्। धूपयेद् विविधं धूपं येन स्याद् वत्सरं परम् ॥ १८ ॥
हिरण्यरत्नवासोभिः पूजयेत जगद्गुरुम्। रागखाण्डवचोष्याणि हविष्याणि निवेदयेत् ॥ १९ ॥
ततः संपूज्य देवेशं पद्मनाभं जगद्गुरुम्। विज्ञापयेन्मुनिश्रेष्ठ मन्त्रेणानेन सुव्रत ॥ २० ॥

सफेद सरसों या तिलके द्वारा उबटन तैयार करना चाहिये ऐसा कहा गया है। उससे या घीसे भगवान् विष्णुको स्नान कराना चाहिये। नारदजी! होममें भी घीका ही विधान है और दानमें भी यथाशक्ति उसीकी विधि है। फिर पुष्पोंद्वारा चरणसे आरम्भकर (सिरतक) सभी अङ्गोंमें केशवकी पूजा करे एवं नाना प्रकारके धूपोंसे उन्हें सुवासित करे, जिससे सम्वत्सर पूर्ण हो। सुवर्ण, रत्नों और वस्त्रोंद्वारा (उन) जगद्गुरुका पूजन करे तथा राग-खाँड, चोष्य एवं हविष्योंका नैवेद्य अर्पित करे। सुव्रत नारदजी! देवेश जगद्गुरु विष्णुकी पूजा करनेके बाद इस मन्त्रसे प्रार्थना करे—॥ १७–२० ॥

नमोऽस्तु ते पद्मनाभ पद्माधव महाद्युते। धर्मार्थकाममोक्षाणि त्वखण्डानि भवन्तु मे ॥ २१ ॥
विकासिपद्मपत्राक्ष यथाऽखण्डोऽसि सर्वतः। तेन सत्येन धर्माद्या अखण्डाः सन्तु केशव ॥ २२ ॥
एवं संवत्सरं पूर्णं सोपवासो जितेन्द्रियः। अखण्डं पारयेद् ब्रह्मन् व्रतं वै सर्ववस्तुषु ॥ २३ ॥
अस्मिंश्चीर्णे व्रते व्यक्तं परितुष्यन्ति देवताः। धर्मार्थकाममोक्षाद्यास्त्वक्षयाः सम्भवन्ति हि ॥ २४ ॥

हे महाकान्तिवाले पद्मनाभ लक्ष्मीपते! आपको प्रणाम है। (आपकी कृपाके प्रसादसे) हमारे धर्म, अर्थ, काम और मोक्ष अखण्ड हों। विकसित कमलपत्रके समान नेत्रवाले! आप जिस प्रकार चारों ओरसे अखण्ड हैं, उसी सत्यके प्रभावसे मेरे भी धर्म, अर्थ, काम और मोक्ष (पुरुषार्थ) अखण्डित रहें। ब्रह्मन्! इस प्रकार वर्षभर उपवास और जितेन्द्रिय रहते हुए सभी वस्तुओंके द्वारा व्रतको अखण्डरूपसे पूरा करे। इस व्रतके करनेपर देवता निश्चितरूपसे प्रसन्न होते हैं एवं धर्म, अर्थ, काम तथा मोक्ष सभी पूर्ण होते हैं ॥ २१–२४ ॥

एतानि ते मयोक्तानि व्रतान्युक्तानि कामिभिः। प्रवक्ष्याम्यधुना त्वेतद्वैष्णवं पञ्जरं शुभम् ॥ २५ ॥
नमो नमस्ते गोविन्द चक्रं गृह्य सुदर्शनम्। प्राच्यां रक्षस्व मां विष्णो त्वामहं शरणं गतः ॥ २६ ॥
गदां कौमोदकीं गृह्य पद्मनाभामितद्युते। याम्यां रक्षस्व मां विष्णो त्वामहं शरणं गतः ॥ २७ ॥
हलमादाय सौनन्दं नमस्ते पुरुषोत्तम। प्रतीच्यां रक्ष मे विष्णो भवन्तं शरणं गतः ॥ २८ ॥

नारद ! यहाँतक मैंने तुमसे सकाम व्रतोंका वर्णन किया है । अब मैं कल्याणकारी विष्णुपञ्जरस्तोत्रको कहूँगा । (वह इस प्रकार है—) गोविन्द ! आपको नमस्कार है । आप सुदर्शनचक्र लेकर मेरी पूर्व दिशामें रक्षा करें । विष्णो ! मैं आपकी शरणमें हूँ । अमितद्युते पद्मनाभ ! आप कौमोदकी गदा धारणकर मेरी रक्षा करें । विष्णो ! मैं आपके शरण हूँ । पुरुषोत्तम ! आपको नमस्कार है । आप सौनन्द नामक हल लेकर मेरी पश्चिम दिशामें रक्षा करें । विष्णो ! मैं आपकी शरणमें हूँ ॥ २५–२८ ॥

मुसलं शातनं गृह्य पुण्डरीकाक्ष रक्ष माम् । उत्तरस्यां जगन्नाथ भवन्तं शरणं गतः ॥ २९ ॥
शार्ङ्गमादाय च धनुरस्त्रं नारायणं हरे । नमस्ते रक्ष रक्षोघ्न ऐशान्यां शरणं गतः ॥ ३० ॥
पाञ्चजन्यं महाशङ्खमन्तर्बोध्यं च पङ्कजम् । प्रगृह्य रक्ष मां विष्णो आग्नेय्यां यज्ञसूकर ॥ ३१ ॥
चर्म सूर्यशतं गृह्य खड्गं चन्द्रमसं तथा । नैर्ऋत्यां मां च रक्षस्व दिव्यमूर्ते नृकेसरिन् ॥ ३२ ॥

पुण्डरीकाक्ष ! आप 'शातन'नामके विनाशकारी मुसलको लेकर मेरी उत्तर दिशामें रक्षा करें । जगन्नाथ ! मैं आपकी शरण हूँ । हरे ! शार्ङ्गधनुष एवं नारायणास्त्र लेकर मेरी ईशानकोणमें रक्षा करें । रक्षोघ्न ! आपको नमस्कार है, मैं आपके शरण हूँ । यज्ञवाराह विष्णो ! आप पाञ्चजन्य नामक विशाल शङ्ख तथा अन्तर्बोध्य पङ्कजको लेकर मेरी अग्निकोणमें रक्षा करें । दिव्य नृसिंह ! सूर्यशत नामकी ढाल तथा चन्द्रहास नामकी तलवार लेकर मेरी नैर्ऋत्यकोणमें रक्षा करें ॥ २९–३२ ॥

वैजयन्तीं प्रगृह्य त्वं श्रीवत्सं कण्ठभूषणम् । वायव्यां रक्ष मां देव अश्वशीर्ष नमोऽस्तु ते ॥ ३३ ॥
वैनतेयं समारुह्य अन्तरिक्षे जनार्दन । मां त्वं रक्षाजित सदा नमस्ते त्वपराजित ॥ ३४ ॥
विशालाक्षं समारुह्य रक्ष मां त्वं रसातले । अकूपार नमस्तुभ्यं महामोह नमोऽस्तु ते ॥ ३५ ॥
करशीर्षाङ्घ्रिपर्वेषु तथाऽष्टबाहुपञ्जरम् । कृत्वा रक्षस्व मां देव नमस्ते पुरुषोत्तम ॥ ३६ ॥

आप वैजयन्ती नामकी माला तथा श्रीवत्स नामका कण्ठाभूषण धारणकर मेरी वायव्यकोणमें रक्षा करें । हयग्रीव ! आपको नमस्कार है । जनार्दन ! वैनतेय (गरुड)पर आरूढ होकर आप मेरी अन्तरिक्षमें रक्षा करें । अजित ! अपराजित ! आपको सदा नमस्कार है । महाकच्छप ! आप विशालाक्षपर चढ़कर मेरी रसातलमें रक्षा करें । महामोह ! आपको नमस्कार है । पुरुषोत्तम ! आप आठ हाथोंसे पञ्जर बनाकर हाथ, शिर एवं सन्धिस्थलों (जोड़ों) आदिमें मेरी रक्षा करें । देव ! आपको नमस्कार है ॥ ३३–३६ ॥

एतदुक्तं भगवता वैष्णवं पञ्जरं महत् । पुरा रक्षार्थमीशेन कात्यायन्या द्विजोत्तम ॥ ३७ ॥
नाशयामास सा यत्र दानवं महिषासुरम् । नमरं रक्तबीजं च तथान्यान् सुरकण्टकान् ॥ ३८ ॥

द्विजोत्तम ! प्राचीन कालमें भगवान् शंकरने कात्यायनी (दुर्गा)की रक्षाके लिये इस महान् विष्णुपञ्जरस्तोत्रको उस स्थानपर कहा था, जहाँ उन्होंने महिषासुर, नमर, रक्तबीज एवं अन्यान्य देव-शत्रुओंका नाश किया था ॥ ३७–३८ ॥

नारद उवाच

काऽसौ कात्यायनी नाम या जघ्ने महिषासुरम् । नमरं रक्तबीजं च तथाऽन्यान् सुरकण्टकान् ॥ ३९ ॥

१—यह विष्णुपञ्जरस्तोत्र बहुत प्रसिद्ध है तथा स्थलान्तरसे अग्निपुराण, अ० १३, ब्रह्मवैवर्त ३ । ३१, विष्णुधर्मोत्तर १ । १३५ आदिमें प्राप्त होता है । वामनपुराणमें तो यह दो बार आ गया है । एक यहाँ तथा आगे ७४ वें अध्यायमें ।

कश्चासौ महिषो नाम कुले जातश्च कस्य स. ।
कश्चासौ रक्तबीजाख्यो नमरः कस्य चात्मजः । एतद्विस्तरतस्तात यथावद् वक्तुमर्हसि ॥ ४० ॥

नारदजीने पूछा—ऋषे ! महिषासुर, नमर, रक्तबीज तथा अन्यान्य सुर-कण्टकोंका वध करनेवाली ये भगवती कात्यायनी कौन हैं ? तात ! यह महिष कौन है ? तथा वह किसके कुलमें उत्पन्न हुआ था ? यह रक्तबीज कौन है ? तथा नमर किसका पुत्र है ? आप इसका यथार्थ रूपसे विस्तारपूर्वक वर्णन करें ॥ ३९–४० ॥

पुलस्त्य उवाच

श्रूयतां संप्रवक्ष्यामि कथां पापप्रणाशिनीम् । सर्वदा वरदा दुर्गा येयं कात्यायनी मुने ॥ ४१ ॥
पुराऽसुरवरौ रौद्रौ जगत्क्षोभकरावुभौ । रम्भश्चैव करम्भश्च द्वावास्तां सुमहाबलौ ॥ ४२ ॥
तावपुत्रौ च देवर्षे पुत्रार्थं तेपतुस्तपः । बहून् वर्षगणान् दैत्यौ स्थितौ पञ्चनदे जले ॥ ४३ ॥
तत्रैको जलमध्यस्थो द्वितीयोऽप्यग्निपञ्चमी । करम्भश्चैव रम्भश्च यक्षं मालवटं प्रति ॥ ४४ ॥

पुलस्त्यजी बोले—नारदजी ! सुनिये, मैं उस पापनाशक कथाको कहता हूँ । मुने ! सब कुछ देनेवाली वरदायिनी भगवती दुर्गा ही ये कात्यायनी हैं । प्राचीनकालमें संसारमें उथल-पुथल मचानेवाले रम्भ और करम्भ नामके दो भयंकर और महाबलवान् असुरश्रेष्ठ थे । देवर्षे ! वे दोनों पुत्रहीन थे । उन दोनों दैत्योंने पुत्रके लिये पञ्चनदके जलमें रहकर बहुत वर्षोंतक तप किया । मालवट यक्षके प्रति एकाग्र होकर करम्भ और रम्भ—इन दोनोंमेंसे एक जलमें स्थित होकर और दूसरा पञ्चाग्निके मध्य बैठकर तप कर रहा था ॥ ४१–४४ ॥

एकं निमग्नं सलिले ग्राहरूपेण वासवः । चरणाभ्यां समादाय निजघान यथेच्छया ॥ ४५ ॥
ततो भ्रातरि नष्टे च रम्भः कोपपरिप्लुतः । वह्नौ स्वशीर्षं संक्षिप्य होतुमैच्छन् महाबलः ॥ ४६ ॥
ततः प्रगृह्य केशेषु खड्गं च रविसप्रभम् । छेत्तुकामो निजं शीर्षं वह्निना प्रतिषेधितः ॥ ४७ ॥
उक्तश्च मा दैत्यवर नाशयात्मानमात्मना । दुस्तरा परवध्याऽपि स्ववध्याऽप्यतिदुस्तरा ॥ ४८ ॥

इन्द्रने ग्राहका रूप धारणकर इनमेंसे एकको जलमें निमग्न होनेपर पैर पकड़कर इच्छानुसार दूर ले जाकर मार डाला । उसके बाद भाईके नष्ट हो जानेपर क्रोधयुक्त महाबलशाली रम्भने अपने सिरको काटकर अग्निमें हवन करना चाहा । वह अपना केश पकड़कर हाथमें सूर्यके समान चमकनेवाली तलवार लेकर अपना सिर काटना ही चाहता था कि अग्निने उसे रोक दिया और कहा—दैत्यवर ! तुम स्वयं अपना नाश मत करो । दूसरेका वध तो पाप होता ही है, आत्महत्या भी भयानक पाप है ॥ ४५–४८ ॥

यच्च प्रार्थयसे वीर तद्ददामि यथेप्सितम् । मा म्रियस्व मृतस्येह नष्टा भवति वै कथा ॥ ४९ ॥
ततोऽब्रवीद् वचो रम्भो वरं चेन्मे ददासि हि । त्रैलोक्यविजयी पुत्रः स्यान्मे त्वत्तेजसाऽधिकः ॥ ५० ॥
अजेयो दैवतैः सर्वैः पुंभिर्दैत्यैश्च पावक । महाबलो वायुरिव कामरूपी कृतास्त्रवित् ॥ ५१ ॥
तं प्रोवाच कविर्ब्रह्मन् बाढमेवं भविष्यति । यस्यां चित्तं समालम्बि करिष्यसि ततः सुत ॥ ५२ ॥

वीर ! तुम जो माँगोगे, तुम्हारी इच्छाके अनुसार वह मैं तुम्हें दूँगा । तुम मरो मत । इस संसारमें मृत व्यक्तिकी कथा नष्ट हो जाती है । इसपर रम्भने कहा—यदि आप वर देते हैं तो यह वर दीजिये कि मुझे आपसे भी अधिक तेजस्वी त्रैलोक्यविजयी पुत्र उत्पन्न हो । अग्निदेव ! समस्त देवताओं तथा मानवों और दैत्योंसे भी वह अजेय हो । वह वायुके समान महाबलवान् तथा कामरूपी एवं सर्वास्त्रवेत्ता हो । नारदजी ! इसपर अग्निने उससे कहा—अच्छा, ऐसा ही होगा । जिस स्त्रीमें तुम्हारा चित्त लग जायगा उसीसे तुम पुत्र लाभ करोगे ॥ ४९–५२ ॥

इत्येवमुक्तो देवेन वह्निना दानवो ययौ। द्रष्टुं मालवटं यक्षं यक्षैश्च परिवारितम् ॥ ५३ ॥
तेषां पद्मनिधिस्तत्र वसते नान्यचेतनः। गजाश्च महिषाश्चाश्वा गावोऽजाविपरिप्लुताः ॥ ५४ ॥
तान् दृष्ट्वैव तदा चक्रे भावं दानवपार्थिवः। महिष्यां रूपयुक्तायां त्रिहायण्यां तपोधन ॥ ५५ ॥
सा समागाच्च दैत्येन्द्रं कामयन्ती तरस्विनी। स चापि गमनं चक्रे भवितव्यप्रचोदितः ॥ ५६ ॥

अग्निदेवके ऐसा कहनेपर रम्भ यक्षोंसे घिरा हुआ मालवट यक्षका दर्शन करने गया। वहाँ उन यक्षोंका एक पद्म नामकी निधि अनन्य-चित्त होकर निवास करती थी। वहाँ बहुत-से बकरे, भेंड़े, घोड़े, भैंसे तथा हाथी और गाय-बैल थे। तपोधन! दानवराजने उन्हें देखकर तीन वर्षोंवाली रूपवती एक महिषीमें प्रेम प्रकट किया (अर्थात् आसक्त हुआ)। कामपरायण होकर वह महिषी शीघ्र दैत्येन्द्रके समीप आ गयी तब भवितव्यतासे प्रेरित उसने (रम्भने) भी उस महिषीके साथ संगत किया ॥ ५३—५६ ॥

तस्यां समभवद् गर्भस्तां प्रगृह्याथ दानवः। पातालं प्रविवेशाथ ततः स्वभवनं गतः ॥ ५७ ॥
दृष्टश्च दानवैः सर्वैः परित्यक्तश्च बन्धुभिः। अकार्यकारकेत्येवं भूयो मालवटं गतः ॥ ५८ ॥
साऽपि तेनैव पतिना महिषी चारुदर्शना। समं जगाम तत् पुण्यं यक्षमण्डलमुत्तमम् ॥ ५९ ॥
ततस्तु वसतस्तस्य श्यामा सा सुषुवे मुने। अजीजनत् सुतं शुभ्रं महिषं कामरूपिणम् ॥ ६० ॥

उसे गर्भ रह गया। उसके बाद उस महिषीको लेकर दानव पातालमें प्रविष्ट हुआ और अपने घर चला गया। उसके दानव-बन्धुओंने उसे देख एवं 'अकार्यकारक' जानकर उसका परित्याग कर दिया। फिर वह पुनः मालवटके निकट गया। वह सुन्दरी महिषी भी उसी पतिके साथ उस पवित्र और उत्तम यक्षमण्डलमें गयी। मुने! उसके वहीं निवास करते समय उस महिषीने सन्तान उत्पन्न की। उसने एक शुभ्र तथा इच्छाके अनुकूल रूप धारण करनेवाले महिष-पुत्रको जन्म दिया ॥ ५७—६० ॥

ऋतुमतीं जातां महिषोऽन्यो ददर्श ह। सा चाभ्यगाद् दितिवरं रक्षन्ती शीलमात्मनः ॥ ६१ ॥
तमुन्नामितनासं च महिषं वीक्ष्य दानवः। खड्गं निष्कृष्य तरसा महिषं समुपाद्रवत् ॥ ६२ ॥
तेनापि दैत्यस्तीक्ष्णाभ्यां शृङ्गाभ्यां हृदि ताडितः। निर्भिन्नहृदयो भूमौ निपपात ममार च ॥ ६३ ॥
मृते भर्तरि सा श्यामा यक्षाणां शरणं गता। रक्षिता गुह्यकैः साध्वी निवार्य महिषं ततः ॥ ६४ ॥

उसके पुनः ऋतुमती होनेपर एक दूसरे महिषने उसे देखा। वह अपने शीलकी रक्षा करती हुई दैत्यश्रेष्ठके निकट गयी। नाकको ऊपर उठाये उस महिषको देखकर दानवने खड्ग निकालकर महिषपर वेगसे आक्रमण किया। उस महिषने भी तीक्ष्ण शृङ्गोंसे दैत्यके हृदयमें प्रहार किया। वह दैत्य हृदय फट जानेसे भूमिपर गिर पड़ा और मर गया। पतिके मर जानेपर वह महिषी यक्षोंकी शरणमें गयी। उसके बाद गुह्यकोंने महिषको हटाकर साध्वी महिषीकी रक्षा की ॥ ६१—६४ ॥

ततो निवारितो यक्षैर्हयारिर्मदनातुरः। निपपात सरो दिव्यं ततो दैत्योऽभवन्मृतः ॥ ६५ ॥
नमरो नाम विख्यातो महाबलपराक्रमः। यक्षानाश्रित्य तस्थौ स कालयन् श्वापदान् मुने ॥ ६६ ॥
स च दैत्येश्वरो यक्षैर्मालवटपुरस्सरैः। चितामारोपितः सा च श्यामा तं चारुहत् पतिम् ॥ ६७ ॥
ततोऽग्निमध्यादुत्तस्थौ पुरुषो रौद्रदर्शनः। व्यद्रावयत् स तान् यक्षान् खड्गपाणिर्भयंकरः ॥ ६८ ॥

यक्षोंद्वारा हटाया गया कामातुर हयारि (महिष) एक दिव्य सरोवरमें गिर पड़ा। उसके बाद वह मरकर एक दैत्य हो गया। मुने! वन्य पशुओंको मारते हुए यक्षोंके आश्रयमें रहनेवाला महान् बली तथा पराक्रमी वह दैत्य

इत्येवमुक्तो देवेन वह्निना दानवो ययौ। द्रष्टुं मालवटं यक्षं यक्षैश्च परिवारितम् ॥ ५३ ॥
तेषां पद्मनिधिस्तत्र वसते नान्यचेतनः। गजाश्च महिषाश्चाश्वा गावोऽजाविपरिप्लुताः ॥ ५४ ॥
तान् दृष्ट्वैव तदा चक्रे भावं दानवपार्थिवः। महिष्यां रूपयुक्तायां त्रिहायण्यां तपोधन ॥ ५५ ॥
सा समागाच्च दैत्येन्द्रं कामयन्ती तरस्विनी। स चापि गमनं चक्रे भवितव्यप्रचोदितः ॥ ५६ ॥

अग्निदेवके ऐसा कहनेपर रम्भ यक्षोंसे घिरा हुआ मालवट यक्षका दर्शन करने गया। वहाँ उन यक्षोंका एक पद्म नामकी निधि अनन्य-चित्त होकर निवास करती थी। वहाँ बहुत-से बकरे, भेंड़े, घोड़े, भैंसे तथा हाथी और गाय-बैल थे। तपोधन ! दानवराजने उन्हें देखकर तीन वर्षोंवाली रूपवती एक महिषीमें प्रेम प्रकट किया (अर्थात् आसक्त हुआ)। कामपरायण होकर वह महिषी शीघ्र दैत्येन्द्रके समीप आ गयी तब भवितव्यतासे प्रेरित उसने (रम्भने) भी उस महिषीके साथ संगत किया ॥ ५३–५६ ॥

तस्यां समभवद् गर्भस्तां प्रगृह्याथ दानवः। पातालं प्रविवेशाथ ततः स्वभवनं गतः ॥ ५७ ॥
दृष्टश्च दानवैः सर्वैः परित्यक्तश्च बन्धुभिः। अकार्यकारकेत्येवं भूयो मालवटं गतः ॥ ५८ ॥
साऽपि तेनैव पतिना महिषी चारुदर्शना। समं जगाम तत् पुण्यं यक्षमण्डलमुत्तमम् ॥ ५९ ॥
ततस्तु वसतस्तस्य श्यामा सा सुषुवे मुने। अजीजनत् सुतं शुभ्रं महिषं कामरूपिणम् ॥ ६० ॥

उसे गर्भ रह गया। उसके बाद उस महिषीको लेकर दानव पातालमें प्रविष्ट हुआ और अपने घर चला गया। उसके दानव-बन्धुओंने उसे देख एवं 'अकार्यकारक' जानकर उसका परित्याग कर दिया। फिर वह पुनः मालवटके निकट गया। वह सुन्दरी महिषी भी उसी पतिके साथ उस पवित्र और उत्तम यक्षमण्डलमें गयी। मुने ! उसके वहीं निवास करते समय उस महिषीने सन्तान उत्पन्न की। उसने एक शुभ्र तथा इच्छाके अनुकूल रूप धारण करनेवाले महिष-पुत्रको जन्म दिया ॥ ५७–६० ॥

ऋतावृतुमतीं जातां महिषोऽन्यो ददर्श ह। सा चाश्यगाद् दितिवरं रक्षन्ती शीलमात्मनः ॥ ६१ ॥
तमुन्नामितनासं च महिषं वीक्ष्य दानवः। खड्गं निष्कृष्य तरसा महिषं समुपाद्रवत् ॥ ६२ ॥
तेनापि दैत्यस्तीक्ष्णाभ्यां शृङ्गाभ्यां हृदि ताडितः। निर्भिन्नहृदयो भूमौ निपपात ममार च ॥ ६३ ॥
मृते भर्तरि सा श्यामा यक्षाणां शरणं गता। रक्षिता गुह्यकैः साध्वी निवार्य महिषं ततः ॥ ६४ ॥

उसके पुनः ऋतुमती होनेपर एक दूसरे महिषने उसे देखा। वह अपने शीलकी रक्षा करती हुई दैत्यश्रेष्ठके निकट गयी। नाकको ऊपर उठाये उस महिषको देखकर दानवने खड्ग निकालकर महिषपर वेगसे आक्रमण किया। उस महिषने भी तीक्ष्ण शृङ्गोंसे दैत्यके हृदयमें प्रहार किया। वह दैत्य हृदय फट जानेसे भूमिपर गिर पड़ा और मर गया। पतिके मर जानेपर वह महिषी यक्षोंकी शरणमें गयी। उसके बाद गुह्यकोंने महिषको हटाकर साध्वी महिषीकी रक्षा की ॥ ६१–६४ ॥

ततो निवारितो यक्षैर्हयारिर्मदनातुरः। निपपात सरो दिव्यं ततो दैत्योऽभवन्मृतः ॥ ६५ ॥
नमरो नाम विख्यातो महाबलपराक्रमः। यक्षानाश्रित्य तस्थौ स कालयन् श्वापदान् मुने ॥ ६६ ॥
स च दैत्येश्वरो यक्षैर्मालवटपुरस्सरैः। चितामारोपितः सा च श्यामा तं चारुहत् पतिम् ॥ ६७ ॥
ततोऽग्निमध्यादुत्तस्थौ पुरुषो रौद्रदर्शनः। व्यद्रावयत् स तान् यक्षान् खड्गपाणिर्भयंकरः ॥ ६८ ॥

यक्षोंद्वारा हटाया गया कामातुर हयारि (महिष) एक दिव्य सरोवरमें गिर पड़ा। उसके बाद वह मरकर एक दैत्य हो गया। मुने ! वन्य पशुओंको मारते हुए यक्षोंके आश्रयमें रहनेवाला महान् बली तथा पराक्रमी वह दैत्य



'नमर' नामसे विख्यात हुआ। फिर मारुवट आदि यक्षोंने उस हयारि दैत्येश्वरको चितापर रखा। वह श्यामा भी पतिके साथ चितापर चढ़ गयी। तब अग्निके मध्यसे हाथमें खड्ग लिये विकराल रूपवाला भयंकर पुरुष प्रकट हुआ। उसने सभी यक्षोंको भगा दिया ॥ ६५-६८ ॥

ततो हतास्तु महिषाः सर्व एव महात्मना। ऋते संरक्षितारं हि महिषं रम्भनन्दन ॥ ६९ ॥
स नामतः स्मृतो दैत्यो रक्तबीजो महामुने। योऽजयत् सर्वतो देवान् सेन्द्ररुद्रार्कमारुतान् ॥ ७० ॥
एवं प्रभावा दनुपुंगवास्ते तेजोऽधिकस्तत्र बभौ हयारिः।
राज्येऽभिषिक्तश्च महाऽसुरेन्द्रैर्विनिर्जितैः शम्बरतारकाद्यैः ॥ ७१ ॥
अशक्नुवद्भिः सहितैश्च देवैः सलोकपालैः सहुताशभास्करैः।
स्थानानि त्यक्तानि शशीन्द्रभास्करैर्धर्मश्च दूरे प्रतियोजितश्च ॥ ७२ ॥
॥ इति श्रीवामनपुराणे सप्तदशोऽध्यायः ॥ १७ ॥

और फिर उस बलवान् दैत्यने रम्भनन्दन महिषको छोड़कर सारे महिषोंको मार डाला। महामुने! वह दैत्य रक्तबीज नामसे विख्यात हुआ। उसने इन्द्र, रुद्र, सूर्य एवं मारुत आदिके साथ देवोंको जीत लिया। यद्यपि वे सभी दैत्य इस प्रकारके प्रभावसे युक्त थे; फिर भी उनमें महिष अधिक तेजस्वी था। उसके द्वारा विजित शम्बर, तारक आदि महान् असुरोंने उसका राज्याभिषेक किया। लोकपालोंसहित अग्नि, सूर्य आदि देवोंके द्वारा एक साथ मिलकर जब वह जीता नहीं गया तब चन्द्र, इन्द्र एवं सूर्यने अपना-अपना स्थान छोड़ दिया तथा धर्मको भी दूर हटा दिया गया ॥ ६९-७२ ॥

॥ इस प्रकार श्रीवामनपुराणमें सत्रहवाँ अध्याय समाप्त हुआ ॥ १७ ॥

[अथाष्टादशोऽध्यायः]

पुलस्त्य उवाच

ततस्तु देवा महिषेण निर्जिताः स्थानानि संत्यज्य सवाहनायुधाः।
जग्मुः पुरस्कृत्य पितामहं ते द्रष्टुं तदा चक्रधरं श्रियः पतिम् ॥ १ ॥
गत्वा त्वपश्यंश्च मिथः सुरोत्तमौ स्थितौ खगेन्द्रासनशंकरौ हि।
दृष्ट्वा प्रणम्यैव [redacted] सिद्धिसाधकौ न्यवेदयंस्तन्महिषादिचेष्टितम् ॥ २ ॥
प्रभोऽश्विसूर्येन्द्वनिलाग्निवेधसां जलेशशक्रादिषु चाधिकारान्।
आक्रम्य नाकात्तु निराकृता वयं कृतावनिस्था महिषासुरेण ॥ ३ ॥
एतद् भवन्तौ शरणागतानां श्रुत्वा वचो ब्रूत हितं सुराणाम्।
न चेद् व्रजामोऽद्य रसातलं हि संकाल्यमाना युधि दानवेन ॥ ४ ॥

अठारहवाँ अध्याय प्रारम्भ

(महिषासुरका अतिचार, देवोंकी तेजोराशिसे भगवती कात्यायनीका प्रादुर्भाव, विन्ध्यप्रसंग, दुर्गाकी अवस्थिति)

पुलस्त्यजी बोले—इसके बाद महिषद्वारा पराजित देवता अपने-अपने स्थानको छोड़कर पितामहको आगे कर चक्रधारी लक्ष्मीपति विष्णुके दर्शनार्थ अपने वाहनों और आयुधोंको लेकर विष्णुलोक चले गये। वहाँ जाकर उन लोगोंने गरुड़वाहन विष्णु एवं शंकर—इन दोनों देवश्रेष्ठोंको एक साथ बैठे देखा। उन दोनों सिद्धि-साधकोंको देखनेके बाद उन लोगोंने उन्हें प्रणामकर उनसे महिषासुरकी दुश्चेष्टा बतलायी। वे बोले— !

महिषासुरने अश्विनीकुमार, सूर्य, चन्द्र, वायु, अग्नि, ब्रह्मा, वरुण, इन्द्र आदि सभी देवताओंके अधिकारोंको छीन-कर स्वर्गसे निकाल दिया है और अब हमलोग भूमण्डलमें रहनेको विवश हो गये हैं। हम शरणमें आये देवताओंकी यह बात सुनकर आप दोनों हमारे हितकी बात बतलायें; अन्यथा दानवद्वारा युद्धमें मारे जा रहे हमलोग अब रसातलमें चले जायेंगे॥ १-४॥

इत्थं सुरारिः सह शंकरेण श्रुत्वा वचो विप्लुतचेतसस्तान्।
दृष्ट्वाऽथ चक्रे सहसैव कोपं कालाग्निकल्पो हरिरव्ययात्मा॥ ५॥
ततोऽनुकोपान्मधुसूदनस्य सशंकरस्यापि पितामहस्य।
तथैव शक्रादिषु दैवतेषु महर्द्धि तेजो वदनाद् विनिःसृतम्॥ ६॥
तच्चैकतां पर्वतकूटसंनिभं जगाम तेजः प्रवराश्रमे मुने।
कात्यायनस्याप्रतिमस्य तेन महर्षिणा तेज उपाकृतं च॥ ७॥
तेनर्षिसृष्टेन च तेजसा वृतं ज्वलत्प्रकाशार्कसहस्रतुल्यम्।
तस्माच्च जाता तरलायताक्षी कात्यायनी योगविशुद्धदेहा॥ ८॥

शिवजीके साथ ही विष्णु भगवान्ने (भी) उनके इस प्रकारके वचनको सुना तथा दुःखसे व्याकुल चित्तवाले उन देवताओंको देखा तो उनका क्रोध कालाग्निके समान प्रज्वलित हो गया। उसके बाद मधुनामक राक्षसको मारनेवाले विष्णु, शंकर, पितामह (ब्रह्मा) तथा इन्द्र आदि देवताओंके क्रोध करनेपर उन सबके मुखसे महान् तेज प्रकट हुआ। मुने! फिर वह तेजोराशि कात्यायन ऋषिके अनुपम आश्रममें पर्वतशृङ्गके समान एकत्र हो गयी। उन महर्षिने भी उस तेजकी और अभिवृद्धि की। उन महर्षिद्वारा उत्पन्न किये गये तेजसे आवृत वह तेज हजारों सूर्योंके समान प्रदीप्त हो गया। उसके योगसे विशुद्ध शरीरवाली एवं चञ्चल तथा विशाल नेत्रोंवाली कात्यायनी देवी प्रकट हो गयीं॥ ५-८॥

माहेश्वराद् वक्त्रमथो बभूव नेत्रत्रयं पावकतेजसा च।
याम्येन केशा हरितेजसा च भुजास्तथाष्टादश संप्रजज्ञिरे॥ ९॥
सौम्येन युग्मं स्तनयोः सुसंहतं मध्यं तथैन्द्रेण च तेजसाऽभवत्।
ऊरू च जङ्घे च नितम्बसंयुते जाते जलेशस्य तु तेजसा हि॥ १०॥
पादौ च लोकप्रपितामहस्य पद्माभिकोशप्रतिमौ बभूवतुः।
दिवाकराणामपि तेजसाऽङ्गुलीः कराङ्गुलीश्च वसुतेजसैव॥ ११॥
प्रजापतीनां दशनाश्च तेजसा याक्षेण नासा श्रवणौ च मारुतात्।
साध्येन च भ्रूयुगलं सुकान्तिमत् कंदर्पबाणासनसंनिभं बभौ॥ १२॥

महादेवजीके तेजसे कात्यायनीका मुख बन गया और अग्निके तेजसे उनके तीन नेत्र प्रकट हो गये। इसी प्रकार यमके तेजसे केश तथा हरिके तेजसे उनकी अठारह भुजाएँ, चन्द्रमाके तेजसे उनके सटे हुए स्तनयुगल, इन्द्रके तेजसे मध्यभाग तथा वरुणके तेजसे ऊरु, जङ्घाएँ एवं नितम्बोंकी उत्पत्ति हुई। लोकपितामह ब्रह्माके तेजसे कमलकोशके समान उनके दोनों चरण, आदित्योंके तेजसे पैरोंकी अङ्गुलियाँ एवं वसुओंके तेजसे उनके हाथोंकी अङ्गुलियाँ उत्पन्न हुईं। प्रजापतियोंके तेजसे उनके दाँत, यक्षोंके तेजसे नाक, वायुके तेजसे दोनों कान, साध्यके तेजसे कामदेवके धनुषके समान उनकी दोनों भौंहें प्रकट हुईं—॥ ९-१२॥

तथर्षितेजोत्तममुत्तमं महन्नाम्ना पृथिव्यामभवत् प्रसिद्धम्।
कात्यायनीत्येव तदा बभौ सा नाम्ना च तेनैव जगत्प्रसिद्धा॥ १३॥

ददौ त्रिशूलं वरदस्त्रिशूली चक्रं मुरारिर्वरुणश्च शङ्खम्।
शक्तिं हुताशः श्वसनश्च चापं तूणौ तथाक्षय्यशरौ विवस्वान् ॥ १४ ॥
वज्रं तथेन्द्रः सह घण्टया च यमोऽथ दण्डं धनदो गदां च।
ब्रह्माऽक्षमालां सकमण्डलुं च कालोऽसिमुग्रं सह चर्मणा च ॥ १५ ॥
हारं च सोमः सह चामरेण मालां समुद्रो हिमवान् मृगेन्द्रम्।
चूडामणिं कुण्डलमर्द्धचन्द्रं प्रादात् कुठारं वसु शिल्पकर्त्ता ॥ १६ ॥

ज्ञात्वा च तत्रार्कसुतां सकामां मुदा युतो वाक्यमिदं जगाद ॥ ५५ ॥
स एष पुत्रि नृपतेस्तनूजो दृष्टः पुरा कामयसे यमद्य।
स एष नायाति ममाश्रमं वै ऋक्षात्मजः संवरणो हि नाम्ना ॥ ५६ ॥
अथाजगाम स नृपस्य पुत्रस्तमाश्रमं ब्राह्मणपुंगवस्य।
दृष्ट्वा वसिष्ठं प्रणिपत्य मूर्ध्ना स्थितस्त्वपश्यत् तपतीं नरेन्द्रः ॥ ५७ ॥
दृष्ट्वा च तां पद्मविशालनेत्रां तां पूर्वदृष्टामिति चिन्तयित्वा।
पप्रच्छ केयं ललना द्विजेन्द्र स वारुणिः प्राह नराधिपेन्द्रम् ॥ ५८ ॥

भगवान् विष्णु बोले—फिर सूर्यपुत्री तपतीके ऐसा कहनेपर वसिष्ठजी ध्यानमें मग्न हो गये और तपतीको उस कुमारमें आसक्त समझकर प्रसन्नतापूर्वक उन्होंने यह बात कही—पुत्रि! जिस राजपुत्रका तुमने पहले दर्शन किया था और जिसकी कामना तुम आज कर रही हो, वह ऋक्षका पुत्र (राजा) संवरण ही है। वह आज मेरे आश्रममें आ रहा है। उसके पश्चात् वह राजकुमार भी ब्राह्मणोंमें श्रेष्ठ वसिष्ठजीके आश्रममें आया। उस राजाने वसिष्ठको सिरसे झुककर प्रणाम किया; फिर खड़े होनेपर तपतीको भी देखा। खिले कमलके समान विशाल नेत्रोंवाली उस नारीको देखकर उसने सोचा कि इसे मैंने पहले भी देखा है। (तब) उसने पूछा—ब्राह्मणश्रेष्ठ! यह सुन्दरी कौन है? उसपर वसिष्ठजीने राजश्रेष्ठ संवरणसे कहा—॥ ५५-५८ ॥

इयं विवस्वद्दुहिता नरेन्द्र नाम्ना प्रसिद्धा तपती पृथिव्याम्।
मया तवार्थाय दिवाकरोऽर्थितः प्रादान्मया स्वाश्रममानिनिन्ये ॥ ५९ ॥
तस्मात् समुत्तिष्ठ नरेन्द्र देव्याः पाणिं तपत्या विधिवद् गृहाण।
इत्येवमुक्तो नृपतिः प्रहृष्टो जग्राह पाणिं विधिवत् तपत्याः ॥ ६० ॥
सा तं पतिं प्राप्य मनोऽभिरामं सूर्यात्मजा शक्रसमप्रभावम्।
रराम तन्वी भवनोत्तमेषु यथा महेन्द्रं दिवि दैत्यकन्या ॥ ६१ ॥

॥ इति श्रीवामनपुराणे एकविंशोऽध्यायः ॥ २१ ॥

नरेन्द्र! पृथ्वीमें तपती नामसे प्रसिद्ध यह सूर्यकी पुत्री है। मैंने तुम्हारे ही लिये सूर्यसे इसकी याचना की थी और उन्होंने स्वयं इसे मुझे सौंपा था। मैं तुम्हारे लिये ही इसे आश्रममें लाया हूँ; अतः नरेन्द्र! उठो तथा देवी तपतीका विधिपूर्वक पाणिग्रहण करो। (वसिष्ठजीके) ऐसा कहनेपर राजा बहुत प्रसन्न हुआ। उसने तपतीका विधिपूर्वक पाणिग्रहण किया। सूर्यकी तनया तपती भी इन्द्रके तुल्य प्रभावशाली उस सुन्दर पतिको प्राप्त करके प्रसन्न हुई। वह उत्तम महलोंमें उसके साथ इस प्रकार विहार करने लगी, जैसे इन्द्रको पाकर शची विहार करती है ॥ ५९-६१ ॥

इस प्रकार श्रीवामनपुराणमें इक्कीसवाँ अध्याय समाप्त हुआ ॥ २१ ॥

[अथ द्वाविंशोऽध्यायः]

देवदेव उवाच

तस्यां तपत्यां नरसत्तमेन जातः सुतः पार्थिवलक्षणस्तु ।
स जातकर्मादिभिरेव संस्कृतो विवर्धताज्येन हुतो यथाऽग्निः ॥ १ ॥
कृतोऽस्य चूडाकरणश्च देवा विप्रेण मित्रावरुणात्मजेन ।
नवाब्दिकस्य व्रतबन्धनं च वेदे च शास्त्रे विधिपारगोऽभूत् ॥ २ ॥
ततश्चतुःषड्भिरपीह वर्षैः सर्वज्ञतामभ्यगमत् ततोऽसौ ।
ख्यातः पृथिव्यां पुरुषोत्तमोऽसौ नाम्ना कुरुः संवरणस्य पुत्रः ॥ ३ ॥
ततो नरपतिर्दृष्ट्वा धार्मिकं तनयं शुभम् । दारक्रियार्थमकरोद् यत्नं शुभकुले ततः ॥ ४ ॥

बाईसवाँ अध्याय प्रारम्भ

(कुरुकी कथा, कुरुक्षेत्रका निर्माण-प्रसङ्ग और पृथूदक तीर्थका माहात्म्य)

देवोंके भी देव भगवान् विष्णुने कहा—उस तपतीके गर्भसे मनुष्योंमें श्रेष्ठ संवरणके द्वारा राजलक्षणों-वाला एक पुत्र उत्पन्न हुआ । वह जातकर्म आदि संस्कारोंसे संस्कृत होकर इस प्रकार बढ़ने लगा जैसे घीकी आहुति डालनेसे अग्नि बढ़ती है । देवगण ! मित्रावरुणके पुत्र वसिष्ठजीने उसका (यथा समय) चौल-संस्कार कराया । नवें वर्ष में उसका उपनयन संस्कार हुआ । फिर वह (क्रम-क्रमसे अध्ययन कर) वेद तथा शास्त्रोंका पारगामी विद्वान् हो गया एवं चौबीस वर्षोंमें तो फिर वह सर्वज्ञ-सा हो गया । पुरुषश्रेष्ठ संवरणका वह पुत्र इस भूतलपर 'कुरु' नामसे प्रसिद्ध हुआ । तब राजा (उस) कल्याणकारी अपने धार्मिक पुत्रको (उपयुक्त अवस्थामें आये हुए) देखकर किसी उत्तम कुलमें उसके विवाहका यत्न करने लगे ॥ १–४ ॥

सौदामिनीं सुदाम्नस्तु सुतां रूपाधिकां नृपः । कुरोरर्थाय वृतवान् स प्रादात् कुरवेऽपि ताम् ॥ ५ ॥
स तां नृपसुतां लब्ध्वा धर्मार्थावविरोधयन् । रेमे तन्व्या सह तया पौलोम्या मघवानिव ॥ ६ ॥
ततो नरपतिः पुत्रं राज्यभारक्षमं बली । विदित्वा यौवराज्याय विधानेनाभ्यषेचयत् ॥ ७ ॥
ततो राज्येऽभिषिक्तस्तु कुरुः पित्रा निजे पदे । पालयामास स महीं पुत्रवच्च स्वयं प्रजाः ॥ ८ ॥

राजाने कुरुके लिये सुन्दर स्वरूपवाली सुदामाकी पुत्री सौदामिनीको चुना और सुदामा राजाने भी उसे कुरुको विधिवत् प्रदान कर दिया । उस राजकुमारीको पाकर वह (कुरु) धर्म और अर्थका (यथावत्) पालन करते हुए उस तन्वङ्गी अर्थात् कृशाङ्गीके साथ गार्हस्थ्य धर्ममें वैसे ही रहने लगा, जैसे पौलोमी (शची)के साथ इन्द्र दाम्पत्य-जीवन व्यतीत करते (हुए रहते) हैं । उसके बाद बलवान् राजाने राज्य-भारके वहन करनेमें—राज्य-कार्य संचालनमें—उसे समर्थ जानकर विधिपूर्वक युवराज पदपर अभिषिक्त कर दिया । तब पिताके द्वारा अपने राज्यपदपर अभिषिक्त होकर कुरु औरस पुत्रकी भाँति अपनी प्रजाका और पृथ्वीका पालन करने लगे ॥ ५–८ ॥

स एव क्षेत्रपालोऽभूत् पशुपालः स एव हि । स स्तु प्रजापालो महाबलः ॥ ९ ॥
ततोऽस्य बुद्धिरुत्पन्ना कीर्तिर्लोके गरीयसी । यावत्कीर्तिः सुसंस्था हि तावद्वासः सुरैः सह ॥ १० ॥
स त्वेवं नृपतिश्रेष्ठो याथातथ्यमवेक्ष्य च । विचचार महीं सर्वां कीर्त्यर्थं तु नराधिपः ॥ ११ ॥
ततो द्वैतवनं नाम पुण्यं लोकेश्वरो बली । तदासाद्य सुसंतुष्टो विवेशाभ्यन्तरं ततः ॥ १२ ॥

(प्रजा और पृथ्वीके पालनमें लगे) वे राजकुमार कुरु 'क्षेत्रपाल' तथा 'पशुपाल' भी हुए ! महाबली वे सर्वपालक एवं प्रजापालक भी हुए । फिर उन्होंने सोचा कि संसारमें यश ही सर्वश्रेष्ठ वस्तु है (उसे प्राप्त करना चाहिये); क्योंकि जबतक संसारमें कीर्ति भलीभाँति स्थित रहती है, तबतक मनुष्य देवताओंके साथ निवास करता है । इस प्रकार यथार्थताका विचार कर वे राजा यश-प्राप्तिके लिये समस्त पृथ्वीपर विचरण करने लगे । उसी सिलसिलेमें वे बलशाली राजा पवित्र द्वैतवन पहुँचे एवं पूर्ण सुसंतुष्ट होकर उसके भीतर प्रविष्ट हो गये ॥ ९-१२ ॥

तत्र देवीं ददर्शाथ पुण्यां पापविमोचनीम् । प्लक्षजां ब्रह्मणः पुत्रीं हरिजिह्वां सरस्वतीम् ॥ १३ ॥
सुदर्शनस्य जननीं ह्रदं कृत्वा सुविस्तरम् । स्थितां भगवतीं कूले तीर्थकोटिभिराप्लुताम् ॥ १४ ॥
तस्यास्तज्जलमीक्ष्यैव स्नात्वा प्रीतोऽभवन्नृपः । समाजगाम च पुनर्ब्रह्मणो वेदिमुत्तराम् ॥ १५ ॥
समन्तपञ्चकं नाम धर्मस्थानमनुत्तमम् । आसमन्ताद् योजनानि पञ्च पञ्च च सर्वतः ॥ १६ ॥

(प्रविष्ट होनेके बाद राजाने) वहाँपर पापनाशिनी उस पवित्र सरस्वती नदीको देखा, जो पर्कटि (पाकड़) वृक्षसे उत्पन्न ब्रह्माकी पुत्री है । वह हरिजिह्वा, ब्रह्मपुत्री और सुदर्शन-जननी नामसे भी प्रसिद्ध है । वह सुविस्तृत ह्रद (बड़ा ताल या झील)में स्थित है । उसके तटपर करोड़ों तीर्थ हैं । उसके जलको देखते ही राजाको उसमें स्नान करनेकी इच्छा हुई । उन्होंने स्नान किया और बड़े प्रसन्न हुए । फिर वे उत्तर दिशामें स्थित ब्रह्माकी समन्तपञ्चक वेदीपर गये । वह समन्तपञ्चक नामक धर्मस्थान चारों ओर पाँच-पाँच योजनतक फैला हुआ है ॥ १३-१६ ॥

देवा ऊचुः

कियन्त्यो वेदयः सन्ति ब्रह्मणः पुरुषोत्तम । येनोत्तरतया वेदिर्गदिता सर्वपञ्चका[1] ॥ १७ ॥

देवताओंने पूछा—पुरुषोत्तम ! ब्रह्माकी कितनी वेदियाँ हैं ? क्योंकि आपने इस सर्वपञ्चक वेदीको उत्तर वेदी (अर्थात् सर्वपञ्चक शब्द 'उत्तर'से विशिष्ट) कहा है ॥ १७ ॥

देवदेव उवाच

वेदयो लोकनाथस्य पञ्च धर्मस्य सेतवः । यासु यष्टं सुरेशेन लोकनाथेन शम्भुना ॥ १८ ॥
प्रयागो मध्यमा वेदिः पूर्वा वेदिर्गयाशिरः । विरजा दक्षिणा वेदिरनन्तफलदायिनी ॥ १९ ॥
प्रतीची पुष्करा वेदिस्त्रिभिः कुण्डैरलंकृता । समन्तपञ्चका चोक्ता वेदिरेवोत्तराऽव्यया ॥ २० ॥
तममन्यत राजर्षिरिदं क्षेत्रं महाफलम् । करिष्यामि कृषिष्यामि सर्वान् कामान् यथेप्सितान् ॥ २१ ॥

भगवान् विष्णु बोले—लोकोंके स्वामी ब्रह्माकी पाँच वेदियाँ धर्म-सेतुके सदृश हैं, जिनपर देवाधिदेव सुरेश्वर श्रीशम्भुने यज्ञ किया था । प्रयाग मध्यवेदी है, गया पूर्ववेदी और अनन्त फलदायिनी जगन्नाथपुरी दक्षिणवेदी है । (इसी प्रकार) तीन कुण्डोंसे अलंकृत पुष्करक्षेत्र पश्चिम वेदी है और अव्यय समन्तपञ्चक उत्तर वेदी है । राजर्षि कुरुने सोचा कि इस (समन्तपञ्चक) क्षेत्रको महाफलदायी करूँगा (बनाऊँगा) और यहीं सभी मनोवाञ्छित कामनाओंकी खेती करूँगा ॥ १८-२१ ॥

इति संचिन्त्य मनसा त्यक्त्वा स्यन्दनमुत्तमम् । चक्रे कीर्त्यर्थमतुलं संस्थानं पार्थिवर्षभः ॥ २२ ॥
कृत्वा सीरं स सौवर्णं गृह्य रुद्रवृषं प्रभुः । पौण्ड्रकं याम्यमहिषं स्वयं कर्षितुमुद्यतः ॥ २३ ॥
तं कर्षन्तं नरवरं समभ्येत्य शतक्रतुः । प्रोवाच राजन् किमिदं भवान् कर्तुमिहोद्यतः ॥ २४ ॥
राजाऽब्रवीत् सुरवरं तपः सत्यं क्षमां दयाम् । कृषामि शौचं दानं च योगं च ब्रह्मचारिताम् ॥ २५ ॥

---

१. समन्तपञ्चक और सर्वपञ्चक समानार्थी शब्द हैं; क्योंकि 'समन्त' और 'सर्व' दोनों सर्ववाची शब्द हैं, अतः दोनों [illegible] एक ही हैं । इसमें [illegible] भ्रम नहीं होना चाहिये ।

अपने मनमें इस प्रकार विचार करके राजाओंमें शिरोमणि कुरु रथसे उतर पड़े एवं उन्होंने अपनी कीर्तिके लिये अनुपम स्थानका निर्माण किया । उन राजाने सुवर्णमय हल बनाकर उसमें शंकरके बैल एवं यमराजके पौण्ड्रक नामक भैंसेको नाधकर स्वयं जोतनेके लिये तैयार हुए । इसपर इन्द्रने उनके पास जाकर कहा—राजन् ! आप यहाँ यह क्या करनेके लिये उद्यत हुए हैं ? राजा बोले—मैं यहाँ तप, सत्य, क्षमा, दया, शौच, दान, योग और ब्रह्मचर्य—इन अष्टाङ्गोंकी खेती कर रहा हूँ ॥ २२–२५ ॥

तस्योवाच हरिर्देवः कस्माद्बीजो नरेश्वर । लब्धोऽष्टाङ्गेति सहसा अवहस्य गतस्ततः ॥ २६ ॥
गतेऽपि शक्रे राजर्षिरहन्यहनि सीरधृक् । कृषतेऽन्यान् समन्ताच्च सप्तक्रोशान् महीपतिः ॥ २७ ॥
ततोऽहमब्रुवं गत्वा कुरो किमिदमित्यथ । तदाऽष्टाङ्गं महाधर्मं समाख्यातं नृपेण हि ॥ २८ ॥
ततो मयाऽस्य गदितं नृप बीजं क्व तिष्ठति ।
स चाह मम देहस्थं बीजं तमहमब्रुवम् । देह्यहं वापयिष्यामि सीरं कृषतु वै भवान् ॥ २९ ॥
ततो नृपतिना बाहुर्दक्षिणः प्रसृतः कृतः । प्रसृतं तं भुजं दृष्ट्वा मया चक्रेण वेगतः ॥ ३० ॥
सहस्रधा ततश्छित्त्वा दत्ता युष्माकमेव हि । ततः सव्यो भुजो राज्ञा दत्तश्छिन्नोऽप्यसौ मया ॥ ३१ ॥
तथैवोरुयुगं प्रादान्मया छिन्नौ च तावुभौ ।
ततः स मे शिरः प्रादात् तेन प्रीतोऽस्मि तस्य च । वरदोऽस्मीत्यथेत्युक्ते कुरुर्वरमयाचत ॥ ३२ ॥

इसपर इन्द्र बोले—नरेश्वर ! आपने (कृषिके लिये साधनभूत) हल और बीज कहाँसे प्राप्त किये हैं ? यह कहते हुए उपहास कर इन्द्र वहाँसे शीघ्र ही चले गये । इन्द्रके चले जानेपर भी राजा प्रतिदिन हल लेकर चारों ओर सात कोसतक पृथ्वी जोतने रहे । तब मैंने (विष्णुने) उनसे जाकर कहा—कुरु ! तुम यह क्या कर रहे हो ? इसपर, राजाने कहा—मैं (पूर्वोक्त) अष्टाङ्ग महाधर्मोंकी खेती कर रहा हूँ । फिर मैंने उनसे पूछा—राजन् ! बीज कहाँ है ? राजाने कहा—बीज मेरे शरीरमें है । मैंने उनसे कहा—उसे मुझे दे दो । मैं (उसे) बोऊँगा, तुम हल चलाओ । तब राजाने अपना दाहिना हाथ फैला दिया । फैलाये हुए हाथको देखकर मैंने चक्रसे शीघ्र ही उसके हजारों टुकड़े कर डाले और उन टुकड़ोंको तुम देवताओंको दे दिया । उसके बाद राजाने बायाँ बाहु दिया और उसे भी मैंने काट दिया । इसी प्रकार उसने दोनों ऊरुओंको दिया । उन दोनोंको भी मैंने काट दिया । तब उसने अपना मस्तक दिया, जिससे मैं उसके ऊपर प्रसन्न हो गया और कहा—तुम्हें मैं वर दूँगा । मेरे ऐसा कहनेपर कुरुने (मुझसे) वर माँगा— ॥ २६—३२ ॥

कुरुरुवाच

यावदेतन्मया कृष्टं धर्मक्षेत्रं तदस्तु च । स्नातानां च मृतानां च महापुण्यफलं त्विह ॥ ३३ ॥
उपवासं च दानं च स्नानं जप्यं च माधव । होमयज्ञादिकं चान्यच्छुभं वाप्यशुभं विभो ॥ ३४ ॥
त्वत्प्रसादाद्धृषीकेश शङ्खचक्रगदाधर । अक्षयं प्रभवेत् क्षेत्रे भवत्वत्र महाफलम् ॥ ३५ ॥
तथा भवान् सुरैः सार्धं समं देवेन शूलिना ।
वस त्वं पुण्डरीकाक्ष मन्नामव्यञ्जकेऽच्युत । इत्येवमुक्तस्तेनाहं राज्ञा बाढमुवाच तम् ॥ ३६ ॥
तथा च त्वं दिव्यवपुर्भव भूयो महीपते । तथाऽन्तकाले मामेव लयमेष्यसि सुव्रत ॥ ३७ ॥

कुरुने कहा—जितने स्थानको मैंने जोता है, वह धर्मक्षेत्र हो जाय और यहाँ स्नान करनेवालों एवं मरनेवालोंको महापुण्यकी प्राप्ति हो । माधव ! विभो ! शङ्खचक्रगदाधारी हृषीकेश ! यहाँ किये गये उपवास, स्नान, दान, जप, हवन, यज्ञ आदि तथा अन्य शुभ या अशुभ कर्म भी इस श्रेष्ठ क्षेत्रमें आपकी कृपासे अक्षय

फल देनेवाले हों तथा हे पुण्डरीकाक्ष ! हे अच्युत ! मेरे नामके व्यञ्जक (प्रकाशक) इस कुरुक्षेत्रमें आप सभी देवताओं एवं शिवजीके साथ निवास करें। राजाके ऐसा कहनेपर मैंने कहा—बहुत अच्छा, ऐसा ही होगा। राजन् ! तुम पुनः दिव्य शरीरवाले हो जाओ तथा हे सुव्रत ! (दृढ़तासे व्रतका सुष्ठु पालन करनेवाले) अन्तकालमें तुम मुझमें ही लीन हो जाओगे ॥ ३३–३७ ॥

कीर्तिश्च शाश्वती तुभ्यं भविष्यति न संशयः। तत्रैव याजका यज्ञान् यजिष्यन्ति सहस्रशः ॥ ३८ ॥
तस्य क्षेत्रस्य रक्षार्थं ददौ स पुरुषोत्तमः। यक्षं च चन्द्रनामानं वासुकिं चापि पन्नगम् ॥ ३९ ॥
विद्याधरं शङ्कुकर्णं सुकेशिं राक्षसेश्वरम्। अजावनं च नृपतिं महादेवं च पावकम् ॥ ४० ॥
एतानि सर्वतोऽभ्येत्य रक्षन्ति कुरुजाङ्गलम्। अमीषां बलिनोऽन्ये च भृत्याश्चैवानुयायिनः ॥ ४१ ॥

(भगवान् विष्णुने आगे कहा—) निःसंदेह तुम्हारी कीर्ति सदा रहनेवाली होगी। यहाँपर यज्ञ करनेवाले व्यक्ति (यजमान) यज्ञ करेंगे। फिर, उस क्षेत्रकी रक्षा करनेके लिये उन पुरुषोत्तम भगवान्ने राजाको चन्द्रनामक यक्ष, वासुकि नामक सर्प, शङ्कुकर्ण नामक विद्याधर, सुकेशी नामक राक्षसेश्वर, अजावन नामक राजा और महादेव नामक अग्निको दे दिया। ये सभी तथा इनके अन्य बली भृत्य एवं अनुयायी वहाँ आकर कुरुजाङ्गलकी सब ओरसे रक्षा करते हैं ॥ ३८–४१ ॥

अष्टौ सहस्राणि धनुर्धराणां ये वारयन्तीह सुदुष्कृतान् वै।
स्नातुं न यच्छन्ति महोग्ररूपास्त्वन्यस्य भूताः सचराचराणाम् ॥ ४२ ॥
तस्यैव मध्ये बहुपुण्य उक्तः पृथूदकः पापहरः शिवश्च।
पुण्या नदी प्राङ्मुखतां प्रयाता यत्रौघयुक्तस्य शुभा जलाढ्या ॥ ४३ ॥
पूर्वं प्रजेयं प्रपितामहेन सृष्टा समं भूतगणैः समस्तैः।
मही जलं वह्निसमीरमेव खं त्वेवमादौ विबभौ पृथूदकः ॥ ४४ ॥
तथा च सर्वाणि महार्णवानि तीर्थानि नद्यः स्रवणाः सरांसि।
संनिर्मितानीह महाभुजेन तच्चैक्यमागात् सलिलं महीषु ॥ ४५ ॥

आठ हजार धनुर्धारी, जो पापियोंको यहाँसे हटाते रहते हैं वे, उग्र रूप धारणकर चराचरके दूसरे भूतगण-(पापियों)को स्नान नहीं करने देते। इसी-(कुरुजाङ्गल-)के मध्य पाप दूर करनेवाला एवं अति पवित्र कल्याणकारी पृथूदक (पेहवा) नामक तीर्थ है, जहाँ शुभ जलसे पूर्ण एक पवित्र नदी पूर्वकी ओर बहती है। इसे प्रपितामह ब्रह्माने सृष्टिके आदिमें पृथ्वी, जल, अग्नि, पवन और आकाशादि समस्त भूतोंके साथ ही रचा था। महाबाहु ब्रह्माने पृथ्वीपर जिन महासमुद्रों, तीर्थों, नदियों, स्रोतों एवं सरोवरोंकी रचना की उन सभीके जल इसमें एकत्र हुए हैं ॥ ४२–४५ ॥

देवदेव उवाच

सरस्वतीदृषद्वत्योरन्तरे कुरुजाङ्गले।
मुनिप्रवरमासीनं पुराणं लोमहर्षणम्। अपृच्छन्त द्विजवराः प्रभावं सरसस्तदा ॥ ४६ ॥
प्रमाणं सरसो ब्रूहि तीर्थानां च विशेषतः। देवतानां च माहात्म्यमुत्पत्तिं वामनस्य च ॥ ४७ ॥
एतच्छ्रुत्वा वचस्तेषां रोमहर्षसमन्वितः। प्रणिपत्य पुराणर्षिरिदं वचनमब्रवीत् ॥ ४८ ॥

[यहाँसे कुरुक्षेत्र और उसके सरोवरका माहात्म्य कहते हैं—]

भगवान् विष्णु बोले— पहले समयमें मुनियोंने सरस्वती और दृषद्वती (घग्गर)के बीचमें स्थित कुरुक्षेत्रमें स्थित मुनिश्रेष्ठ पुराणवेत्ता लोमहर्षणजीसे वहाँ स्थित सरोवरकी महिमा पूछी और इस सरोवरके विस्तार, विशेषतः तीर्थों और देवताओंके माहात्म्य एवं वामनकी उत्पत्तिकी कथा कहनेकी प्रार्थना की।

उनके इस वचनको सुनकर रोमाञ्चित होते हुए पौराणिक ऋषि लोमहर्षण उन्हें प्रणाम कर (फिर) इस प्रकार बोले—॥ ४६–४८ ॥

लोमहर्षण उवाच

ब्रह्माणमग्र्यं कमलासनस्थं विष्णुं तथा लक्ष्मिसमन्वितं च ।
रुद्रं च देवं प्रणिपत्य मूर्ध्ना तीर्थं महद् ब्रह्मसरः प्रवक्ष्ये ॥ ४९ ॥

रन्तुकादौजसं यावत् पावनाच्च चतुर्मुखम् । सरः संनिहितं प्रोक्तं ब्रह्मणा पूर्वमेव तु ॥ ५० ॥
कलिद्वापरयोर्मध्ये व्यासेन च महात्मना । सरः प्रमाणं यत्प्रोक्तं तच्छृणुध्वं द्विजोत्तमाः ॥ ५१ ॥
विश्वेश्वरादस्थिपुरं तथा कन्या जरद्गवी । यावदोघवती प्रोक्ता तावत्संनिहितं सरः ॥ ५२ ॥

लोमहर्षणजी बोले—सबसे पहले उत्पन्न होनेवाले कमलासन ब्रह्मा, लक्ष्मीके सहित विष्णु और महादेव रुद्रको सिर झुकाकर प्रणाम करके मैं महान् ब्रह्मसर तीर्थका वर्णन करता हूँ । ब्रह्माने पहले कहा था कि यह 'संनिहित' सरोवर 'रन्तुक' नामक स्थानसे लेकर 'ओजस' नामक स्थानतक तथा 'पावन'से 'चतुर्मुख' तक फैला हुआ है । ब्राह्मणश्रेष्ठो ! किंतु अब कलि और द्वापरके मध्यमें महात्मा व्यासने सरोवरका जो (वर्तमान) प्रमाण बतलाया है उसे आपलोग सुनें । 'विश्वेश्वर' स्थानसे 'अस्थिपुर'तक और 'वृद्ध-कन्या'से लेकर 'ओघवती' नदीतक यह सरोवर स्थित है ॥ ४९–५२ ॥

मया श्रुतं प्रमाणं यत् पठ्यमानं तु वामने । तच्छृणुध्वं द्विजश्रेष्ठाः पुण्यं वृद्धिकरं महत् ॥ ५३ ॥
विश्वेश्वराद् देववरा नृपावनात् सरस्वती । सरः संनिहितं ज्ञेयं समन्तादर्धयोजनम् ॥ ५४ ॥
एतदाश्रित्य देवाश्च ऋषयश्च समागताः । सेवन्ते मुक्तिकामार्थं स्वर्गार्थं चापरे स्थिताः ॥ ५५ ॥
ब्रह्मणा सेवितमिदं सृष्टिकामेन योगिना । विष्णुना स्थितिकामेन हरिरूपेण सेवितम् ॥ ५६ ॥

ब्राह्मणश्रेष्ठो ! मैंने वामनपुराणमें वर्णित जो प्रमाण सुना है, आप उस पवित्र एवं कल्याणकारी प्रमाणको सुनें । विश्वेश्वर स्थानसे देववरतक एवं नृपावनसे सरस्वतीतक चतुर्दिक् आधे योजन-(दो कोसों-)में फैले इस संनिहित सरको समझना चाहिये । मोक्षकी इच्छासे आये हुए देवता एवं ऋषिगण इसका आश्रय लेकर सदा इसका सेवन करते हैं तथा अन्य लोग स्वर्गके निमित्त यहाँ रहते हैं । योगीश्वर ब्रह्माने सृष्टिकी इच्छासे एवं भगवान् श्रीविष्णुने जगत्के पालनकी कामनासे इसका आश्रय लिया था ॥ ५३–५६ ॥

रुद्रेण च सरोमध्यं प्रविष्टेन महात्मना । सेव्य तीर्थं महातेजाः स्थाणुत्वं प्राप्तवान् हरः ॥ ५७ ॥
आद्यैषा ब्रह्मणो वेदिस्ततो रामह्रदः स्मृतः । कुरुणा च यतः कृष्टं कुरुक्षेत्रं ततः स्मृतम् ॥ ५८ ॥

तरन्तुकारन्तुकयोर्यदन्तरं यदन्तरं रामह्रदाच्चतुर्मुखम् ।
एतत्कुरुक्षेत्रसमन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते ॥ ५९ ॥

इति श्रीवामनपुराणे द्वाविंशोऽध्यायः ॥ २२ ॥

(इसी प्रकार) सरोवरके मध्यमें पैठकर महात्मा रुद्रने भी इस तीर्थका सेवन किया, जिससे महातेजस्वी (उन) हरको स्थाणुत्व (स्थिरत्व) प्राप्त हुआ । आदिमें यह 'ब्रह्मवेदी' कहा गया था, किंतु आगे चलकर इसका नाम 'रामह्रद' हुआ । उसके बाद राजर्षि कुरुद्वारा जोते जानेसे इसका नाम 'कुरुक्षेत्र' पड़ा । तरन्तुक एवं अरन्तुक नामक स्थानोंका मध्य तथा रामह्रद एवं चतुर्मुखका मध्यभाग समन्तपञ्चक है, जो कुरुक्षेत्र कहा जाता है । इसे पितामहकी उत्तरवेदी भी कहते हैं ॥ ५७–५९ ॥

इस प्रकार श्रीवामनपुराणमें बाईसवाँ अध्याय समाप्त हुआ ॥ २२ ॥

[अथ त्रयोविंशोऽध्यायः]

[illegible] उवाच

[illegible] च [illegible] । यथा बलिर्नियमितो दत्तं राज्यं शतक्रतोः ॥ १ ॥

तेईसवाँ अध्याय प्रारम्भ

[illegible] हिरण्यकशिपु [illegible] होना और उनके [illegible] वर्णन

ऋषियोंने कहा— [illegible] उनकी [illegible] उत्पत्ति [illegible] कि बलिको किस प्रकार [illegible] राज्य दिया गया ॥ १ ॥

[illegible] उवाच

शृणुध्वं मुनयः प्रीता वामनस्य महात्मनः । उत्पत्तिं च प्रभावं च निवासं कुरुजाङ्गले ॥ २ ॥

तदेवं वंशं दैत्यानां शृणुध्वं द्विजसत्तमाः । यस्य वंशे समभवद् बलिर्वैरोचनिः पुरा ॥ ३ ॥

दैत्यानामादिपुरुषो [illegible] पुरा । तस्य पुत्रो महातेजाः प्रह्लादो नाम दानवः ॥ ४ ॥

तस्माद् विरोचनो जज्ञे बलिर्जज्ञे विरोचनात् । हते [illegible] देवानुत्साद्य सर्वतः ॥ ५ ॥

राज्यं कृतं च तेनेष्टं त्रैलोक्ये सचराचरे । कृतयत्नेषु देवेषु त्रैलोक्ये दैत्यतां गते ॥ ६ ॥

[illegible] मुनियो ! [illegible] उत्पत्ति, [illegible] सुनें ! द्विजश्रेष्ठो ! [illegible] दैत्योंके उस वंशको [illegible] उत्पन्न हुए थे । [illegible] दैत्योंके आदिपुरुष [illegible] हिरण्यकशिपु [illegible] उनसे विरोचन उत्पन्न हुए [illegible] चराचर- [illegible] ॥ २–६ ॥

[illegible] । [illegible] दिक्षु [illegible] प्रवृत्ते धर्मकर्मणि ॥ ७ ॥

[illegible] ॥ ८ ॥

[illegible] च ॥ ९ ॥

[illegible] धर्मभावे [illegible] ॥ १० ॥

[illegible] । [illegible] प्रह्लाद, [illegible] दैत्योंसे [illegible] हो गया । [illegible] ([illegible]) [illegible] ॥ ७–१० ॥

[illegible] ॥ ११ ॥

[illegible] च ॥ १२ ॥

फिर तो धर्म चारों चरणोंसे प्रतिष्ठित हो गया और अधर्म एक ही चरणपर स्थित रह गया। सभी राजा (भलीभाँति) प्रजापालन करते हुए सुशोभित होने लगे और सभी आश्रमोंके लोग अपने-अपने धर्मका पालन करने लगे। ऐसे समयमें असुरोंने बलिको दैत्यराजके पदपर अभिषिक्त कर दिया। असुरोंका समुदाय हर्षित होकर निनाद (जय-जयकार) करने लगा। इसके बाद कमलके भीतरी गोभाके समान कान्तिशाली वरदायिनी और सुन्दर सुवेशवाली श्रीलक्ष्मीदेवी हाथमें कमल लिये हुए बलिके समीप आयीं॥ ११-१३॥

श्रीरुवाच

बले बलवतां श्रेष्ठ दैत्यराज महाद्युते। प्रीतास्मि तव भद्रं ते देवराजपराजये॥ १४॥
यत्त्वया युधि विक्रम्य देवराज्यं पराजितम्। दृष्ट्वा ते परमं सत्त्वं ततोऽहं स्वयमागता॥ १५॥
नाश्चर्यं दानवव्याघ्र हिरण्यकशिपोः कुले। प्रसूतस्यासुरेन्द्रस्य तव कर्मेदमीदृशम्॥ १६॥
विशेषितस्त्वया राजन् दैत्येन्द्रः प्रपितामहः। येन भुक्तं हि निखिलं त्रैलोक्यमिदमव्ययम्॥ १७॥

लक्ष्मीने कहा—बलवानोंमें श्रेष्ठ महातेजस्वी दैत्यराज बलि! देवराजके पराजय हो जानेपर मैं तुमपर प्रसन्न हूँ। तुम्हारा मङ्गल हो, क्योंकि तुमने संग्राममें पराक्रम दिखाकर देवोंके राज्यको जीत लिया है। इसलिये तुम्हारे श्रेष्ठ बलको देखकर मैं स्वयं आयी हूँ। दानव! असुरोंके स्वामी! हिरण्यकशिपुके कुलमें उत्पन्न हुए तुम्हारा यह कर्म ऐसा है—इसमें कोई आश्चर्यकी बात नहीं है। राजन्! आप दैत्यश्रेष्ठ अपने प्रपितामह हिरण्यकशिपुसे भी विशिष्ट (प्रभावशाली) हैं, क्योंकि आप पूरे तीनों लोकोंमें समृद्ध इस राज्यका भोग कर रहे हैं॥ १४-१७॥

एवमुक्त्वा तु सा देवी लक्ष्मीर्दैत्यनृपं बलिम्। प्रविष्टा वरदा सेव्या सर्वदेवमनोरमा॥ १८॥
तुष्टाश्च देव्यः प्रवराः ह्रीः कीर्तिर्द्युतिरेव च। प्रभा धृतिः क्षमा भूतिर्ऋद्धिर्दिव्या महामतिः॥ १९॥
श्रुतिः स्मृतिरिडा कीर्तिः शान्तिः पुष्टिस्तथा क्रिया। सर्वाश्चाप्सरसो दिव्या नृत्तगीतविशारदाः॥ २०॥
प्रपद्यन्ते स्म दैत्येन्द्रं त्रैलोक्यं सचराचरम्। प्राप्तमैश्वर्यमतुलं बलिना ब्रह्मवादिना॥ २१॥

॥ इति श्रीवामनपुराणे त्रयोविंशोऽध्यायः ॥ २३ ॥

दैत्यराज बलिसे ऐसा कहनेके बाद सर्वदेव-मनोहारिणी एवं मनोहर रूपवाली महती सेव्य एवं (सबकी) वर देनेवाली श्रीलक्ष्मी देवी राजा बलिमें प्रविष्ट हो गयीं। तब सभी श्रेष्ठ देवियाँ—ह्री, कीर्ति, द्युति, प्रभा, धृति, क्षमा, भूति, ऋद्धि, दिव्या, महामति, श्रुति, स्मृति, इडा, कीर्ति, शान्ति, पुष्टि, क्रिया और नृत्तगीतमें निपुण दिव्य अप्सराएँ भी प्रसन्न होकर दैत्येन्द्र (बलि) का सेवन करने लगीं। इस प्रकार ब्रह्मवादी बलिने चर-अचरवाले त्रिलोकीका अतुल ऐश्वर्य प्राप्त कर लिया॥ १८-२१॥

इस प्रकार श्रीवामनपुराणमें तेईसवाँ अध्याय पूरा हुआ॥ २३॥

[अथ चतुर्विंशोऽध्यायः]

ऋषय ऊचुः

देवानां ब्रूहि नः कर्म यद्भूतास्ते पराजिताः। कथं देवाधिदेवोऽसौ विष्णुर्वामनतां गतः॥ १॥

चौबीसवाँ अध्याय प्रारम्भ

(वामन-चरितके उपक्रममें देवताओंका कश्यपजीके साथ ब्रह्मलोकमें जाना)

ऋषियोंने कहा—आप हमें यह बतलायें कि देवताओंने कौन-सा कर्म किया, जिससे प्रभावित होकर वे (दैत्य) पराजित हुए तथा देवाधिदेव भगवान् विष्णु कैसे वामन (बौना) बने॥ १॥

लोमहर्षण उवाच

बलिसंस्थं च त्रैलोक्यं दृष्ट्वा देवः पुरंदरः। मेरुप्रस्थं ययौ शक्रः स्वमातुर्निलयं शुभम् ॥ २ ॥
समीपं प्राप्य मातुश्च कथयामास तां गिरम्। आदित्याश्च यथा युद्धे दानवेन पराजिताः ॥ ३ ॥

लोमहर्षणने कहा (उत्तर दिया)—इन्द्रदेवने जब तीनों लोकोंको बलिके अधिकारमें देखा तब वे मेरु (पर्वत) पर स्थित (रहनेवाली) अपनी कल्याणमयी माताके घर गये। माताके समीप जाकर उन्होंने उनसे (मातासे) वह बात कही—जिससे देवगण, युद्धमें दानव बलिसे पराजित हुए थे ॥ २–३ ॥

अदितिरुवाच

यद्येवं पुत्र युष्माभिर्न शक्यो हन्तुमाहवे। बलिर्विरोचनसुतः सर्वैरश्चैव मरुद्गणैः ॥ ४ ॥
सहस्रशिरसा शक्यः केवलं हन्तुमाहवे। तेनैकेन सहस्राक्ष न स ह्यन्येन शक्यते ॥ ५ ॥
तत्तद् पृच्छामि पितरं कश्यपं ब्रह्मवादिनम्। पराजयार्थं दैत्यस्य बलेस्तस्य महात्मनः ॥ ६ ॥

माता अदितिने कहा—पुत्र! यदि ऐसी बात है तो तुमलोग सम्पूर्ण मरुद्गणोंके साथ मिलकर भी संग्राममें विरोचनके पुत्र बलिको नहीं मार सकते। सहस्राक्ष! युद्धमें केवल हजारों सिरवाले (सहस्रशीर्ष) भगवान् विष्णु ही (उसे) मार सकते हैं। उनके सिवा किसी दूसरेसे वह नहीं मारा जा सकता। अतः इस विषयमें उस महान् आत्मा (महाबलवान्) बलिनामक दैत्यकी पराजयके लिये मैं तुम्हारे पिता ब्रह्मवादी कश्यपसे (उपाय) पूछूँगी ॥ ४–६ ॥

ततोऽदित्या सह सुराः संप्राप्ताः कश्यपान्तिकम्। तत्रापश्यन्त मारीचं मुनिं दीप्ततपोनिधिम् ॥ ७ ॥
आद्यं देवगुरुं दिव्यं प्रदीप्तं ब्रह्मवर्चसा। तेजसा भास्कराकारं स्थितमग्निशिखोपमम् ॥ ८ ॥
न्यस्तदण्डं तपोयुक्तं बद्धकृष्णाजिनाम्बरम्। वल्कलाजिनसंवीतं प्रदीप्तमिव तेजसा ॥ ९ ॥
हुताशमिव दीप्यन्तमाज्यगन्धपुरस्कृतम्। स्वाध्यायवन्तं पितरं वपुष्मन्तमिवानलम् ॥ १० ॥
ब्रह्मवादिसत्यवादिसुरासुरगुरुं प्रभुम्। ब्राह्मण्याऽप्रतिमं लक्ष्म्या कश्यपं दीप्ततेजसम् ॥ ११ ॥

इस प्रकार माता अदितिके कहनेपर सभी देवता उनके साथ कश्यपजीके पास पहुँच गये। वहाँ (जाकर उन लोगोंने) तपस्याके धनी, मरीचिके पुत्र, आद्य एवं दिव्य पुरुष, देवताओंके गुरु, ब्रह्मतेजसे देदीप्यमान और अपने तेजसे सूर्यके समान तेजस्वी, अग्निशिखाकी भाँति दीप्त, संन्यासीके रूपमें, योगयुक्त, दण्ड तथा मृगचर्म धारण किये हुए, (आहुतिके) घीकी गन्धसे आप्यायित (वासित) अग्निके समान लगते हुए, स्वाध्यायमें लगे हुए, मानो शरीरधारी अग्नि ही हों एवं ब्रह्मवादी, सत्यवादी देवों तथा दानवोंके गुरु, अनुपम ब्रह्मतेजसे पूर्ण एवं शोभासे दीप्त कश्यपजीको देखा ॥ ७–११ ॥

यः स्रष्टा सर्वलोकानां प्रजानां पतिरुत्तमः। आत्मभावविशेषेण तृतीयो यः प्रजापतिः ॥ १२ ॥
अथ प्रणम्य ते वीराः सहादित्या सुरर्षभाः। ऊचुः प्राञ्जलयः सर्वे ब्रह्माणमिव मानसाः ॥ १३ ॥
अजेयो युधि शक्रेण बलिर्दैत्यो बलाधिकः। तस्माद् विधत्त नः श्रेयो देवानां पुष्टिवर्धनम् ॥ १४ ॥
श्रुत्वा तु कथितं तेषां पुत्राणां कश्यपः प्रभुः। अकरोद् गमने बुद्धिं ब्रह्मलोकाय लोककृत् ॥ १५ ॥

(वे [illegible]) सभी लोकोंके रचनेवाले, श्रेष्ठ प्रजापति एवं आत्मभाव अर्थात् [illegible] विशेषताके कारण ऐसे लग रहे थे जैसे तीसरे प्रजापति ही हैं। फिर अदितिके साथ समस्त देवोंने उन्हें प्रणाम कर उनसे हाथ जोड़कर ऐसे कहे, जैसे ब्रह्मासे उनके मानस-पुत्र बोलते हैं—बलशाली

दैत्यराज बलि युद्धमें इन्द्रसे अपराजेय हो गया है । अतः हम देवोंके सामर्थ्यकी पुष्टि-वृद्धिके लिये आप कल्याणकारी उपाय करें । उन पुत्रोंकी बातें सुनकर लोकोंको रचनेवाले सामर्थ्यशाली कश्यपने ब्रह्मलोकमें जानेका विचार किया ॥ १२—१५ ॥

कश्यप उवाच

शक्र गच्छाम सदनं ब्रह्मणः परमाद्भुतम् । तथा पराजयं सर्वे ब्रह्मणः ख्यातुमुद्यताः ॥ १६ ॥
सहादित्या ततो देवा याताः काश्यपमाश्रमम् । प्रस्थिता ब्रह्मसदनं महर्षिगणसेवितम् ॥ १७ ॥
ते मुहूर्तेन संप्राप्ता ब्रह्मलोकं सुवर्चसः । दिव्यैः कामगमैर्यानैर्यथार्हैस्ते महाबलाः ॥ १८ ॥
ब्रह्माणं द्रष्टुमिच्छन्तस्तपोराशिनमव्ययम् । अध्यगच्छन्त विस्तीर्णां ब्रह्मणः परमां सभाम् ॥ १९ ॥

(फिर) कश्यपने कहा—इन्द्र ! हम सभी अपनी पराजयकी बात ब्रह्माजीसे कहनेके लिये तैयार होकर उनके परम अद्भुत लोकको चलें । कश्यपके इस प्रकार कहनेपर अदितिके साथ कश्यपके आश्रममें आये हुए सभी देवताओंने महर्षिगणोंसे सेवित ब्रह्मसदनकी ओर प्रस्थान किया । यथायोग्य इच्छाके अनुसार चलनेवाले दिव्य यानोंसे महाबली एवं तेजस्वी वे सभी देवता क्षणमात्रमें ही ब्रह्मलोकमें पहुँच गये और तब वे लोग तपोराशि अव्यय ब्रह्माको देखनेकी इच्छा करते हुए ब्रह्माकी विशाल परम श्रेष्ठ सभामें पहुँचे ॥ १६—१९ ॥

षट्पदोद्गीतमधुरां सामगैः समुदीरिताम् । श्रेयस्करीममित्रघ्नीं दृष्ट्वा संजहृषुस्तदा ॥ २० ॥
ऋचो बह्वृचमुख्यैश्च प्रोक्ताः क्रमपदाक्षराः । शुश्रुवुर्विबुधव्याघ्रा विततेषु च कर्मसु ॥ २१ ॥
यज्ञविद्यावेदविदः पदक्रमविदस्तथा । स्वरेण परमर्षीणां सा बभूव प्रणादिता ॥ २२ ॥
यज्ञसंस्तवविद्भिश्च शिक्षाविद्भिस्तथा द्विजैः । छन्दसां चैव चार्थज्ञैः सर्वविद्याविशारदैः ॥ २३ ॥
लोकायतिकमुख्यैश्च शुश्रुवुः स्वरमीरितम् । तत्र तत्र च विप्रेन्द्रा नियताः शंसितव्रताः ॥ २४ ॥
जपहोमपरा मुख्या ददृशुः कश्यपात्मजाः । तस्यां सभायामास्ते स ब्रह्मा लोकपितामहः ॥ २५ ॥

वे (देवतालोग) भ्रमरोंकी गुञ्जारसे गुञ्जित, सामगानसे सुशोभित, कल्याणकारी विभासिका और शत्रुओंका विनाश करनेवाली उस सभाको देखकर प्रसन्न हो गये । (उस स्थानपर) उन श्रेष्ठ देवगणोंने विस्तृत (विशाल) अनेक कर्मानुष्ठानोंके समय श्रेष्ठ ऋग्वेदियोंके द्वारा 'क्रमपदादि' (वेद पढ़नेकी विशिष्ट शैलियोंसे) उच्चरित ऋचाओं-(वेदमन्त्रों-) को सुना । वह सभा यज्ञविद्याके ज्ञाता एवं 'पदक्रम' प्रभृति वेदपाठके ज्ञानवाले परमर्षियोंके उच्चारणकी ध्वनिसे प्रतिध्वनित हो रही थी । देवोंने वहाँ यज्ञके संस्तवोंके ज्ञाताओं, शिक्षाविदों और वेदमन्त्रोंके अर्थ जाननेवालों, समस्त विद्याओंमें पारङ्गत द्विजों एवं श्रेष्ठ लोकायतिकों (चार्वाकके मतानुयायियों-) द्वारा उच्चरित स्वरको भी सुना । कश्यपके पुत्रोंने वहाँ सर्वत्र नियमपूर्वक तीव्र-व्रतको धारण करनेवाले जप-होम करनेमें लगे हुए श्रेष्ठ विप्रोंको देखा । उसी सभामें लोक-पितामह ब्रह्मा विराजमान थे ॥ २०—२५ ॥

सुरासुरगुरुः श्रीमान् विद्यया वेदमायया । उपासन्त च तत्रैव प्रजानां पतयः प्रभुम् ॥ २६ ॥
दक्षः प्रचेताः पुलहो मरीचिश्च द्विजोत्तमाः । भृगुरत्रिर्वसिष्ठश्च गौतमो नारदस्तथा ॥ २७ ॥
विद्यास्तथान्तरिक्षं च वायुस्तेजो जलं मही । शब्दः स्पर्शश्च रूपं च रसो गन्धस्तथैव च ॥ २८ ॥
प्रकृतिश्च विकारश्च यच्चान्यत् कारणं महत् । साङ्गोपाङ्गाश्च चत्वारो वेदा लोकपतिस्तथा ॥ २९ ॥
नयाश्च क्रतवश्चैव संकल्पः प्राण एव च । एते चान्ये च बहवः स्वयंभुवमुपासते ॥ ३० ॥
अर्थो धर्मश्च कामश्च क्रोधो हर्षश्च नित्यशः । शुक्रो बृहस्पतिश्चैव संवर्तोऽथ बुधस्तथा ॥ ३१ ॥
शनैश्चरश्च राहुश्च ग्रहाः सर्वे व्यवस्थिताः । मरुतो विश्वकर्मा च वसवश्च द्विजोत्तमाः ॥ ३२ ॥
दिवाकरश्च सोमश्च दिवा रात्रिस्तथैव च । अर्धमासाश्च मासाश्च ऋतवः षट् च संस्थिताः ॥ ३३ ॥

(उस) सभामें वेदमाता विद्यासे सम्पन्न, सुरों एवं असुरोंके गुरु (श्रीमान् ब्रह्माजी) भी उपस्थित थे। प्रजापतिगण (उस प्रभुता-सम्पन्न) प्रभुकी उपासना कर रहे थे। द्विजोत्तमो! दक्ष, प्रचेता, पुलह, मरीचि, भृगु, अत्रि, वसिष्ठ, गौतम और नारद एवं सभी विद्याएँ, आकाश, वायु, तेज, जल, पृथ्वी, शब्द, स्पर्श, रूप, रस और गन्ध एवं प्रकृति, विकृति, अन्यान्य महत् कारण, अङ्गों एवं उपाङ्गोंके साथ चारों वेद और लोकपति, नीति, यज्ञ, सङ्कल्प, प्राण—ये तथा अन्यान्य देव, ऋषि, भूत, तत्त्वादि ब्रह्माकी उपासना कर रहे थे। द्विजश्रेष्ठो! अर्थ, धर्म, काम, क्रोध, हर्ष, शुक्र, बृहस्पति, संवर्त, बुध, शनैश्चर और राहु आदि सभी ग्रह भी वहाँ यथास्थान बैठे थे। मरुद्गण, विश्वकर्मा, वसु, सूर्य, चन्द्रमा, दिन, रात्रि, पक्ष, मास तथा छः ऋतुएँ भी वहाँ उपस्थित थीं ॥२६–३३॥

तां प्रविश्य सभां दिव्यां ब्रह्मणः सर्वकामिकाम्। कश्यपस्त्रिदशैः सार्द्धं पुत्रैर्धर्मभृतां वरः ॥ ३४ ॥
सर्वतेजोमयीं दिव्यां ब्रह्मर्षिगणसेविताम्। ब्राह्म्या श्रिया सेव्यमानामचिन्त्यां विगतक्लमाम् ॥ ३५ ॥
ब्रह्माणं प्रेक्ष्य ते सर्वे परमासनमास्थितम्। शिरोभिः प्रणता देवं देवा ब्रह्मर्षिभिः सह ॥ ३६ ॥
ततः प्रणम्य चरणौ नियताः परमात्मनः। विमुक्ताः सर्वपापेभ्यः शान्ता विगतकल्मषाः ॥ ३७ ॥
दृष्ट्वा तु तान् सुरान् सर्वान् कश्यपेन सहागतान्। आह ब्रह्मा महातेजा देवानां प्रभुरीश्वरः ॥ ३८ ॥

इति श्रीवामनपुराणे चतुर्विंशोऽध्यायः ॥ २४ ॥

धर्मात्माओंमें श्रेष्ठ कश्यपने अपने पुत्र देवताओंके साथ ब्रह्माकी उस सर्वमनोरथमयी, सर्वतेजोमयी, दिव्य एवं ब्रह्मर्षिगणोंसे सेवित तथा ब्रह्म-विचारमयी तेजस्वी एवं लक्ष्मीसे सेवित अचिन्त्य तथा खिन्नतासे रहित सभामें प्रवेश किया। वहाँ उसमें जाकर सभी देवताओंने श्रेष्ठ आसनपर विराजमान ब्रह्माजीको देखा और उन्हें ब्रह्मर्षियोंके साथ झुककर सिरसे प्रणाम किया। नियमका पालन करनेवाले वे सभी परमात्माके चरणोंमें प्रणाम करके सम्पूर्ण पापोंसे मुक्त, निर्मल एवं शान्त हो गये। (फिर) महान् तेजस्वी देवेश्वर ब्रह्माने कश्यपके साथ आये हुए उन सभी देवताओंसे कहा—॥ ३४–३८ ॥

इस प्रकार श्रीवामनपुराणमें चौबीसवाँ अध्याय समाप्त हुआ ॥ २४ ॥

[अथ पञ्चविंशोऽध्यायः]

ब्रह्मोवाच

यदर्थमिह संप्राप्ता भवन्तः सर्व एव हि। चिन्तयाम्यहमप्यग्रे तदर्थं च महाबलाः ॥ १ ॥
भविष्यति च वः सर्वं काङ्क्षितं यत् सुरोत्तमाः। बलेर्दानवमुख्यस्य योऽस्य जेता भविष्यति ॥ २ ॥
न केवलं सुरादीनां गतिर्मम स विश्वकृत्। त्रैलोक्यस्यापि नेता च देवानामपि स प्रभुः ॥ ३ ॥
यः प्रभुः सर्वलोकानां विश्वेशश्च सनातनः। पूर्वजोऽयं सदाप्याहुरादिदेवं सनातनम् ॥ ४ ॥

पचीसवाँ अध्याय प्रारम्भ

(ब्रह्माजीके द्वारा देवोंको सान्त्वना प्रदान, उपदेश तथा तदनुसार देवोंका श्वेतद्वीपमें तपस्या करना)

ब्रह्माजीने कहा— महाबलशाली देवताओ! आपलोग जिस उद्देश्यसे यहाँ आये हैं, उसके विषयमें मैं पहलेसे ही सोच रहा हूँ। सुरश्रेष्ठो! आपलोगोंको जो अभिलषित है, वह पूर्ण होकर रहेगा। दानवोंमें प्रधान बलिको जीतनेवाले विश्वकर्ता (भगवान्) न केवल (आप सब) देवोंके, प्रत्युत हमारे भी सहारे हैं। वे तीनों लोकोंके नेता और देवताओंके भी प्रभु हैं। उन्हें ही सनातन आदिदेव भी कहते हैं ॥ १–४ ॥

तं देवापि महात्मानं न विदुः कोऽप्यसाविति। देवानस्मान् श्रुतिं विश्वं स वेत्ति पुरुषोत्तमः॥ ५॥
तस्यैव तु प्रसादेन प्रवक्ष्ये परमां गतिम्। यत्र योगं समास्थाय तपश्चरति दुश्चरम्॥ ६॥
क्षीरोदस्योत्तरे कूले उदीच्यां दिशि विश्वकृत्। अमृतं नाम परमं स्थानमाहुर्मनीषिणः॥ ७॥
भवन्तस्तत्र वै गत्वा तपसा शंसितव्रताः। अमृतं स्थानमासाद्य तपश्चरत दुश्चरम्॥ ८॥

उन महान् आत्मा-(सनातन आदिदेव-)को देवता आदि कोई भी वास्तवमें नहीं जानते कि वे कौन हैं; परंतु वे पुरुषोत्तम (समस्त) देवोंको, मुझे तथा श्रुति (वेद) एवं समस्त विश्वको जानते हैं (संसारके समस्त क्रिया-कलाप उनकी जानकारीमें ही होते हैं; वे सर्वज्ञ हैं) । उन्हींके कृपा-प्रसादसे (आपलोगोंको) मैं अत्यन्त श्रेष्ठ उपाय बतलाता हूँ । (आपलोग सुनें ।) आप सभी उत्तर-दिशामें क्षीरसागरके उत्तरी तटपर स्थित उस स्थानपर जाइये जिसे विचारशील विद्वान् लोग (अमृत) नामसे उच्चारित करते हैं । विश्वकी रचना करनेवाले (परमात्मा) वहीं योगधारणामें स्थित होकर कठिन तपस्या कर रहे हैं । आप सभी लोग उस अमृत नामक स्थानपर जायँ और आलस्यरहित होकर आपलोग भी लक्ष्य सिद्धिके लिये वहाँ कठिन तपस्या प्रारम्भ कर दें ॥५-८॥

ततः श्रोष्यथ संघुष्टां स्निग्धगम्भीरनिस्वनाम्। उष्णान्ते तोयदस्येव तोयपूर्णस्य निःस्वनम्॥ ९॥
रक्तां पुष्टाक्षरां रम्यामभयां सर्वदा शिवाम्। वाणीं परमसंस्कारां वदतां ब्रह्मवादिनाम्॥ १०॥
दिव्यां सत्यकरीं सत्यां सर्वकल्मषनाशिनीम्। सर्वदेवाधिदेवस्य ततोऽसौ भावितात्मनः॥ ११॥
तस्य व्रतसमाप्त्यां तु योगव्रतविसर्जने। अमोघं तस्य देवस्य विश्वतेजो महात्मनः॥ १२॥
कस्य किं वो वरं देवा ददामि वरदः स्थितः। स्वागतं वः सुरश्रेष्ठा मत्समीपमुपागताः॥ १३॥

(जब आपलोग वहाँ जाकर कठिन तपस्या करने लगेंगे) तब ग्रीष्मके अन्तमें देवाधिदेवकी शब्दरूपिणी, स्निग्ध-गम्भीर ध्वनिवाली, प्रेमसे भरी हुई शुद्ध और स्पष्ट अक्षरोंसे युक्त मनोहर एवं निर्भयताकी सूचना देनेवाली, सर्वदा मङ्गलमयी, उच्च स्वरसे अध्ययन करनेवाले ब्रह्मवादियोंकी वाणीके समान स्पष्ट, उत्तम संस्कारसे युक्त, दिव्य, सत्य-स्वरूपिणी, सत्यवादी और उन्मुख होनेके लिये प्रेरणा देनेवाली और पापोंको नष्ट करनेवाली जलसे पूर्ण मेघके गर्जनके समान गभीर वाणीको सुनेंगे । उसके बाद भावितात्माके (आत्मज्ञानसे परिपूर्ण महात्मा कश्यपके योगव्रतके अवसरपर) व्रतकी समाप्ति हो जानेके बाद अमोघ तेजसे सम्पन्न वे देव आपसे कहेंगे—सुरश्रेष्ठो ! आपलोग मेरे पास आये, आपलोगोंका स्वागत है । मैं (आपलोगोंको) वरदान देनेके लिये आप सबके समक्ष स्थित हूँ कहो—किसे कौन-सा वर दूँ ॥ ९-१३ ॥

ततोऽदितिः कश्यपश्च गृह्णीयातां वरं तदा। प्रणम्य शिरसा पादौ तस्मै देवाय धीमते॥ १४॥
भगवानेव नः पुत्रो भवत्विति प्रसीद नः। उक्तश्च परया वाचा तथाऽस्त्विति स वक्ष्यति॥ १५॥
देवा ब्रुवन्ति ते सर्वे कश्यपोऽदितिरेव च।
तथास्त्विति सुराः सर्वे प्रणम्य शिरसा प्रभुम्। श्वेतद्वीपं समुद्दिश्य गताः सौम्यदिशं प्रति॥ १६॥
तेऽचिरेणैव संप्राप्ताः क्षीरोदं सरितां पतिम्। यथोद्दिष्टं भगवता ब्रह्मणा सत्यवादिना॥ १७॥

और, जब भगवान् इस प्रकार वरदान देनेके लिये उपस्थित होंगे तथा अदिति एवं कश्यप प्रज्ञावान् प्रभुके चरणोंमें झुककर सिरसे प्रणाम और वरकी याचना करेंगे कि 'भगवान् ही हमारे पुत्र हों, इसके लिये आप हमारे ऊपर प्रसन्न हों' तब वे श्रेष्ठवाणीके द्वारा 'ऐसा ही हो'—यह कहेंगे । ([illegible] हैं—निर्देश पाकर कश्यप, अदिति एवं सभी देवताओंने 'ऐसा ही हो' —यह कहकर प्रभु

प्रणाम किया और ब्रह्मदीपकी ओर लक्ष्य करके उत्तर दिशाकी ओर प्रस्थान किया। वे अत्यन्त शीघ्रतासे सत्य-प्रसन्न भगवान् ब्रह्माके द्वारा निर्दिष्ट की गयी व्यवस्थाके अनुसार क्षीरसागरके तटपर पहुँच गये ॥ १४–१७ ॥

ते क्रान्त्वा सागरान् सर्वान् पर्वतांश्च सकाननान्। नदीश्च विविधा दिव्याः पृथिव्यां ते सुरोत्तमाः॥ १८ ॥
अपश्यन्त तमो घोरं सर्वसत्त्वविवर्जितम्। अभास्करममर्यादं तमसा सर्वतो वृतम् ॥ १९ ॥
अमृतं स्थानमासाद्य कश्यपेन महात्मना। दीक्षिताः कामदं दिव्यं व्रतं वर्षसहस्रकम् ॥ २० ॥
प्रसादार्थं सुरेशाय तस्मै योगाय धीमते। नारायणाय देवाय सहस्राक्षाय भूतये ॥ २१ ॥
ब्रह्मचर्येण मौनेन स्थाने वीरासनेन च। क्रमेण च सुराः सर्वे तप उग्रं समास्थिताः ॥ २२ ॥
कश्यपस्तत्र भगवान् प्रसादार्थं महात्मनः। उदीरयत वेदोक्तं यमाहुः परमं स्तवम् ॥ २३ ॥

इति श्रीवामनपुराणे पञ्चविंशोऽध्यायः ॥ २५ ॥

उन देवताओंने पृथ्वीके सभी समुद्रों, वनोंसे भरे हुए पर्वतों एवं भाँति-भाँतिकी दिव्य नदियोंको पार किया। उसके बाद (उसके आगे) उन लोगोंने ऐसे स्थानको देखा जहाँ न कोई प्राणी था, न सूर्यका प्रकाश ही था; प्रत्युत चारों ओर घनघोर अन्धकार था, जिसकी सीमा मालूम ही नहीं होती थी। इस प्रकारके उस 'अमृत' नामक स्थानमें पहुँचकर महात्मा कश्यपने ब्रह्म-सम्पन्न योगी, देवेश्वर, कल्याणकी मूर्ति, सहस्रचक्षु नारायणदेवकी प्रसन्नताकी प्राप्तिके उद्देश्यसे देवताओंको सहस्रवार्षिक (हजारों वर्षोंमें पूर्ण होनेवाले) दिव्य (देव-सम्बन्धी) इच्छापूर्ण करनेवाले व्रतकी दीक्षा दी। फिर वे सभी देवता क्रमशः अपनी इन्द्रियोंको वशमें करके और मौन धारणकर उचित स्थानपर वीरासनसे बैठकर कठोर तपस्या करने लगे। वहाँ भगवान् कश्यपने महात्मा विष्णुको प्रसन्न करनेके लिये वेदमें कहे गए स्तवका (स्तुति या स्तोत्रका) उच्च वाणीमें पाठ किया, जिसे 'परमस्तव' कहते हैं ॥ १८–२३ ॥

इस प्रकार श्रीवामनपुराणमें पचीसवाँ अध्याय समाप्त हुआ ॥ २५ ॥

[अथ षड्विंशोऽध्यायः]

कश्यप उवाच

नमोऽस्तु ते देवदेव एकशृङ्ग वृषार्चे सिन्धुवृष वृषाकपे सुरवृष अनादिसंभव रुद्र कपिल विष्वक्सेन सर्वभूतपते ध्रुव धर्माधर्म वैकुण्ठ वृषावर्त्त अनादिमध्यनिधन धनंजय शुचिश्रवः पृश्नितेजः निजजय अमृतेशय सनातन त्रिधाम तुषित महातत्त्व लोकनाथ पद्मनाभ विरिञ्चे बहुरूप अक्षय अक्षर हव्यभुज खण्डपरशो शक्र मुञ्जकेश हंस महादक्षिण हृषीकेश सूक्ष्म महानियमधर विरज लोकप्रतिष्ठ अरूप अग्रज धर्मज धर्मनाभ गभस्तिनाभ शतक्रतुनाभ चन्द्ररथ सूर्यतेजः समुद्रवासः अजः सहस्रशिरः सहस्रपाद अधोमुख महापुरुष पुरुषोत्तम सहस्रबाहो सहस्रमूर्ते सहस्रास्य सहस्रसंभव सहस्रसत्त्वं त्वामाहुः। पुष्पहास चरम त्वमेव वौषट् वषट्कारं त्वामाहुरग्र्यं मखेषु प्राशितारं सहस्रधारं च भूश्च भुवश्च स्वश्च त्वमेव वेदवेद्य ब्रह्मशय ब्राह्मणप्रिय त्वमेव द्यौरसि मातरिश्वाऽसि धर्मोऽसि होता पोता मन्ता नेता होमहेतुस्त्वमेव अग्र्य विश्वधाम्ना त्वमेव दिग्भिः सुभाण्ड इज्योऽसि सुमेधोऽसि समिधस्त्वमेव मतिर्गतिर्दाता त्वमसि मोक्षोऽसि योगोऽसि सृजसि। धाता परमयज्ञोऽसि सोमोऽसि दीक्षितोऽसि दक्षिणाऽसि विश्वमसि स्थविर हिरण्यनाभ नारायण त्रिनयन आदित्यवर्ण आदित्यतेजः महापुरुष पुरुषोत्तम आदिदेव

सुविक्रम प्रभाकर शंभो स्वयंभो भूतादिः महाभूतोऽसि विश्वभूत विश्व त्वमेव विश्वगोप्ताऽसि पवित्रमसि विश्वभव ऊर्ध्वकर्म अमृत दिवस्पते वाचस्पते घृतार्चे अनन्तकर्म वंश प्राग्वंश विश्वपास्त्वमेव ।

वरार्थिनां वरदोऽसि त्वम् ।

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां तुभ्यं होत्रात्मने नमः ॥ १ ॥

इति श्रीवामनपुराणे षड्विंशोऽध्यायः ॥ २६ ॥

छब्बीसवाँ अध्याय प्रारम्भ

(कश्यप-द्वारा भगवान् वामनकी स्तुति)

कश्यपने कहा—हे देवदेव, एकशृङ्ग, वृषार्चि, सिन्धुवृष, वृषाकपि, सुरवृष, अनादिसम्भव, रुद्र, कपिल, विष्वक्सेन, सर्वभूतपति (सम्पूर्ण प्राणियोंके स्वामी), ध्रुव, धर्माधर्म, वैकुण्ठ, वृषावर्त्त, अनादिमध्यनिधन, धनञ्जय, शुचिश्रव, पृश्नितेज, निजजय, अमृतेशय, सनातन, त्रिधाम, तुषित, महातत्त्व, लोकनाथ, पद्मनाभ, विरिञ्चि, बहुरूप, अक्षय, अक्षर, हव्यभुज, खण्डपरशु, शक्र, मुञ्जकेश, हंस, महादक्षिण, हृषीकेश, सूक्ष्म, महानियमधर, विरज, लोकप्रतिष्ठ, अरूप, अग्रज, धर्मज, धर्मनाभ, गभस्तिनाभ, शतक्रतुनाभ, चन्द्ररथ, सूर्यतेज, समुद्रवास, अज, सहस्रशिर, सहस्रपाद, अधोमुख, महापुरुष, पुरुषोत्तम, सहस्रबाहु, सहस्रमूर्ति, सहस्रास्य, सहस्रसम्भव ! मेरा आपके चरणोंमें नमस्कार है । (आपके भक्तजन) आपको सहस्रसत्त्व कहते हैं । (खिले हुए पुष्पके समान मधुर मुसकानवाले) पुष्पहास, चरम (सर्वोत्तम) ! लोग आपको ही वौषट् एवं वषट्कार कहते हैं । आप ही अग्र्य, (सर्वश्रेष्ठ) यज्ञोंमें प्राशिता (भोक्ता) हैं; सहस्रधार, भूः, भुवः एवं स्वः हैं । आप ही वेदवेद्य (वेदोंके द्वारा जाननेयोग्य), ब्रह्मशय, ब्राह्मणप्रिय (अग्निके प्रेमी), द्यौ (आकाशके समान सर्वव्यापी), मातरिश्वा (वायुके समान गतिमान्), धर्म, होता, पोता (विष्णु), मन्ता, नेता एवं होमके हेतु हैं । आप ही विश्वतेजके द्वारा अग्र्य (सर्वश्रेष्ठ) हैं और दिशाओंके द्वारा सुभाण्ड (विस्तृत पात्ररूप) हैं अर्थात् दिशाएँ आपमें समाविष्ट हैं । आप (यजन करने योग्य) इज्य, सुमेध, समिधा, मति, गति एवं दाता हैं । आप ही मोक्ष, योग तथा (सृष्टि करनेवाले), धाता (धारण और पोषण करनेवाले), परमयज्ञ, सोम, दीक्षित, दक्षिणा एवं विश्व हैं । आप ही स्थविर, हिरण्यनाभ, नारायण, त्रिनयन, आदित्यवर्ण, आदित्यतेज, महापुरुष, पुरुषोत्तम, आदिदेव, सुविक्रम, प्रभाकर, शम्भु, स्वयम्भू, भूतादि, महाभूत, विश्वभूत एवं विश्व हैं । आप ही संसारकी रक्षा करनेवाले, पवित्र, विश्वभव,-विश्वकी सृष्टि करनेवाले, ऊर्ध्वकर्म (उत्तमकर्मा), अमृत (कभी भी मृत्युको न प्राप्त होनेवाले), दिवस्पति, वाचस्पति, घृतार्चि, अनन्तकर्म, वंश, प्राग्वंश, विश्वपा (विश्वका पालन करनेवाले) तथा वरदानवर चाहनेवालोंके लिये वरदानी हैं ।

चार (आश्रावय), चार (अस्तु श्रौषट्), दो (यज) तथा पाँच (ये यजामहे) और पुनः दो (वषट्) अक्षरों—इस प्रकार ४+४+२+५+२=१७ अक्षरोंसे— जिसके लिये अग्नि होत्र किया जाता है उन आप होत्रात्माको नमस्कार है ॥ १ ॥

इस प्रकार श्रीवामनपुराणमें छब्बीसवाँ अध्याय समाप्त हुआ ॥ २६ ॥



[अथ सप्तविंशोऽध्यायः]

लोमहर्षण उवाच

नारायणस्तु भगवाञ्छ्रुत्वैवं परमं स्तवम्। ब्रह्मज्ञेन द्विजेन्द्रेण कश्यपेन समीरितम्॥ १ ॥
उवाच वचनं सम्यक् तुष्टः पुष्टपदाक्षरम्। श्रीमान् प्रीतमना देवो यद्वदेत् प्रभुरीश्वरः॥ २ ॥
वरं वृणुध्वं भद्रं वो वरदोऽस्मि सुरोत्तमाः।

कश्यप उवाच

प्रीतोऽसि नः सुरश्रेष्ठ सर्वेषामेव निश्चयः॥ ३ ॥
वासवस्यानुजो भ्राता ज्ञातीनां नन्दिवर्धनः। अदित्या अपि च श्रीमान् भगवानस्तु वै सुतः॥ ४ ॥
अदितिर्देवमाता च एतमेवार्थमुत्तमम्। पुत्रार्थं वरदं प्राह भगवन्तं वरार्थिनी॥ ५ ॥

सत्ताईसवाँ अध्याय प्रारम्भ

(भगवान् नारायणसे देवों और कश्यपकी प्रार्थना, अदितिकी तपस्या और प्रभुसे प्रार्थना)

लोमहर्षणने कहा—इस प्रकार ब्रह्मज्ञानी द्विजश्रेष्ठ कश्यपने विष्णुकी उत्तम स्तुति की; उसे सुनकर प्रसन्न होकर सामर्थ्यशाली एवं ऐश्वर्यसम्पन्न नारायणने अत्यन्त संतुष्ट होकर प्रसन्न मनसे सुसंस्कृत शब्दों एवं अक्षरोंवाला समयानुकूल उचित वचन कहा—श्रेष्ठ देवताओ ! वर माँगो। तुम सबका कल्याण हो; मैं तुम लोगोंको (इच्छित) वर दूँगा।

कश्यपने कहा—सुरश्रेष्ठ ! यदि आप हम सबपर प्रसन्न हैं तो हम सभीका यह निश्चय है कि श्रीमान् भगवान् आप स्वयं इन्द्रके छोटे भाईके रूपमें अदितिके कुटुम्बियोंके आनन्द बढ़ानेवाले पुत्र बनें। वरकी याचना करनेवाली देवमाता अदितिने भी वरदानी भगवानसे पुत्रकी प्राप्तिके लिये अपने इस उत्तम अभिप्रायको प्रकट किया—कहा॥ १—५॥

देवा ऊचुः

निःश्रेयसार्थं सर्वेषां दैवतानां महेश्वर। त्राता भर्ता च दाता च शरणं भव नः सदा॥ ६ ॥
ततस्तानब्रवीद्विष्णुर्देवान् कश्यपमेव च।
सर्वेषामेव युष्माकं ये भविष्यन्ति शत्रवः। मुहूर्तमपि ते सर्वे न स्थास्यन्ति ममाग्रतः॥ ७ ॥
हत्वाऽसुरगणान् सर्वान् यज्ञभागाग्रभोजिनः। हव्यादांश्च सुरान् सर्वान् कव्यादांश्च पितॄनपि॥ ८ ॥
करिष्ये विबुधश्रेष्ठाः पारमेष्ठ्येन कर्मणा। यथायातेन मार्गेण निवर्तध्वं सुरोत्तमाः॥ ९ ॥

(अदितिके अभिप्रायको जानकर) देवताओंने कहा—महेश्वर ! सभी देवताओंके परम कल्याणके लिये आप हम सबकी सदा रक्षा करनेवाले, पालन-पोषण करनेवाले, दान देनेवाले एवं आश्रय बनें। इसके बाद भगवान् विष्णुने उन देवताओंसे तथा कश्यपसे कहा कि आप सभीके जितने भी शत्रु होंगे वे सभी मेरे सम्मुख क्षणमात्र भी नहीं टिक सकेंगे। देवश्रेष्ठो ! परमेष्ठी (ब्रह्मा)के द्वारा विधान किये गये कर्मोंके द्वारा मैं समस्त असुरोंको मारकर देवताओंको यज्ञभागके सर्वप्रथम भाग ग्रहण करनेवाले अधिकारी एवं हव्यभोक्ता और पितरोंको कव्यभोक्ता बनाऊँगा। सुरोत्तमो ! अब आपलोग जिस मार्गसे आये हैं, फिर उसी मार्गसे वापस लौट जायँ॥ ६—९॥

लोमहर्षण उवाच

एवमुक्ते तु देवेन विष्णुना प्रभविष्णुना। ततः प्रहृष्टमनसः पूजयन्ति स्म तं प्रभुम्॥ १० ॥
विश्वेदेवा महात्मानः कश्यपोऽदितिरेव च। नमस्कृत्य सुरेशाय तस्मै देवाय रंहसा॥ ११ ॥
प्रयाताः प्राग्दिशं सर्वे विपुलं कश्यपाश्रमम्। ते कश्यपाश्रमं गत्वा कुरुक्षेत्रवनं महत्॥ १२ ॥
प्रसाद्य ह्यदितिं तत्र तपसे तां न्ययोजयन्। सा चचार तपो घोरं वर्षाणामयुतं तदा॥ १३ ॥

लोमहर्षणने कहा—प्रभावशाली भगवान् विष्णुने जब ऐसा कहा तब महात्मा देवगण, कश्यप एवं अदितिने प्रसन्न-चित्तसे उन प्रभुका पूजन किया एवं देवेश्वरको नमस्कार करनेके बाद पूर्व दिशामें स्थित कश्यपके विस्तृत आश्रमकी ओर शीघ्रतासे चल पड़े। जब देवगण कुरुक्षेत्र-वनमें स्थित महान् आश्रममें पहुँचे तब लोगोंने अदितिको प्रसन्नकर उसे तपस्या करनेके लिये प्रेरित किया। (फिर) उसने दस हजार वर्षोंतक बड़ी कठिन तपस्या की ॥ १०–१३ ॥

तस्या नाम्ना वनं दिव्यं सर्वकामप्रदं शुभम्। आराधनाय कृष्णस्य वाग्जिता वायुभोजना ॥ १४ ॥
दैत्यैर्निराकृतान् दृष्ट्वा तनयानृषिसत्तमाः।
वृथापुत्राऽहमिति सा निर्वेदात् प्रणयाद्धरिम्। तुष्टाव वाग्भिरग्र्याभिः परमार्थावबोधिनी ॥ १५ ॥
शरण्यं शरणं विष्णुं प्रणता भक्तवत्सलम्। देवदैत्यमयं चादिमध्यमान्तस्वरूपिणम् ॥ १६ ॥

श्रेष्ठ ऋषियो! (जिस वनमें अदितिने तप किया) उस दिव्य वनका नाम उसके नामपर अदितिवन पड़ा। वह समस्त कामनाओंकी पूर्ति करनेवाला एवं मङ्गलकारी है। ऋषिश्रेष्ठो! परम अर्थको जाननेवाली (तत्त्वज्ञा) अदितिने अपने पुत्रोंको दैत्योंके द्वारा अपमानित देखा; उसने सोचा कि तब मेरा पुत्रका जनना ही व्यर्थ है; इसलिये अपनी वाणीको संयतकर; हवा पीकर नम्रतापूर्वक शरणागतोंकी रक्षा करनेवाले, भक्तजनप्रिय, देवताओं और दैत्योंकी मूर्तिस्वरूप, आदि-मध्य और अन्तके रूपमें रहनेवाले भगवान् श्रीविष्णुकी प्रसन्नताके लिये उनकी सत्य एवं मधुर वाणियोंसे उत्तम स्तुति करना प्रारम्भ कर दिया ॥ १४–१६ ॥

अदितिरुवाच

नमः कृत्यार्तिनाशाय नमः पुष्करमालिने। नमः परमकल्याण कल्याणायादिवेधसे ॥ १७ ॥
नमः पङ्कजनेत्राय नमः पङ्कजनाभये। नमः पङ्कजसंभूतिसंभवायात्मयोनये ॥ १८ ॥
श्रियः कान्ताय दान्ताय दान्तदृश्याय चक्रिणे। नमः पद्मासिहस्ताय नमः कनकरेतसे ॥ १९ ॥
तथात्मज्ञानयज्ञाय योगिचिन्त्याय योगिने। निर्गुणाय विशेषाय हरये ब्रह्मरूपिणे ॥ २० ॥

अदितिने इस प्रकार स्तुति करना आरम्भ किया—कृत्यासे उत्पन्न दुःखका नाश करनेवाले प्रभुको नमस्कार है। कमलकी मालाको धारण करनेवाले पुष्करमाली भगवान्‌को नमस्कार है। परम मङ्गलकारी, कल्याणकारी आदिविधाता प्रभो! आपको नमस्कार है। कमलनयन! आपको नमस्कार है। पद्मनाभ! आपको नमस्कार है। ब्रह्माकी उत्पत्तिके स्थान, आत्मजन्मा! आपको नमस्कार है। प्रभो! आप लक्ष्मीपति, इन्द्रियोंका दमन करनेवाले, संयमियोंके द्वारा दर्शन पानेयोग्य, हाथमें सुदर्शन चक्र धारण करनेवाले एवं खड्ग (तलवार) धारण करते हैं; आपको नमस्कार है। स्वामिन्! आत्मज्ञानके द्वारा यज्ञ करनेवाले, योगियोंके द्वारा ध्यान करने योग्य, योगकी साधना करनेवाले योगी, सत्त्वगुण, रजोगुण, तमोगुणसे रहित किंतु (दयादि) विशिष्ट गुणोंसे युक्त ब्रह्मरूपी श्रीहरि भगवान्‌को नमस्कार है ॥ १७–२० ॥

जगच्च तिष्ठते यत्र जगतो यो न दृश्यते। नमः स्थूलातिसूक्ष्माय तस्मै देवाय शार्ङ्गिणे ॥ २१ ॥
यं न पश्यन्ति पश्यन्तो जगदप्यखिलं नराः। अपश्यद्भिर्जगद्यश्च दृश्यते हृदि संस्थितः ॥ २२ ॥
बहिर्ज्योतिरलक्ष्यो यो लक्ष्यते ज्योतिषः परः। यस्मिन्नेव यतश्चैव यस्यैतदखिलं जगत् ॥ २३ ॥
तस्मै समस्तजगतामभराय नमो नमः।
आद्यः प्रजापतिः सोऽपि पितॄणां परमं पतिः। पतिः सुराणां यस्तस्मै नमः कृष्णाय वेधसे ॥ २४ ॥

जिन आप परमेश्वरमें सारा संसार स्थित है, किंतु जो संसारसे दृश्य नहीं हैं, ऐसे स्थूल तथा अति- आप शार्ङ्गधारी देवको नमस्कार है। सम्पूर्ण जगत्‌की अपेक्षा करनेवाले प्राणी जिन आपके दर्शनसे रहते हैं, आपका वे दर्शन नहीं कर पाते, परंतु जिन्होंने जगत्‌की अपेक्षा नहीं की, उन्हें आप

स्थित दीखते हैं। आपकी ज्योति बाहर है एवं अदृश्य है, सर्वोत्तम ज्योति है; यह सारा जगत् आपमें स्थित है, आपसे उत्पन्न होता है और आपका ही है, जगत्‌के देवता उन आपको नमस्कार है। जो आप सबके आदिमें प्रजापति रहे हैं एवं पितरोंके श्रेष्ठ स्वामी हैं, देवताओंके स्वामी हैं; उन आप श्रीकृष्णको बार-बार नमस्कार है ॥ २१–२४ ॥

यः प्रवृत्तैर्निवृत्तैश्च कर्मभिस्तु विरज्यते। स्वर्गापवर्गफलदो नमस्तस्मै गदाभृते ॥ २५ ॥
यस्तु संचिन्त्यमानोऽपि सर्वं पापं व्यपोहति। नमस्तस्मै विशुद्धाय परस्मै हरिमेधसे ॥ २६ ॥
ये पश्यन्त्यखिलाधारमीशानमजमव्ययम्। न पुनर्जन्ममरणं प्राप्नुवन्ति नमामि तम् ॥ २७ ॥
यो यज्ञो यज्ञपरमैरिज्यते यज्ञसंस्थितः। तं यज्ञपुरुषं विष्णुं नमामि प्रभुमीश्वरम् ॥ २८ ॥

जो प्रवृत्त एवं निवृत्त कर्मोंसे विरक्त तथा स्वर्ग और मोक्षके फलके देनेवाले हैं, उन गदा धारण करनेवाले भगवान्‌को नमस्कार है। जो स्मरण करनेवालेके सारे पाप नष्ट कर देते हैं, उन विशुद्ध हरिमेधाको मेरा नमस्कार है। जो प्राणी अविनाशी भगवान्‌को अखिलाधार, ईशान एवं अजके रूपमें देखते हैं, वे कभी भी जन्म-मरणको नहीं प्राप्त होते। प्रभो! मैं आपको प्रणाम करती हूँ। आपकी आराधना यज्ञोंद्वारा होती है, आप यज्ञकी मूर्ति हैं, यज्ञमें आपकी स्थिति है; यज्ञपुरुष! आप ईश्वर, प्रभु विष्णुको मैं नमस्कार करती हूँ ॥ २५–२८ ॥

गीयते सर्ववेदेषु वेदविद्भिर्विदां गतिः। यस्तस्मै वेदवेद्याय नित्याय विष्णवे नमः ॥ २९ ॥
यतो विश्वं समुद्भूतं यस्मिन् प्रलयमेष्यति। विश्वोद्भवप्रतिष्ठाय नमस्तस्मै महात्मने ॥ ३० ॥
आब्रह्मस्तम्बपर्यन्तं व्याप्तं येन चराचरम्। मायाजालसमुन्नद्धं तमुपेन्द्रं नमाम्यहम् ॥ ३१ ॥
योऽत्र तोयस्वरूपस्थो बिभर्त्यखिलमीश्वरः। विश्वं विश्वपतिं विष्णुं तं नमामि प्रजापतिम् ॥ ३२ ॥

वेदोंमें आपका गुणगान हुआ है—उसे वेदज्ञ गाते हैं। आप विद्वज्जनोंके आश्रय हैं, वेदोंसे जानने योग्य एवं नित्यस्वरूप हैं; आप विष्णुको मेरा नमस्कार है। विश्व जिनसे समुद्भूत हुआ है और जिनमें विलीन होगा तथा जो विश्वके उद्भव तथा प्रतिष्ठाके स्वरूप हैं, उन महान् आत्मा (परमात्मा-)को मेरा नमस्कार है। जिनके द्वारा मायाजालसे बँधा हुआ ब्रह्मासे लेकर चराचर (विश्व) व्याप्त है, उन उपेन्द्र भगवानको मैं नमस्कार करती हूँ। जो ईश्वर जलस्वरूपमें स्थित होकर अखिल विश्वका धारण करते हैं, उन विश्वपति एवं प्रजापति विष्णुको मैं नमस्कार करती हूँ ॥ २९–३२ ॥

मूर्तं तमोऽसुरमयं तद्विधो विनिहन्ति यः। रात्रिजं सूर्यरूपी च तमुपेन्द्रं नमाम्यहम् ॥ ३३ ॥
यस्याक्षिणी चन्द्रसूर्यौ सर्वलोकशुभाशुभम्। पश्यतः कर्म सततं तमुपेन्द्रं नमाम्यहम् ॥ ३४ ॥
यस्मिन् सर्वेश्वरे सर्वं सत्यमेतन्मयोदितम्। नानृतं तमजं विष्णुं नमामि प्रभवाव्ययम् ॥ ३५ ॥
यथैतत्सत्यमुक्तं मे भूयश्चातो जनार्दन। सत्येन तेन सकलाः पूर्यन्तां मे मनोरथाः ॥ ३६ ॥

॥ इति श्रीवामनपुराणे सप्तविंशोऽध्यायः ॥ २७ ॥

जो सूर्यरूपी उपेन्द्र असुरमय रात्रिसे उत्पन्न, रूपधारी तमका विनाश करते हैं, मैं उनको प्रणाम करती हूँ। जिनकी सूर्य तथा चन्द्रमा-रूप दोनों आँखें समस्त लोकोंके शुभाशुभ कर्मोंको सतत देखती रहती हैं, उन उपेन्द्रको मैं नमस्कार करती हूँ। जिन सर्वेश्वरके विषयमें मेरा यह समस्त उद्गार सत्य है—असत्य नहीं है, उन अजन्मा, अव्यय एवं स्रष्टा विष्णुको मैं नमस्कार करती हूँ। हे जनार्दन! यदि मैंने यह सत्य कहा है तो उस सत्यके प्रभावसे मेरे मनकी सारी अभिलाषाएँ परिपूर्ण हों ॥ ३३–३६ ॥

इस प्रकार श्रीवामनपुराणमें सत्ताईसवाँ अध्याय समाप्त हुआ ॥ २७ ॥

[अथाष्टाविंशोऽध्यायः]

लोमहर्षण उवाच

एवं स्तुतोऽथ भगवान् वासुदेव उवाच ताम्। अदृश्यः सर्वभूतानां तस्याः संदर्शने स्थितः॥ १॥

अट्ठाईसवाँ अध्याय प्रारम्भ

(अदितिकी प्रार्थनापर भगवान्‌का प्रकट होना तथा भगवान्‌का अदितिको वर देना)

लोमहर्षणने कहा—इस प्रकार स्तुति करनेके बाद समस्त प्राणियोंके दृष्टि-पथमें न आनेवाले भगवान् वासुदेव उसके सामने प्रकट हुए और बोले—॥ १॥

श्रीभगवानुवाच

मनोरथांस्त्वमदिते यानिच्छस्यभिवाञ्छितान्। तांस्त्वं प्राप्स्यसि धर्मज्ञे मत्प्रसादान्न संशयः॥ २॥
शृणु त्वं च महाभागे वरो यस्ते हृदि स्थितः। मद्दर्शनं हि विफलं न कदाचिद् भविष्यति॥ ३॥
यश्चेह त्वद्वने स्थित्वा त्रिरात्रं वै करिष्यति। सर्वे कामाः समृध्यन्ते मनसा यानिहेच्छति॥ ४॥
दूरस्थोऽपि वनं यस्तु अदित्याः स्मरते नरः। सोऽपि याति परं स्थानं किं पुनर्निवसन् नरः॥ ५॥
यश्चेह ब्राह्मणान् पञ्च त्रीन् वा द्वावेकमेव वा। भोजयेच्छ्रद्धया युक्तः स याति परमां गतिम्॥ ६॥

श्रीभगवान् बोले—धर्मज्ञे (धर्मके मर्मको जाननेवाली) अदिति! तुम मुझसे जिन मनचाही कामनाओंकी पूर्ति चाहती हो उन्हें तुम मेरी कृपासे प्राप्त करोगी, इसमें कोई संदेह नहीं। महाभागे! सुनो, तुम्हारे मनमें जिन वरोंकी इच्छा है उन्हें तुम मुझसे माँगो; क्योंकि मेरे दर्शन करनेका फल कभी व्यर्थ नहीं होता। तुम्हारे इस (अदिति) वनमें रहकर जो तीन रात्रितक निवास करेगा, उसकी सभी मनचाही कामनाएँ पूरी होंगी। जो मनुष्य दूर देशमें स्थित रहकर भी तुम्हारे इस वनका स्मरण करेगा, वह परम धामको प्राप्त कर लेगा। फिर यहाँ रहनेवाले मनुष्योंको परम धामकी प्राप्ति हो जाय, इसमें क्या आश्चर्य? जो मानव इस स्थानपर पाँच, तीन अथवा दो या एक ही ब्राह्मणको श्रद्धापूर्वक भोजन करायेगा, वह उत्तम गति-(मोक्ष) को प्राप्त करेगा॥ २–६॥

अदितिरुवाच

यदि देव प्रसन्नस्त्वं भक्त्या मे भक्तवत्सल। त्रैलोक्याधिपतिः पुत्रस्तदस्तु मम वासव॥ ७॥
हृतं राज्यं हृतश्चास्य यज्ञभागः सुरासुरैः। त्वयि प्रसन्ने वरद तत् प्राप्नोतु सुतो मम॥ ८॥
हृतं राज्यं न दुःखाय मम पुत्रस्य केशव। शरणदायविभ्रंशो बाधां मे कुरुते हृदि॥ ९॥

अदितिने कहा—भक्तवत्सल देव! यदि आप मेरी भक्तिसे मेरे ऊपर प्रसन्न हैं तो मेरा पुत्र इन्द्र तीनों लोकोंका स्वामी हो जाय। असुरोंने उसके राज्यको तथा यज्ञमें मिलनेवाले भागको छीन लिया है। अतः वरदानी प्रभो! आप मेरे ऊपर प्रसन्न हैं तो मेरा पुत्र उसे (राज्यको) प्राप्त कर ले। केशव! मेरे पुत्रके राज्यका असुरोंद्वारा छीन जानेका मुझे दुःख नहीं है, किंतु शरणागतको मिलनेवाले हिस्सेका छिन जाना मेरे हृदयको कुरेद रहा है॥ ७–९॥

श्रीभगवानुवाच

कृतः प्रसादो हि मया तव देवि यथेप्सितम्। स्वांशेन चैव ते गर्भे संभविष्यामि कश्यपात्॥ १०॥
तव गर्भे समुद्भूतस्ततस्ते ये त्वरातयः। तानहं च हनिष्यामि निर्वृत्ता भव नन्दिनि॥ ११॥

श्रीभगवान् बोले—देवि! तुम्हारी इच्छाके अनुकूल मैंने तुम्हारे ऊपर कृपा-प्रसाद प्रकट किया है। (सुनो,) कश्यपसे तुम्हारे गर्भमें मैं अपने अंशसे जन्म लूँगा। तुम्हारी कोखसे जन्म लेकर मैं तुम्हारे सभी शत्रुओंका वध करूँगा। नन्दिनि! तुम लौट जाओ॥ १०–११॥

अदितिरुवाच

प्रसीद देवदेवेश नमस्ते विश्वभावन ।
नाहं त्वामुदरे वोढुमीश शक्ष्यामि केशव । यस्मिन् प्रतिष्ठितं सर्वं विश्वयोनिस्त्वमीश्वरः ॥ १२ ॥

अदितिने कहा—देवदेवेश ! आप (मुझपर) प्रसन्न हों । विश्वभावन ! आपको मेरा नमस्कार है । हे केशव ! हे ईश ! आप विश्वके उत्पत्ति-स्थान और ईश्वर हैं । जिन आप प्रभुमें सारा संसार प्रतिष्ठित है, उन आपके भारको मैं अपनी कोखमें वहन न कर सकूँगी ॥ १२ ॥

श्रीभगवानुवाच

अहं त्वां च वहिष्यामि आत्मानं चैव नन्दिनि । न च पीडां करिष्यामि स्वस्ति तेऽस्तु व्रजाम्यहम् ॥ १३ ॥
इत्युक्त्वान्तर्हिते देवेऽदितिर्गर्भं समादधे ।
गर्भस्थिते ततः कृष्णे चचाल सकला क्षितिः । चकम्पिरे महाशैला जग्मुः क्षोभं महाब्धयः ॥ १४ ॥
यतो यतोऽदितिर्याति ददाति पदमुत्तमम् । ततस्ततः क्षितिः खेदान्ननाम द्विजपुंगवाः ॥ १५ ॥
दैत्यानामपि सर्वेषां गर्भस्थे मधुसूदने । बभूव तेजसो हानिर्यथोक्तं परमेष्ठिना ॥ १६ ॥

॥ इति श्रीवामनपुराणेऽष्टाविंशोऽध्यायः ॥ २८ ॥

श्रीभगवान्‌ने कहा—नन्दिनि ! मैं स्वयं अपना और तुम्हारा—दोनोंका भार वहन कर लूँगा; मैं तुम्हें पीडा नहीं करूँगा । तुम्हारा कल्याण हो, अब मैं जाता हूँ । यह कहकर भगवान्‌के चले जानेपर अदितिने गर्भधारण कर लिया । भगवान्-(कृष्ण-)के गर्भमें आ जानेपर सारी पृथ्वी डगमगा गयी । बड़े-बड़े पर्वत हिलने लगे एवं विशाल समुद्र विक्षुब्ध हो गये । द्विजश्रेष्ठो ! अदिति जहाँ-जहाँ जाती या पैर रखती थी, वहाँ-वहाँकी पृथ्वी खेद-(भार-) के कारण झुक जाती थी । जैसा कि ब्रह्माने (पहले) बतलाया था, मधुसूदनके गर्भमें आनेपर सभी दैत्योंके तेजकी हानि हो गयी ॥ १२–१६ ॥

इस प्रकार श्रीवामनपुराणमें अट्ठाईसवाँ अध्याय समाप्त हुआ ॥ २८ ॥

[अथैकोनत्रिंशोऽध्यायः]

लोमहर्षण उवाच

निस्तेजसोऽसुरान् दृष्ट्वा समस्तानसुरेश्वरः । प्रह्लादमथ पप्रच्छ बलिरात्मपितामहम् ॥ १ ॥

उन्तीसवाँ अध्याय प्रारम्भ

(बलिका पितामह प्रह्लादसे प्रश्न, प्रह्लादका अदितिके गर्भमें वामनागमन एवं विष्णु-महिमाका कथन तथा स्तवन)

लोमहर्षण बोले—उसके बाद (दैत्योंके तेजके समाप्त हो जानेपर) असुरराज बलिने समस्त असुरोंको श्रीहीन देखकर अपने पितामह प्रह्लादजीसे पूछा—॥ १ ॥

बलिरुवाच

तात निस्तेजसो दैत्या निर्दग्धा इव वह्निना । किमेते सहसैवाद्य ब्रह्मदण्डहता इव ॥ २ ॥
दुरिष्टं किं नु दैत्यानां किं कृत्या विधिनिर्मिता । नाशायैषां समुद्भूता येन निस्तेजसोऽसुराः ॥ ३ ॥

बलिने कहा—तात ! (इस समय) दैत्य लोग आगसे झुलसे हुए-से कान्तिहीन हो गये हैं । आज ये ऐसा क्यों हो गये हैं ? प्रतीत होता है कि मानो इन्हें ब्राह्मणका अभिशाप लग गया है—ये ब्रह्मदण्डसे जैसे

*

पीड़ित हो गये हैं। क्या दैत्योंका कोई अशुभ होनेवाला है ? अथवा इनके नाशके लिये ब्रह्माने कृत्या-(पुरश्चरणसे उत्पन्न की गयी मारिकाशक्ति-)को उत्पन्न कर दिया है, जिससे ये असुरलोग इस प्रकार तेजसे रहित हो गये हैं ॥ २-३ ॥

लोमहर्षण उवाच

इत्यसुरवरस्तेन पृष्टः पौत्रेण ब्राह्मणाः। चिरं ध्यात्वा जगादेदमसुरं तं तदा बलिम् ॥ ४ ॥

लोमहर्षण बोले—ब्राह्मणो ! अपने पौत्र (पुत्रके पुत्र) राजा बलिके इस प्रकार पूछनेपर दैत्योंमें प्रधान प्रह्लादने देरतक ध्यान करके तब असुर बलिसे कहा—॥ ४ ॥

प्रह्लाद उवाच

चलन्ति गिरयो भूमिर्जहाति सहसा धृतिम्। सद्यः समुद्राः क्षुभिता दैत्या निस्तेजसः कृताः ॥ ५ ॥
सूर्योदये यथा पूर्वं तथा गच्छन्ति न ग्रहाः। देवानां च परा लक्ष्मीः कारणेनानुमीयते ॥ ६ ॥
महदेतन्महाबाहो कारणं दानवेश्वर। न ह्यल्पमिति मन्तव्यं त्वया कार्यं कथंचन ॥ ७ ॥

प्रह्लादने कहा—दानवाधिप ! इस समय पहाड़ डगमग रहे हैं, पृथ्वी एकाएक अपनी (स्वाभाविक) धीरता छोड़ रही है, समुद्रमें जोरोंकी लहरें उठ रही हैं और दैत्य तेजसे रहित हो गये हैं। सूर्योदय होनेपर अब पहलेके समान ग्रहोंकी चाल नहीं दीखती है। इन कारणों-(लक्षणों-)से अनुमान होता है कि देवताओंका अभ्युदय होनेवाला है। महाबाहु ! दानवेश्वर ! यह कोई विशेष कारण अवश्य है। इस कारणको छोटा नहीं मानना चाहिये और आपको इसका कोई प्रतियत्न (उपाय) करना चाहिये ॥ ५-७ ॥

लोमहर्षण उवाच

इत्युक्त्वा दानवपतिं प्रह्लादः सोऽसुरोत्तमः। अत्यर्थभक्तो देवेशं जगाम मनसा हरिम् ॥ ८ ॥
स ध्यानपथगं कृत्वा प्रह्लादश्च मनोऽसुरः। विचारयामास ततो यथा देवो जनार्दनः ॥ ९ ॥
स ददर्शोदरेऽदित्याः प्रह्लादो वामनाकृतिम्। तदन्तश्च वसून् रुद्रानश्विनौ मरुतस्तथा ॥ १० ॥
साध्यान् विश्वे तथादित्यान् गन्धर्वोरगराक्षसान्। विरोचनं च तनयं बलिं चासुरनायकम् ॥ ११ ॥
जम्भं कुजम्भं नरकं बाणमन्यांस्तथासुरान्। आत्मानमुर्वीं गगनं वायुं वारि हुताशनम् ॥ १२ ॥
समुद्राद्रिसरिद्द्वीपान् सरांसि च पशून् महीम्। वयोमनुष्यानखिलांस्तथैव च सरीसृपान् ॥ १३ ॥
समस्तलोकस्रष्टारं ब्रह्माणं भवमेव च। ग्रहनक्षत्रताराश्च दक्षाद्यांश्च प्रजापतीन् ॥ १४ ॥
सम्पश्यन् विस्मयाविष्टः प्रकृतिस्थः क्षणात् पुनः। प्रह्लादः प्राह दैत्येन्द्रं बलिं वैरोचनिं ततः ॥ १५ ॥

लोमहर्षणने कहा—असुरोंमें श्रेष्ठ महान् भक्त प्रह्लादने दैत्यराज बलिसे इस प्रकार कहकर मनसे श्रीहरिका ध्यान किया। असुर प्रह्लादने अपने मनको भगवान्के ध्यान-पथमें लगाकर चिन्तन किया—जैसा कि भगवान्का स्वरूप है। उन्होंने उस समय (चिन्तन करते समय) अदितिकी कोखमें वामनके रूपमें भगवान्को देखा। उनके भीतर वसुओं, रुद्रों, दोनों अश्विनीकुमारों, मरुतों, साध्यों, विश्वेदेवों, आदित्यों, गन्धर्वों, नागों, राक्षसों तथा अपने पुत्र विरोचन एवं असुरनायक बलि, जम्भ, कुजम्भ, नरक, बाण तथा इस प्रकारके दूसरे बहुत-से असुरों एवं अपनेको और पृथ्वी, आकाश, वायु, जल, अग्नि, समुद्रों, पर्वतों, नदियों, द्वीपों, सरों, पशुओं, भूमण्डलियों, पक्षियों, सम्पूर्ण मनुष्यों, सरकनेवाले जीवों, समस्त लोकोंके स्रष्टा ब्रह्मा, शिव, ग्रहों, नक्षत्रों, ताराओं तथा दक्ष आदि प्रजापतियोंको भी देखा। प्रह्लाद इन्हें देखकर आश्चर्यमें पड़ गये, किंतु क्षणमात्रमें ही [illegible] पूर्ववत् प्रकृतिस्थ हो गये और विरोचन-पुत्र दैत्योंके राजा बलिसे बोले—॥ ८-१५ ॥

तत्संज्ञातं मया सर्वं यदर्थं भवतामियम्। तेजसो हानिरुत्पन्ना शृण्वन्तु तदशेषतः ॥ १६ ॥
देवदेवो जगद्योनिरयोनिर्जगदादिजः। अनादिरादिर्विश्वस्य वरेण्यो वरदो हरिः ॥ १७ ॥
परावराणां परमः परापरसतां गतिः।
प्रभुः प्रमाणं मानानां सप्तलोकगुरोर्गुरुः। स्थितिं कर्तुं जगन्नाथः सोऽचिन्त्यो गर्भतां गतः ॥ १८ ॥
प्रभुः प्रभूणां परमः पराणामनादिमध्यो भगवाननन्तः।
त्रैलोक्यमंशेन सनाथमेकः कर्तुं महात्माऽदितिजोऽवतीर्णः ॥ १९ ॥

(दैत्यो !) मैंने तुम लोगोंकी कान्तिहीनताके (वास्तविक) सब कारणको—अच्छी तरहसे समझ लिया है। (अब) उसे तुम लोग भलीभाँति सुनो। देवोंके देव, जगद्योनि, (विश्वको उत्पन्न करनेवाले) किंतु स्वयं अयोनि, विश्वके प्रारम्भमें विद्यमान पर स्वयं अनादि, फिर भी विश्वके आदि, वर देनेवाले वरणीय हरि, सर्वश्रेष्ठोंमें भी परम (श्रेष्ठ), बड़े-छोटे सज्जनोंकी गति, मानोंके भी प्रमाणभूत प्रभु, सातों लोकोंके गुरुओंके भी गुरु एवं चिन्तनमें न आनेयोग्य विश्वके स्वामी मर्यादा-(धर्महेतु-) की स्थापना करनेके लिये (अदितिके) गर्भमें आ गये हैं। प्रभुओंके प्रभु, श्रेष्ठोंमें श्रेष्ठ, आदि-मध्यसे रहित, अनन्त भगवान् तीनों लोकोंको सनाथ करनेके लिये अदितिके पुत्रके रूपमें अंशावतारस्वरूपसे अवतीर्ण हुए हैं ॥ १६–१९ ॥

न यस्य रुद्रा न च पद्मयोनिर्नेन्द्रो न सूर्येन्दुमरीचिमिश्राः।
जानन्ति दैत्याधिप यत्स्वरूपं स वासुदेवः कलयावतीर्णः ॥ २० ॥
यमक्षरं वेदविदो वदन्ति विशन्ति यं ज्ञानविधूतपापाः।
यस्मिन् प्रविष्टा न पुनर्भवन्ति तं वासुदेवं प्रणमामि देवम् ॥ २१ ॥
भूतान्यशेषाणि यतो भवन्ति यथोर्मयस्तोयनिधेरजस्रम्।
लयं च यस्मिन् प्रलये प्रयान्ति तं वासुदेवं प्रणतोऽस्म्यचिन्त्यम् ॥ २२ ॥
न यस्य रूपं न बलं प्रभावो न च प्रतापः परमस्य पुंसः।
विज्ञायते सर्वपितामहाद्यैस्तं वासुदेवं प्रणमामि नित्यम् ॥ २३ ॥

दैत्यपते ! जिन वासुदेव भगवान्के वास्तविक स्वरूपको रुद्र, ब्रह्मा, इन्द्र, सूर्य, चन्द्र एवं मरीचि आदि श्रेष्ठ पुरुष नहीं जानते, वे ही वासुदेव भगवान् अपनी एक कलासे अवतीर्ण हुए हैं। वेदके जाननेवाले जिन्हें अक्षर कहते हैं तथा ब्रह्मज्ञानके होनेसे जिनके पाप नष्ट हो गये हैं ऐसे निष्पाप शुद्ध प्राणी जिनमें प्रवेश पाते हैं और जिनके भीतर प्रविष्ट हुए लोग पुनः जन्म नहीं लेते—ऐसे उन वासुदेव भगवान्को मैं प्रणाम करता हूँ। समुद्रकी लहरोंके समान जिनसे समस्त जीव निरन्तर उत्पन्न होते रहते हैं तथा प्रलयकालमें जिनके भीतर विलीन हो जाते हैं, उन अचिन्त्य वासुदेवको मैं प्रणाम करता हूँ। ब्रह्मा आदि जिन परम पुरुषके रूप, बल, प्रभाव और प्रतापको नहीं जान पाते उन वासुदेवको मैं नित्य प्रणाम करता हूँ ॥ २०–२३ ॥

रूपस्य चक्षुर्ग्रहणे त्वगेषा स्पर्शग्रहित्री रसना रसस्य।
घ्राणं च गन्धग्रहणे नियुक्तं न घ्राणचक्षुः श्रवणादि तस्य ॥ २४ ॥
स्वयंप्रकाशः परमार्थतो यः सर्वेश्वरो वेदितव्यः स युक्त्या।
शक्यं नमस्यमनघं च देवं ग्राह्यं नतोऽहं हरिमीशितारम् ॥ २५ ॥
येनैकदंष्ट्रेण समुद्धृतेयं धरा चला धारयतीह सर्वम्।
शेते ग्रसित्वा सकलं जगद् यस्तमीड्यमीशं प्रणतोऽस्मि विष्णुम् ॥ २६ ॥

अंशावतीर्णेन च येन गर्भे हृतानि तेजांसि महासुराणाम् ।
नमामि तं देवमनन्तमीशमशेषसंसारतरोः कुठारम् ॥ २७ ॥
देवो जगद्योनिरयं महात्मा स षोडशांशेन महासुरेन्द्राः ।
सुरेन्द्रमातुर्जठरं प्रविष्टो हृतानि वस्तेन बलं वपूंषि ॥ २८ ॥

जिन परमेश्वरने रूप देखनेके लिये आँखोंको, स्पर्शज्ञानके लिये त्वचाको, खट्टे-मीठे स्वाद लेनेके लिये जीभको और सुगन्ध-दुर्गन्ध सूँघनेके लिये नाकको निश्चित किया है; पर स्वयं उनके नाक, आँख और कान आदि नहीं हैं। जो वस्तुतः स्वयं प्रकाशस्वरूप हैं, वे सर्वेश्वर युक्तिके द्वारा (कुछ-कुछ) जाने जा सकते हैं; उन सर्वसमर्थ, स्तुतिके योग्य, किसी भी प्रकारके मलसे रहित, (भक्तिसे) प्राप्य, ईश-हरिदेवको मैं प्रणाम करता हूँ। जिनके द्वारा एक मोटे तथा बड़े दाँतसे निकाली गयी चिरस्थायिनी पृथ्वी सभी कुछ धारण करनेमें समर्थ है तथा जो समस्त संसारको अपनेमें स्थान देकर सोनेका स्वाँग धारण करते हैं, उन स्तुत्य ईश विष्णुको मैं प्रणाम करता हूँ। जिन्होंने अपने अंशसे अदितिके गर्भमें आकर महासुरोंके तेजका अपहरण कर लिया, उन समस्त संसाररूपी वृक्षके लिये कुठाररूप धारण करनेवाले अनन्त देवाधीश्वरको मैं प्रणाम करता हूँ। हे महासुरो! जगत्की उत्पत्तिके स्थान वे ही महात्मा देव अपने सोलहवें अंशकी कलासे इन्द्रकी माताके गर्भमें प्रविष्ट हुए हैं और उन्होंने ही तुम लोगोंके शारीरिक बलको अपहृत कर लिया है ॥ २४–२८ ॥

बलिरुवाच

तात कोऽयं हरिर्नाम यतो नो भयमागतम् । सन्ति मे शतशो दैत्या वासुदेवबलाधिकाः ॥ २९ ॥
विप्रचित्तिः शिबिः शंकुरयःशंकुस्तथैव च । हयशिरा अश्वशिरा भङ्गकारो महाहनुः ॥ ३० ॥
प्रतापी प्रघसः शंभुः कुक्कुराक्षश्च दुर्जयः । एते चान्ये च मे सन्ति दैतेया दानवास्तथा ॥ ३१ ॥
महाबला महावीर्या भूभारधरणक्षमाः । एषामेकैकशः कृष्णो न वीर्यार्धेन संमितः ॥ ३२ ॥

बलिने कहा—तात! जिनसे हम सबको डर है वे हरि कौन हैं? हमारे पास वासुदेवसे अधिक शक्तिशाली सैकड़ों दैत्य हैं; जैसे—विप्रचित्ति, शिब, शङ्कु, अयःशंकु, हयशिरा, अश्वशिरा, (विघटन करनेवाला-) भङ्गकार, महाहनु, प्रतापी, प्रघस, शम्भु, दुर्जय एवं कुक्कुराक्ष। ये तथा अन्य भी ऐसे अनेक दैत्य एवं दानव हैं। ये सभी महाबलवान् तथा महापराक्रमी एवं पृथ्वीके भारको धारण करनेमें समर्थ हैं। कृष्ण तो हमारे इन बलवान् दैत्योंमेंसे पृथक्-पृथक् एक-एकके आधे बलके समान भी नहीं हैं ॥ २९–३२ ॥

लोमहर्षण उवाच

पौत्रस्यैतद् वचः श्रुत्वा प्रह्लादो दैत्यसत्तमः । सक्रोधश्च बलिं प्राह वैकुण्ठाक्षेपवादिनम् ॥ ३३ ॥
विनाशमुपयास्यन्ति दैत्या ये चापि दानवाः । येषां त्वमीदृशो राजा दुर्बुद्धिरविवेकवान् ॥ ३४ ॥
देवदेवं महाभागं वासुदेवमजं विभुम् । त्वामृते पापसङ्कल्प कोऽन्य एवं वदिष्यति ॥ ३५ ॥

लोमहर्षणने कहा—अपने पौत्रकी इस उक्तिको सुनकर दैत्यश्रेष्ठ प्रह्लाद क्रुद्ध हो गये और भगवान्की निन्दा करनेवाले बलिसे बोले—बलि! तेरे-जैसे विवेकहीन एवं दुर्बुद्धि राजाके साथ ये सारे दैत्य एवं दानव मारे जायँगे। हे पापको ही सोचनेवाले पापबुद्धि! तुम्हारे सिवा ऐसा कौन है, जो देवाधिदेव महाभाग अज एवं सर्वव्यापी वासुदेवको इस तरह कहेगा ॥ ३३–३५ ॥

य एते भवता प्रोक्ताः समस्ता दैत्यदानवाः । सब्रह्मकास्तथा देवाः स्थावरान्ता विभूतयः ॥ ३६ ॥
त्वं चाहं च जगच्चेदं साद्रिद्रुमनदीवनम् । ससमुद्रद्वीपलोकोऽयं यच्चेदं सचराचरम् ।

यस्याभिवाद्यवन्द्यस्य व्यापिनः परमात्मनः। एकांशांशकलाजन्म कस्तमेवं प्रवक्ष्यति ॥ ३८ ॥
ऋते विनाशाभिमुखं त्वामेकमविवेकिनम्। दुर्बुद्धिमजितात्मानं वृद्धानां शासनातिगम् ॥ ३९ ॥

तुमने जिन-जिनका नाम लिया है, वे सभी दैत्य एवं दानव तथा ब्रह्माके साथ सभी देवता एवं चराचरकी समस्त विभूतियाँ, तुम और मैं, पर्वत तथा वृक्ष, नदी और वनसे युक्त सारा जगत् तथा समुद्र एवं द्वीपोंसे युक्त सम्पूर्ण लोक तथा चर और अचर जिन सर्ववन्द्य श्रेष्ठ सर्वव्यापी परमात्माके एक अंशकी अंशकलासे उत्पन्न हुए हैं, उनके विषयमें विनाशकी ओर चलनेवाले विवेकहीन, मूर्ख, इन्द्रियोंके गुलाम, वृद्धोंके आदेशोंका उल्लङ्घन करनेवाले तुम्हारी अपेक्षा कौन ऐसा (कृष्ण नामसे) कह सकेगा ? ॥ ३६–३९ ॥

शोच्योऽहं यस्य मे गेहे जातस्तव पिताऽधमः। यस्य त्वमीदृशः पुत्रो देवदेवावमानकः ॥ ४० ॥
तिष्ठत्वनेकसंसारसंघातौघविनाशिनि । कृष्णे भक्तिरहं तावदवेक्ष्यो भवता न किम् ॥ ४१ ॥
न मे प्रियतरः कृष्णादपि देहोऽयमात्मनः। इति जानात्ययं लोको भवांश्च दितिनन्दन ॥ ४२ ॥
जानन्नपि प्रियतरं प्राणेभ्योऽपि हरिं मम। निन्दां करोषि तस्य त्वमकुर्वन् गौरवं मम ॥ ४३ ॥
विरोचनस्तव गुरुर्गुरुस्तस्याप्यहं बले। ममापि सर्वजगतां गुरुर्नारायणो हरिः ॥ ४४ ॥

मैं (ही सचमुच) शोचनीय हूँ, जिसके घरमें तुम्हारा अधम पिता उत्पन्न हुआ, जिसका तुम्हारे-जैसा देवदेव-(विष्णु-)का तिरस्कार करनेवाला पुत्र है। जो अनेक संसारके समूहोंके प्रवाहका विनाश करनेवाले हैं, ऐसे कृष्णमें भक्तिके लिये तुम्हें क्या मेरा भी ध्यान नहीं रहा। दितिनन्दन! मेरे विषयमें समस्त संसार एवं तुम भी यह जानते हो कि मुझे यह मेरी देह भी कृष्णसे अधिक प्रिय नहीं है। फिर यह समझते हुए भी कि भगवान् कृष्ण मुझे प्राणोंसे भी अधिक प्रिय हैं, फिर भी तुम मेरी मर्यादापर ध्यान न देकर ठेस पहुँचाते हुए उनकी निन्दा कर रहे हो। बलि! तुम्हारा गुरु (पिता) विरोचन है, उसका गुरु (पिता) मैं हूँ तथा मेरे भी गुरु सम्पूर्ण जगत्के स्वामी भगवान् नारायण श्रीहरि हैं ॥ ४०–४४ ॥

निन्दां करोषि तस्मिंस्त्वं कृष्णे गुरुगुरोर्गुरौ। यस्मात् तस्मादिहैव त्वमैश्वर्याद् भ्रंशमेष्यसि ॥ ४५ ॥
स देवो जगतां नाथो बले प्रभुर्जनार्दनः। नन्वहं प्रत्यवेक्ष्यस्ते भक्तिमानत्र मे गुरुः ॥ ४६ ॥
एतावन्मात्रमप्यत्र निन्दता जगतो गुरुम्। नापेक्षितस्त्वया यस्मात् तस्माच्छापं ददामि ते ॥ ४७ ॥
यथा मे शिरसश्छेदादिदं गुरुतरं बले। त्वयोक्तमच्युताक्षेपं राज्यभ्रष्टस्तथा पत ॥ ४८ ॥
यथा न कृष्णादपरः परित्राणं भवार्णवे। तथाऽचिरेण पश्येयं भवन्तं राज्यविच्युतम् ॥ ४९ ॥

॥ इति श्रीवामनपुराणे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

जिस कारण तुम अपने गुरु-(पिता विरोचन-)के गुरु (पिता मैं प्रह्लाद)के भी गुरु विष्णुकी निन्दा कर रहे हो, इस कारण तुम यहीं ऐश्वर्यसे भ्रष्ट हो जाओगे। बलि! वे प्रभु जनार्दनदेव जगत्के स्वामी हैं। इस विषयमें मेरा गुरु (अर्थात् मैं) भक्तिमान् हूँ, यह विचारकर तुझे मेरी अवहेलना नहीं करनी चाहिये। जिस कारणसे जगद्गुरुकी निन्दा करनेवाले तुमने मेरी इतनी भी अपेक्षा नहीं की, इस कारण मैं तुम्हें शाप देता हूँ; क्योंकि बलि! तुम्हारे द्वारा अच्युतके प्रति अपमानजनित ये वचन मेरे लिये सिर कट जानेसे भी अधिक कष्टदायी हैं, अतः तुम राज्यसे भ्रष्ट होकर गिर जाओ। भवसागरमें भगवान्को विष्णु छोड़कर दूसरा कोई रक्षक नहीं है, अतः शीघ्र ही मैं तुम्हें राज्यसे भ्रष्ट हुआ देखूँगा ॥ ४५–४९ ॥

इस प्रकार श्रीवामनपुराणमें उनतीसवाँ अध्याय समाप्त हुआ ॥ २९ ॥

[अथ त्रिंशोऽध्यायः]

लोमहर्षण उवाच

इति दैत्यपतिः श्रुत्वा वचनं रौद्रमप्रियम्। प्रसादयामास गुरुं प्रणिपत्य पुनः पुनः ॥ १ ॥

तीसवाँ अध्याय प्रारम्भ

(बलिका प्रह्लादको संतुष्ट करना, अदितिके गर्भसे वामनका प्राकट्य; ब्रह्माद्वारा स्तुति, वामनका बलिके यज्ञमें जाना)

लोमहर्षणने कहा—दैत्यपति बलि प्रह्लादकी इस प्रकार कठोर एवं अप्रिय उक्तिसे सुनकर उनके चरणोंमें बार-बार सिर झुकाकर प्रणाम करते हुए मनाने लगा ॥ १ ॥

बलिरुवाच

प्रसीद तात मा कोपं कुरु मोहहते मयि। बलावलेपमूढेन मयैतद्वाक्यमीरितम् ॥ २ ॥
मोहापहतविज्ञानः पापोऽहं दितिजोत्तम। यच्छप्तोऽस्मि दुराचारस्तत्साधु भवता कृतम्॥ ३ ॥
राज्यभ्रंशं यशोभ्रंशं प्राप्स्यामीति ततस्त्वहम्। विषण्णोऽस्मि यथा तात तथैवाविनये कृते ॥ ४ ॥
त्रैलोक्यराज्यमैश्वर्यमन्यद्वा नातिदुर्लभम्। संसारे दुर्लभास्तात गुरवो ये भवद्विधाः ॥ ५ ॥
प्रसीद तात मा कोपं कर्तुमर्हसि दैत्यप। त्वत्कोपपरिदग्धोऽहं परितप्ये दिवानिशम् ॥ ६ ॥

बलिने कहा—तात ! आप मेरे ऊपर प्रसन्न हों, मैं मूढ़ हो गया था, मेरे ऊपर क्रोध न करें । बलके घमण्डसे विवेकहीन होनेके कारण मैंने यह वचन कहा था । दैत्यश्रेष्ठ ! मोहके कारण मेरी बुद्धि नष्ट हो गयी थी, मैं अधम हूँ । मैंने सदाचारका पालन नहीं किया, जिससे मुझ पापाचारीको आपने जो शाप दिया, वह बहुत ठीक किया । तात ! आप (यतः) मेरी उद्दण्डताके कारण बहुत दुःखी हैं, अतः मैं राज्यसे च्युत और अपनी कीर्तिसे रहित हो जाऊँगा । तात ! संसारमें तीनों लोकोंका राज्य, ऐश्वर्य अथवा अन्य किसी (वस्तु) का मिलना बहुत कठिन नहीं है, परंतु आप-जैसे जो गुरुजन हैं, वे संसारमें दुर्लभ हैं । दैत्योंकी रक्षा करनेवाले तात ! आप प्रसन्न हों, क्रोध न करें । आपका क्रोध मुझे जला रहा है, इसलिये मैं दिन-रात (आठों प्रहर) संतप्त हो रहा हूँ ॥ २–६ ॥

प्रह्लाद उवाच

वत्स कोपेन मे मोहो जनितस्तेन ते मया। शापो दत्तो विवेकश्च मोहेनापहृतो मम ॥ ७ ॥
यदि मोहेन मे ज्ञानं नाक्षिप्तं स्यान्महासुर। तत्कथं सर्वगं जानन् हरिं कश्चिच्छपाम्यहम्॥ ८ ॥
यो यः शापो मया दत्तो भवतो सुरपुंगव। भाव्यमेतेन नूनं ते तस्मात्त्वं मा विषीद वै ॥ ९ ॥
अद्यप्रभृति देवेशे भगवत्यच्युते हरौ। भवेथा भक्तिमानीशे स ते त्राता भविष्यति ॥ १० ॥
शापं प्राप्य च मे वीर देवेशः संस्मृतस्त्वया। तथा तथा वदिष्यामि श्रेयस्त्वं प्राप्स्यसे यथा ॥ ११ ॥

प्रह्लाद बोले—वत्स ! क्रोधके कारण हमें मोह उत्पन्न हो गया था और उसीने मेरी विचार करनेवाली बुद्धि भी नष्ट कर दी थी, इसीसे मैंने तुम्हें शाप दे दिया । महासुर ! यदि मोहवश मेरा ज्ञान दूर नहीं हुआ होता तो मैं भगवान्‌को सब जगह विद्यमान जानता हुआ भी तुम्हें शाप कैसे देता । असुरश्रेष्ठ ! मैंने तुम्हें जो क्रोधवश शाप दिया है, वह तो तुम्हारे लिये होगा, किंतु तुम दुःखी मत हो; बल्कि आजसे तुम उन देवोंके भी ईश्वर भगवान् अच्युत हरिकी भक्ति करनेवाले बन जाओ—भक्त हो जाओ । वे ही तुम्हारे रक्षक हो जायँगे । वीर ! मेरा शाप पाकर तुमने देवेश्वर भगवान्‌का स्मरण किया है, अब मैं तुमसे वही कहूँगा, जिससे तुम कल्याणको प्राप्त करो ॥ ७–११ ॥

लोमहर्षण उवाच

अदितिर्वरमासाद्य सर्वकामसमृद्धिदम् । क्रमेण ह्युदरे देवो वृद्धिं प्राप्तो महायशाः ॥ १२ ॥
ततो मासेऽथ दशमे काले प्रसव आगते । अजायत स गोविन्दो भगवान् वामनाकृतिः ॥ १३ ॥
अवतीर्णे जगन्नाथे तस्मिन् सर्वामरेश्वरे । देवाश्च मुमुचुर्दुःखं देवमाताऽदितिस्तथा ॥ १४ ॥
ववुर्वाताः सुखस्पर्शा नीरजस्कमभून्नभः । धर्मे च सर्वभूतानां तदा मतिरजायत ॥ १५ ॥
नोद्वेगश्चाप्यभूद् देहे मनुजानां द्विजोत्तमाः । तदा हि सर्वभूतानां धर्मे मतिरजायत ॥ १६ ॥
तं जातमात्रं भगवान् ब्रह्मा लोकपितामहः । जातकर्मादिकां कृत्वा क्रियां तुष्टाव च प्रभुम् ॥ १७ ॥

लोमहर्षणने कहा—(उधर) अदितिने सभी कामनाओंकी समृद्धि करनेवाले वरको प्राप्त कर लिया तब उसके उदरमें महायशस्वी देव (भगवान्) धीरे-धीरे बढ़ने लगे। इसके बाद दसवें महीनेमें जब प्रसवका समय आया तब भगवान् गोविन्द वामनाकारमें उत्पन्न हो गये। संसारके स्वामी उन अखिलेश्वरके अवतार ले लेनेपर देवता और देवमाता अदिति दुःखसे मुक्त हो गये। फिर तो (संसारमें) आनन्ददायी वायु बहने लगी, गगन-मण्डल बिना धूलिका (स्वच्छ) हो गया एवं सभी जीवोंकी बुद्धि धर्म करनेमें लग गयी। द्विजोत्तमो! उस समय मनुष्योंकी देहमें कोई घबराहट नहीं थी और तब समस्त प्राणियोंकी बुद्धि धर्ममें लग गयी। उनके उत्पन्न होते ही लोकपितामह ब्रह्माने उनकी तत्काल जातकर्म आदि क्रिया (संस्कार) सम्पन्न करके उन प्रभुकी स्तुति की ॥ १२–१७ ॥

ब्रह्मोवाच

जयाधीश जयाजेय जय विश्वगुरो हरे । जन्ममृत्युजरातीत जयानन्त जयाच्युत ॥ १८ ॥
जयाजित जयाशेष जयाव्यक्तस्थिते जय । परमार्थार्थ सर्वज्ञ ज्ञानज्ञेयार्थनिःसृत ॥ १९ ॥
जयाशेष जगत्साक्षिञ्जगत्कर्तर्जगद्गुरो । जगतोऽजगदन्तेश स्थितौ पालयते जय ॥ २० ॥
जयाखिल जयाशेष जय सर्वहृदिस्थित । जयादिमध्यान्तमय सर्वज्ञानमयोत्तम ॥ २१ ॥
मुमुक्षुभिरनिर्देश्य नित्यहृष्ट जयेश्वर । योगिभिर्मुक्तिकामैस्तु दमादिगुणभूषण ॥ २२ ॥

ब्रह्मा बोले—अधीश ! आपकी जय हो। अजेय ! आपकी जय हो। विश्वके गुरु हरि ! आपकी जय हो। जन्म-मृत्यु तथा जरासे अतीत अनन्त ! आपकी जय हो। अच्युत ! आपकी जय हो। अजित ! आपकी जय हो। अशेष ! आपकी जय हो। अव्यक्त स्थितिवाले भगवन् ! आपकी जय हो। परमार्थकी (उत्तम अभिलाषाकी) पूर्तिमें निमित्त ! ज्ञान और ज्ञेयके अर्थके उत्पादक सर्वज्ञ ! आपकी जय हो। अशेष जगत्के साक्षी ! जगत्के कर्ता ! जगद्गुरु ! आपकी जय हो। जगत् (चर) एवं अजगत् (अचर) के स्थिति, पालन एवं प्रलयके स्वामी ! आपकी जय हो। अखिल ! आपकी जय हो। अशेष ! आपकी जय हो। सभीके हृदयमें अवस्थित प्रभो ! आपकी जय हो। आदि, मध्य और अन्तस्वरूप ! समस्त ज्ञानकी मूर्ति, उत्तम ! आपकी जय हो। हे मुमुक्षुओंके द्वारा अनिर्देश्य, नित्य-प्रसन्न ईश्वर ! आपकी जय हो। हे मुक्तिकी कामना करनेवाले योगियोंसे सेवित, दम आदि गुणोंसे विभूषित परमेश्वर ! आपकी जय हो ॥ १८–२२ ॥

जयातिसूक्ष्म दुर्ज्ञेय जय स्थूल जगन्मय । जय सूक्ष्मातिसूक्ष्म त्वं जयानिन्द्रिय सेन्द्रिय ॥ २३ ॥
जय स्वमायायोगस्थ शेषभोग जयाक्षर । जयैकदंष्ट्राप्रान्तेन समुद्धृतवसुंधर ॥ २४ ॥
नृकेसरिन् सुरारातिवक्षःस्थलविदारण । साम्प्रतं जय विश्वात्मन् मायावामन केशव ॥ २५ ॥
निजमायापरिच्छिन्न जगद्धातर्जनार्दन । जयाचिन्त्य जयानेकस्वरूपैकविध प्रभो ॥ २६ ॥
वर्धस्व वर्धितानेकविकारप्रकृते हरे । त्वय्येषा जगतामीशे संस्थिता धर्मपद्धतिः ॥ २७ ॥

हे अत्यन्त सूक्ष्म स्वरूपवाले ! हे दुर्ज्ञेय (कठिनतासे समझमें आनेवाले) ! आपकी जय हो । हे स्थूल और जगत्-मूर्ति ! आपकी जय हो । हे सूक्ष्मसे भी अत्यन्त सूक्ष्म प्रभो ! आपकी जय हो । हे इन्द्रियोंसे रहित तथा इन्द्रियोंसे युक्त (नाथ) ! आपकी जय हो । हे अपनी मायासे योगमें स्थित रहनेवाले (स्वामी) ! आपकी जय हो । हे शेषकी शय्यापर सोनेवाले अविनाशी शेषशायी प्रभो ! आपकी जय हो । हे एक दाँतके कोनेपर पृथ्वीको उठानेवाले वराहरूपधारी भगवन् ! आपकी जय हो । हे देवताओंके शत्रु (हिरण्यकशिपु)के वक्षःस्थलको विदीर्ण करनेवाले नृसिंह भगवान् तथा विश्वकी आत्मा एवं अपनी मायासे वामनका रूप धारण करनेवाले केशव ! आपकी जय हो । हे अपनी मायासे आवृत तथा संसारको धारण करनेवाले परमेश्वर ! आपकी जय हो । हे चिन्तन करनेसे परे अनेक स्वरूप धारण करनेवाले तथा एकविध प्रभो ! आपकी जय हो । हरे ! आपने प्रकृतिके भाँति-भाँतिके विकार बढ़ाये हैं । आपकी वृद्धि हो । जगत्‌की यह धर्मप्रणाली आप प्रभुमें स्थित है ॥ २३–२७ ॥

न त्वामहं न चेशानो नेन्द्राद्यास्त्रिदशा हरे । ज्ञातुमीशा न मुनयः सनकाद्या न योगिनः ॥ २८ ॥
त्वं मायापटसंवीतो जगत्यत्र जगत्पते । कस्त्वां वेत्स्यति सर्वेश त्वत्प्रसादं विना नरः ॥ २९ ॥
त्वमेवाराधितो यस्य प्रसादसुमुखः प्रभो । स एव केवलं देवं वेत्ति त्वां नेतरो जनः ॥ ३० ॥
तदीश्वरेश्वरेशान विभो वर्द्धस्व भावन । प्रभवायास्य विश्वस्य विश्वात्मन् पृथुलोचन ॥ ३१ ॥

हे हरे ! मैं, शंकर, इन्द्र आदि देव, सनकादि मुनि तथा योगिगण आपको जाननेमें असमर्थ हैं । हे जगत्पते ! आप इस संसारमें मायारूपी वस्त्रसे ढके हैं । हे सर्वेश ! आपकी प्रसन्नताके बिना कौन ऐसा मनुष्य है जो आपको जान सके । प्रभो ! जो मनुष्य आपकी आराधना करता है और आप उसपर प्रसन्न होते हैं, वही आपको जानता है, अन्य नहीं । हे ईश्वरोंके भी ईश्वर ! हे ईशान ! हे विभो ! हे भावन ! हे विश्वात्मन् ! हे पृथुलोचन ! इस विश्वके प्रभव (उत्पत्ति—सृष्टिके कारण) विष्णु ! आपकी वृद्धि हो—जय हो ॥ २८–३१ ॥

लोमहर्षण उवाच

एवं स्तुतो हृषीकेशः स तदा वामनाकृतिः । प्रहस्य भावगम्भीरमुवाचारूढसंपदम् ॥ ३२ ॥
स्तुतोऽहं भवता पूर्वमिन्द्राद्यैः कश्यपेन च । मया च वः प्रतिज्ञातमिन्द्रस्य भुवनत्रयम् ॥ ३३ ॥
भूयश्चाहं स्तुतोऽदित्या तस्याश्चापि मया श्रुतम् । यथा शक्राय दास्यामि त्रैलोक्यं हतकण्टकम् ॥ ३४ ॥
सोऽहं तथा करिष्यामि यथेन्द्रो जगतः पतिः । भविष्यति सहस्राक्षः सत्यमेतद् ब्रवीमि वः ॥ ३५ ॥

लोमहर्षणने कहा—इस प्रकार जब वामनरूपमें अवतीर्ण भगवान्‌की स्तुति सम्पन्न हुई, तब हृषीकेश भगवान् हँसकर अभिप्रायपूर्ण ऐश्वर्ययुक्त वाणीमें बोले—पूर्वकालमें आपने, इन्द्र आदि देवों तथा कश्यपने मेरी स्तुति की थी । मैंने भी आप लोगोंसे इन्द्रके लिये त्रिभुवनको देनेकी प्रतिज्ञा की थी । इसके बाद अदितिने मेरी स्तुति की तो उससे भी मैंने प्रतिज्ञा की थी कि मैं बाधाओंसे रहित तीनों लोकोंको इन्द्रको दूँगा । अतः मैं ऐसा करूँगा कि जिससे हजारों नेत्रोंवाले (इन्द्र) संसारके स्वामी होंगे । मेरा यह कथन सत्य है ॥ ३२–३५ ॥

ततः कृष्णाजिनं ब्रह्मा हृषीकेशाय दत्तवान् । यज्ञोपवीतं भगवान् ददौ तस्य बृहस्पतिः ॥ ३६ ॥
आषाढमददाद् दण्डं मरीचिर्ब्रह्मणः सुतः ।
कमण्डलुं वसिष्ठश्च कौशं चीरमथाङ्गिराः । आसनं चैव पुलहः पुलस्त्यः पीतवाससी ॥ ३७ ॥
उपतस्थुश्च तं वेदाः प्रणवस्वरभूषणाः । शास्त्राण्यशेषाणि तथा सांख्ययोगोक्तयश्च याः ॥ ३८ ॥
स वामनो जटी दण्डी छत्री धृतकमण्डलुः । सर्वदेवमयो देवो ३९ ॥

(हृषीकेश भगवान्‌के इस प्रकार अपने वचनकी सत्यता बोधित करनेके बाद) ब्रह्माने हृषीकेशको कृष्ण मृगचर्म समर्पित किया एवं भगवान् बृहस्पतिने उन्हें यज्ञोपवीत दिया। ब्रह्मपुत्र मरीचिने उन्हें पलाशदण्ड, वसिष्ठने कमण्डलु और अङ्गिराने रेशमी वस्त्र दिया। पुलहने आसन तथा पुलस्त्यने दो पीले वस्त्र दिये। ओंकारके स्वरसे अलंकृत वेद, सभी शास्त्र तथा सांख्ययोग आदि दर्शनोंकी उक्तियाँ उनका उपस्थान करने लगीं। समस्त देवताओंके मूर्तिरूप वामनभगवान् जटा, दण्ड, छत्र एवं कमण्डलु धारण करके बलिकी यज्ञभूमिमें पधारे ॥ ३६—३९ ॥

यत्र यत्र पदं विप्रा भूभागे वामनो ददौ। ददाति भूमिर्विवरं तत्र तत्राभिपीडिता ॥ ४० ॥
स वामनो जडगतिर्मृदु गच्छन् सपर्वताम्। साब्धिद्वीपवतीं सर्वां चालयामास मेदिनीम् ॥ ४१ ॥
बृहस्पतिस्तु शनकैर्मार्गं दर्शयते शुभम्। तथा क्रीडाविनोदार्थमतिजाड्यगतोऽभवत् ॥ ४२ ॥
ततः शेषो महानागो निःसृत्यासौ रसातलात्। साहाय्यं कल्पयामास देवदेवस्य चक्रिणः ॥ ४३ ॥
तदद्यापि च विख्यातमहेर्बिलमनुत्तमम्। तस्य संदर्शनादेव नागेभ्यो न भयं भवेत् ॥ ४४ ॥

॥ इति श्रीवामनपुराणे त्रिंशोऽध्यायः ॥ ३० ॥

ब्राह्मणो! पृथ्वीपर वामन भगवान् जिस-जिस स्थानपर डग रखते थे, वहाँकी दबी हुई भूमिमें दरार पड़ जाता था—गड्ढा हो जाता था। मधुरभावसे धीरे-धीरे चलते हुए वामनभगवान्‌ने समुद्रों, द्वीपों तथा पर्वतोंसे युक्त सारी पृथ्वीको कँपा दिया। बृहस्पति भी शनैः-शनैः उन्हें सारे कल्याणकारी मार्गको दिखाने लगे एवं स्वयं भी क्रीडापूर्ण मनोरञ्जनके लिये अत्यन्त धीरे-धीरे चलने लगे। उसके बाद महानाग शेष रसातलसे ऊपर आकर देवदेव चक्रधारी भगवान्‌की सहायता करने लगे। आज भी वह श्रेष्ठ सर्पोंका बिल विख्यात है और उसके दर्शनमात्रसे नागोंसे भय नहीं होता ॥ ४०—४४ ॥

॥ इस प्रकार श्रीवामनपुराणमें तीसवाँ अध्याय समाप्त हुआ ॥ ३० ॥

[अथैकत्रिंशोऽध्यायः]

लोमहर्षण उवाच

सपर्वतवनामुर्वीं दृष्ट्वा संक्षुभितां बलिः। पप्रच्छोशनसं शुक्रं प्रणिपत्य कृताञ्जलिः ॥ १ ॥
आचार्य क्षोभमायाति साब्धिभूमिधरा मही। कस्मान्च नासुरान् भागान् प्रतिगृह्णन्ति वह्नयः ॥ २ ॥
इति पृष्टोऽथ बलिना काव्यो वेदविदां वरः। उवाच दैत्याधिपतिं चिरं ध्यात्वा महामतिः ॥ ३ ॥
अवतीर्णो जगद्योनिः कश्यपस्य गृहे हरिः। वामनेनेह रूपेण परमात्मा सनातनः ॥ ४ ॥

इकतीसवाँ अध्याय प्रारम्भ

(वामनद्वारा तीन पग भूमिकी याचना तथा विराट्‌रूपसे तीनों लोकोंको तीन पगमें नाप लेना और बलिका पातालमें जाना)

लोमहर्षण बोले—बलिने वनों और पर्वतोंके साथ सम्पूर्ण पृथ्वीको क्षोभसे भरी देखकर हाथ जोड़ करके शुक्राचार्यको प्रणाम कर पूछा—आचार्यदेव! समुद्र तथा पर्वतोंके साथ पृथ्वीके क्षुब्ध होनेका क्या कारण है और अग्निदेव असुरोंके भागोंको क्यों नहीं ग्रहण कर रहे हैं? बलिके इस प्रकार प्रश्न करनेपर वेदज्ञोंमें श्रेष्ठ बुद्धिमान् शुक्राचार्यने चिरकालतक ध्यान लगाकर (और तथ्य समझकर) दैत्येन्द्रसे कहा—कश्यपके घरमें जगद्योनि—संसारको उत्पन्न करनेवाले सनातन परमात्मा वामनके रूपमें अवतीर्ण हो गये हैं ॥ १—४ ॥

स नूनं यज्ञमायाति तव दानवपुंगव। तत्पादन्यासविक्षोभादियं प्रचलिता मही ॥ ५ ॥
कम्पन्ते गिरयश्चेमे क्षुभिता मकरालयाः। नेयं भूतपतिं भूमिः समर्था वोढुमीश्वरम् ॥ ६ ॥
सदेवासुरगन्धर्वा यक्षराक्षसपन्नगाः।
अनेनैव धृता भूमिरापोऽग्निः पवनो नभः। धारयत्यखिलान् देवान् मनुष्यांश्च महासुरान् ॥ ७ ॥
इयमस्य जगद्धातुर्माया कृष्णस्य गह्वरी। धार्यधारकभावेन यया संपीडितं जगत् ॥ ८ ॥

दानवश्रेष्ठ ! वे ही प्रभु तुम्हारे यज्ञमें आ रहे हैं। उन्हींके पैर रखनेसे पृथ्वीमें विक्षोभ हो रहा है जिससे यह पृथ्वी काँप रही है, ये पर्वत भी काँप रहे हैं और सिन्धुमें जोरोंकी लहरें उठ रही हैं। इस भूमिमें उन भूतपति भगवान्‌को वहन करनेकी शक्ति नहीं है। ये ही (परमात्मा) देव, असुर, गन्धर्व, देवों, मनुष्यों एवं महासुरोंको धारण करते हैं। जगत्‌को धारण करनेवाले भगवान् कृष्णकी ही यह गम्भीर (अचिन्त्य) माया है, जिस मायाके द्वारा यह संसार धार्यधारकभावसे क्षुब्ध हो रहा है ॥ ५-८ ॥

तत्संनिधानादसुरा न भागार्हाः सुरद्विषः। भुञ्जते नासुरान् भागानपि तेन त्रयोऽग्नयः ॥ ९ ॥
शुक्रस्य वचनं श्रुत्वा हृष्टरोमाऽब्रवीद् बलिः।
धन्योऽहं कृतपुण्यश्च यन्मे यज्ञपतिः स्वयम्। यज्ञमभ्यागतो ब्रह्मन् मत्तः कोऽन्योऽधिकः पुमान् ॥ १० ॥
यं योगिनः सदोद्युक्ताः परमात्मानमव्ययम्।
द्रष्टुमिच्छन्ति देवोऽसौ ममाध्वरमुपेष्यति। यन्मयाचार्य कर्तव्यं तन्ममादेष्टुमर्हसि ॥ ११ ॥

उनके सन्निधान होनेके कारण देवताओंके शत्रु दैत्यलोग यज्ञ-भाग पानेके योग्य नहीं रह गये हैं, अतएव तीनों अग्निदेव भी असुरोंके भागको नहीं ले रहे हैं। शुक्राचार्यकी बात सुननेके बाद बलिके रोंगटे खड़े हो गये। इसके बाद बलिने (शुक्राचार्यसे) कहा—ब्रह्मन् ! मैं धन्य एवं कृतकृत्य हो गया, जो स्वयं यज्ञके अधिपति भगवान् लगातार मेरे यज्ञमें पधार रहे हैं। कौन दूसरा पुरुष मुझसे श्रेष्ठ है ! सदैव सावधान रहनेवाले योगीलोग जिन नित्य परमात्माको देखना चाहते हैं, वे ही देव मेरे यज्ञमें (कृपाकर) पधार रहे हैं। आचार्य ! मुझे जो करना चाहिये, वह आप आदिष्ट कीजिये ॥ ९-११ ॥

शुक्र उवाच

यज्ञभागभुजो देवा वेदप्रामाण्यतोऽसुर। त्वया तु दानवा दैत्य यज्ञभागभुजः कृताः ॥ १२ ॥
अयं च देवः सत्त्वस्थः करोति स्थितिपालनम्। विसृष्टं च तथाऽयं च स्वयमत्ति प्रजाः प्रभुः ॥ १३ ॥
भवांस्तु बन्दी भविता नूनं विष्णुः स्थितौ स्थितः। विदित्वैवं महाभाग कुरु यत् ते मनोगतम् ॥ १४ ॥
त्वयाऽस्य दैत्याधिपते स्वल्पकेऽपि हि वस्तुनि। प्रतिज्ञा नैव वोढव्या वाच्यं साम तथाऽफलम् ॥ १५ ॥
कृतकृत्यस्य देवस्य देवार्थं चैव कुर्वतः।
अलं दातुं धनं देवे त्वेतद्वाच्यं तु याचतः। कृष्णस्य देवभूत्यर्थं प्रवृत्तस्य महासुर ॥ १६ ॥

शुक्राचार्य बोले—असुर ! वेदोंका विधान है कि यज्ञभागके भोक्ता देवता हैं। परन्तु दैत्य ! तुमने यज्ञभागका भोक्ता दानवोंको बना दिया है। (यह वेद-विधानके विपरीत किया है—विधानका उल्लङ्घन किया है।) ये ही देव सत्त्वगुणका आश्रय लेकर विश्वकी स्थिति और पालन करते हैं और ये ही सृष्टि भी करते हैं फिर ये ही प्रभु स्वयं प्रजाका (जीवोंका) अन्त भी करते हैं। विष्णु स्थितिके कार्यमें (कल्याणमय मर्यादाके स्थापनमें) तत्पर हो गये हैं। अतः आपको निश्चय ही बन्दी होना है। महाभाग ! इसपर विचारकर तुम्हारे मनमें जैसी इच्छा हो वैसा करो। दैत्यपते ! (देखना) तुम थोड़ी-सी भी वस्तु देनेके लिये उनसे प्रतिज्ञा मत

अर्थकी कोमल और मधुर बातें करना। महागुरु! कृतकृत्य, एवं देवताओंका कार्य पूरा करनेवाले तथा देवताओंके ऐश्वर्यके लिये प्रयत्नशील भगवान् श्रीकृष्णके याचना करनेपर 'मैं देवताओंके हेतु पर्याप्त धन दूँगा' ऐसा कहना॥ १२-१६॥

बलिरुवाच

ब्रह्मन् कथमहं ब्रूयामन्येनापि हि याचितः। नास्तीति किमु देवस्य संसारस्यापहारिणः॥ १७॥
व्रतोपवासैर्विविधैर्यः प्रभुर्गृह्यते हरिः। स मे वक्ष्यति देहीति गोविन्दः किमतोऽधिकम्॥ १८॥
यदर्थं सुमहारम्भा दमशौचगुणान्वितैः। यज्ञाः क्रियन्ते यज्ञेशः स मे देहीति वक्ष्यति॥ १९॥
तत्साधु सुकृतं कर्म तपः सुचरितं च नः। यन्मां देहीति विश्वेशः स्वयमेव वदिष्यति॥ २०॥

बलि बोले—ब्रह्मन्! मैं दूसरोंके याचना करनेपर भी 'नहीं है'—ऐसा कैसे कह सकता हूँ? फिर संसारके पापोंको दूर करनेवाले (उन) देवसे कहनेकी तो बात ही क्या है? विविध प्रकारके व्रतों एवं उपवासोंसे जो परमेश्वर ग्रहण किये जाने योग्य हैं, वे ही गोविन्द मुझसे 'दो' इस प्रकार कहेंगे तो इससे बढ़कर (मेरे लिये) और (भाग्य) क्या हो सकता है? जिनके लिये दम-शमादि शौच—भीतरी-बाहरी पवित्रता आदि गुणोंसे युक्त लोग यज्ञीय उपकरणों एवं सम्पत्तियोंको जुटाकर यज्ञ करते हैं, वे ही यज्ञेश (यज्ञके स्वामी) यदि मुझसे 'दो' इस प्रकार कहेंगे तो मेरे किये हुए सभी कर्म सफल हो गये और हमारा तपश्चरण भी सफल हो गया; क्योंकि विश्वके स्वामी स्वयं मुझसे 'दो'—इस तरह कहेंगे॥ १७-२०॥

नास्तीत्यहं गुरो वक्ष्ये तमभ्यागतमीश्वरम्। प्राणत्यागं करिष्येऽहं न तु नास्ति जने क्वचित्॥ २१॥
नास्तीति यन्मया नोक्तमन्येषामपि याचताम्। वक्ष्यामि कथमायाते तदद्य चामरेऽच्युते॥ २२॥
श्लाघ्य एव हि वीराणां दानाच्चापत्समागमः। न बाधाकारि यद्दानं तदङ्ग बलवत् स्मृतम्॥ २३॥
मद्राज्ये नासुखी कश्चिन्न दरिद्रो न चातुरः। न दुःखितो न चोद्विग्नो न शमादिविवर्जितः॥ २४॥
हृष्टस्तुष्टः सुगन्धी च तृप्तः सर्वसुखान्वितः। जनः सर्वो महाभाग किमुताहं सदा सुखी॥ २५॥

गुरुदेव! क्या अपने यहाँ (याचकरूपमें) आये उन परमेश्वरसे 'नहीं है'—मैं ऐसा कहूँ? (यह तो उचित नहीं जँचता है) भले ही प्राणोंका त्याग कर दूँगा; किंतु अन्य भी याचक मनुष्यसे 'नहीं है'—यह नहीं कह सकता। दूसरोंके भी याचना करनेपर जब मैंने 'नहीं है'—ऐसा नहीं कहा तो आज अपने यहाँ स्वयं पूर्ण परमेश्वरके आ जानेपर मैं यह कैसे कहूँगा कि 'नहीं है'? दानके कारण यदि कठिनाई आती है तो उसे वीर पुरुष प्रशंसनीय ही मानते हैं। क्योंकि दानका महत्त्व उससे और बढ़ जाता है। गुरो! (हाँ, साधारणतया यह समझा जाता है कि—) जो दान बाधा डालनेवाला नहीं होता, वह निःसन्देह बलवान् कहा गया है। (पर ऐसा प्रसंग नहीं आ सकता; क्योंकि) मेरे राज्यमें ऐसा कोई भी नहीं है जो सुखी न हो और न कोई रोगी या दुःखी ही है, न कोई किसीके द्वारा उद्वेजित किया गया है और न कोई शम आदि गुणोंसे रहित है। महाभाग! सभी लोग हृष्ट, पुष्ट, सुगन्ध-अंगरागसे तृप्त एवं सुखी हैं। अधिक क्या है? मैं तो सदा सुखी हूँ॥ २१-२५॥

एतद्विशिष्टमत्राहं दानबीजफलं लभे। विदितं मुनिशार्दूल मयैतत् त्वन्मुखाच्छ्रुतम्॥ २६॥
मत्प्रसादपरं नूनं यज्ञेनाराधितो हरिः। मम दानमवाप्यासौ पुष्णाति यदि देवताः॥ २७॥
एतद्बीजवरं दानबीजं पतति चेद् गुरो। जनार्दने महापात्रे किं न प्राप्तं ततो मया॥ २८॥
विशिष्टं मम तद्दानं परितुष्टाश्च देवताः। उपभोगाच्छतगुणं दानं सुखकरं स्मृतम्॥ २९॥



भगवान् मायावामनका यज्ञवाटमें [illegible]

मुनिशार्दूल ! आपके मुखसे सुनकर मुझे यह मालूम हो गया कि मैं यहाँपर विशिष्ट दानरूपी बीजका शुभ फल प्राप्त कर रहा हूँ। वे हरि यदि मुझसे दान लेकर देवताओंकी पुष्टि करते हैं तो यज्ञसे आराधित वे (हरि) मुझपर निश्चय ही प्रसन्न हैं। यदि श्रेष्ठ बीज (एवं दान) महान् (योग्य) पात्र, पूज्य जनार्दनको मिल गया तो फिर मुझे क्या नहीं मिला ? निश्चय ही मेरा यह दान विशिष्ट गुणोंवाला है और देवता मेरे ऊपर प्रसन्न हैं। दानके उपभोगकी अपेक्षा दान देना सौ-गुना सुख देनेवाला माना गया है ॥ २६–२९ ॥

मत्प्रसादपरो नूनं यज्ञेनाराधितो हरिः। तेनाभ्येति न संदेहो दर्शनादुपकारकृत् ॥ ३० ॥
अथ कोपेन चाभ्येति देवभागोपरोधनः। मां निहन्तुं ततो हि स्याद् वधः श्लाघ्यतरोऽच्युतात् ॥ ३१ ॥
एतज्ज्ञात्वा मुनिश्रेष्ठ दानविघ्नकरेण मे। नैव भाव्यं जगन्नाथे गोविन्दे समुपस्थिते ॥ ३२ ॥

यज्ञसे पूजे गये श्रीहरि निश्चय ही मेरे ऊपर प्रसन्न हैं। तभी तो निस्संदेह मुझे दर्शन देकर मेरा कल्याण करनेवाले वे प्रभु आ रहे हैं, निश्चय ही यही बात है। देवताओंके देवभागकी प्राप्तिमें रुकावट होनेके कारण यदि वे क्रोधवश मेरा वध करने भी आ रहे हों तो भी उन अच्युतसे होनेवाला मेरा वध भी प्रशंसनीय ही होगा। मुनिश्रेष्ठ ! यह समझकर गोविन्दके यहाँ समुपस्थित होनेपर आप मेरे दानमें विघ्न न डालेंगे ॥ ३०–३२ ॥

लोमहर्षण उवाच

इत्येवं वदतस्तस्य प्राप्तस्तत्र जनार्दनः। सर्वदेवमयोऽचिन्त्यो मायावामनरूपधृक् ॥ ३३ ॥
तं दृष्ट्वा यज्ञवाटं तु प्रविष्टमसुराः प्रभुम्। जग्मुः प्रभावतः क्षोभं तेजसा तस्य निष्प्रभाः ॥ ३४ ॥
जेपुश्च मुनयस्तत्र ये समेता महाध्वरे। वसिष्ठो गाधिजो गर्गो अन्ये च मुनिसत्तमाः ॥ ३५ ॥
बलिश्चैवाखिलं जन्म मेने सफलमात्मनः। ततः संक्षोभमापन्नो न कश्चित् किंचिदुक्तवान् ॥ ३६ ॥

लोमहर्षण बोले—जिस समय शुक्राचार्य और बलिमें इस प्रकार बात हो रही थी उसी समय सर्वदेवमय, अचिन्त्य भगवान् अपनी मायासे अपना वामनरूप धारण करके वहाँ पहुँच गये। उन प्रभुको यज्ञस्थानमें उपस्थित देखकर दैत्यलोग उनके प्रभावसे अशान्त और तीव्र तेजसे रहित हो गये। उस महायज्ञमें एकत्र (उपस्थित) वसिष्ठ, विश्वामित्र, गर्ग एवं अन्य श्रेष्ठ मुनिजन अपना-अपना जप करने लगे। बलिने भी अपने सम्पूर्ण जन्मको सफल माना; किंतु उसके बाद (इधर) खलबली मच गयी और संक्षुब्ध होनेके कारण किसीने कुछ भी नहीं कहा ॥ ३३–३६ ॥

प्रत्येकं देवदेवेशं पूजयामास तेजसा। अथासुरपतिं प्रह्वं दृष्ट्वा मुनिवरांश्च तान् ॥ ३७ ॥
देवदेवपतिः साक्षाद् विष्णुर्वामनरूपधृक्।
तुष्टाव यज्ञं वह्निं च यजमानमथार्चितः। यज्ञकर्माधिकारस्थान् सदस्यान् द्रव्यसंपदम् ॥ ३८ ॥
सदस्याः पात्रमखिलं वामनं प्रति तत्क्षणात्। यज्ञवाटस्थितं विप्राः साधु साध्वित्युदीरयन् ॥ ३९ ॥
स चार्घमादाय बलिः प्रोद्भूतपुलकस्तदा। पूजयामास गोविन्दं प्राह चेदं महासुरः ॥ ४० ॥

उनके देदीप्यमान तेजके कारण प्रत्येकने देवाधिदेवकी पूजा की। उसके बाद वामनरूपमें प्रत्यक्ष प्रकट हुए विष्णु भगवान्ने लोगोंसे पूजित होनेके बाद एक दृष्टिसे (चारों ओर देखकर) उन विनम्र दैत्यपति एवं मुनिवरोंको देखा तथा यज्ञ, अग्नि, यजमान, यज्ञकर्ममें अधिकृत सदस्यों एवं द्रव्यकी सम्पत्तिकी प्रशंसा की। हे विप्रो ! तत्काल ही सभी सदस्यगण यज्ञमण्डपमें उपस्थित पात्रस्वरूप वामनके प्रति 'साधु-साधु' कहने लगे। उस समय हर्षमें विह्वल होकर महासुर बलिने अर्घ लिया और गोविन्दकी पूजा की तथा उनसे यह कहा ॥ ३७–४० ॥

बलिरुवाच

सुवर्णरत्नसंघातो गजाश्वसमितिस्तथा । स्त्रियो वस्त्राण्यलंकारान् गावो ग्रामाश्च पुष्कलाः ॥ ४१ ॥
सर्वे च सकला पृथ्वी भवतो वा यदीप्सितम् । तद् ददामि वृणुष्वेष्टं ममार्थाः सन्ति ते प्रियाः ॥ ४२ ॥

बलिने कहा—(वामनदेव !) अनन्त सुवर्ण और रत्नोंके ढेर तथा हाथी, घोड़े, स्त्रियाँ, वस्त्र, आभूषण, गायें और ग्रामसमूह—ये सभी वस्तुएँ, समस्त पृथ्वी अथवा आपकी जो अभिलाषा हो वह मैं देता हूँ। आप अपना अभीष्ट बतलायें। मेरे प्रिय लगनेवाले समस्त अर्थ आपके लिये हैं ॥ ४१-४२ ॥

इत्युक्तो दैत्यपतिना प्रीतिगर्भान्वितं वचः । प्राह सस्मितगम्भीरं भगवान् वामनाकृतिः ॥ ४३ ॥
ममाग्निशरणार्थाय देहि राजन् पदत्रयम् । सुवर्णग्रामरत्नादि तदर्थिभ्यः प्रदीयताम् ॥ ४४ ॥

दैत्यपति बलिके इस प्रकार प्रसन्नतापूर्वक उदार वचन कहनेपर वामनका आकार धारण करनेवाले भगवान्‌ने हँसते हुए दुर्बोध वाणीमें कहा—राजन् ! मुझे अग्निशालाके लिये तीन पग (भूमि) दें। सुवर्ण, ग्राम एवं रत्न आदि उनकी इच्छा रखनेवाले याचकोंको प्रदान करें ॥ ४३–४४ ॥

बलिरुवाच

त्रिभिः प्रयोजनं किं ते पदैः पदवतां वर । शतं शतसहस्रं वा पदानां मार्गतां भवान् ॥ ४५ ॥

बलिने कहा—हे पदधारियोंमें श्रेष्ठ ! तीन पग भूमिसे आपका कौन-सा स्वार्थ सिद्ध होगा। सौ अथवा सौ हजार पग भूमि आप माँगिये ॥ ४५ ॥

श्रीवामन उवाच

एतावता दैत्यपते कृतकृत्योऽस्मि मार्गणे । अन्येषामर्थिनां वित्तमिच्छया दास्यते भवान् ॥ ४६ ॥
एतच्छ्रुत्वा तु गदितं वामनस्य महात्मनः । वाचयामास वै तस्मै वामनाय महात्मने ॥ ४७ ॥
पाणौ तु पतिते तोये वामनोऽभूदवामनः । सर्वदेवमयं रूपं दर्शयामास तत्क्षणात् ॥ ४८ ॥
चन्द्रसूर्यौ तु नयने द्यौः शिरश्चरणौ क्षितिः । पादाङ्गुल्यः पिशाचास्तु हस्ताङ्गुल्यश्च गुह्यकाः ॥ ४९ ॥

श्रीवामनने कहा—हे दैत्यपते ! मैं इतना पानेसे ही कृतकृत्य हूँ। (मेरा स्वार्थ इतनेसे ही सिद्ध हो जायगा) आप दूसरे याचना करनेवाले याचकोंको उनके इच्छानुकूल दान दीजियेगा। महात्मा वामनकी यह वाणी सुनकर (बलिने) उन महात्मा वामनको तीन पग भूमि देनेके लिये वचन दे दिया। दान देनेके लिये हाथपर जल गिरते ही वामन अवामन (विराट्) बन गये। तत्क्षण उन्होंने उन्हें अपना सर्वदेवमय स्वरूप दिखाया। चन्द्र और सूर्य उनके दोनों नेत्र, आकाश सिर, पृथ्वी दोनों चरण, पिशाच पैरकी अँगुलियाँ एवं गुह्यक हाथोंकी अँगुलियाँ थे ॥ ४६–४९ ॥

विश्वेदेवाश्च जानुस्था जङ्घे साध्याः सुरोत्तमाः । यक्षा नखेषु सम्भूता रेखास्वप्सरसस्तथा ॥ ५० ॥
दृष्टिर्ऋक्षाण्यशेषाणि केशाः सूर्यांशवः प्रभोः । तारका रोमकूपाणि रोमेषु च महर्षयः ॥ ५१ ॥
बाहवो विदिशास्तस्य दिशः श्रोत्रे महात्मनः । अश्विनौ श्रवणे तस्य नासा वायुर्महात्मनः ॥ ५२ ॥
प्रसादे चन्द्रमा देवो मनो धर्मः समाश्रितः । सत्यमस्याभवद् वाणी जिह्वा देवी सरस्वती ॥ ५३ ॥

जानुओंमें विश्वेदेवगण, दोनों जङ्घाओंमें सुरश्रेष्ठ साध्यगण, नखोंमें यक्ष एवं रेखाओंमें अप्सराएँ थीं। समस्त नक्षत्र उनकी दृष्टियाँ, सूर्यकिरणें प्रभुके केश, तारकाएँ उनके रोमकूप एवं महर्षिगण रोमोंमें स्थित थे। विदिशाएँ उनकी बाहें, दिशाएँ उन महात्माके कान, दोनों अश्विनीकुमार श्रवण एवं वायु उन महात्माके नासिका-स्थानपर थे। उनके प्रसादमें (मधुर हास्यच्छटामें) चन्द्रदेव तथा मनमें धर्म आश्रित थे। सत्य उनकी वाणी तथा जिह्वा सरस्वती देवी थी ॥ ५०–५३ ॥

ग्रीवाऽदितिर्देवमाता विद्यास्तद्वलयस्तथा। स्वर्गद्वारमभून्मैत्रं त्वष्टा पूषा च वै भ्रुवौ ॥ ५४ ॥
मुखे वैश्वानरश्चास्य वृषणौ तु प्रजापतिः। हृदयं च परं ब्रह्म पुंस्त्वं वै कश्यपो मुनिः ॥ ५५ ॥
पृष्ठेऽस्य वसवो देवा मरुतः सर्वसंधिषु। वक्षःस्थले तथा रुद्रो धैर्ये चास्य महार्णवः ॥ ५६ ॥
उदरे चास्य गन्धर्वा मरुतश्च महाबलाः। लक्ष्मीर्मेधा धृतिः कान्तिः सर्वविद्याश्च वै कटिः ॥ ५७ ॥

देवमाता अदिति उनकी ग्रीवा, विद्या उनकी वलियाँ, स्वर्गद्वार उनकी गुदा तथा त्वष्टा एवं पूषा उनकी भौंहें थे। वैश्वानर उनके मुख तथा प्रजापति वृषण थे। परंब्रह्म उनके हृदय तथा कश्यप मुनि उनके पुंस्त्व थे। उनकी पीठमें वसु देवता, सभी सन्धियोंमें मरुद्गण, वक्षःस्थलमें रुद्र तथा उनके धैर्यमें महार्णव आश्रित थे। उनके उदरमें गन्धर्व एवं महाबली मरुद्गण स्थित थे। लक्ष्मी, मेधा, धृति, कान्ति एवं सभी विद्याएँ उनकी कटिमें स्थित थीं ॥ ५४-५७ ॥

सर्वज्योतींषि यानीह तपश्च परमं महत्। तस्य देवाधिदेवस्य तेजः प्रोद्भूतमुत्तमम् ॥ ५८ ॥
तनौ कुक्षिषु वेदाश्च जानुनी च महामखाः। इष्टयः पशवश्चास्य द्विजानां चेष्टितानि च ॥ ५९ ॥
तस्य देवमयं रूपं दृष्ट्वा विष्णोर्महात्मनः। उपसर्पन्ति ते दैत्याः पतङ्गा इव पावकम् ॥ ६० ॥
चिक्षुरस्तु महादैत्यः पादाङ्गुष्ठं गृहीतवान्। दन्ताभ्यां तस्य वै ग्रीवामङ्गुष्ठेनाहनद्धरिः ॥ ६१ ॥

समस्त ज्योतियाँ एवं परम महत् तप उन देवाधिदेवके उत्तम तेज थे। उनके शरीर एवं कुक्षियोंमें वेद थे तथा बड़े-बड़े यज्ञ इष्टियाँ थीं, पशु एवं ब्राह्मणोंकी चेष्टाएँ उनकी दोनों जानुएँ थीं। उन महात्मा विष्णुके सर्वदेवमय रूपको देखकर वे दैत्य उनके निकट उसी प्रकार जाते थे, जिस प्रकार अग्निके निकट पतिंगे जाते हैं। महादैत्य चिक्षुरने दाँतोंसे उनके पैरके अँगूठेको दबोच लिया। फिर भगवान्‌ने अँगूठेसे उसकी ग्रीवापर प्रहार किया और—॥ ५८-६१ ॥

प्रमथ्य सर्वानसुरान् पादहस्ततलैर्विभुः। कृत्वा रूपं महाकायं संजहाराशु मेदिनीम् ॥ ६२ ॥
तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे। नभो विक्रममाणस्य सक्थिदेशे स्थितावुभौ ॥ ६३ ॥
परं विक्रममाणस्य जानुमूले प्रभाकरौ। विष्णोरास्तां स्थितस्यैतौ देवपालनकर्मणि ॥ ६४ ॥
जित्वा लोकत्रयं तांश्च हत्वा चासुरपुंगवान्। पुरंदराय त्रैलोक्यं ददौ विष्णुरुरुक्रमः ॥ ६५ ॥

अपने पैरों एवं हाथोंके तलवोंसे समस्त असुरोंको रगड़ डाला तथा विराट् शरीर धारण करके शीघ्र ही उन्होंने पृथ्वीको उनसे छीन लिया। भूमिको नापते समय चन्द्र और सूर्य उनके स्तनोंके मध्य स्थित थे तथा आकाशके नापते समय उनकी सक्थिप्रदेश (जाँघ-) में स्थित हो गये एवं परम (ऊर्ध्व) लोकका अतिक्रमण करते समय देवताओंकी रक्षा करनेमें स्थित श्रीविष्णुके जानुमूल-(घुटनेके स्थान-)में चन्द्र एवं सूर्य स्थित हो गये। उरुक्रम (लंबी डगोंवाले) विष्णुने तीनों लोकोंको जीतकर एवं उन बड़े-बड़े असुरोंका वध कर तीनों लोक इन्द्रको दे दिये ॥ ६२-६५ ॥

सुतलं नाम पातालमधस्ताद् वसुधातलात्। बलेर्दत्तं भगवता विष्णुना प्रभविष्णुना ॥ ६६ ॥
अथ दैत्येश्वरं प्राह विष्णुः सर्वेश्वरेश्वरः। तत् त्वया सलिलं दत्तं गृहीतं पाणिना मया ॥ ६७ ॥
कल्पप्रमाणं तस्मात् ते भविष्यत्यायुरुत्तमम्। वैवस्वते तथाऽतीते काले मन्वन्तरे तथा ॥ ६८ ॥
सावर्णिके तु संप्राप्ते भवानिन्द्रो भविष्यति। इदानीं भुवनं सर्वं दत्तं शक्राय वै पुरा ॥ ६९ ॥
चतुर्युगव्यवस्था च साधिका ह्येकसप्ततिः। नियन्तव्या मया सर्वे ये तस्य परिपन्थि[illegible] ॥

शक्तिशाली भगवान् विष्णुने पृथ्वीतलके नीचे स्थित सुतलनामक पातालको बलिके लिये दे दिया। तदनन्तर सर्वेश्वर विष्णुने दैत्येश्वरसे कहा—मैंने तुम्हारे द्वारा दानके लिये दिये हुए जलको अपने हाथमें ग्रहण किया है; अतः तुम्हारी उत्तम आयु कल्पप्रमाणकी होगी तथा वैवस्वत मन्वन्तरका काल व्यतीत होनेपर एवं सावर्णिक मन्वन्तरके आनेपर तुम इन्द्रपद प्राप्त करोगे—इन्द्र बनोगे। इस समयके लिये मैंने समस्त भुवनको पहले ही इन्द्रको दे रखा है। इकहत्तर चतुर्युगीके कालसे कुछ अधिक कालतक जो समयकी व्यवस्था है अर्थात् एक मन्वन्तरके कालतक मैं उसके (इन्द्रके) विरोधियोंको अनुशासित करूँगा ॥ ६६–७० ॥

तेनाहं परया भक्त्या पूर्वमाराधितो बले। सुतलं नाम पातालं समासाद्य वचो मम ॥ ७१ ॥
वसासुर ममादेशं यथावत्परिपालयन्। तत्र देवसुखोपेते प्रासादशतसंकुले ॥ ७२ ॥
प्रोत्फुल्लपद्मसरसि ह्रदशुद्धसरिद्वरे। सुगन्धी रूपसंपन्नो वराभरणभूषितः ॥ ७३ ॥
स्रक्चन्दनादिदिग्धाङ्गो नृत्यगीतमनोहरान्। उपभुञ्जन् महाभोगान् विविधान् दानवेश्वर ॥ ७४ ॥
ममाज्ञया कालमिमं तिष्ठ स्त्रीशतसंवृतः। यावत्सुरैश्च विप्रैश्च न विरोधं गमिष्यसि ॥ ७५ ॥
तावत् त्वं भुङ्क्ष्व संभोगान् सर्वकामसमन्वितान्।
यदा सुरैश्च विप्रैश्च विरोधं त्वं करिष्यसि। बन्धिष्यन्ति तदा पाशा वारुणा घोरदर्शनाः ॥ ७६ ॥

हे बलि ! पूर्वकालमें उसने बड़ी श्रद्धासे मेरी आराधना की थी, अतः तुम मेरे कहनेसे सुतल नामक पातालमें जाकर मेरे आदेशका भलीभाँति पालन करो तथा देवताओंके सुखसे भरे-पूरे सैकड़ों प्रासादोंसे पूर्ण विकसित कमलोंवाले सरोवरों, ह्रदों एवं शुद्ध श्रेष्ठ सरिताओंवाले उस स्थानपर निवास करो। हे दानवेश्वर ! सुगन्धिसे अनुलिप्त हो तथा श्रेष्ठ आभरणोंसे भूषित एवं माला और चन्दन आदिसे अलङ्कृत सुन्दर स्वरूपवाले तुम नृत्य और गीतसे युक्त विविध भाँतिके महान् भोगोंका उपभोग करते हुए सैकड़ों स्त्रियोंसे आवृत होकर इतने कालतक मेरी आज्ञासे वहाँ निवास करो। जबतक तुम देवताओं एवं ब्राह्मणोंसे विरोध न करोगे तबतक समस्त कामनाओंसे युक्त भोगोंको भोगोगे। किंतु जब तुम देवों एवं ब्राह्मणोंके साथ विरोध करोगे तो देखनेमें भयंकर वरुणके पाश तुम्हें बाँध लेंगे ॥ ७१–७६ ॥

बलिरुवाच

तत्रासतो मे पाताले भगवन् भवदाज्ञया।
किं भविष्यत्युपादानमुपभोगोपपादकम्। आप्यायितो येन देव स्मरेयं त्वामहं सदा ॥ ७७ ॥

बलिने पूछा—हे भगवन् ! हे देव ! आपकी आज्ञासे वहाँ पातालमें निवास करनेवाले मेरे भोगोंका साधन क्या होगा ? जिससे तृप्त होकर मैं सदा आपका स्मरण करूँगा ॥ ७७ ॥

श्रीभगवानुवाच

दानान्यविधिदत्तानि श्राद्धान्यश्रोत्रियाणि च। हुतान्यश्रद्धया यानि तानि दास्यन्ति ते फलम् ॥ ७८ ॥
अदक्षिणास्तथा यज्ञाः क्रियाश्चाविधिना कृताः। फलानि तव दास्यन्ति अधीतान्यव्रतानि च ॥ ७९ ॥
उदकेन विना पूजा विना दर्भेण या क्रिया। आज्येन च विना होमं फलं दास्यन्ति ते बले ॥ ८० ॥
यश्चेदं स्थानमाश्रित्य क्रियाः काश्चित्करिष्यति। न तत्र चासुरो भागो भविष्यति कदाचन ॥ ८१ ॥
ज्येष्ठाश्रमे महापुण्ये तथा विष्णुपदे ह्रदे। ये च श्राद्धानि दास्यन्ति व्रतं नियममेव च ॥ ८२ ॥

क्रिया कृता च या काचिद् विधिनाऽविधिनापि वा। सर्वं तदक्षयं तस्य भविष्यति न संशयः ॥ ८३ ॥
ज्येष्ठे मासि सिते पक्षे एकादश्यामुपोषितः।
द्वादश्यां वामनं दृष्ट्वा स्नात्वा विष्णुपदे ह्रदे। दानं दत्त्वा यथाशक्त्या प्राप्नोति परमं पदम् ॥ ८४ ॥

श्रीभगवान्‌ने कहा—अविधिपूर्वक दिये गये दान, श्रोत्रिय ब्राह्मणसे रहित श्राद्ध तथा बिना श्रद्धाके किये गये जो हवन हैं, वे तुम्हारे भाग होंगे। दक्षिणारहित यज्ञ, अविधिपूर्वक किये गये कर्म और व्रतसे रहित अध्ययन तुम्हें फल प्रदान करेंगे। हे बलि! जलके बिना की गयी पूजा, बिना कुशाकी की गयी क्रिया और बिना घीके किये गये हवन तुमको फल देंगे। इस स्थानका आश्रय कर जो मनुष्य किन्हीं भी क्रियाओंको करेगा, उसमें कभी भी असुरोंका अधिकार न होगा। अत्यन्त पवित्र ज्येष्ठाश्रम तथा विष्णुपद सरोवरमें जो श्राद्ध, दान, व्रत या नियम-पालन करेगा तथा विधि या अविधिपूर्वक जो कोई क्रिया यहाँ की जायगी, उसके लिये वे सभी निःसंदेह अक्षय फलदायी होगा। जो मनुष्य ज्येष्ठमासके शुक्ल पक्षमें एकादशीके दिन उपवास कर द्वादशीके दिन विष्णुपदनामके सरोवरमें स्नान कर वामनका दर्शन करनेके बाद यथाशक्ति दान देगा, वह परम पदको प्राप्त करेगा ॥ ७८–८४ ॥

लोमहर्षण उवाच

बलेर्वरमिमं दत्त्वा शक्राय च त्रिविष्टपम्। व्यापिना तेन रूपेण जगामादर्शनं हरिः ॥ ८५ ॥
शशास च यथापूर्वमिन्द्रस्त्रैलोक्यमूर्जितः। निःशेषं च तदा कालं बलिः पातालमाश्रितः ॥ ८६ ॥
इत्येतत् कथितं तस्य विष्णोर्माहात्म्यमुत्तमम्। शृणुयाद्यो वामनस्य सर्वपापैः प्रमुच्यते ॥ ८७ ॥
बलिप्रह्लादसंवादं मन्त्रितं बलिशुक्रयोः। बलेर्विष्णोश्च चरितं ये स्मरिष्यन्ति मानवाः ॥ ८८ ॥
नाधयो व्याधयस्तेषां न च मोहाकुलं मनः। भविष्यति द्विजश्रेष्ठाः पुंसस्तस्य कदाचन ॥ ८९ ॥
च्युतराज्यो निजं राज्यमिष्टप्राप्तिं वियोगवान्। समाप्नोति महाभागा नरः श्रुत्वा कथामिमाम् ॥ ९० ॥
ब्राह्मणो वेदमाप्नोति क्षत्रियो जयते महीम्।
वैश्यो धनसमृद्धिं च शूद्रः सुखमवाप्नुयात्। वामनस्य च माहात्म्यं शृण्वन् पापैः प्रमुच्यते ॥ ९१ ॥

इति श्रीवामनपुराणे एकत्रिंशोऽध्यायः ॥ ३१ ॥

लोमहर्षणजी बोले—भगवान् उस सर्वव्यापी रूपसे बलिको यह वरदान तथा इन्द्रको स्वर्ग प्रदानकर अन्तर्हित हो गये। तबसे बलशाली इन्द्र पहलेकी भाँति तीनों लोकोंका शासन करने लगे और बलि सर्वदा पातालमें निवास करने लगे। इस प्रकार उन भगवान् (वामन) विष्णुका उत्तम माहात्म्य कहा गया; जो इसे (वामनमाहात्म्यको) सुनता है, वह सभी पापोंसे मुक्त हो जाता है। द्विजश्रेष्ठो! बलि एवं प्रह्लादके संवाद, बलि एवं शुक्रकी मन्त्रणा तथा बलि एवं विष्णुके चरितको जो मनुष्य स्मरण करेंगे, उन्हें कभी कोई आधि एवं व्याधि न होगी तथा उनका मन भी मोहसे आकुल नहीं होगा। हे महाभागो! इस कथाको सुनकर राज्यच्युत व्यक्ति अपने राज्यको एवं वियोगी मनुष्य अपने प्रियको प्राप्त करता है। (इसको सुननेसे) ब्राह्मणको वेदकी प्राप्ति होती है, क्षत्रिय पृथ्वीकी जय प्राप्त करता है तथा वैश्यको धन-समृद्धि एवं शूद्रको सुखकी प्राप्ति होती है। वामनका माहात्म्य सुननेसे पापोंसे मुक्ति होती है ॥ ८५–९१ ॥

इस प्रकार श्रीवामनपुराणमें एकतीसवाँ अध्याय समाप्त हुआ ॥ ३१ ॥

[अथ द्वात्रिंशोऽध्यायः]

ऋषय ऊचुः

कथमेषा समुत्पन्ना नदीनामुत्तमा नदी। सरस्वती महाभागा कुरुक्षेत्रप्रवाहिनी ॥ १ ॥
कथं सरः समासाद्य कृत्वा तीर्थानि पार्श्वतः।
प्रयाता पश्चिमामाशां दृश्यादृश्यगतिः शुभा। एतद् विस्तरतो ब्रूहि तीर्थवंशं सनातनम् ॥ २ ॥

बत्तीसवाँ अध्याय प्रारम्भ

(सरस्वती नदीका वर्णन—उसका कुरुक्षेत्रमें प्रवाहित होना)

ऋषियोंने पूछा—(लोमहर्षणजी !) कुरुक्षेत्रमें प्रवाहित होनेवाली नदियोंमें श्रेष्ठ भाग्यशालिनी यह सरस्वती नदी कैसे उत्पन्न हुई ? सरोवरमें जाकर अगल-बगलमें (अपने दोनों तटोंपर) तीर्थोंकी स्थापना करती हुई दृश्य और अदृश्यरूपसे यह शुभ नदी किस प्रकार पश्चिम दिशाको गयी ? इस सनातन तीर्थ-वंशका विस्तारपूर्वक वर्णन करें ॥ १-२ ॥

लोमहर्षण उवाच

प्लक्षवृक्षात् समुद्भूता सरिच्छ्रेष्ठा सनातनी। सर्वपापक्षयकरी स्मरणादेव नित्यशः ॥ ३ ॥
सैषा शैलसहस्राणि विदार्य च महानदी। प्रविष्टा पुण्यतोयौघा वनं द्वैतमिति स्मृतम् ॥ ४ ॥
तस्मिन् प्लक्षे स्थितां दृष्ट्वा मार्कण्डेयो महामुनिः। प्रणिपत्य तदा मूर्ध्ना तुष्टावाथ सरस्वतीम् ॥ ५ ॥
त्वं देवि सर्वलोकानां माता देवारणिः शुभा। सदसद् देवि यत्किञ्चिन्मोक्षदाय्यर्थवत् पदम् ॥ ६ ॥
तत् सर्वं त्वयि संयोगि योगिवद् देवि संस्थितम्।
अक्षरं परमं देवि यत्र सर्वं प्रतिष्ठितम्। अक्षरं परमं ब्रह्म विश्वं चैतत् क्षरात्मकम् ॥ ७ ॥

लोमहर्षणने कहा—(ऋषियो !) स्मरण करनेमात्रसे ही नित्य सभी पापोंको नष्ट करनेवाली यह सनातनी श्रेष्ठ (सरस्वती) नदी पाकड़-वृक्षसे उत्पन्न हुई है। यह पवित्र जलधारमयी महानदी हजारों पर्वतोंको तोड़ती-फोड़ती हुई प्रसिद्ध द्वैत वनमें प्रविष्ट हुई, ऐसी प्रसिद्धि है। महामुनि मार्कण्डेयने उस प्लक्षवृक्षमें स्थित सरस्वती नदीको देखकर सिरसे (सिर झुकाकर नम्रतापूर्वक) प्रणाम करनेके बाद उनकी स्तुति की—देवि! आप सभी लोकोंकी माता एवं देवोंकी शुभ अरणि हैं। देवि ! समस्त सद्, असद्, मोक्ष देनेवाले एवं अर्थवान् पद, यौगिक क्रियासे युक्त पदार्थकी भाँति आपमें मिलकर स्थित हैं। देवि ! अक्षर परब्रह्म तथा यह विनाशशील समस्त संसार आपमें प्रतिष्ठित है ॥ ३-७ ॥

दारुण्यवस्थितो वह्निर्भूमौ गन्धो यथा ध्रुवम्। तथा त्वयि स्थितं ब्रह्म जगच्चेदमशेषतः ॥ ८ ॥
ओंकाराक्षरसंस्थानं यत् तद् देवि स्थिरास्थिरम्। तत्र मात्रात्रयं सर्वमस्ति यद् देवि नास्ति च ॥ ९ ॥
त्रयो लोकास्त्रयो वेदास्त्रैविद्यं पावकत्रयम्। त्रीणि ज्योतींषि वर्गाश्च त्रयो धर्मादयस्तथा ॥ १० ॥
त्रयो गुणास्त्रयो वर्णास्त्रयो देवास्तथा क्रमात्। त्रैधातवस्तथावस्थाः पितरश्चैवमादयः ॥ ११ ॥
एतन्मात्रात्रयं देवि तव रूपं सरस्वति। विभिन्नदर्शनामाद्यां ब्रह्मणो हि सनातनीम् ॥ १२ ॥

जिस प्रकार काठमें आग एवं पृथिवीमें गन्धकी निश्चित स्थिति होती है, उसी प्रकार तुम्हारे भीतर ब्रह्म और यह सम्पूर्ण जगत् नित्य (सदा) स्थित है। देवि ! जो कुछ भी स्थिर (अचर) तथा अस्थिर (चर) है, वह सब ओंकार अक्षरमें अवस्थित है। जो कुछ भी अस्तित्वयुक्त है या अस्तित्वविहीन, उन सबमें ओंकारकी तीन मात्राएँ

(अनुस्यूत) हैं। हे सरस्वति ! भूः, भुवः, स्वः—ये तीनों लोक; ऋक्, यजुः, साम—ये तीनों वेद; आन्वीक्षिकी, त्रयी और वार्ता—ये तीनों विद्याएँ; गार्हपत्य, आहवनीय, दक्षिणाग्नि—ये तीनों अग्नियाँ; सूर्य, चन्द्र, अग्नि—ये तीनों ज्योतियाँ; धर्म, अर्थ, काम—ये तीनों वर्ग; सत्त्व, रज, तम—ये तीनों गुण; ब्राह्मण, क्षत्रिय, वैश्य—ये तीनों वर्ग; तीनों देव, वात, पित्त, कफ—ये तीनों धातुएँ तथा जाग्रत, स्वप्न, सुषुप्ति—ये तीनों अवस्थाएँ एवं पिता, पितामह, प्रपितामह—ये तीनों पितर इत्यादि—ये सभी ओंकारके मात्रात्रयस्वरूप आपके रूप हैं। आपको ब्रह्मकी विभिन्न रूपोंवाली आद्या एवं सनातनी मूर्ति कहा जाता है॥ ८–१२॥

सोमसंस्था हविःसंस्था पाकसंस्था सनातनी। तास्त्वदुच्चारणाद् देवि क्रियन्ते ब्रह्मवादिभिः॥ १३॥
अनिर्देश्यपदं त्वेतदर्द्धमात्राश्रितं परम्। अविकार्यक्षयं दिव्यं परिणामविवर्जितम्॥ १४॥
तवैतत् परमं रूपं यन्न शक्यं मयोदितुम्। न चास्येन न वा जिह्वाताल्वोष्ठादिभिरुच्यते॥ १५॥
स विष्णुः स वृषो ब्रह्मा चन्द्रार्कज्योतिरेव च। विश्वावासं विश्वरूपं विश्वात्मानमनीश्वरम्॥ १६॥

देवि! ब्रह्मवादी लोग आपकी शक्तिसे ही उच्चारण करके सोम-संस्था, हविःसंस्था एवं सनातनी पाकसंस्थाको सम्पन्न करते हैं। अर्धमात्रामें आश्रित आपका यह अनिर्देश्य पद अविकारी, अक्षय, दिव्य तथा अपरिणामी है। यह आपका अनिर्देश्य पद परम रूप है, जिसका वर्णन मैं नहीं कर सकता। न तो मुखसे ही इसका वर्णन हो सकता है और न जिह्वा, तालु, ओष्ठ आदिसे ही। तुम्हारा यह रूप ही विष्णु, वृष (धर्म), ब्रह्मा, चन्द्रमा, सूर्य एवं ज्योति है। उसीको विश्वावास, विश्वरूप, विश्वात्मा एवं अनीश्वर (स्वतन्त्र) कहते हैं॥ १३–१६॥

सांख्यसिद्धान्तवेदोक्तं बहुशाखास्थिरीकृतम्। अनादिमध्यनिधनं सदसच्च सदेव तु॥ १७॥
एकं त्वनेकधाप्येकभाववेदसमाश्रितम्। अनाख्यं षड्गुणाख्यं च बह्वाख्यं त्रिगुणाश्रयम्॥ १८॥
नानाशक्तिविभावज्ञं नानाशक्तिविभावकम्। सुखात् सुखं महत्सौख्यं रूपं तत्त्वगुणात्मकम्॥ १९॥
एवं देवि त्वया व्याप्तं सकलं निष्कलं च यत्। अद्वैतावस्थितं ब्रह्म यच्च द्वैते व्यवस्थितम्॥ २०॥

आपका यह रूप सांख्य सिद्धान्त तथा वेदद्वारा वर्णित, (वेदोंकी) बहुत-सी शाखाओंद्वारा स्थिर किया हुआ, आदि-मध्य-अन्तसे रहित, सत्-असत् अथवा एकमात्र सत् (ही) है। यह एक तथा अनेक प्रकारका, वेदोंद्वारा एकाग्र भक्तिसे अवलम्बित, आख्या (नाम-) विहीन, ऐश्वर्य आदि षड्गुणोंसे युक्त, बहुत नामोंवाला तथा त्रिगुणाश्रय है। आपका यह तत्त्वगुणात्मक रूप सुखमें भी परमसुख, महान् सुखरूप, नाना शक्तियोंके विभावको जाननेवाला है। देवि! यह अद्वैत तथा द्वैतमें आश्रित 'निष्कल' तथा 'सकल ब्रह्म' आपके द्वारा व्याप्त है॥ १७–२०॥

येऽर्था नित्या ये विनश्यन्ति चान्ये येऽर्थाः स्थूला ये तथा सन्ति सूक्ष्माः।
ये वा भूमौ येऽन्तरिक्षेऽन्यतो वा तेषां देवि त्वत्त एवोपलब्धिः॥ २१॥
यद्वा मूर्तं यदमूर्तं समस्तं यद्वा भूतेष्वेकमेकं च किंचित्।
यच्च द्वैते व्यस्तभूतं च लक्ष्यं तत्सम्बद्धं त्वत्स्वरैर्व्यञ्जनैश्च॥ २२॥
एवं स्तुता तदा देवी विष्णुजिह्वा सरस्वती।
प्रत्युवाच महात्मानं मार्कण्डेयं महामुनिम्। यत्र त्वं नेष्यसे विप्र तत्र यास्याम्यतन्द्रिता॥ २३॥

(सरस्वती) देवि! जो पदार्थ नित्य हैं तथा जो विनष्ट हो जानेवाले हैं, जो पदार्थ स्थूल हैं तथा जो सूक्ष्म हैं, जो भूमिपर हैं तथा जो अन्तरिक्षमें हैं या जो इनसे भिन्न स्थानोंमें हैं, उन समस्त पदार्थोंकी प्राप्ति आपसे ही होती है। जो मूर्त या अमूर्त है, वह सब कुछ और जो सब भूतोंमें एक रूपसे स्थित

मात्र है और जो द्वैतमें अलग-अलग रूपसे दिखलायी पड़ता है, वह सब कुछ आपके स्वर-व्यञ्जनोंसे सम्बद्ध है। इस प्रकार स्तुति किये जानेपर विष्णुकी जीभरूपिणी सरस्वतीने महामुनि महात्मा मार्कण्डेयसे कहा—हे विप्र! तुम मुझे जहाँ ले जाओगे, मैं वहीं आलस्य छोड़कर चली जाऊँगी ॥ २१–२३ ॥

मार्कण्डेय उवाच

आद्यं ब्रह्मसरः पुण्यं ततो रामह्रदः स्मृतः।
कुरुणा ऋषिणा कृष्टं कुरुक्षेत्रं ततः स्मृतम्। तस्य मध्येन वै गाढं पुण्या पुण्यजलावहा ॥ २४ ॥

इति श्रीवामनपुराणे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

मार्कण्डेयने कहा—आरम्भमें (इसका) पवित्र नाम ब्रह्मसर था, फिर रामह्रद प्रसिद्ध हुआ एवं उसके बाद कुरु ऋषिद्वारा कृष्ट होनेसे कुरुक्षेत्र कहा जाने लगा। (अब) उसके मध्यमें अत्यन्त पवित्र जलवाली गहरी सरस्वती प्रवाहित हों ॥ २४ ॥

इस प्रकार श्रीवामनपुराणमें बत्तीसवाँ अध्याय समाप्त हुआ ॥ ३२ ॥

[अथ त्रयस्त्रिंशोऽध्यायः]

लोमहर्षण उवाच

इत्येवंवचनं श्रुत्वा मार्कण्डेयस्य धीमतः। नदी प्रवाहसंयुक्ता कुरुक्षेत्रं विवेश ह ॥ १ ॥
तत्र सा रन्तुकं प्राप्य पुण्यतोया सरस्वती। कुरुक्षेत्रं समाप्लाव्य प्रयाता पश्चिमां दिशम् ॥ २ ॥
तत्र तीर्थसहस्राणि ऋषिभिः सेवितानि च। तान्यहं कीर्तयिष्यामि प्रसादात् परमेष्ठिनः ॥ ३ ॥
तीर्थानां स्मरणं पुण्यं दर्शनं पापनाशनम्। स्नानं मुक्तिकरं प्रोक्तमपि दुष्कृतकर्मणः ॥ ४ ॥

तैंतीसवाँ अध्याय प्रारम्भ

(सरस्वती नदीका कुरुक्षेत्रमें प्रवाहित होना और कुरुक्षेत्रमें निवास करने तथा तीर्थमें स्नान करनेका महत्त्व)

लोमहर्षणने कहा—बुद्धिमान् मार्कण्डेय ऋषिके इस उपर्युक्त वचनको सुनकर प्रवाहसे भरी हुई सरस्वती नदी कुरुक्षेत्रमें प्रविष्ट हुई। वह पवित्रसलिला सरस्वती नदी वहाँ रन्तुकमें जाकर कुरुक्षेत्रको जलसे प्लावित करती हुई, जो पश्चिम दिशाकी ओर चली गयी। वहाँ (कुरुक्षेत्रमें) हजारों तीर्थ ऋषियोंसे सेवित हैं। परमेष्ठी-(ब्रह्मा-)के प्रसादसे मैं उनका वर्णन करूँगा। पापियोंके लिये भी तीर्थोंका स्मरण पुण्यदायक, उनका दर्शन पापनाशक और स्नान मुक्तिदायक कहा गया है (पुण्यशालियोंके लिये तो कहना ही क्या है) ॥ १–४ ॥

ये स्मरन्ति च तीर्थानि देवताः प्रीणयन्ति च। स्नान्ति च श्रद्दधानाश्च ते यान्ति परमां गतिम् ॥ ५ ॥
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत् कुरुक्षेत्रं स बाह्याभ्यन्तरः शुचिः ॥ ६ ॥
कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम्। इत्येवं वाचमुत्सृज्य सर्वपापैः प्रमुच्यते ॥ ७ ॥
ब्रह्मज्ञानं गयाश्राद्धं गोग्रहे मरणं तथा। वासः पुंसां कुरुक्षेत्रे मुक्तिरुक्ता चतुर्विधा ॥ ८ ॥

इससे उनके (नृत्य करनेसे उनके साथ) सम्पूर्ण अचर-चर जगत् भी नाचने लगा। उनके तेजसे मोहित जगत्‌को नाचते देखकर ब्रह्मा आदि देव एवं तपस्वी ऋषियोंने मुनिके (हितके) लिये महादेवसे कहा—देव ! आप ऐसा (कार्य) करें, जिससे ये नृत्य न करें (उन्हें नृत्यसे विरत करनेका उपाय करें)। उसके बाद हर्षसे अधिक मग्न उन मुनिको देखकर एवं देवोंके हितकी इच्छासे महादेवने कहा—मुनिसत्तम ! ब्राह्मणश्रेष्ठ ! आप तो तपस्वी एवं धर्मपथमें स्थित रहनेवाले हैं। फिर आपके इस हर्षका कारण क्या है ? ॥ ९–१२ ॥

ऋषिरुवाच

किं न पश्यसि मे ब्रह्मन् कराच्छाकरसं स्रुतम्। यं दृष्ट्वाऽहं प्रनृत्तो वै हर्षेण महताऽन्वितः ॥ १३ ॥
तं प्रहस्याब्रवीद् देवो मुनिं रागेण मोहितम्। अहं न विस्मयं विप्र गच्छामीह प्रपश्यताम् ॥ १४ ॥
एवमुक्त्वा मुनिश्रेष्ठं देवदेवो महाद्युतिः। अङ्गुल्यग्रेण विप्रेन्द्राः स्वाङ्गुष्ठं ताडयद् भवः ॥ १५ ॥
ततो भस्म क्षतात् तस्मान्निर्गतं हिमसन्निभम्। तद् दृष्ट्वा व्रीडितो विप्रः पादयोः पतितोऽब्रवीत् ॥ १६ ॥

ऋषिने कहा—ब्रह्मन्! क्या आप नहीं देखते कि मेरे हाथसे शाकका रस चू रहा है; जिसे देखकर मैं अत्यन्त आनन्दमग्न होकर नृत्य कर रहा हूँ। महादेवजीने हँसकर आसक्तिसे मोहित हुए उन मुनिसे कहा—विप्रवर! मुझे आश्चर्य नहीं हो रहा है। (किंतु) आप इधर देखें। विप्रेन्द्रो! श्रेष्ठ मुनिसे ऐसा कहकर तेजोनिधान भगवान् देवाधिदेव महादेवने अपनी अंगुलिके अग्रभागसे अपने अंगूठेको ठीक किया। उसके बाद उस चोटसे हिमतुल्य (श्वेत) भस्म निकलने लगा। उसे देखनेके बाद ब्राह्मण लज्जित होकर (महादेवके) चरणोंमें गिर पड़े और बोले—॥ १३—१६ ॥

नान्यं देवादहं मन्ये शूलपाणेर्महात्मनः। चराचरस्य जगतो वरस्त्वमसि शूलधृक् ॥ १७ ॥
त्वदाश्रयाश्च दृश्यन्ते सुरा ब्रह्मादयोऽनघ। पूर्वस्त्वमसि देवानां कर्ता कारयिता महत् ॥ १८ ॥
त्वत्प्रसादात् सुराः सर्वे मोदन्ते ह्यकुतोभयाः। एवं स्तुत्वा महादेवमृषिः स प्रणतोऽब्रवीत् ॥ १९ ॥
भगवंस्त्वत्प्रसादाद्धि तपो मे न क्षयं व्रजेत्। ततो देवः प्रसन्नात्मा तमृषिं वाक्यमब्रवीत् ॥ २० ॥

मैं महात्मा शूलपाणि महादेवके अतिरिक्त किसीको नहीं मानता। शूलपाणे! मेरी दृष्टिमें आप ही चराचर समस्त संसारमें सर्वश्रेष्ठ हैं। अनघ! ब्रह्मा आदि देवता आपके ही आश्रित देखे जाते हैं। आप ही देवताओंमें प्रथम हैं और आप (सब कुछ) करने एवं करानेवाले तथा महत्स्वरूप हैं। आपकी कृपासे सभी देवता निर्भय होकर मोदमान होते रहते हैं। ऋषिने इस प्रकार महादेवजीकी स्तुति करनेके बाद उन्हें प्रणामकर कहा—भगवन्! आपकी कृपासे मेरी तपस्या क्षय न हो। तब महादेवजीने प्रसन्न होकर उन ऋषिसे यह वचन कहा—॥ १७—२० ॥

ईश्वर उवाच

तपस्ते वर्धतां विप्र मत्प्रसादात् सहस्रधा। आश्रमे चेह वत्स्यामि त्वया सार्धमहं सदा ॥ २१ ॥
सप्तसारस्वते स्नात्वा यो मामर्चिष्यते नरः। न तस्य दुर्लभं किंचिदिह लोके परत्र च ॥ २२ ॥
सारस्वतं च तं लोकं गमिष्यति न संशयः। शिवस्य च प्रसादेन प्राप्नोति परमं पदम् ॥ २३ ॥

इति श्रीवामनपुराणे अष्टात्रिंशोऽध्यायः ॥ ३८ ॥

(महादेव) ईश्वरने कहा—विप्र! मेरी कृपासे तुम्हारी तपस्या सहस्रों प्रकारसे बढ़े। मैं तुम्हारे साथ इस आश्रममें सदा निवास करूँगा। जो मनुष्य इस सप्तसारस्वततीर्थमें स्नान करके मेरी पूजा करेगा, उसे इस लोक और परलोकमें कुछ भी दुर्लभ नहीं होगा। वह निःसंदेह उस सारस्वतलोकको जायगा एवं (मुझ) शिवके अनुग्रहसे परमपदको प्राप्त करेगा ॥ २१—२३ ॥

इस प्रकार श्रीवामनपुराणमें अड़तीसवाँ अध्याय समाप्त हुआ ॥ ३८ ॥

[अथैकोनचत्वारिंशोऽध्यायः]

लोमहर्षण उवाच

ततस्त्वौशनसं तीर्थं गच्छेत्तु श्रद्धयान्वितः। उशना यत्र संसिद्धो ग्रहत्वं च समाप्तवान्॥ १ ॥
तस्मिन् स्नात्वा विमुक्तस्तु पातकैर्जन्मसम्भवैः। ततो याति परं ब्रह्म यस्मान्नावर्तते पुनः॥ २ ॥
रहोदरो नाम मुनिर्यत्र मुक्तो बभूव ह। महता शिरसा ग्रस्तस्तीर्थमाहात्म्यदर्शनात्॥ ३ ॥

उन्तालीसवाँ अध्याय प्रारम्भ

(कुरुक्षेत्रके तीर्थोंका अनुक्रमसे वर्णन)

लोमहर्षणने कहा—(ऋषियो !) सनत्कुमारके बाद श्रद्धासे युक्त होकर 'औशनस' तीर्थमें जाना चाहिये, जहाँ शुक्र सिद्धि प्राप्तकर ग्रहत्वको प्राप्त हो गये। उस तीर्थमें स्नानकर मनुष्य अनेक जन्मोंमें किये हुए पातकोंसे छूटकर परमपदको प्राप्त करता है, जहाँसे पुनः (जन्म-मरणके चक्रमें) लौटना नहीं पड़ता। (यह तीर्थ ऐसा है) जहाँ तीर्थ-दर्शनकी महिमासे भारी सिरसे जकड़े हुए रहोदर नामके एक मुनि उससे मुक्त हो गये थे ॥ १-३ ॥

ऋषय ऊचुः

कथं रहोदरो ग्रस्तः कथं मोक्षमवाप्तवान्। तीर्थस्य तस्य माहात्म्यमिच्छामः श्रोतुमादरात्॥ ४ ॥

ऋषियोंने कहा (पूछा)—रहोदर मुनि सिरसे ग्रस्त कैसे हो गये थे ? और, वे उससे मुक्त कैसे हुए ? हम लोग उस तीर्थके माहात्म्यको आदरके साथ सुनना चाहते हैं (जिसकी महिमासे ऐसा हुआ।) ॥ ४ ॥

लोमहर्षण उवाच

पुरा वै दण्डकारण्ये राघवेण महात्मना। वसता द्विजशार्दूला राक्षसास्तत्र हिंसिताः॥ ५ ॥
तत्रैकस्य शिरश्छिन्नं राक्षसस्य दुरात्मनः। क्षुरेण शितधारेण तत् पपात महावने॥ ६ ॥
रहोदरस्य तल्लग्नं जङ्घायां वै यदृच्छया। वने विचरतस्तत्र अस्थि भित्त्वा विवेश ह॥ ७ ॥
स तेन लग्नेन तदा द्विजातिर्न शशाक ह। अभिगन्तुं महाप्राज्ञस्तीर्थान्यायतनानि च॥ ८ ॥

लोमहर्षणजी बोले—द्विजश्रेष्ठो ! प्राचीन कालमें दण्डकारण्यमें रहते हुए रघुवंशी महात्मा रामचन्द्रने बहुत-से राक्षसोंको मारा था। वहाँ एक दुरात्मा राक्षसका सिर तीक्ष्ण धारवाले क्षुर नामक बाणसे कटकर उस महावनमें गिरा। (फिर वह) संयोगवश वनमें विचरण करते हुए रहोदर मुनिकी जंघामें उनकी हड्डीको तोड़कर उसमें चिपट गया। महाप्राज्ञ वे ब्राह्मणदेव (जाँघकी टूटी हड्डीमें) उस मस्तकके लग जानेके कारण तीर्थों और देवालयोंमें नहीं जा पाते थे ॥ ५-८ ॥

स पूतिना विस्रवता वेदनार्तो महामुनिः। जगाम सर्वतीर्थानि पृथिव्यां यानि कानि च॥ ९ ॥
ततः स कथयामास ऋषीणां भावितात्मनाम्। तेऽब्रुवन् ऋषयो विप्रं प्रयाह्यौशनसं प्रति॥ १० ॥
तेषां तद्वचनं श्रुत्वा जगाम स रहोदरः। ततस्त्वौशनसे तीर्थे तस्योपस्पृशतस्तदा॥ ११ ॥
तच्छिरश्चरणं मुक्त्वा पपातान्तर्जले द्विजाः। ततः स विरजो भूत्वा पूतात्मा वीतकल्मषः॥ १२ ॥
आजगामाश्रमं प्रीतः कथयामास चाखिलम्।
ते श्रुत्वा ऋषयः सर्वे तीर्थमाहात्म्यमुत्तमम्। कपालमोचनमिति नाम चक्रुः समागताः॥ १३ ॥

वे महामुनि दुर्गन्धपूर्ण युक्त पीब आदि बहनेके कारण तथा वेदनासे अत्यन्त दुःखी रहते थे। पृथ्वीके जिन जिन्हीं सभी तीर्थोंमें वे गये, वहाँ-वहाँ उन्होंने पवित्रात्मा ऋषियोंसे (अपना दुःख) कहा। ऋषियोंने उन विप्रसे कहा— ब्राह्मणदेव ! आप औशनस-(तीर्थ-)में जाइये। (लोमहर्षणने कहा—) द्विजो ! उनका यह वचन [illegible]

महोदर मुनि महर्षि औशनसतीर्थमें गये। वहाँ उन्होंने तीर्थ-जलका स्पर्श किया। उनके द्वारा (जलका) स्पर्श होते ही वह मस्तक उनके (जाँघ) को छोड़कर जलमें गिर गया। उसके बाद वे मुनि पापसे रहित निर्मल रजोगुणसे रहित अकल्मष पवित्रात्मा होकर प्रसन्नतापूर्वक (अपने) आश्रममें गये और उन्होंने (ऋषियोंसे) सारी आपबीती कह सुनायी। फिर तो उन आये हुए सभी ऋषियोंने औशनसतीर्थके इस उत्तम माहात्म्यको सुनकर उसका नाम 'कपालमोचन' रख दिया ॥ ९–१३ ॥

तत्रापि सुमहत्तीर्थं विश्वामित्रस्य विश्रुतम्। ब्राह्मण्यं लब्धवान् यत्र विश्वामित्रो महामुनिः ॥ १४ ॥
तस्मिंस्तीर्थवरे स्नात्वा ब्राह्मण्यं लभते ध्रुवम्। ब्राह्मणस्तु विशुद्धात्मा परं पदमवाप्नुयात् ॥ १५ ॥
ततः पृथूदकं गच्छेन्नियतो नियताशनः। तत्र सिद्धस्तु ब्रह्मर्षी रुषङ्गुर्नाम नामतः ॥ १६ ॥
जातिस्मरो रुषङ्गुस्तु गङ्गाद्वारे सदा स्थितः।
अन्तकालं ततो दृष्ट्वा पुत्रान् वचनमब्रवीत्। इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम् ॥ १७ ॥
विज्ञाय तस्य तद्भावं रुषङ्गोस्ते तपोधनाः। तं वै तीर्थे उपानिन्युः सरस्वत्यास्तपोधनम् ॥ १८ ॥

वहीं (कपालमोचन तीर्थमें ही) महामुनि विश्वामित्रका बहुत बड़ा तीर्थ है, जहाँ विश्वामित्रने ब्राह्मणत्वको प्राप्त किया था। उस श्रेष्ठ तीर्थमें स्नान करनेसे मनुष्यको निश्चय रूपसे ब्राह्मणत्वकी प्राप्ति होती है और वह ब्राह्मण विशुद्धात्मा होकर उसके परम पदको प्राप्त करता है। कपालमोचनके बाद पृथूदक नामके तीर्थमें जाय और नियमपूर्वक नियत मात्रामें आहार करे। वहाँ रुषङ्गुनामके महर्षिने सिद्धि पायी थी। सदा गङ्गाद्वारमें स्थित रहते हुए पूर्वजन्मके वृत्तान्तको स्मरण रखनेवाले रुषङ्गुने (अपना) अन्तकाल आया देखकर (अपने) पुत्रोंसे कहा कि यहाँ (मैं) अपना कल्याण नहीं देख रहा हूँ। मुझे पृथूदक (तीर्थ) में ले चलो। रुषङ्गुके उस भावको जानकर वे तपोधन (पुत्र) उन तपके धनीको सरस्वतीके तीर्थमें ले गये ॥ १४–१८ ॥

स तैः पुत्रैः समानीतः सरस्वत्यां समाप्लुतः। स्मृत्वा तीर्थगुणान् सर्वान् प्राहेदमृषिसत्तमः ॥ १९ ॥
सरस्वत्युत्तरे तीर्थे यस्त्यजेदात्मनस्तनुम्। पृथूदके जप्यपरो नूनं चामरतां व्रजेत् ॥ २० ॥
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्मिता। पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः ॥ २१ ॥
चातुर्वर्ण्यस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत्। तस्याभिध्यायतः सृष्टिं ब्रह्मणो व्यक्तजन्मनः ॥ २२ ॥
मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रियास्तथा। ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन् ॥ २३ ॥

उन पुत्रोंद्वारा लाये गये उन ऋषिश्रेष्ठने सरस्वतीमें स्नान करनेके पश्चात् उस तीर्थके सब गुणोंका स्मरण कर यह कहा—सरस्वतीके उत्तरमें स्थित पृथूदक नामके तीर्थमें अपने शरीरका त्याग करनेवाला जपपरायण मनुष्य निश्चय ही अमरत्वको प्राप्त होता है। वहीं ब्रह्माका 'निर्मित ब्रह्मयोनि तीर्थ' है, जहाँ सरस्वतीके किनारे अवस्थित पृथूदकमें स्थित होकर ब्रह्मा चारों वर्णोंकी सृष्टिके लिये आत्मज्ञानमें लीन हुए थे। सृष्टिके विषयमें अव्यक्तजन्मा ब्रह्माके चिन्तन करनेपर उनके मुखसे ब्राह्मण, भुजाओंसे क्षत्रिय, दोनों ऊरुओंसे वैश्य और दोनों पैरोंसे शूद्र उत्पन्न हुए ॥ १९–२३ ॥

चातुर्वर्ण्यं ततो दृष्ट्वा आश्रमस्थं ततस्ततः। एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीति संज्ञितम् ॥ २४ ॥
तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति। तत्रैव तीर्थं विख्यातमवकीर्णेति नामतः ॥ २५ ॥
यस्मिंस्तीर्थे बको दाल्भ्यो धृतराष्ट्रममर्षणम्। जुहाव वाहनैः सार्धं तत्राबुध्यन् ततो नृपः ॥ २६ ॥

इसके बाद उन्होंने चारों वर्णोंको विभिन्न आश्रमोंमें स्थित हुआ देखा। इस प्रकार ब्रह्मयोनिनामक तीर्थकी प्रतिष्ठा हुई थी। मुक्तिकी कामना करनेवाला व्यक्ति वहाँ स्नान करनेसे पुनर्जन्म नहीं देखता। वहीं अवकीर्णनामक एक विख्यात तीर्थ है, जहाँपर दाल्भ्य (दल्भके पुत्र, दल्भ गोत्रमें उत्पन्न) बकनामक ऋषिने क्रोधी धृतराष्ट्रको वाहनोंके साथ हवन कर दिया था, तब राजाको (अपने किये कर्मका) ज्ञान हुआ था ॥ २४–२६ ॥

ऋषय ऊचुः

कथं प्रतिष्ठितं तीर्थमवकीर्णेति नामतः। धृतराष्ट्रेण राज्ञा च स किमर्थं प्रसादितः॥ २७॥

ऋषियोंने पूछा—अवकीर्णनामक तीर्थ कैसे प्रतिष्ठित हुआ एवं राजा धृतराष्ट्रने उन (बक दाल्भ्य मुनि) को क्यों प्रसन्न किया था? ॥ २७ ॥

लोमहर्षण उवाच

ऋषयो नैमिषेया ये दक्षिणार्थं ययुः पुरा। तत्रैव च बको दाल्भ्यो धृतराष्ट्रमयाचत॥ २८॥
तेनापि तत्र निन्दार्थमुक्तं पश्वनृतं तु यत्। ततः क्रोधेन महता मांसमुत्कृत्य तत्र ह॥ २९॥
पृथूदके महातीर्थे अवकीर्णेति नामतः। जुहाव धृतराष्ट्रस्य राष्ट्रं नरपतेस्ततः॥ ३०॥
हूयमाने तदा राष्ट्रे प्रवृत्ते यज्ञकर्मणि। अक्षीयत ततो राष्ट्रं नृपतेर्दुष्कृतेन वै॥ ३१॥

लोमहर्षणने कहा—प्राचीन कालमें नैमिषारण्यनिवासी जो ऋषि दक्षिणा पानेके लिये (राजा धृतराष्ट्रके यहाँ) गये थे, उनमेंसे दल्भवंशीय बक ऋषिने धृतराष्ट्रसे (धनकी) याचना की। उन्होंने (धृतराष्ट्रने) भी निन्दापूर्ण असत्य बात कही। उसके बाद वे (बकदाल्भ्य) अत्यन्त क्रुद्ध होकर पृथूदकमें स्थित अवकीर्णनामक तीर्थमें जाकर मांस काट-काटकर धृतराष्ट्रके राष्ट्रके नाम हवन करने लगे। तब यज्ञमें राष्ट्रका हवन आरम्भ होनेपर राजाके दुष्कर्मके कारण राष्ट्रका क्षय होने लगा ॥ २८–३१ ॥

ततः स चिन्तयामास ब्राह्मणस्य विचेष्टितम्। पुरोहितेन संयुक्तो रत्नान्यादाय सर्वशः॥ ३२॥
प्रसादनार्थं विप्रस्य ह्यवकीर्णं ययौ तदा। प्रसादितः स राज्ञा च तुष्टः प्रोवाच तं नृपम्॥ ३३॥
ब्राह्मणा नावमन्तव्याः पुरुषेण विजानता। अवज्ञातो ब्राह्मणस्तु हन्यात् त्रिपुरुषं कुलम्॥ ३४॥
एवमुक्त्वा स नृपतिं राज्येन यशसा पुनः। उत्थापयामास ततस्तस्य राज्ञो हिते स्थितः॥ ३५॥

(राष्ट्रको क्षीण होते देख) उसने विचार किया और यह इसे ब्राह्मणका विकर्म जानकर (उस ब्राह्मणको) प्रसन्न करनेके लिये समस्त रत्नोंको लेकर पुरोहितके साथ अवकीर्ण तीर्थमें गया (और उस) राजाने उन्हें प्रसन्न कर लिया। प्रसन्न होकर उन्होंने राजासे कहा—(राजन्!) विद्वान् मनुष्यको ब्राह्मणका अपमान नहीं करना चाहिये। अपमानित हुआ ब्राह्मण मनुष्यके कुलके तीन पुरुषों (पीढ़ियों) का विनाश कर देता है। ऐसा कहकर उन्होंने पुनः राजाको राज्य एवं यशके साथ सम्पन्न कर दिया और वे उस राजाके हितकारी हो गये ॥ ३२–३५॥

तस्मिंस्तीर्थे तु यः स्नाति श्रद्दधानो जितेन्द्रियः। स प्राप्नोति नरो नित्यं मनसा चिन्तितं फलम्॥ ३६॥
तत्र तीर्थं सुविख्यातं यायातं नाम नामतः। यस्येह यजमानस्य मधु सुस्राव वै नदी॥ ३७॥
तस्मिन् स्नातो नरो भक्त्या मुच्यते सर्वकिल्बिषैः। फलं प्राप्नोति यज्ञस्य अश्वमेधस्य मानवः॥ ३८॥
मधुस्रवं च तत्रैव तीर्थं पुण्यतमं द्विजाः। तस्मिन् स्नात्वा नरो भक्त्या मधुना तर्पयेत् पितॄन्॥ ३९॥
तत्रापि सुमहत्तीर्थं वसिष्ठोद्वाहसंज्ञितम्। तत्र स्नातो भक्तियुक्तो वासिष्ठं लोकमाप्नुयात्॥ ४०॥

इति श्रीवामनपुराणे एकोनचत्वारिंशोऽध्यायः॥ ३९॥

उस (अवकीर्ण) तीर्थमें जो जितेन्द्रिय मनुष्य श्रद्धापूर्वक स्नान करता है, वह नित्य मनोऽभिलषित फल प्राप्त करता है। वहाँ 'यायात' (ययातिका तीर्थ) नामसे सुविख्यात तीर्थ है, जहाँ यज्ञ करनेवालेके लिये नदीने मधु बहाया था। उसमें भक्तिपूर्वक स्नान करनेसे मनुष्य समस्त पापोंसे मुक्त हो जाता है एवं उसे अश्वमेधयज्ञका फल प्राप्त होता है। द्विजो! वहीं 'मधुस्रव' नामक पवित्र तीर्थ है। उसमें मनुष्यको भक्तिपूर्वक स्नान कर मधुसे पितरोंका तर्पण करना चाहिये। वहीं पर 'वसिष्ठोद्वाह' नामक सुन्दर महान् तीर्थ है, वहाँ भक्तियुक्त स्नान करने व्यक्ति महर्षि वसिष्ठके लोकको प्राप्त करता है ॥ ३६–४० ॥

इस प्रकार श्रीवामनपुराणमें उन्तालीसवाँ अध्याय समाप्त हुआ ॥ ३९ ॥

[अथ चत्वारिंशोऽध्यायः]

ऋषय ऊचुः

वसिष्ठस्यापवाहोऽसौ कथं वै सम्बभूव ह। किमर्थं सा सरिच्छ्रेष्ठा तमृषिं प्रत्यवाहयत्॥ १॥

चालीसवाँ अध्याय प्रारम्भ

(वसिष्ठापवाह नामक तीर्थका उत्पत्ति-प्रसङ्ग)

ऋषियोंने कहा (पूछा)—महाराज! यह वसिष्ठापवाह कैसे उत्पन्न हुआ? उस श्रेष्ठ सरिताने उन ऋषिको क्यों अपने प्रवाहमें बहा दिया था?॥ १॥

लोमहर्षण उवाच

विश्वामित्रस्य राजर्षेर्वसिष्ठस्य महात्मनः। भृशं वैरं बभूवेह तपःस्पर्धाकृते महत्॥ २॥
आश्रमो वै वसिष्ठस्य स्थाणुतीर्थे बभूव ह। तस्य पश्चिमदिग्भागे विश्वामित्रस्य धीमतः॥ ३॥
यत्रेष्ट्वा भगवान् स्थाणुः पूजयित्वा सरस्वतीम्। स्थापयामास देवेशो लिङ्गाकारां सरस्वतीम्॥ ४॥
वसिष्ठस्तत्र तपसा घोररूपेण संस्थितः। तस्येह तपसा हीनो विश्वामित्रो बभूव ह॥ ५॥

लोमहर्षण बोले—(ऋषियो!) राजर्षि विश्वामित्र एवं महात्मा वसिष्ठमें तपस्याके विषयमें परस्पर चुनौती होनेके कारण बड़ी भारी शत्रुता हो गयी। वसिष्ठका आश्रम स्थाणुतीर्थमें था और उसकी पश्चिम दिशामें बुद्धिमान् विश्वामित्र महर्षिका आश्रम था; जहाँ देवाधिदेव भगवान् शिवने यज्ञ करनेके बाद सरस्वतीकी पूजा कर मूर्तिके रूपमें सरस्वतीकी स्थापना की थी। वसिष्ठजी वहीं घोर तपस्यामें संलग्न थे। उनकी तपस्यासे विश्वामित्र (क्रमशः) हीनसे होने लगे॥ २–५॥

सरस्वतीं समाहूय इदं वचनमब्रवीत्। वसिष्ठं मुनिशार्दूलं स्वेन वेगेन आनय॥ ६॥
इहाहं तं द्विजश्रेष्ठं हनिष्यामि न संशयः। एतच्छ्रुत्वा तु वचनं व्यथिता सा महानदी॥ ७॥
तथा तां व्यथितां दृष्ट्वा वेपमानां महानदीम्। विश्वामित्रोऽब्रवीत् क्रुद्धो वसिष्ठं शीघ्रमानय॥ ८॥
ततो गत्वा सरिच्छ्रेष्ठा वसिष्ठं मुनिसत्तमम्। कथयामास रुदती विश्वामित्रस्य तद् वचः॥ ९॥

(एक बार) विश्वामित्रने सरस्वतीको बुलाकर यह वचन कहा—सरस्वति! तुम मुनिश्रेष्ठ वसिष्ठको अपने वेगसे बहा लाओ। मैं उन द्विजश्रेष्ठ वसिष्ठको यहाँ मारूँगा—इसमें संदेहकी बात नहीं है। इस-(विश्वामित्रकी बात)को सुनकर वह महानदी दुःखित हो गयी। (पर) विश्वामित्रने उस प्रकार दुःखित एवं काँपती हुई उस महानदीको देखकर क्रोधमें भरकर कहा कि वसिष्ठको शीघ्र लाओ। उसके बाद उस श्रेष्ठ नदीने मुनिश्रेष्ठके पास जाकर उनसे रोते हुए विश्वामित्रकी उस बातको कहा॥ ६–९॥

तपःक्षयविशीर्णां च भृशं शोकसमन्विताम्। उवाच स सरिच्छ्रेष्ठां विश्वामित्राय मां वह॥ १०॥
तस्य तद् वचनं श्रुत्वा कृपाशीलस्य सा सरित्। चालयामास तं स्थानात् प्रवाहेणाम्भसस्तदा॥ ११॥
स च कूलापहारेण मित्रावरुणयोः सुतः। उह्यमानश्च तुष्टाव तदा देवीं सरस्वतीम्॥ १२॥
पितामहस्य सरसः प्रवृत्तासि सरस्वति। व्याप्तं त्वया जगत् सर्वं तवैवाम्भोभिरुत्तमैः॥ १३॥

उन वसिष्ठजीने तपस्याके क्षयसे दुर्बल एवं अधिक शोक-संतप्त उस श्रेष्ठ सरिता-(सरस्वती-)से कहा—(तुम) विश्वामित्रके पास मुझे बहा ले चलो। उन दयालुके इस वचनको सुनकर उस सरस्वती सरिताने जलके (तेज) प्रवाहसे उन्हें उस स्थानसे बहाना आरम्भ किया। किनारेके कट जानेके कारण बहते हुए मित्रावरुणके पुत्र

वसिष्ठजी प्रसन्न होकर देवी सरस्वतीकी स्तुति करने लगे—सरस्वति ! आप ब्रह्माके सरोवरसे निकली हैं। आपने अपने उत्तम जलसे समस्त जगत्को व्याप्त कर दिया है ॥ १०–१३ ॥

त्वमेवाकाशगा देवी मेघेषु सृजसे पयः। सर्वास्त्वापस्त्वमेवेति त्वत्तो वयमधीमहे ॥ १४ ॥
पुष्टिर्धृतिस्तथा कीर्तिः सिद्धिः कान्तिः क्षमा तथा। स्वधा स्वाहा तथा वाणी तवायत्तमिदं जगत् ॥ १५ ॥
त्वमेव सर्वभूतेषु वाणीरूपेण संस्थिता। एवं सरस्वती तेन स्तुता भगवती सदा ॥ १६ ॥
सुखेनोवाह तं विप्रं विश्वामित्राश्रमं प्रति। न्यवेदयत्तदा खिन्ना विश्वामित्राय तं मुनिम् ॥ १७ ॥

'आप ही आकाशगामिनी देवी हैं और मेघोंमें जलको उत्पन्न करती हैं। आप ही सभी जलोंके रूपमें वर्तमान हैं। आपकी ही शक्तिसे हम लोग अध्ययन करते हैं। आप ही पुष्टि, धृति, कीर्ति, सिद्धि, कान्ति, क्षमा, स्वधा, स्वाहा तथा सरस्वती हैं। यह पूरा विश्व आपके ही अधीन है। आप ही समस्त प्राणियोंमें वाणीरूपसे स्थित हैं।' वसिष्ठजीने भगवती सरस्वतीकी इस प्रकार स्तुति की और सरस्वती नदीने उन विप्रदेवको विश्वामित्रके आश्रममें सुखपूर्वक पहुँचा दिया और खिन्न होकर उन मुनिको विश्वामित्रके लिये निवेदित कर दिया ॥ १४–१७ ॥

तमानीतं सरस्वत्या दृष्ट्वा कोपसमन्वितः। अथान्विष्यत् प्रहरणं वसिष्ठान्तकरं तदा ॥ १८ ॥
तं तु क्रुद्धमभिप्रेक्ष्य ब्रह्महत्याभयान्नदी।
अपोवाह वसिष्ठं तं मध्ये चैवाम्भसस्तदा। उभयोः कुर्वती वाक्यं वञ्चयित्वा च गाधिजम् ॥ १९ ॥
ततोऽपवाहितं दृष्ट्वा वसिष्ठमृषिसत्तमम्। अब्रवीत् क्रोधरक्ताक्षो विश्वामित्रो महातपाः ॥ २० ॥
यस्मान्मां सरितां श्रेष्ठे वञ्चयित्वा विनिर्गता। शोणितं वह कल्याणि रक्षोग्रामणिसंयुता ॥ २१ ॥

उसके बाद सरस्वतीद्वारा बहाकर लाये गये वसिष्ठको देखकर विश्वामित्र क्रोधसे भर गये और वसिष्ठका अन्त करनेवाला शस्त्र ढूँढ़ने लगे। उन्हें क्रोधसे भरा हुआ देखकर ब्रह्महत्याके भयसे डरती हुई वह सरस्वती नदी गाधिपुत्र विश्वामित्रको वञ्चित कर दोनोंकी बातोंका पालन करती हुई उन वसिष्ठको जलमें (पुनः) बहा ले गयी। उसके बाद ऋषिप्रवर वसिष्ठको (अपवाहित होते) देखकर महातपस्वी विश्वामित्रके नेत्र क्रोधसे लाल हो गये। फिर विश्वामित्रने कहा—ओ श्रेष्ठ नदी ! चूँकि तुम मुझे वञ्चितकर चली गयी हो, कल्याणि ! अतः श्रेष्ठ राक्षसोंसे संयुक्त होकर तुम शोणितका वहन करो—तुम्हारा जल रक्तसे युक्त हो जाय ॥ १८–२१ ॥

ततः सरस्वती शप्ता विश्वामित्रेण धीमता। अवहच्छोणितोन्मिश्रं तोयं संवत्सरं तदा ॥ २२ ॥
अथर्षयश्च देवाश्च गन्धर्वाप्सरसस्तथा। सरस्वतीं तदा दृष्ट्वा बभूवुर्भृशदुःखिताः ॥ २३ ॥
तस्मिंस्तीर्थवरे पुण्ये शोणितं समुपावहत्। ततो भूतपिशाचाश्च राक्षसाश्च समागताः ॥ २४ ॥
ततस्ते शोणितं सर्वे पिबन्तः सुखमासते।
तृप्ताश्च सुभृशं तेन सुखिता विगतज्वराः। नृत्यन्तश्च हसन्तश्च यथा स्वर्गजितस्तथा ॥ २५ ॥

उसके बाद बुद्धिमान् विश्वामित्रसे इस प्रकार शाप पाकर सरस्वतीने एक वर्षतक रक्तसे मिले हुए जलको बहाया। उसके पश्चात् सरस्वती नदीको रक्तसे मिश्रित जलवाली देखकर ऋषि, देवता, गन्धर्व और अप्सराएँ अत्यन्त दुःखित हो गयीं। (क्योंकि) उस पवित्र श्रेष्ठ तीर्थमें रुधिर ही बहने लगा। अतः वहाँ भूत, पिशाच, राक्षस एकत्र होने लगे। वे सभी रक्तका पान करते हुए वहाँ आनन्दपूर्वक रहने लगे। वे उससे अत्यन्त तृप्त, सुखी एवं निश्चिन्त होकर इस प्रकार नाचने एवं हँसने लगे, मानो उन्होंने स्वर्गको जीत लिया हो ॥ २२–२५ ॥

कस्यचित्त्वथ कालस्य ऋषयः सतपोधनाः। तीर्थयात्रां समाजग्मुः सरस्वत्यां तपोधनाः ॥ २६ ॥
तां दृष्ट्वा राक्षसैर्घोरैः पीयमानां महानदीम्। परित्राणे सरस्वत्याः परं यत्नं प्रचक्रिरे ॥ २७ ॥
ते तु सर्वे महाभागाः समागम्य महाव्रताः। आहूय सरितां श्रेष्ठामिदं वचनमब्रुवन् ॥ २८ ॥
किं कारणं सरिच्छ्रेष्ठे शोणितेन ह्रदो ह्ययम्। एवमाकुलतां यातः श्रुत्वा वेत्स्यामहे वयम् ॥ २९ ॥

कुछ समय बीतनेपर तपस्याके धनी ऋषिलोग तीर्थयात्रा करते-करते सरस्वतीके तटपर पहुँचे। (वहाँ) भयानक राक्षसोंके द्वारा पीती जाती हुई महानदी सरस्वतीको देखकर वे उसकी रक्षाके लिये महान् प्रयत्न करने लगे। और महान् व्रतोंका अनुष्ठान करनेवाले उन महाभागोंने श्रेष्ठ नदीको (पास) बुलाकर उससे यह वचन फिर कहा—श्रेष्ठ सरिते ! हम सब आपसे यह जानना चाहते हैं कि यह जलाशय रक्तसे भरकर ऐसा क्षुब्ध कैसे हुआ है ?॥ २६–२९ ॥

ततः सा सर्वमाचष्ट विश्वामित्रविचेष्टितम्।
ततस्ते मुनयः प्रीताः सरस्वत्यां समानयन्। अरुणां पुण्यतोयौघां सर्वदुष्कृतनाशनीम् ॥ ३० ॥
दृष्ट्वा तोयं सरस्वत्या राक्षसा दुःखिता भृशम्। ऊचुस्तान् वै मुनीन् सर्वान् दैन्ययुक्ताः पुनः पुनः ॥ ३१ ॥
वयं हि क्षुधिताः सर्वे धर्महीनाश्च शाश्वताः। न च नः कामकारोऽयं यद् वयं पापकारिणः ॥ ३२ ॥
युष्माकं चाप्रसादेन दुष्कृतेन च कर्मणा। पक्षोऽयं वर्धतेऽस्माकं यतः स्मो ब्रह्मराक्षसाः ॥ ३३ ॥

तब उसने विश्वामित्रके समस्त विक्रमोंका (उनके सामने ही) वर्णन किया। उसके पश्चात् प्रसन्न हुए मुनिजन सरस्वती तथा समस्त पापोंका विनाश करनेवाली अरुणा नदीको ले आये (जिससे सरस्वती-ह्रदका शोणित पवित्र जल हो गया) (पर) सरस्वतीके जलको (इस प्रकार शुद्ध हुआ) देखकर राक्षस बहुत दुःखित हो गये। वे दीनतापूर्वक उन सभी मुनियोंसे बार-बार कहने लगे कि हम सभी सदा भूखे एवं धर्मसे रहित रहते हैं। हम अपनी इच्छासे पापकर्म करनेवाले पापी नहीं बने हुए हैं, अपितु आप लोगोंकी अकृपा एवं अशोभन कर्मोंसे ही हमारा पक्ष बढ़ता रहता है; क्योंकि हम सभी ब्रह्मराक्षस हैं ॥ ३०–३३ ॥

एवं वैश्याश्च शूद्राश्च क्षत्रियाश्च विकर्मभिः। ये ब्राह्मणान् प्रद्विषन्ति ते भवन्तीह राक्षसाः ॥ ३४ ॥
योषितां चैव पापानां योनिदोषेण वर्द्धते। इयं संततिरस्माकं गतिरेषा सनातनी ॥ ३५ ॥
शक्ता भवन्तः सर्वेषां लोकानामपि तारणे। तेषां ते मुनयः श्रुत्वा कृपाशीलाः पुनश्च ते ॥ ३६ ॥
ऊचुः परस्परं सर्वे तप्यमानाश्च ते द्विजाः। क्षुतकीटावपन्नं च यच्चोच्छिष्टाशितं भवेत् ॥ ३७ ॥
केशावपन्नमाधूतं मारुतश्वासदूषितम्। एभिः संसृष्टमन्नं च भागं वै रक्षसां भवेत् ॥ ३८ ॥

इसी प्रकार जो क्षत्रिय, वैश्य, शूद्र, ब्राह्मणोंसे द्वेष करते हैं वे (ऐसे ही) विकर्म करनेके कारण राक्षस हो जाते हैं। पापिनी स्त्रियोंके योनिदोषसे हमारी यह संतति बढ़ती रहती है। यह हमारी प्राचीन गति है। आप लोग सभी लोकोंका उद्धार करनेमें समर्थ हैं। (लोमहर्षणजी कहते हैं—) द्विजो ! वे कृपालु मुनि उन सदाकी रीति ब्रह्मराक्षसोंके इन वचनोंको सुनकर बहुत दुःखी हुए और परस्पर परामर्शकर उनसे बोले—(ब्रह्मराक्षसो !) छींक तथा कीटके संसर्गसे दूषित, उच्छिष्ट भोजन, केशयुक्त, निरस्कृत एवं श्वासवायुसे दूषित अन्न तुम राक्षसोंका भाग होगा ॥ ३४–३८ ॥

तस्माज्ज्ञात्वा सदा विद्वान् अन्नान्येतानि वर्जयेत्। राक्षसानामसौ भुङ्क्ते यो भुङ्क्तेऽन्नमीदृशम् ॥ ३९ ॥
शोधयित्वा तु तत्तीर्थमृषयस्ते तपोधनाः। मोक्षार्थं रक्षसां तेषां संगमं तत्र कल्पयन् ॥ ४० ॥
अरुणायाः सरस्वत्याः संगमे लोकविश्रुते। त्रिरात्रोपोषितः स्नातो मुच्यते सर्वकिल्बिषैः ॥ ४१ ॥

प्राप्ते कलियुगे घोरे अधर्मे प्रत्युपस्थिते । अरुणासंगमे स्नात्वा मुक्तिमाप्नोति मानवः ॥ ४२ ॥
ततस्ते राक्षसाः सर्वे स्नाताः पापविवर्जिताः । दिव्यमाल्याम्बरधराः स्वर्गस्थितिसमन्विताः ॥ ४३ ॥

इति श्रीवामनपुराणे चत्वारिंशोऽध्यायः ॥ ४० ॥

(पुनः लोमहर्षणजी बोले—) ऋषियो ! इसको जानकर विद्वान् पुरुषको चाहिये कि इस प्रकारके अन्नोंको त्याग दे । इस प्रकारका अन्न खानेवाला व्यक्ति राक्षसोंका भाग खाता है । उन तपोधन ऋषियोंने उस तीर्थको छूकर उन राक्षसोंकी मुक्तिके लिये वहाँ एक संगमकी रचना की । [उसका फल इस प्रकार है—] लोक-प्रसिद्ध अरुणा और सरस्वतीके संगममें तीन दिनोंतक संयमपूर्वक स्नान करनेवाला (व्यक्ति) सभी पापोंसे मुक्त हो जाता है । (आगे भी) घोर कलियुग आनेपर तथा अधर्मका अधिक प्रसार हो जानेपर मनुष्य अरुणाके संगममें स्नान करके मुक्ति प्राप्त कर लेंगे । इसको सुननेके बाद उन सभी राक्षसोंने उसमें स्नान किया और वे निष्पाप हो गये तथा दिव्य माला और वस्त्र धारणकर स्वर्गमें विराजने लगे ॥ ३०–४३ ॥

इस प्रकार श्रीवामनपुराणमें चालीसवाँ अध्याय समाप्त हुआ ॥ ४० ॥



[अथैकचत्वारिंशोऽध्यायः]

लोमहर्षण उवाच

समुद्रास्तत्र चत्वारो दर्भिणा आहृताः पुरा । प्रत्येकं तु नरः स्नातो गोसहस्रफलं लभेत् ॥ १ ॥
यत्किंचित् क्रियते तस्मिंस्तपस्तीर्थे द्विजोत्तमाः । परिपूर्णं हि तत्सर्वमपि दुष्कृतकर्मणः ॥ २ ॥
शतसाहस्रिकं तीर्थं तथैव शतिकं द्विजाः । उभयोर्हि नरः स्नातो गोसहस्रफलं लभेत् ॥ ३ ॥
सोमतीर्थं च तत्रापि सरस्वत्यास्तटे स्थितम् । यस्मिन् स्नातस्तु पुरुषो राजसूयफलं लभेत् ॥ ४ ॥

एकतालीसवाँ अध्याय प्रारम्भ

(कुरुक्षेत्रके तीर्थों–शतसाहस्रिक, शतिक, रेणुका, ऋणमोचन, ओजस, पंचिदन्ति, प्राची सरस्वती; पञ्चवट, कुरुतीर्थ, अनरकतीर्थ, काम्यकवन आदिका वर्णन)

लोमहर्षणने कहा—प्राचीन कालकी बात है महर्षि दर्भि वहाँ चार समुद्रोंको ले आये थे । उनमेंसे प्रत्येक समुद्रमें स्नान करनेसे मनुष्योंको हजार गोदान करनेका फल प्राप्त होता है । द्विजोत्तमो ! इस तीर्थमें जो तपस्या की जाती है, वह पापीद्वारा की गयी होनेपर भी सिद्ध हो जाती है । द्विजो ! वहाँ शतसाहस्रिक एवं शतिक नामके दो तीर्थ हैं । उन दोनों ही तीर्थोंमें स्नान करनेवाला मनुष्य हजार गोदान करनेका फल प्राप्त करता है । वहीं सरस्वतीके तटपर सोम तीर्थ भी स्थित है, जिसमें स्नान करनेसे पुरुष राजसूययज्ञका फल प्राप्त करता है ॥ १–४ ॥

रेणुकाश्रममासाद्य श्रद्दधानो जितेन्द्रियः । मातृभक्त्या च यत्पुण्यं तत्फलं प्राप्नुयान्नरः ॥ ५ ॥
ऋणमोचनमासाद्य तीर्थं ब्रह्मनिषेवितम् ।
ऋणैर्मुक्तो भवेन्नित्यं देवर्षिपितृसम्भवैः । कुमारस्याभिषेकं च ओजसं नाम विश्रुतम् ॥ ६ ॥
तस्मिन् स्नातस्तु पुरुषो यशसा च समन्वितः । कुमारपुरमाप्नोति कृत्वा श्राद्धं च मानवः ॥ ७ ॥
चैत्रषष्ठ्यां सिते पक्षे यस्तु श्राद्धं करिष्यति । गयाश्राद्धे च यत्पुण्यं तत्पुण्यं ॥ ८ ॥

माताकी सेवा करनेसे जो पुण्य प्राप्त होता है, उस पुण्य-फलको इन्द्रियोंपर विजय प्राप्त करनेवाला श्रद्धालु मनुष्य रेणुकातीर्थमें जाकर प्राप्त कर लेता है और ब्रह्माद्वारा सेवित ऋणमोचननामके तीर्थमें जाकर देव-ऋण, ऋषि-ऋण और पितृ-ऋणसे छूट जाता है। कुमार (कार्तिकेय) का अभिषेकस्थल ओजसनामसे विख्यात है; उस तीर्थमें स्नान करनेसे मनुष्य कीर्ति प्राप्त करता है और वहाँ श्राद्ध करनेसे उसे कार्तिकेयके लोककी प्राप्ति होती है। चैत्रमासकी शुक्ला षष्ठी तिथिमें जो मनुष्य वहाँ श्राद्ध करेगा, वह गयामें श्राद्ध करनेसे जो पुण्य प्राप्त होता है, उस पुण्यको प्राप्त करता है ॥ ५-८ ॥

संनिहत्यां यथा श्राद्धं राहुग्रस्ते दिवाकरे। तथा श्राद्धं तत्र कृतं नात्र कार्या विचारणा ॥ ९ ॥
ओजसे ह्यक्षयं श्राद्धं वायुना कथितं पुरा। तस्मात् सर्वप्रयत्नेन श्राद्धं तत्र समाचरेत् ॥ १० ॥
यस्तु स्नानं श्रद्धधानश्चैत्रषष्ठ्यां करिष्यति। अक्षय्यमुदकं तस्य पितॄणामुपजायते ॥ ११ ॥
तत्र पञ्चवटं नाम तीर्थं त्रैलोक्यविश्रुतम्। महादेवः स्थितो यत्र योगमूर्तिधरः स्वयम् ॥ १२ ॥

राहुद्वारा सूर्यके ग्रस्त हो जानेपर (सूर्यग्रहण लगनेपर) सन्निहति तीर्थमें किये गये श्राद्धके समान वहाँका श्राद्ध पुण्यप्रद होता है; इसमें अन्यथा विचार नहीं करना चाहिये। पूर्वसमयमें वायुने कहा था कि ओजसतीर्थमें किये गये श्राद्धका क्षय नहीं होता है। इसलिये प्रयत्नपूर्वक वहाँ श्राद्ध करना चाहिये। चैत्र मासके शुक्लपक्षकी षष्ठी तिथिके दिन जो उसमें श्रद्धापूर्वक स्नान करेगा, उसके पितरोंको अक्षय (कभी भी क्षय न होनेवाले) जलकी प्राप्ति होगी। तीनों लोकोंमें विख्यात एक 'पञ्चवट' नामका तीर्थ है, जहाँ स्वयं भगवान् महादेव योगसाधना करनेकी मुद्रामें विराजमान हैं ॥ ९-१२ ॥

तत्र स्नात्वाऽर्चयित्वा च देवदेवं महेश्वरम्। गाणपत्यमवाप्नोति दैवतैः सह मोदते ॥ १३ ॥
कुरुतीर्थं च विख्यातं कुरुणा यत्र वै तपः। तप्तं सुघोरं क्षेत्रस्य कर्षणार्थं द्विजोत्तमाः ॥ १४ ॥
तस्य घोरेण तपसा तुष्ट इन्द्रोऽब्रवीद् वचः। राजर्षे परितुष्टोऽस्मि तपसाऽनेन सुव्रत ॥ १५ ॥
यज्ञं ये च कुरुक्षेत्रे करिष्यन्ति शतक्रतोः। ते गमिष्यन्ति सुकृताँल्लोकान् पापविवर्जितान् ॥ १६ ॥
अवहस्य ततः शक्रो जगाम त्रिदिवं प्रभुः। आगम्यागम्य चैवैनं भूयो भूयो वहस्य च ॥ १७ ॥
शतक्रतुरनिर्विण्णः पृष्ट्वा पृष्ट्वा जगाम ह।
यदा तु तपसोग्रेण चकर्ष देहमात्मनः। ततः शक्रोऽब्रवीत् प्रीत्या ब्रूहि यत्ते चिकीर्षितम् ॥ १८ ॥

उस (पञ्चवट) स्थानपर स्नान करके देवाधिदेव महादेवकी पूजा करनेवाला मनुष्य गणपतिका पद और देवताओंके साथ आनन्द प्राप्त करता हुआ प्रसन्न रहता है। श्रेष्ठ द्विजो ! 'कुरुतीर्थ' विख्यात तीर्थ है, जिसमें कुरुने कीर्तिकी प्राप्तिके लिये धर्मकी खेती करनेके लिये तपस्या की थी। उनकी घोर तपस्यासे प्रसन्न होकर इन्द्रने कहा—सुन्दर व्रतोंके करनेवाले राजर्षि ! तुम्हारी इस तपस्यासे मैं सन्तुष्ट हूँ। (सुनो) इस कुरुक्षेत्रमें जो लोग इन्द्रका यज्ञ करेंगे, वे लोग पापरहित हो जायँगे, और पवित्र लोकोंको प्राप्त होंगे। इतना कहकर इन्द्रदेव मुस्कराकर स्वर्ग चले गये। बिना खिन्न हुए इन्द्र बारंबार आये और उपहासपूर्वक उनसे (उनकी योजनाके सम्बन्धमें कुछ) पूछ-पूछकर चले गये। कुरुने जब उग्र तपस्याद्वारा अपनी देहका कर्षण किया तो इन्द्रने प्रेमपूर्वक उनसे कहा—'कुरु ! तुम्हें जो कुछ करनेकी इच्छा हो उसे कहो' ॥ १३-१८ ॥

कुरुरुवाच

ये श्रद्धधानास्तीर्थेऽस्मिन् मानवा निवसन्ति ह। ते प्राप्नुवन्तु सदनं ब्रह्मणः परमात्मनः ॥ १९ ॥
अन्यत्र कृतपापा ये पञ्चपातकदूषिताः। अस्मिंस्तीर्थे नराः स्नात्वा मुक्ता यान्तु परां गतिम् ॥ २० ॥

कुरुक्षेत्रे पुण्यतमं कुरुतीर्थं द्विजोत्तमाः। तं दृष्ट्वा पापमुक्तस्तु परं पदमवाप्नुयात् ॥ २१ ॥
कुरुतीर्थे नरः स्नातो मुक्तो भवति किल्बिषैः। कुरुणा समनुज्ञातः प्राप्नोति परमं पदम् ॥ २२ ॥

कुरुने कहा—इन्द्रदेव! जो श्रद्धालु मानव इस तीर्थमें निवास करते हैं, वे परमात्मस्वरूप परब्रह्मके लोकको प्राप्त करते हैं। इस स्थानसे अन्यत्र पाप करनेवालों एवं महापातकोंसे दूषित मनुष्य भी इस तीर्थमें स्नान करनेसे मुक्त होकर परमगतिको प्राप्त करता है। (लोमहर्षणने कहा—) श्रेष्ठ ब्राह्मणो! कुरुक्षेत्रमें कुरुतीर्थ सर्वाधिक पवित्र है। उसका दर्शन कर पापात्मा मनुष्य (भी) मोक्ष प्राप्त कर लेता है तथा कुरुतीर्थमें स्नानकर पापोंसे छूट जाता है एवं कुरुकी आज्ञासे परमपद (मोक्ष)को प्राप्त करता है ॥ १९–२२ ॥

स्वर्गद्वारं ततो गच्छेच्छिवद्वारे व्यवस्थितम्। तत्र स्नात्वा शिवद्वारे प्राप्नोति परमं पदम् ॥ २३ ॥
ततो गच्छेदनरकं तीर्थं त्रैलोक्यविश्रुतम्। यत्र पूर्वे स्थितो ब्रह्मा दक्षिणे तु महेश्वरः ॥ २४ ॥
रुद्रपत्नी पश्चिमतः पद्मनाभोत्तरे स्थितः। मध्ये अनरकं तीर्थं त्रैलोक्यस्यापि दुर्लभम् ॥ २५ ॥

फिर (कुरुतीर्थमें स्नान करनेके बाद) शिवद्वारमें स्थित स्वर्गद्वारको जाय (और स्नान करे); क्योंकि वहाँ (शिवद्वारमें) स्नान करनेसे मनुष्य परमपदको प्राप्त करता है। शिवद्वार जानेके पश्चात् तीनों लोकोंमें विख्यात अनरक नामके तीर्थमें जाय। उस अनरकके पूर्वमें ब्रह्मा, दक्षिणमें महेश्वर, पश्चिममें रुद्रपत्नी एवं उत्तरमें पद्मनाभ और इन सबके मध्यमें अनरक नामका तीर्थ स्थित है; वह तीनों लोकोंके लिये भी दुर्लभ है—॥ २३–२५ ॥

यस्मिन् स्नातस्तु मुच्येत पातकैरुपपातकैः। वैशाखे च यदा षष्ठी मङ्गलस्य दिनं भवेत् ॥ २६ ॥
तदा स्नानं तत्र कृत्वा मुक्तो भवति पातकैः। यः प्रयच्छेत करकांश्चतुरो भक्ष्यसंयुतान् ॥ २७ ॥
कलशं च तथा दद्यादपूपैः परिशोभितम्। देवताः प्रीणयेत् पूर्वं करकैरन्नसंयुतैः ॥ २८ ॥
ततस्तु कलशं दद्यात् सर्वपातकनाशनम्। अनेनैव विधानेन यस्तु स्नानं समाचरेत् ॥ २९ ॥
स मुक्तः कलुषैः सर्वैः प्रयाति परमं पदम्। अन्यत्रापि यदा षष्ठी मङ्गलेन भविष्यति ॥ ३० ॥

जिस-(अनरकतीर्थ-)में स्नान करनेवाला मनुष्य छोटे-बड़े सभी पापोंसे छूट जाता है। जब वैशाखमासकी षष्ठी तिथिको मङ्गल दिन हो तब वहाँ स्नान करनेसे मनुष्य पापोंसे छूट जाता है। (उस दिन) भक्ष्य पदार्थसे संयुक्त चार करवा (करवे या कमण्डलु) एवं मालपुओं आदिसे सुशोभित कलशका दान करे। पहले अन्नसे युक्त करवोंसे देवताकी पूजा करे, फिर सम्पूर्ण पापोंके नाश करनेवाले कलशका दान करे। जो मानव इस विधानसे स्नान करता है वह सम्पूर्ण पापोंसे छूट जायगा और परमपदको प्राप्त करेगा। इसके अतिरिक्त (वैशाखके सिवा) अन्य समयमें भी मङ्गलके दिन षष्ठी तिथि होनेपर उस तीर्थमें की हुई पूर्वोक्त क्रिया मुक्ति देनेवाली होगी ॥ २६–३० ॥

तथापि मुक्तिफलदा क्रिया तस्मिन् भविष्यति। तीर्थे च सर्वतीर्थानां यस्मिन् स्नातो द्विजोत्तमाः ॥ ३१ ॥
सर्वदेवैरनुज्ञातः परं पदमवाप्नुयात्। काम्यकं च वनं पुण्यं सर्वपातकनाशनम् ॥ ३२ ॥
यस्मिन् प्रविष्टमात्रस्तु मुक्तो भवति किल्बिषैः। यमाश्रित्य वनं पुण्यं सविता प्रकटः स्थितः ॥ ३३ ॥
पूषा नाम द्विजश्रेष्ठा दर्शनान्मुक्तिमाप्नुयात्।
आदित्यस्य दिने प्राप्ते तस्मिन् स्नातस्तु मानवः। विशुद्धदेहो भवति मनसा चिन्तितं लभेत् ॥ ३४ ॥

इति श्रीवामनपुराणे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रेष्ठ द्विजो ! वहीं समस्त पापोंका विनाश करनेवाला तीर्थ-शिरोमणि काम्यकवन नामका एक तीर्थ है। जो मनुष्य उसमें स्नान करता है, वह सभी देवोंकी अनुमतिसे परमपदको प्राप्त करता है। इस वनमें प्रवेश करनेसे ही मनुष्य अपने समस्त पापोंसे छूट जाता है। इस पवित्र वनमें पूषा नामके सूर्यभगवान् प्रत्यक्ष रूपसे स्थित हैं। द्विजश्रेष्ठो ! उन सूर्यभगवान्के दर्शनसे मुक्ति प्राप्त होती है। रविवारके दिन उस तीर्थमें स्नान करनेवाला मनुष्य विशुद्ध-देह हो जाता है और अपने मनोरथको प्राप्त करता है ॥ ३१–३४ ॥

इस प्रकार श्रीवामनपुराणमें इकतालीसवाँ अध्याय समाप्त हुआ ॥ ४१ ॥

[अथ द्विचत्वारिंशोऽध्यायः]

ऋषय ऊचुः

काम्यकस्य तु पूर्वेण कुञ्जं देवैर्निषेवितम्। तस्य तीर्थस्य सम्भूतिं विस्तरेण ब्रवीहि नः ॥ १ ॥

बयालीसवाँ अध्याय प्रारम्भ

(काम्यकवन-तीर्थका प्रसङ्ग, सरस्वती नदीकी महिमा और तत्सम्बद्ध तीर्थोंका वर्णन)

ऋषियोंने पूछा—(लोमहर्षणजी !) काम्यकवनके पूर्वमें स्थित कुञ्जका आश्रयण देवताओंने किया था, पर उस काम्यकवन तीर्थकी उत्पत्ति कैसे हुई, इसे आप हमें विस्तारसे बतलाइये ॥ १ ॥

लोमहर्षण उवाच

शृण्वन्तु मुनयः सर्वे तीर्थमाहात्म्यमुत्तमम्। ऋषीणां चरितं श्रुत्वा मुक्तो भवति किल्बिषैः ॥ २ ॥
नैमिषेयाश्च ऋषयः कुरुक्षेत्रे समागताः। सरस्वत्यास्तु स्नानार्थं प्रवेशं ते न लेभिरे ॥ ३ ॥
ततस्ते कल्पयामासुस्तीर्थं यज्ञोपवीतिकम्। शेषास्तु मुनयस्तत्र न प्रवेशं हि लेभिरे ॥ ४ ॥
रन्तुकस्याश्रमात्तावद् यावत्तीर्थं सचक्रकम्। ब्राह्मणैः परिपूर्णं तु दृष्ट्वा देवी सरस्वती ॥ ५ ॥
हितार्थं सर्वविप्राणां कृत्वा कुञ्जानि सा नदी। प्रयाता पश्चिमं मार्गं सर्वभूतहिते स्थिता ॥ ६ ॥

लोमहर्षणजी बोले—(उत्तर दिया)—मुनियो ! आप सभी लोग इस तीर्थके श्रेष्ठ माहात्म्यको सुनें। ऋषियोंके चरित्रको सुननेसे मनुष्य पापोंसे मुक्त हो जाता है। (एक बारकी बात है) नैमिषारण्यके निवासी ऋषि सरस्वती नदीमें स्नान करनेके लिये कुरुक्षेत्र आये। परंतु वे सरस्वतीमें स्नान करनेके लिये प्रवेश न पा सके। तब उन्होंने यज्ञोपवीतिक नामक एक तीर्थकी कल्पना कर ली। (पर फिर भी) शेष मुनिलोग उसमें भी प्रवेश न पा सके। सरस्वतीने देखा कि रन्तुक आश्रमसे सचक्रकतक जितने भी तीर्थस्थल हैं, वे सब-के-सब ब्राह्मणोंसे भर गये हैं। इसलिये सभी ब्राह्मणोंके कल्याणके लिये उस सरस्वती नदीने कुञ्ज बना दिया और सभी प्राणियोंकी भलाईमें तत्पर होकर वह पश्चिम मार्गको (पश्चिमवाहिनी बनकर) चल पड़ी ॥ २–६ ॥

पूर्वप्रवाहे यः स्नाति गङ्गास्नानफलं लभेत्। प्रवाहे दक्षिणे तस्या नर्मदा सरितां वरा ॥ ७ ॥
पश्चिमे तु दिशाभागे यमुना संश्रिता नदी। यदा उत्तरतो याति सिन्धुर्भवति सा नदी ॥ ८ ॥
एवं दिशाप्रवाहेण याति पुण्या सरस्वती। तस्यां स्नातः सर्वतीर्थे स्नातो भवति मानवः ॥ ९ ॥
ततो गच्छेद् द्विजश्रेष्ठा मदनस्य महात्मनः। तीर्थं त्रैलोक्यविख्यातं विहारं नाम नामतः ॥ १० ॥

जो मनुष्य सरस्वतीके पूर्वी प्रवाहमें स्नान करता है, उसे गङ्गामें स्नान करनेका फल प्राप्त होता है। उसके दक्षिणी प्रवाहमें सरिताओंमें श्रेष्ठ नर्मदा एवं पश्चिम दिशाकी ओर यमुना नदी संश्रित है। किंतु जब वह

उत्तर दिशाकी ओर बहने लगती है तो वह सिन्धु हो जाती है । इस प्रकार विभिन्न दिशाओंमें वह पवित्र सरस्वती नदी (भिन्न भिन्न रूपोंमें) प्रवाहित होती है । उस सरस्वती नदीमें स्नान करनेवाला मनुष्य मानो सभी तीर्थोंमें स्नान कर लेता है । द्विजश्रेष्ठो ! सरस्वती नदीमें स्नान करनेके बाद तीर्थसेवीको तीनों लोकोंमें प्रसिद्ध महात्मा मदनके 'विहार' नामक तीर्थमें जाना चाहिये ॥ ७–१० ॥

यत्र देवाः समागम्य शिवदर्शनकाङ्क्षिणः । समागता न चापश्यन् देवं देव्या समन्वितम् ॥ ११ ॥
ते स्तुवन्तो महादेवं नन्दिनं गणनायकम् । ततः प्रसन्नो नन्दीशः कथयामास चेष्टितम् ॥ १२ ॥
भवस्य उमया सार्धं विहारे क्रीडितं महत् । तच्छ्रुत्वा देवतास्तत्र पत्नीमाहूय क्रीडिताः ॥ १३ ॥
तेषां क्रीडाविनोदेन तुष्टः प्रोवाच शंकरः । योऽस्मिंस्तीर्थे नरः स्नाति विहारे श्रद्धयान्वितः ॥ १४ ॥
धनधान्यप्रियैर्युक्तो भवते नात्र संशयः । दुर्गातीर्थं ततो गच्छेद् दुर्गया सेवितं महत् ॥ १५ ॥

जहाँपर भगवान् शिवके दर्शनाभिलाषी देवता आये, पर वे उमासहित शिवका दर्शन न कर पाये । वे लोग गणनायक महादेव नन्दीकी स्तुति करने लगे । इससे नन्दीश्वर प्रसन्न हो गये और (उन्होंने) उमाके साथ की जा रही शिवकी महती विहार-क्रीडाका वर्णन किया । यह सुनकर देवताओंने भी अपनी पत्नियोंको बुलाया और उनके साथ (उन लोगोंने भी) क्रीडा की । उनके क्रीडा-विनोदसे शंकर प्रसन्न हो गये और बोले—इस विहार-तीर्थमें जो श्रद्धाके साथ स्नान करेगा, वह निःसंदेह धन-धान्य एवं प्रिय सम्बन्धियोंसे सम्पन्न होगा । उमा-शिवके विहार-स्थलकी यात्राके बाद दुर्गासे प्रतिष्ठित उस महान् दुर्गातीर्थमें जाना चाहिये—॥ ११–१५ ॥

यत्र स्नात्वा पितॄन् पूज्य न दुर्गतिमवाप्नुयात् । तत्रापि च सरस्वत्याः कूपं त्रैलोक्यविश्रुतम् ॥ १६ ॥
दर्शनान्मुक्तिमाप्नोति सर्वपातकवर्जितः । यस्तत्र तर्पयेद् देवान् पितॄंश्च श्रद्धयान्वितः ॥ १७ ॥
अक्षय्यं लभते सर्वं पितृतीर्थं विशिष्यते । मातृहा पितृहा यश्च ब्रह्महा गुरुतल्पगः ॥ १८ ॥
स्नात्वा शुद्धिमवाप्नोति यत्र प्राची सरस्वती । देवमार्गप्रविष्टा च देवमार्गेण निःसृता ॥ १९ ॥

जहाँ स्नानकर पितरोंकी पूजा करनेसे मनुष्यको दुर्गतिकी प्राप्ति नहीं होती । उसी स्थानपर तीनों लोकोंमें प्रसिद्ध सरस्वतीका एक कूप है । उसका दर्शन करनेमात्रसे ही मनुष्य सभी पापोंसे रहित हो जाता है और मुक्ति प्राप्त करता है । जो वहाँ श्रद्धापूर्वक देवता और पितरोंका तर्पण करता है, वह व्यक्ति समस्त अक्षय्य (कभी भी नष्ट न होनेवाले) पदार्थोंको प्राप्त करता है । पितृतीर्थकी विशेष महत्ता है । उस तीर्थमें माता, पिता और ब्रह्मका घातक तथा गुरुपत्नीगामी भी स्नान करनेसे (ही) शुद्ध हो जाता है । वहीं पूर्व दिशाकी ओर बहनेवाली सरस्वती देव-मार्गमें प्रविष्ट होकर देवमार्गसे ही निकली हुई है ॥ १६–१९ ॥

प्राची सरस्वती पुण्या अपि दुष्कृतकर्मणाम् । त्रिरात्रं ये करिष्यन्ति प्राचीं प्राप्य सरस्वतीम् ॥ २० ॥
न तेषां दुष्कृतं किंचिद् देहमाश्रित्य तिष्ठति । नरनारायणौ देवौ ब्रह्मा स्थाणुस्तथा रविः ॥ २१ ॥
प्राचीं दिशं निषेवन्ते सदा देवाः सवासवाः । ये तु श्राद्धं करिष्यन्ति प्राचीमाश्रित्य मानवाः ॥ २२ ॥
तेषां न दुर्लभं किंचिदिह लोके परत्र च । तस्मात् प्राची सदा सेव्या पञ्चम्यां च विशेषतः ॥ २३ ॥
पञ्चम्यां सेवमानस्तु लक्ष्मीवाञ्जायते नरः । तत्र तीर्थमौशनसं त्रैलोक्यस्यापि दुर्लभम् ॥ २४ ॥
उशना यत्र संसिद्ध आराध्य परमेश्वरम् । ग्रहमध्येषु पूज्यते तस्य तीर्थस्य सेवनात् ॥ २५ ॥

पूर्ववाहिनी सरस्वती दुष्कर्मियोंके लिये भी पुण्य देनेवाली है । जो प्राची सरस्वतीके निकट जाकर त्रिरात्र करता है, उसके शरीरमें कोई पाप नहीं रह जाता । नर और नारायण—ये दोनों देव, ब्रह्मा, स्थाणु तथा सूर्य

एवं इन्द्रसहित सभी देवता प्राची दिशाका सेवन करते हैं। जो मानव प्राची सरस्वतीमें श्राद्ध करेंगे, उन्हें इस लोक तथा परलोकमें कुछ भी दुर्लभ नहीं होगा। अतः प्राची सरस्वतीका सर्वदा सेवन करना चाहिये—विशेषतः पञ्चमीके दिन। पञ्चमी तिथिको प्राची सरस्वतीका सेवन करनेवाला मनुष्य लक्ष्मीवान् होता है। वहीं तीनों लोकोंमें दुर्लभ औशनस नामका तीर्थ है, जहाँ परमेश्वरकी आराधना कर शुक्राचार्य सिद्ध हो गये थे। उस तीर्थका सेवन करनेसे ग्रहोंके मध्य उनकी पूजा होती है॥ २०—२५॥

एवं शुक्रेण मुनिना सेवितं तीर्थमुत्तमम्। ये सेवन्ते श्रद्दधानास्ते यान्ति परमां गतिम्॥ २६॥
यस्तु श्राद्धं नरो भक्त्या तस्मिंस्तीर्थे करिष्यति। पितरस्तारितास्तेन भविष्यन्ति न संशयः॥ २७॥
चतुर्मुखं ब्रह्मतीर्थं सरो मर्यादया स्थितम्। ये सेवन्ते चतुर्दश्यां सोपवासा वसन्ति च॥ २८॥
अष्टम्यां कृष्णपक्षस्य चैत्रे मासि द्विजोत्तमाः। ते पश्यन्ति परं सूक्ष्मं यस्मान्नावर्तते पुनः॥ २९॥
स्थाणुतीर्थं ततो गच्छेत् सहस्रलिङ्गशोभितम्। तत्र स्थाणुवटं दृष्ट्वा मुक्तो भवति किल्बिषैः॥ ३०॥

इति श्रीवामनपुराणे द्विचत्वारिंशोऽध्यायः॥ ४२॥

इस प्रकार शुक्रमुनिके द्वारा सेवित उत्तम तीर्थका जो श्रद्धापूर्वक (स्वयं) सेवन करते हैं, वे परम गतिको प्राप्त होते हैं। उस तीर्थमें भक्तिपूर्वक जो व्यक्ति श्राद्ध करेगा, उसके द्वारा उसके पितर निःसन्देह तर जायँगे। द्विजोत्तमो! जो सरोवरकी मर्यादासे स्थित चतुर्मुख ब्रह्मतीर्थमें चतुर्दशीके दिन उपवास-व्रत करते हैं तथा चैत्रमासके कृष्णपक्षकी अष्टमीतक निवास करके तीर्थका सेवन करते हैं, उन्हें परम सूक्ष्म-(तत्त्व-) का दर्शन प्राप्त होता है; जिससे वे पुनः संसारमें नहीं आते। ब्रह्मतीर्थके नियम पालन करनेके बाद सहस्रलिङ्गसे शोभित स्थाणुतीर्थमें जाय। वहाँ स्थाणुवटका दर्शन प्राप्त कर मनुष्य पापोंसे विमुक्त हो जाता है॥ २६—३०॥

इस प्रकार श्रीवामनपुराणमें बयालीसवाँ अध्याय समाप्त हुआ॥ ४२॥

[अथ त्रिचत्वारिंशोऽध्यायः]

ऋषय ऊचुः

स्थाणुतीर्थस्य माहात्म्यं वटस्य च महामुने। सांनिहत्यसरोत्पत्तिं पूरणं पांशुना ततः॥ १॥
लिङ्गानां दर्शनात् पुण्यं स्पर्शनेन च किं फलम्। तथैव सरमाहात्म्यं ब्रूहि सर्वमशेषतः॥ २॥

तैंतालीसवाँ अध्याय प्रारम्भ

(स्थाणुतीर्थ, स्थाणुवट और सांनिहत्य सरोवरके सम्बन्धमें प्रश्न और ब्रह्माके हवालेसे लोमहर्षणका उत्तर)

(स्थाणुतीर्थमें जाने तथा स्थाणुवटके दर्शनसे मुक्ति-प्राप्ति होनेकी बात सुननेके बाद) ऋषियोंने पूछा—महामुने! आप स्थाणुतीर्थ एवं स्थाणुवटके माहात्म्य तथा सांनिहत्य सरोवरकी उत्पत्ति और इन्द्रद्वारा उसके धूलसे भरे जानेके कारणका वर्णन करें। (इसी प्रकार) लिङ्गोंके दर्शनसे होनेवाले पुण्य तथा स्पर्शसे होनेवाले फल और सरोवरके माहात्म्यका भी पूर्णतः वर्णन करें॥ १—२॥

लोमहर्षण उवाच

शृण्वन्तु मुनयः सर्वे पुराणं वामनं महत्। यच्छ्रुत्वा मुक्तिमाप्नोति प्रसादाद् वामनस्य तु॥ ३॥
सनत्कुमारमासीनं स्थाणोर्वटसमीपतः। ऋषिभिर्बालखिल्याद्यैर्ब्रह्मपुत्रैर्महात्मभिः॥ ४॥
मार्कण्डेयो मुनिस्तत्र विनयेनाभिगम्य च। पप्रच्छ सरमाहात्म्यं प्रमाणं च स्थितिं तथा॥ ५॥

लोमहर्षणजी बोले—मुनियो ! आपलोग महान् वामनपुराणको श्रवण करें, जिसका श्रवण कर मनुष्य वामनभगवान्‌की कृपासे मुक्ति पा लेता है। (एक समय) ब्रह्माके पुत्र सनत्कुमार महात्मा वालखिल्य आदि ऋषियोंके साथ स्थाणुवटके पास बैठे हुए थे। महर्षि मार्कण्डेयने उनके निकट जाकर नम्रतापूर्वक सरोवरके माहात्म्य, उसके विस्तार और स्थितिके विषयमें पूछा—॥ ३–५ ॥

मार्कण्डेय उवाच

ब्रह्मपुत्र महाभाग सर्वशास्त्रविशारद। ब्रूहि मे सरमाहात्म्यं सर्वपापभयापहम् ॥ ६ ॥
कानि तीर्थानि दृश्यानि गुह्यानि द्विजसत्तम। लिङ्गानि ह्यतिपुण्यानि स्थाणोर्यानि समीपतः ॥ ७ ॥
येषां दर्शनमात्रेण मुक्तिं प्राप्नोति मानवः। वटस्य दर्शनं पुण्यमुत्पत्तिं कथयस्व मे ॥ ८ ॥
प्रदक्षिणायां यत्पुण्यं तीर्थस्नानेन यत्फलम्। गुह्येषु चैव दृष्टेषु यत्पुण्यमभिजायते ॥ ९ ॥
देवदेवो यथा स्थाणुः सरोमध्ये व्यवस्थितः। किमर्थं पांसुना शक्रस्तीर्थं पूरितवान् पुनः ॥ १० ॥
स्थाणुतीर्थस्य माहात्म्यं चक्रतीर्थस्य यत्फलम्। सूर्यतीर्थस्य माहात्म्यं सोमतीर्थस्य ब्रूहि मे ॥ ११ ॥
शंकरस्य च गुह्यानि विष्णोः स्थानानि यानि च। कथयस्व महाभाग सरस्वत्याः सविस्तरम् ॥ १२ ॥
ब्रूहि देवाधिदेवस्य माहात्म्यं देव तत्त्वतः। विरिञ्चस्य प्रसादेन विदितं सर्वमेव च ॥ १३ ॥

मार्कण्डेयजीने कहा (पूछा)—सर्वशास्त्रविशारद महाभाग ब्रह्मपुत्र (सनत्कुमार) ! आप मुझसे सभी पापोंके नष्ट करनेवाले सरोवरके माहात्म्यको कहिये। द्विजश्रेष्ठ ! स्थाणुतीर्थके पास कौन-कौन-से तीर्थ दृश्य हैं और कौन-कौन-से अदृश्य और कौन-से लिङ्ग अत्यन्त पवित्र हैं, जिनका दर्शन कर मनुष्य मुक्ति प्राप्त करता है। मुने ! आप स्थाणुवटके दर्शनसे होनेवाले पुण्य तथा उसकी उत्पत्तिके विषयमें भी कहिये—बताइये। इनकी प्रदक्षिणा करनेसे होनेवाले पुण्य, तीर्थमें स्नान करनेसे मिलनेवाले फल एवं गुप्त तीर्थों तथा प्रकट तीर्थोंके दर्शनसे मिलनेवाले पुण्यका भी वर्णन करें। प्रभो ! सरोवरके मध्यमें देवाधिदेव स्थाणु (शिव) किस प्रकार स्थित हुए और किस कारणसे इन्द्रने इस तीर्थको पुनः धूलिसे भर दिया ? आप स्थाणुतीर्थका माहात्म्य, चक्रतीर्थका फल एवं सूर्यतीर्थ तथा सोमतीर्थका माहात्म्य—इन सबको मुझसे कहिये। महाभाग ! सरस्वतीके निकट शंकर तथा विष्णुके जो-जो गुप्त स्थान हैं उनका भी आप विस्तारपूर्वक वर्णन करें। देव ! देवाधिदेवके माहात्म्यको आप भलीभाँति बतावें; क्योंकि ब्रह्माजी कृपासे आपको सब कुछ विदित है ॥ ६–१३ ॥

लोमहर्षण उवाच

मार्कण्डेयवचः श्रुत्वा ब्रह्मात्मा स महामुनिः। अतिभक्त्या तु तीर्थस्य प्रवणीकृतमानसः ॥ १४ ॥
पर्यङ्कं शिथिलीकृत्वा नमस्कृत्वा महेश्वरम्। कथयामास तत्सर्वं यच्छ्रुतं ब्रह्मणः पुरा ॥ १५ ॥

लोमहर्षणने कहा (उत्तर दिया)—मार्कण्डेयके वचनको सुनकर ब्रह्मस्वरूप महामुनिका मन उस तीर्थके प्रति अत्यन्त भक्ति-प्रवण होनेसे गद्गद हो गया। उन्होंने आसनसे उठकर भगवान् शंकरको प्रणाम किया तथा प्राचीनकालमें ब्रह्मासे इसके विषयमें जो कुछ सुना था उन सबका वर्णन किया ॥ १४–१५ ॥

सनत्कुमार उवाच

नमस्कृत्य महादेवमीशानं वरदं शिवम्। उत्पत्तिं च प्रवक्ष्यामि तीर्थानां ब्रह्मभाषिताम् ॥ १६ ॥
पूर्वमेकार्णवे घोरे नष्टे स्थावरजङ्गमे। बृहदण्डमभूदेकं प्रजानां बीजसम्भवम् ॥ १७ ॥
तस्मिन्नण्डे स्थितो ब्रह्मा शयनायोपचक्रमे। सहस्रयुगपर्यन्तं सुप्त्वा स प्रत्यबुध्यत ॥ १८ ॥
सुप्तोत्थितस्तदा ब्रह्मा शून्यं लोकमपश्यत। सृष्टिं चिन्तयतस्तस्य रजसा मोहितस्य च ॥ १९ ॥

सनत्कुमारने कहा—मैं कल्याणकर्ता, वरदानी महादेव ईशानको नमस्कार कर ब्रह्मासे कहे हुए तीर्थकी उत्पत्तिके विषयमें वर्णन करूँगा। प्राचीन कालमें जब महाप्रलय हो गया और सर्वत्र केवल जल-ही-जल हो गया एवं उसमें समस्त चर-अचर जगत् नष्ट हो गया, तब प्रजाओंके बीजस्वरूप एक 'अण्ड' उत्पन्न हुआ। ब्रह्मा उस अण्डमें स्थित थे। उन्होंने उसमें अपने सोनेका उपक्रम किया। फिर तो वे हजारों युगोंतक सोते रहे। उसके बाद जगे। ब्रह्मा जब सोकर उठे, तब उन्होंने संसारको शून्य देखा। (जब उन्होंने संसारमें कुछ भी नहीं देखा) तब रजोगुणसे आविष्ट हो गये और सृष्टिके विषयमें विचार करने लगे ॥ १६–१९ ॥

रजः सृष्टिगुणं प्रोक्तं सत्त्वं स्थितिगुणं विदुः। उपसंहारकाले च तमोगुणः प्रवर्तते ॥ २० ॥
गुणातीतः स भगवान् व्यापकः पुरुषः स्मृतः। तेनेदं सकलं व्याप्तं यत्किञ्चिज्जीवसंज्ञितम् ॥ २१ ॥
स ब्रह्मा स च गोविन्द ईश्वरः स सनातनः। यस्तं वेद महात्मानं स सर्वं वेद मोक्षवित् ॥ २२ ॥
किं तेषां सकलैस्तीर्थैराश्रमैर्वा प्रयोजनम्। येषामनन्तकं चित्तमात्मन्येव व्यवस्थितम् ॥ २३ ॥

रजोगुणको सृष्टिकारक तथा सत्त्वगुणको स्थितिकारक माना गया है। उपसंहार करनेके समयमें तमोगुणकी प्रवृत्ति होती है। परंतु भगवान् वास्तवमें व्यापक एवं गुणातीत हैं। वे पुरुष नामसे कहे जाते हैं। जीव नामसे निर्दिष्ट सारे पदार्थ उन्हींसे ओतप्रोत हैं। वे ही ब्रह्मा हैं, वे ही विष्णु हैं और वे ही सनातन महेश्वर हैं। मोक्षके ज्ञानी जिस प्राणीने उन महान् आत्माको समझ लिया, उसने सब कुछ जान लिया। जिस मनुष्यका अनन्त (बहुमुखी) चित्त उन परमात्मामें ही भलीभाँति स्थित है, उनके लिये सारे तीर्थ एवं आश्रमोंसे क्या प्रयोजन ? ॥ २०-२३ ॥

आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलसमाधियुक्ता।
तस्यां स्नातः पुण्यकर्मा पुनाति न वारिणा शुद्ध्यति चान्तरात्मा ॥ २४ ॥
एतत्प्रधानं पुरुषस्य कर्म यदात्मसम्बोधसुखे प्रविष्टम्।
ज्ञेयं तदेव प्रवदन्ति सन्तस्तत्प्राप्य देही विजहाति कामान् ॥ २५ ॥
नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च।
शीले स्थितिर्दण्डविधानवर्जनमक्रोधनश्चोपरमः क्रियाभ्यः ॥ २६ ॥
एतद् ब्रह्म समासेन मयोक्तं ते द्विजोत्तम। यज्ज्ञात्वा ब्रह्म परमं प्राप्स्यसि त्वं न संशयः ॥ २७ ॥
इदानीं शृणु चोत्पत्तिं ब्रह्मणः परमात्मनः। इमं चोदाहरन्त्येव श्लोकं नारायणं प्रति ॥ २८ ॥

यह आत्मारूपी नदी शील और समाधिसे युक्त है। इसमें संयमरूपी पवित्र तीर्थ है, जो सत्यरूपी जलसे परिपूर्ण है। जो पुण्यात्मा इस (नदी)में स्नान करता है, वह पवित्र हो जाता है, (पिये जानेवाले सामान्य) जलसे अन्तरात्माकी शुद्धि नहीं होती। इसलिये पुरुषका मुख्य कर्तव्य है कि वह आत्मज्ञानरूपी सुखमें प्रविष्ट रहे। महात्मा लोग उसीको 'ज्ञेय' कहते हैं। शरीर धारण करनेवाला देही जब उसे पा लेता है, तब सभी इच्छाओंको छोड़ देता है। ब्राह्मणके लिये एकता, समता, सत्यता, मर्यादामें स्थिति, दण्ड-विधानका त्याग, क्रोध न करना एवं (सांसारिक) क्रियाओंसे विराग ही धन है, इनके समान उनके लिये कोई अन्य धन नहीं है। द्विजोत्तम ! मैंने थोड़ी मात्रामें तुमसे यह जो ब्रह्मके विषयमें कहा है, इसे जानकर तुम निःसंदेह परम ब्रह्मको प्राप्त करोगे। अब तुम परमात्मा ब्रह्मकी उत्पत्तिके विषयमें सुनो। उन नारायणके विषयमें लोग इस श्लोकका उदाहरण दिया करते हैं—॥ २४–२८ ॥

आपो नारा वै तनव इत्येवं नाम शुश्रुमः। तासु शेते स यस्माच्च तेन नारायणः स्मृतः ॥ २९ ॥
विबुद्धः सलिले तस्मिन् विज्ञायान्तर्गतं जगत्। अण्डं बिभेद भगवांस्तस्मादोमित्यजायत ॥ ३० ॥
ततो भूरभवत् तस्माद् भुव इत्यपरः स्मृतः। स्वःशब्दश्च तृतीयोऽभूद् भूर्भुवःस्वेति संज्ञितः॥ ३१ ॥
तस्मात्तेजः समभवत् तत्सवितुर्वरेण्यं यत्। उदकं शोषयामास यत्तेजोऽण्डविनिःसृतम् ॥ ३२ ॥

'आप्' (जल) ही को 'नार', (एवं परमात्मा) को 'तनु'—ऐसा हमने सुन रखा है। 'वे (परमात्मा) उसमें शयन करते हैं, जिससे वे (शब्दव्युत्पत्तिसे) 'नारायण' शब्दसे स्मरण किये गये हैं। जलमें सोनेके बाद जाग जानेपर उन्होंने जगत्‌को अपनेमें प्रविष्ट जानकर अण्डको तोड़ दिया, उससे 'ॐ' शब्दकी उत्पत्ति हुई। इसके बाद उससे (पहली बार) भूः, दूसरी बार भुवः एवं तीसरी बार स्वःकी उत्पत्ति (ध्वनि) हुई। इन तीनोंका नाम क्रमशः मिलकर 'भूर्भुवःस्वः' हुआ। उस सविता देवताका जो वरेण्य तेज है, वह उसीसे उत्पन्न हुआ। अण्डसे जो तेज निकला, उसने जलको सुखा दिया ॥ २९–३२ ॥

तेजसा शोषितं शेषं कललत्वमुपागतम्। कललाद् बुद्बुदं ज्ञेयं ततः काठिन्यतां गतम् ॥ ३३ ॥
काठिन्याद् धरणी ज्ञेया भूतानां धारिणी हि सा। यस्मिन् स्थाने स्थितं ह्यण्डं तस्मिन् संनिहितं सरः॥ ३४ ॥
यदाद्यं निःसृतं तेजस्तस्मादादित्य उच्यते। अण्डमध्ये समुत्पन्नो ब्रह्मा लोकपितामहः ॥ ३५ ॥
उल्बं तस्याभवन्मेरुर्जरायुः पर्वताः स्मृताः। गर्भोदकं समुद्राश्च तथा नद्यः सहस्रशः ॥ ३६ ॥
नाभिस्थाने यदुदकं ब्रह्मणो निर्मलं महत्। महत्सरस्तेन पूर्णं विमलेन वराम्भसा ॥ ३७ ॥

तेजसे जलके सोखे जानेपर शेष जल कललकी आकृतिमें बदल गया। कललसे बुद्बुद हुआ और उसके बाद वह कठोर हो गया। कठोर हो जानेके कारण वह बुद्बुद भूतोंको धारण करनेवाली धरणी बन गया। जिस स्थानपर अण्ड स्थित था, वहीं संनिहित नामका सरोवर है। तेजके आदिमें उत्पन्न होनेके कारण उसे 'आदित्य' नामसे कहा जाता है। फिर सारे संसारके पितामह ब्रह्मा अण्डके मध्यमें उत्पन्न हुए। उस अण्डका उल्ब (गर्भका आवरण) मेरु पर्वत है एवं अन्य पर्वत उसके जरायु (झिल्ली) माने जाते हैं। समुद्र एवं सहस्रों नदियाँ गर्भके जल हैं। ब्रह्माके नाभि-स्थानमें जो विशाल निर्मल जल राशि है, उस स्वच्छ श्रेष्ठ जलसे महान् सरोवर भरा-पूरा है ॥ ३३–३७ ॥

तस्मिन् मध्ये स्थाणुरूपी वटवृक्षो महामनाः। तस्माद् विनिर्गता वर्णा ब्राह्मणाः क्षत्रिया विशः ॥ ३८ ॥
शूद्राश्च तस्मादुत्पन्नाः शुश्रूषार्थं द्विजन्मनाम्।
ततश्चिन्तयतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः। मनसा मानसा जाताः सनकाद्या महर्षयः ॥ ३९ ॥
पुनश्चिन्तयतस्तस्य प्रजाकामस्य धीमतः। उत्पन्ना ऋषयः सप्त ते प्रजापतयोऽभवन् ॥ ४० ॥
पुनश्चिन्तयतस्तस्य रजसा मोहितस्य च। वालखिल्या समुत्पन्नास्तपःस्वाध्यायतत्पराः ॥ ४१ ॥

उस सरोवरके मध्यमें स्थाणुके आकारका महान् विशाल एक वटवृक्ष है। ब्राह्मण, क्षत्रिय और वैश्य—ये तीनों वर्ण उससे निकले और द्विजोंकी शुश्रूषा करनेके लिये उसीसे शूद्रोंकी भी उत्पत्ति हुई। (इस प्रकार चारों वर्णोंकी सृष्टि सरोवरके मध्यमें स्थाणुरूपसे स्थित वटवृक्षसे हुई)। उसके बाद सृष्टिकी चिन्ता करते हुए अव्यक्त-जन्मा ब्रह्माके मनसे सनकादि महर्षियोंकी उत्पत्ति हुई। फिर प्रजाकी इच्छासे चिन्तन कर रहे मतिमान् ब्रह्मासे सात ऋषि उत्पन्न हुए। वे प्रजापति हुए। रजोगुणसे मोहित होकर ब्रह्माने जब पुनः चिन्तन किया, तब तप एवं स्वाध्यायमें परायण वालखिल्य ऋषियोंकी उत्पत्ति हुई ॥ ३८–४१ ॥

ते सदा स्नाननिरता देवार्चनपरायणाः। उपवासैर्व्रतैस्तीव्रैः शोषयन्ति कलेवरम् ॥ ४२ ॥
वानप्रस्थेन विधिना अग्निहोत्रसमन्विताः। तपसा परमेणेह शोषयन्ति कलेवरम् ॥ ४३ ॥
दिव्यं वर्षसहस्रं ते कृशा धमनिसंतताः। आराधयन्ति देवेशं न च तुष्यति शंकरः ॥ ४४ ॥
ततः कालेन महता उमया सह शंकरः। आकाशमार्गेण तदा दृष्ट्वा देवी सुदुःखिता ॥ ४५ ॥
प्रसाद्य देवदेवेशं शंकरं प्राह सुव्रता। क्लिश्यन्ते ते मुनिगणा देवदारुवनाश्रयाः ॥ ४६ ॥
तेषां क्लेशक्षयं देव विधेहि कुरु मे दयाम्। किं वेदधर्मनिष्ठानामनन्तं देव दुष्कृतम् ॥ ४७ ॥
नाद्यापि येन शुद्ध्यन्ति शुष्कस्नाय्वस्थिशोषिताः।
तच्छ्रुत्वा वचनं देव्याः पिनाकी पातितान्धकः। प्रोवाच प्रहसन् मूर्ध्नि चारुचन्द्रांशुशोभितः ॥ ४८ ॥

वे सर्वदा स्नान (शुद्धि) करनेमें निरत तथा देवताओंकी पूजा करनेमें विशेषरूपसे लगे रहते तथा उपवासों एवं तीव्र व्रतोंसे अपने शरीरको सुखाये जा रहे थे। अग्निहोत्रसे युक्त होकर वानप्रस्थकी विधिसे वे उत्कृष्ट तपस्या करते और अपने शरीर सुखाते जाते थे। वे लोग अत्यन्त दुर्बल एवं कंकाल-काय होकर सहस्र दिव्य वर्षोंतक देवेशकी उपासना करते रहे; परंतु भगवान् शंकर प्रसन्न न हुए। उसके बहुत दिनोंके बाद उमाके साथ भगवान् शंकर आकाश-मार्गसे भ्रमण कर रहे थे। धार्मिक कार्योंको करनेवाली उमा (बालखिल्योंको) इस प्रकारकी दशा (कंकालमात्र) देखकर दुःखी हो गयीं और दुःखी होकर देवदेवेश शंकरको प्रसन्नकर कहने लगीं—देव ! देवदारु वनमें रहनेवाले वे मुनिगण क्लेश उठा रहे हैं। देव ! मेरे ऊपर दया करें। आप उनके क्लेशका विनाश करें। देव ! वैदिक धर्ममें निष्ठा रखनेवाले इन (तपस्वियों) के कौन ऐसा अनन्त दुष्कृत है, जिससे ये कङ्कालमात्र होनेपर भी अबतक शुद्ध नहीं हुए ? अन्धकको मार गिरानेवाले, चन्द्रमाकी मनोहर किरणोंसे सुशोभित सिरवाले पिनाकधारी शंकरजी उमाकी बातको सुनकर हँसते हुए बोले—॥ ४२—४८ ॥

श्रीमहादेव उवाच

न वेत्सि देवि तत्त्वेन धर्मस्य गहना गतिः। नैते धर्मं विजानन्ति न च कामविवर्जिताः ॥ ४९ ॥
न च क्रोधेन निर्मुक्ताः केवलं मूढबुद्धयः। एतच्छ्रुत्वाऽब्रवीद् देवी मा मैवं शंसितव्रतान् ॥ ५० ॥
देव प्रदर्शयात्मानं परं कौतूहलं हि मे। स इत्युक्त उवाचेदं देवीं देवः स्मिताननः ॥ ५१ ॥
तिष्ठ त्वमत्र यास्यामि यत्रैते मुनिपुंगवाः। साधयन्ति तपो घोरं दर्शयिष्यामि चेष्टितम् ॥ ५२ ॥

श्रीमहादेवजी बोले—देवि ! धर्मकी गति गहन होती है। तुम उसे तत्त्वतः नहीं जानती। ये लोग न तो धर्मज्ञ हैं और न कामशून्य। ये क्रोधसे मुक्त भी नहीं हैं और विचार-रहित हैं। यह सुनकर उमादेवीने कहा—नहीं, व्रत धारण करनेवाले इन लोगोंको ऐसा मत कहिये; (प्रत्युत) देव ! आप अपनेको प्रकट करें। निश्चय ही मुझे बड़ा कौतूहल है। उमाके ऐसा कहनेपर शंकरने मुस्कुराकर देवीसे इस प्रकार कहा—अच्छा, तुम यहाँ रुको। ये मुनिश्रेष्ठ जहाँ घोर तपस्याकी साधना कर रहे हैं, वहाँ जाकर मैं इनकी चेष्टा कैसी है, उसे दिखलाता हूँ ॥ ४९—५२ ॥

इत्युक्ता तु ततो देवी शंकरेण महात्मना। गच्छस्वेत्याह मुदिता भर्तारं भुवनेश्वरम् ॥ ५३ ॥
यत्र ते मुनयः सर्वे काष्ठलोष्ठसमाः स्थिताः। अधीयाना महाभागाः कृताग्निसदनक्रियाः ॥ ५४ ॥
तान् विलोक्य ततो देवो नग्नः सर्वाङ्गसुन्दरः। वनमालाकृतापीडो युवा भिक्षाकपालभृत् ॥ ५५ ॥
आश्रमे पर्यटन् भिक्षां मुनीनां दर्शनं प्रति। देहि भिक्षां ततश्चोक्त्वा ह्याश्रमादाश्रमं ययौ ॥ ५६ ॥

जब महात्मा शंकरने देवी उमासे इस प्रकार कहा तब उमादेवी प्रसन्न हो गयीं और भुवनोंके पालन करनेवाले भुवनेश्वर शिवसे बोलीं—अच्छा, जिस स्थानपर लकड़ी और मिट्टीके ढेलेके समान निरीह, अग्निहोत्री एवं अध्ययनमें लगे हुए मुनिगण रहते हैं, उस स्थानपर आप जायँ। (फिर उमाद्वारा इस प्रकार प्रेरित किये जानेपर शंकरजी मुनिमण्डलीकी ओर जानेके लिये प्रस्तुत हो गये) फिर शंकरने उस मुनिमण्डलीको देखकर वनमाला धारण कर लिया। तब वे सर्वाङ्गसुन्दर(पर) नग्न-सुडौल देह धारण कर युवाके रूपमें हो गये और भिक्षा-पात्र हाथमें लेकर मुनियोंके सामने भिक्षाके लिये भ्रमण करते हुए 'भिक्षा दो' यह कहते हुए एक आश्रमसे दूसरे आश्रममें जाने लगे ॥ ५३-५६ ॥

तं विलोक्याश्रमगतं योषितो ब्रह्मवादिनाम्। सकौतुकस्वभावेन तस्य रूपेण मोहिताः ॥ ५७ ॥
प्रोचुः परस्परं नार्य एहि पश्याम भिक्षुकम्। परस्परमिति चोक्त्वा गृह्य मूलफलं बहु ॥ ५८ ॥
गृहाण भिक्षामूचुस्तास्तं देवं मुनियोषितः। स तु भिक्षाकपालं तं प्रसार्य बहु सादरम् ॥ ५९ ॥
देहि देहि शिवं वोऽस्तु भवतीभ्यस्तपोवने।
हसमानस्तु देवेशस्तत्र देव्या निरीक्षितः। तस्मै दत्त्वैव तां भिक्षां पप्रच्छुस्तं स्मरातुराः ॥ ६० ॥

एक आश्रमसे दूसरे आश्रममें घूम रहे उन नग्न युवाको देखकर ब्रह्मवादियोंकी स्त्रियाँ उत्सुकताके स्वभाववश उनके रूपसे मोहित हो गयीं और परस्परमें कहने लगीं—आओ, भिक्षुकको देखा जाय। आपसमें इस प्रकार कहकर बहुत-सा मूल-फल लेकर मुनि-पत्नियोंने उन देवसे कहा—आप भिक्षा ग्रहण करें। उन्होंने भी अत्यन्त आदरसे उस भिक्षापात्रको फैलाकर (सामने दिखाकर) कहा—तपोवनवासिनियो! (भिक्षा) दो, दो! आप सबका कल्याण हो। पार्वतीजी वहाँ हँसते हुए शंकरको देख रही थीं। कामातुर मुनिपत्नियोंने उस नग्न युवाको भिक्षा देकर उनसे पूछा ॥ ५७-६० ॥

नार्य ऊचुः

कोऽसौ नाम व्रतविधिस्त्वया तापस सेव्यते।
यत्र नग्नेन लिङ्गेन वनमालाविभूषितः। भवान् वै तापसो हृद्यो हृद्याः स्मो यदि मन्यसे ॥ ६१ ॥
इत्युक्तस्तापसीभिस्तु प्रोवाच हसिताननः। इदमीदृग् व्रतं किंचिन्न रहस्यं प्रकाश्यते ॥ ६२ ॥
शृण्वन्ति बहवो यत्र तत्र व्याख्या न विद्यते। अस्य व्रतस्य सुभगा इति मत्वा गमिष्यथ ॥ ६३ ॥
एवमुक्तास्तदा तेन ताः प्रत्यूचुस्तदा मुनिम्। रहस्ये हि गमिष्यामो मुने नः कौतुकं महत् ॥ ६४ ॥

मुनिपत्नियोंने पूछा—तापस! आप किस व्रतके विधानका पालन कर रहे हैं, जिसमें वनमालासे विभूषित हृदयहारी तापसीका सुन्दर स्वरूप धारण कर नग्न-मूर्ति बनना पड़ा है? आप हमारे हृदयमें आनन्दप्रद तापस हैं, यदि आप मानें तो हम भी आपकी मनोऽनुकूल प्रिया हो सकती हैं। उन्होंने तपस्विनियोंके इस प्रकार कहनेपर हँसते हुए कहा—यह व्रत ऐसा है कि इसका कुछ भी रहस्य प्रकट नहीं किया जा सकता। सौभाग्यशालिनियो! जहाँ बहुत-से सुननेवाले हों वहाँ इस व्रतकी व्याख्या नहीं की जा सकती। इसलिये यह जानकर आप सभी चली जायँ। उनके ऐसा कहनेपर उन्होंने मुनिसे कहा—मुने! हम सब (यह जाननेके लिये) एकान्तमें चलेंगी; (क्योंकि) हमें महान् कौतूहल हो रहा है ॥ ६१-६४ ॥

इत्युक्त्वा तास्तदा तं वै जगृहुः पाणिपल्लवैः। काचित् कण्ठे सकन्दर्पा बाहुभ्यामपरास्तथा ॥ ६५ ॥
जानुभ्यामपरा नार्यः केशेषु ललितापराः। अपरास्तु कटीरन्ध्रे अपराः पादयोरपि ॥ ६६ ॥
क्षोभं विलोक्य मुनय आश्रमेषु स्वयोषिताम्। हन्यतामिति संभाष्य काष्ठपाषाणपाणयः ॥ ६७ ॥
पातयन्ति स्म देवस्य लिङ्गमुद्धृत्य भीषणम्। पातिते तु ततो लिङ्गे गतोऽन्तर्धानमीश्वरः ॥ ६८ ॥

यह कहकर उन सभीने उनको अपने कोमल हाथोंसे पकड़ लिया। कुछ कामसे आतुर होकर कण्ठसे लिपट गयीं और कुछने उन्हें भुजाओंमें बाँध लिया; कुछ स्त्रियोंने उन्हें घुटनोंसे पकड़ लिया; कुछ सुन्दरी स्त्रियाँ उनके केश छूने लगीं; और कुछ उनकी कमरसे लिपट गयीं एवं कुछने उनके पैरोंको पकड़ लिया। मुनियोंने आश्रममें अपनी स्त्रियोंकी अधीरता देख 'मारो-मारो'—इस प्रकार कहते हुए हाथोंमें डंडा और पत्थर लेकर शिवके लिङ्गको ही उखाड़कर फेंक दिया। लिङ्गके गिरा दिये जानेपर भगवान् शंकर अन्तर्हित हो गये ॥ ६५–६८ ॥

देव्या स भगवान् रुद्रः कैलासं नगमाश्रितः। पतिते देवदेवस्य लिङ्गे नष्टे चराचरे ॥ ६९ ॥
क्षोभो बभूव सुमहानृषीणां भावितात्मनाम्। एवं देवे तदा तत्र वर्तति व्याकुलीकृते ॥ ७० ॥
उवाचैको मुनिवरस्तत्र बुद्धिमतां वरः। न वयं विद्मः सद्भावं तापसस्य महात्मनः ॥ ७१ ॥
विरिञ्चिं शरणं यामः स हि ज्ञास्यति चेष्टितम्। एवमुक्ताः सर्व एव ऋषयो लज्जिता भृशम् ॥ ७२ ॥

वे भगवान् रुद्र उमादेवीके साथ कैलास पर्वतपर चले गये। देवदेव शंकरके लिङ्गके गिरनेपर प्रायः समस्त चर-अचर जगत् नष्ट हो गया। इससे आत्मनिष्ठ महर्षियोंको व्याकुलता हुई। इसी प्रकार देवके (भी) व्याकुल हो जानेपर एक अत्यन्त बुद्धिमान् श्रेष्ठ मुनिने कहा——हम उन महात्मा तापसके सद्भाव (सदाशय)को नहीं जानते। हम ब्रह्माकी शरणमें चलें। वे ही उनकी चेष्टा (रहस्य) समझ सकेंगे। ऐसा कहनेपर सभी ऋषि अत्यन्त लज्जित हो गये ॥ ६९–७२ ॥

ब्रह्मणः सदनं जग्मुर्देवैः सह निषेवितम्। प्रणिपत्याथ देवेशं लज्जयाऽधोमुखाः स्थिताः ॥ ७३ ॥
अथ तान् दुःखितान् दृष्ट्वा ब्रह्मा वचनमब्रवीत्। अहो मुग्धा यदा यूयं क्रोधेन कलुषीकृताः ॥ ७४ ॥
न धर्मस्य क्रिया काचिज्ज्ञायते मूढबुद्धयः। श्रूयतां धर्मसर्वस्वं तापसाः क्रूरचेष्टिताः ॥ ७५ ॥
विदित्वा यद् बुधः क्षिप्रं धर्मस्य फलमाप्नुयात्। योऽसावात्मनि देहेऽस्मिन् विभुर्नित्यो व्यवस्थितः ॥ ७६ ॥
सोऽनादिः स महास्थाणुः पृथक्त्वे परिसूचितः। मणिर्यथोपधानेन धत्ते वर्णोज्ज्वलोऽपि वै ॥ ७७ ॥
तन्मयो भवते तद्वदात्माऽपि मनसा कृतः। मनसो भेदमाश्रित्य कर्मभिश्चोपचीयते ॥ ७८ ॥
ततः कर्मवशाद् भुङ्क्ते संभोगान् स्वर्गनारकान्। तन्मनः शोधयेद् धीमाञ्ज्ञानयोगाद्युपक्रमैः ॥ ७९ ॥

फिर, वे लोग देवताओंसे उपासित ब्रह्माके लोकमें गये। वहाँ देवेश (ब्रह्मा)को प्रणाम कर लज्जासे मुख नीचा कर खड़े हो गये। उसके बाद ब्रह्माने उन्हें दुःखी देखकर यह वचन कहा——अहो, क्रोध करनेसे तुम सबका मन कलुषित हो गया है, इसलिये मूढ़ हो गये हो। मूढ बुद्धिवालो ! तुम सब धर्मकी कोई वास्तविक क्रिया नहीं जानते। अप्रिय कर्म करनेवाले तापसो ! धर्मके सारभूत रहस्यको सुनो, जिसे जानकर बुद्धिमान् मनुष्य शीघ्र ही धर्मका फल प्राप्त करता है। हम सबके इस शरीरमें रहनेवाला जो नित्य विभु (परमेश्वर) है, वह आदि-अन्त-रहित एवं महा स्थाणु है। (विचार करनेपर) वह (देही) इस शरीरसे अलग प्रतीत होता है। जिस प्रकार उज्ज्वल वर्णकी मणि भी आश्रयके प्रभावसे उसी रूपकी भासती है, उसी प्रकार आत्मा भी मनसे संयुक्त होकर मनके भेदका आश्रय कर कर्मोंसे ढक जाता है। उसके बाद कर्मवश वह स्वर्गीय तथा नारकीय भोगोंको भोगता रहता है। बुद्धिमान् व्यक्तिको चाहिये कि ज्ञान तथा योग आदि उपायोंद्वारा मनका शोधन करे ॥ ७३–७९ ॥

तस्मिन्शुद्धे ह्यन्तरात्मा स्वयमेव निराकुलः। न शरीरस्य संक्लेशैरपि निर्दहनात्मकैः ॥ ८० ॥
शुद्धिमाप्नोति पुरुषः संशुद्धं यस्य नो मनः। क्रिया हि नियमार्थाय पातकेभ्यः प्रकीर्तिताः ॥ ८१ ॥
यस्मादव्याहितं देहं न शीघ्रं शुद्ध्यते किल। तेन लोकेषु मार्गोऽयं सत्पथस्य प्रवर्त्तितः ॥ ८२ ॥
वर्णाश्रमविभागोऽयं लोकाध्यक्षेण केनचित्। निर्मितो मोहमाहात्म्यं चिह्नं चोत्तमभागिनाम् ॥ ८३ ॥

मनके शुद्ध होनेपर अन्तरात्मा अपने आप निर्मल हो जाता है। जिसका मन शुद्ध नहीं है, ऐसा पुरुष शरीरको सुखानेवाले क्लेशोंके द्वारा शुद्ध नहीं होता। पर्पोसे बचनेके लिये ही (धर्म) क्रियाकलाप विशाल हुआ है, अत अत्यन्त पापपूर्ण शरीर (सत)शीघ्र शुद्ध नहीं होता। इसीलिये लोकमें सत्य।—शास्त्रविहित क्रियाओंका यह मार्ग प्रवर्तित हुआ है। किसी दिव्यद्रष्टा ...स्वामीने उत्तम भाग्यवालोंके निमित्त मोक्ष-माहात्म्यके प्रतीकस्वरूप इस वर्णाश्रम विभागका निर्माण किया है ॥ ८०–८३ ॥

भवन्त क्रोधकामाभ्यामभिभूताश्रमे स्थिता। ज्ञानिनामाश्रमो वेश्म अनाश्रममयोगिनाम् ॥ ८४ ॥
क्व च न्यस्तसमस्तेच्छा क्व च नारीमयो भ्रम। क्व क्रोधमादृश घोर येनात्मान न जानथ ॥ ८५ ॥
यत्क्रोधनो यजति यच्च ददाति नित्य यद् वा तपस्तपति यच्च जुहोति तस्य।
प्राप्नोति नैव किमपीह फल हि लोके मोघ फल भवति तस्य हि क्रोधनस्य ॥ ८६ ॥

इति श्रीवामनपुराणे त्रिचत्वारिंशोऽध्याय ॥ ४३ ॥

आप लोग आश्रममें रहते हुए भी क्रोध तथा कामके वशीभूत हैं। ज्ञानियोंके लिये घर ही आश्रम है और अयोगियों (अज्ञानियों) के लिये आश्रम भी अनाश्रम है। कहाँ समस्त कामनाओंका त्याग और कहाँ नारीमय यह भ्रम जाल। (कहाँ तप और) कहाँ तो इस प्रकारका क्रोध जिससे तुम लोग अपने आत्मा (शिव)को नहीं पहचान पाते। क्रोधी पुरुष लोकमें जो सतत यज्ञ करता है जो दान देता है अथवा जो तप या हवन करता है उसका कोई फल उसे नहीं मिलता उस क्रोधीके सभी कर्म व्यर्थ होते हैं ॥ ८४–८६ ॥

इस प्रकार श्रीवामनपुराणमें तैंतालीसवाँ अध्याय समाप्त हुआ ॥ ४३ ॥

[अथ चतुश्चत्वारिंशोऽध्याय]

सनत्कुमार उवाच

ब्रह्मणा वचन श्रुत्वा ऋषय सर्व एव ते। पुनरेव च पप्रच्छुर्जगत श्रेयकारणम् ॥ १ ॥

चौवालीसवाँ अध्याय प्रारम्भ

(ऋषियोंसहित ब्रह्माजीका शंकरजीकी शरणमें जाना और स्तवन स्थाण्वीश्वरमाहात्म्य और हरिहररूप शंकरकी स्तुति एव लिङ्गका सन्निधान)

सनत्कुमारने कहा—उन सभी ऋषियोंने ब्रह्माजी की वाणीको सुनकर संसारके कल्याणार्थ पुन उपाय पूछा ॥ १ ॥

ब्रह्मोवाच

गच्छाम शरण देव शूलपाणि त्रिलोचनम्। प्रसादाद् देवदेवस्य भविष्यथ यथा पुरा ॥ २ ॥
इत्युक्ता ब्रह्मणा सार्धं कैलास गिरिमुत्तमम्। ददृशुस्ते समासीनमुमया सहित हरम् ॥ ३ ॥
तत स्तोतु समारब्धो ब्रह्मा लोकपितामह। देवाधिदेव वरद त्रैलोक्यस्य प्रभु शिवम् ॥ ४ ॥

ब्रह्माने कहा—(उत्तर दिया) (आओ) हम सभी लोग हाथमें शूल धारण करनेवाले त्रिनेत्रधारी भगवान् शंकरकी शरणमें चलें। तुम सब लोग उन्हीं देवदेवके प्रसादसे पहलेजैसे हो जाओगे। ब्रह्माके ऐसा कहनेपर वे लोग उनके साथ श्रेष्ठ पर्वत कैलासपर चले गये और वहाँ उन लोगोंने उमा (पार्वती) के साथ बैठे हुए शंकरका दर्शन किया। उसके बाद संसारके पितामह ब्रह्माजीने देवोंके देव तीनों लोकोंके स्वामी वरदाता भगवान् शंकरकी स्तुति करनी आरम्भ की— ॥ २–४ ॥

ब्रह्मोवाच

अनन्ताय नमस्तुभ्यं वरदाय पिनाकिने। महादेवाय देवाय स्थाणवे परमात्मने ॥ ५ ॥
नमोऽस्तु भुवनेशाय तुभ्यं तारक सर्वदा। ज्ञानानां दायको देवस्त्वमेकः पुरुषोत्तमः ॥ ६ ॥
नमस्ते पद्मगर्भाय पद्मेशाय नमो नमः। घोरशान्तिस्वरूपाय चण्डक्रोध नमोऽस्तु ते ॥ ७ ॥
नमस्ते देव विश्वेश नमस्ते सुरनायक। शूलपाणे नमस्तेऽस्तु नमस्ते विश्वभावन ॥ ८ ॥

पिनाक धारण करनेवाले वरदानी अनन्त महादेव ! स्थाणुस्वरूप परमात्मदेव ! आपको मेरा नमस्कार है। भुवनोंके स्वामी भुवनेश्वर तारक भगवान् ! आपको सदा नमस्कार है। पुरुषोत्तम ! आप ज्ञान देनेवाले अद्वितीय देव हैं। आप कमलगर्भ एवं पद्मेश हैं। आपको बारम्बार नमस्कार है। (प्रचण्ड) घोर-स्वरूप एवं शान्तिमूर्ति ! आपको नमस्कार है। विश्वके शासकदेव ! आपको नमस्कार है। सुरनायक ! आपको नमस्कार है। शूलपाणि शंकर ! आपको नमस्कार है। (संसारके रचनेवाले) विश्वभावन ! आपको मेरा नमस्कार है ॥ ५-८ ॥

एवं स्तुतो महादेवो ब्रह्मणा ऋषिभिस्तदा। उवाच मा भैर्व्रजत लिङ्गं वो भविता पुनः ॥ ९ ॥
क्रियतां मद्वचः शीघ्रं येन मे प्रीतिरुत्तमा। भविष्यति प्रतिष्ठायां लिङ्गस्यात्र न संशयः ॥ १० ॥
ये लिङ्गं पूजयिष्यन्ति मामकं भक्तिमाश्रिताः। न तेषां दुर्लभं किंचिद् भविष्यति कदाचन ॥ ११ ॥
सर्वेषामेव पापानां कृतानामपि जानता। शुद्ध्यते लिङ्गपूजायां नात्र कार्या विचारणा ॥ १२ ॥

ऋषियों और ब्रह्माने जब इस प्रकार शंकरकी स्तुति की तब महादेव शङ्करने कहा—भय मत करो; जाओ (तुम लोगोंके कल्याणार्थ) लिङ्ग फिर भी (उत्पन्न) हो जायगा। मेरे वचनका शीघ्र पालन करो। लिङ्गकी प्रतिष्ठा कर देनेपर निस्सन्देह मुझे अत्यन्त प्रसन्नता होगी। जो व्यक्ति भक्तिके साथ मेरे लिङ्गकी पूजा करेंगे उनके लिये कोई भी पदार्थ कभी दुर्लभ न होगा। जानकर किये गये समस्त पापोंकी भी शुद्धि लिङ्गकी पूजा करनेसे हो जाती है; इसमें किसी प्रकारका अन्यथा विचार नहीं करना चाहिये ॥ ९-१२ ॥

युष्माभिः पातितं लिङ्गं सारयित्वा महत्सरः। सांनिहत्यं तु विख्यातं तस्मिञ्शीघ्रं प्रतिष्ठितम् ॥ १३ ॥
यथाभिलषितं कामं ततः प्राप्स्यथ ब्राह्मणाः। स्थाणुर्नाम्ना हि लोकेषु पूजनीयो दिवौकसाम् ॥ १४ ॥
स्थाण्वीश्वरे स्थितो यस्मात्स्थाण्वीश्वरस्ततः स्मृतः। ये स्मरन्ति सदा स्थाणुं ते मुक्ताः सर्वकिल्बिषैः ॥ १५ ॥
भविष्यन्ति शुद्धदेहा दर्शनान्मोक्षगामिनः। इत्येवमुक्ता देवेन ऋषयो ब्रह्मणा सह ॥ १६ ॥
तस्माद् दारुवनाल्लिङ्गं नेतुं समुपचक्रमुः। न तं चालयितुं शक्तास्ते देवा ऋषिभिः सह ॥ १७ ॥

तुम लोगोंने लिङ्गको गिरा दिया है, इसलिये शीघ्र ही उसे उठाकर प्रसिद्ध महान् सांनिहत्य-सरोवरमें स्थापित करो। ब्राह्मणो ! ऐसा करनेसे तुमलोग अपने इच्छानुकूल मनोरथोंको प्राप्त करोगे। सारे संसारमें उस लिङ्गकी प्रसिद्धि स्थाणु नामसे होगी। देवताओंद्वारा (भी) वह पूज्य होगा। वह लिङ्ग स्थाण्वीश्वरमें स्थित रहनेके कारण स्थाण्वीश्वर नामसे स्मरण किया जायगा। जो स्थाण्वीश्वरको सदा स्मरण करेंगे, उनके सारे पाप कट जायँगे और वे पवित्र-देह होकर मोक्षकी प्राप्ति करेंगे। जब शंकरने ऐसा कहा तब ब्रह्माके सहित ऋषिलोग लिङ्गको उस दारुवनसे ले जानेका उद्योग करने लगे। किंतु ऋषियोंसहित वे सभी देवगण उसे हिलाने-डुलानेमें समर्थ न हो सके ॥ १३-१७ ॥

श्रमेण महता युक्ता ब्रह्माणं शरणं ययुः। तेषां श्रमाभितप्तानामिदं ब्रह्माऽब्रवीद् वचः ॥ १८ ॥
किं वा श्रमेण महता न यूयं वहनक्षमाः। स्वेच्छया पातितं लिङ्गं देवदेवेन शूलिना ॥ १९ ॥
तस्मात् तमेव शरणं यास्यामः सहिताः सुराः। प्रसन्नश्च महादेवः स्वयमेव नयिष्यति ॥ २० ॥
इत्येवमुक्ता ऋषयो देवाश्च ब्रह्मणा सह। कैलासं गिरिमासेदू रुद्रदर्शनकाङ्क्षिणः ॥ २१ ॥

(फिर) वे बहुत परिश्रम करके ब्रह्माकी शरणमें गये। ब्रह्माने परिश्रमसे श्रान्त-क्लान्त (मग्न) हुए उन लोगोंसे यह वचन कहा—देवताओ! अत्यन्त कठोर परिश्रम करनेसे क्या लाभ! तुमलोग इसे उठानेमें समर्थ नहीं हो। देवाधिदेव भगवान् शंकरने अपनी इच्छासे इस लिङ्गको गिराया है। अतः हे देवो! हम सभी एक साथ उन्हीं भगवान् शङ्करकी शरणमें चलें। महादेव सन्तुष्ट होकर अपने आप ही (लिङ्गको) ले जायँगे। इस प्रकार ब्रह्माके कहनेपर सभी ऋषि और देवता ब्रह्माके साथ शंकरजीके दर्शनकी अभिलाषासे [illegible] पर पहुँचे ॥ १८-२१ ॥

न च पश्यन्ति तं देवं ततश्चिन्तासमन्विताः। ब्रह्माणमूचुर्मुनयः क्व स देवो महेश्वरः ॥ २२ ॥
ततो ब्रह्मा चिरं ध्यात्वा ज्ञात्वा देवं महेश्वरम्। हस्तिरूपेण तिष्ठन्तं मुनिभिर्मानसैः स्तुतम् ॥ २३ ॥
अथ ते ऋषयः सर्वे देवाश्च ब्रह्मणा सह। गता महत्सरः पुण्यं यत्र देवः स्वयं स्थितः ॥ २४ ॥
न च पश्यन्ति तं देवमन्विष्यन्तस्ततस्ततः। ततश्चिन्तान्विता देवा ब्रह्मणा सहिताः स्थिताः ॥ २५ ॥
पश्यन्ति देवीं सुप्रीतां कमण्डलुविभूषिताम्। प्रीयमाणा तदा देवी इदं वचनमब्रवीत् ॥ २६ ॥

वहाँ उन लोगोंने शंकरजीको नहीं देखा। तब वे चिन्तित हो गये। फिर उन्होंने [illegible] (कि महान्) वे महेश्वरदेव कहाँ हैं? उसके बाद ब्रह्माने चिरकालतक ध्यान लगाया और [illegible] अन्तःकरणसे स्तुत महेश्वर देव हाथीके आकारमें स्थित हैं। उसके पश्चात् वे ऋषि और [illegible] उस पावन महान् सरोवरपर गये जहाँ भगवान् शंकर स्वयं उपस्थित थे। वे लोग वहाँ [illegible] उन्हें ढूँढने लगे, फिर भी शङ्करजीका दर्शन न पा सके। ब्रह्माके साथ दर्शन न [illegible] चिन्तित हो गये। उसके बाद उन्होंने कमण्डलुसे सुशोभित देवीको अत्यन्त प्रसन्न देखा। [illegible] हुई देवी उनसे यह वचन बोलीं—॥ २२-२६ ॥

श्रमेण महता युक्ता अन्विष्यन्तो महेश्वरम्।
पीयतामसृतं देवास्ततो ज्ञास्यथ शङ्करम्। एतच्छ्रुत्वा तु वचनं [illegible] ॥ २७ ॥
सुखोपविष्टास्ते देवाः पपुस्तदमृतं शुचि। अनन्तरं सुखासीनाः [illegible] ॥ २८ ॥
क स देवः इहायातो हस्तिरूपधरः स्थितः। दर्शितश्च तदा देव्या [illegible] ॥ २९ ॥
दृष्ट्वा देवं हर्षयुक्ताः सर्वे देवाः सहर्षिभिः। ब्रह्माणमग्रतः कृत्वा इदं [illegible] ॥ ३० ॥

महेश्वरको ढूँढते हुए तुमलोग अत्यन्त श्रान्त हो गये हो। देवो! तुम [illegible] शङ्करको जान सकोगे। भवानीद्वारा कही हुई इस वाणीको सुनकर वे देवता [illegible] पवित्र अमृतको पी लिया। उसके बाद सुखपूर्वक बैठे हुए उन देवताओंने [illegible] धारण किये हुए भगवान् शङ्कर देव यहाँ किस स्थानपर आये हुए हैं? [illegible] सरोवरके बीचमें स्थित शङ्करको उन्हें दिखला दिया। ऋषियोंके साथ सभी देवता [illegible] गये और ब्रह्माको आगे कर शङ्करजीसे ये वचन बोले—॥ २७-३० ॥

त्वया त्यक्तं महादेव लिङ्गं त्रैलोक्यवन्दितम्। तस्य चानयने [illegible]
इत्येवमुक्तो भगवान् देवो ब्रह्मादिभिर्हरः। आगाम ऋषिभिः [illegible]
तत्र गत्वा महादेवो हस्तिरूपधरो हरः। करेण [illegible]
तमादाय महादेवः स्तूयमानो महर्षिभिः। निवेशयामास [illegible]
ततो देवाः सर्व एव ऋषयश्च तपोधनाः। आत्मानं [illegible]

महेश्वर ! आपने तीनों लोकोंमें वन्दित जिस लिङ्गको छोड़ दिया है, उसे ले आनेमें दूसरे किसीकी शक्ति नहीं है, उसे कोई दूसरा उठा नहीं सकता। इस प्रकार ब्रह्मा आदि देवताओंने जब भगवान् शंकरसे कहा, तब देवदेव शिवजी ऋषियोंके साथ देवदारुवनके आश्रममें चले गये। वहाँ जाकर हाथीका रूप धारण करनेवाले महादेव शिवने खेल-खेलमें (लिङ्गको) अपने सूँड़में पकड़कर उठा लिया। शङ्करजी महर्षियोंके द्वारा स्तुति किये जाते हुए उस लिङ्गको लाकर सरोवरके पास पश्चिम दिशामें स्थापित कर दिया। उसके बाद सभी देवता एवं तपस्वी ऋषियोंने अपनेको सफल समझा और वे भगवान् शंकरकी स्तुति करने लगे ॥ ३१–३५ ॥

नमस्ते परमात्मन् अनन्तयोने लोकसाक्षिन् परमेष्ठिन् भगवन् सर्वज्ञ क्षेत्रज्ञ परावरज्ञ ज्ञानज्ञेय सर्वेश्वर महाविरिञ्च महाविभूते महाक्षेत्रज्ञ महापुरुष सर्वभूतावास मनोनिवास आदिदेव महादेव सदाशिव ईशान दुर्विज्ञेय दुराराध्य महाभूतेश्वर परमेश्वर महायोगेश्वर त्र्यम्बक महायोगिन् परब्रह्मन् परमज्योतिः ब्रह्मविदुत्तम ॐकार वषट्कार स्वाहाकार स्वधाकार परमकारण सर्वगत सर्वदर्शिन् सर्वशक्ते सर्वदेव अज सहस्रार्चिः पृषार्चिः सुधामन् हरधाम अनन्तधाम संवर्त संकर्षण वडवानल अग्नीषोमात्मक पवित्र महापवित्र महामेघ महामायाधर महाकाम कामहन् हंस परमहंस महाराजिक महेश्वर महाकामुक महाहंस भवक्षयकर सुरसिद्धार्चित हिरण्यवाह हिरण्यरेतः हिरण्यनाभ हिरण्याग्रकेश मुञ्जकेशिन् सर्वलोकवरप्रद सर्वानुग्रहकर कमलेशय कुशेशय हृदयेशय ज्ञानोदधे शम्भो विभो महायज्ञ महायाज्ञिक सर्वयज्ञमय सर्वयज्ञहृदय सर्वयज्ञसंस्तुत निराश्रय समुद्रेशय अत्रिसम्भव भक्तानुकम्पिन् अभग्नयोग योगधर वासुकि-महामणि विद्योतितविग्रह हरितनयन त्रिलोचन जटाधर नीलकण्ठ चन्द्रार्धधर उमाशरीरार्धहर गजचर्मधर दुस्तरसंसारमहासंहारकर प्रसीद भक्तजनवत्सल।

एवं स्तुतो देवगणैः सुभक्त्या सब्रह्मसुरेन्द्रैश्च पितामहेन ।
त्यक्त्वा तदा हस्तिरूपं महात्मा लिङ्गे तदा संनिधानं चकार ॥ ३६ ॥

इति श्रीवामनपुराणे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

परमात्मन् ! अनन्तयोने ! लोकसाक्षिन् ! परमेष्ठिन् ! भगवन् ! सर्वज्ञ ! क्षेत्रज्ञ ! हे पर और अवरके ज्ञाता ! ज्ञानज्ञेय ! सर्वेश्वर ! महाविरिञ्च ! महाविभूते ! महाक्षेत्रज्ञ ! महापुरुष ! हे सब भूतोंके निवास ! मनोनिवास ! आदिदेव ! महादेव ! सदाशिव ! ईशान ! दुर्विज्ञेय ! दुराराध्य ! महाभूतेश्वर ! परमेश्वर ! महायोगेश्वर ! त्र्यम्बक ! महायोगिन् ! परमब्रह्मन् ! परमज्योति ! ब्रह्मविद् ! उत्तम ! ओंकार ! वषट्कार ! स्वाहाकार ! स्वधाकार ! परमकारण ! सर्वगत ! सर्वदर्शिन् ! सर्वशक्ति ! सर्वदेव ! अज ! सहस्रार्चि ! पृषार्चि ! सुधामन् ! हरधाम ! अनन्तधाम ! संवर्त ! संकर्षण ! वडवानल, अग्नि और सोमस्वरूप ! पवित्र ! महापवित्र ! महामेघ ! महामायाधर ! महाकाम ! कामहन् ! हंस ! परमहंस ! महाराजिक ! महेश्वर ! महाकामुक ! महाहंस ! भवक्षयकर ! हे देवों और सिद्धोंसे पूजित ! हिरण्यवाह ! हिरण्यरेतः ! हिरण्यनाभ ! हिरण्याग्रकेश ! मुञ्जकेशिन् ! सर्वलोकवरप्रद ! सर्वानुग्रहकर ! कमलेशय ! कुशेशय ! हृदयेशय ! ज्ञानोदधे ! शम्भो ! विभो ! महायज्ञ ! महायाज्ञिक ! सर्वयज्ञमय ! सर्वयज्ञहृदय ! सर्वयज्ञसंस्तुत ! निराश्रय ! समुद्रेशय ! अत्रिसंभव ! भक्तानुकम्पिन् ! अभग्नयोग योगधर ! हे वासुकि और महामणिसे द्युतिमान् शिव ! हरितनयन ! त्रिलोचन ! जटाधर ! नीलकण्ठ ! चन्द्रार्धधर ! उमाशरीरार्धहर ! गजचर्मधर ! दुस्तरसंसारका महासंहार करनेवाले महाप्रलयंकर शिव ! हमारा आपको नमस्कार है। भक्तजनवत्सल शङ्कर ! आप हम सबपर प्रसन्न हों।

इस प्रकार पितामह ब्रह्मा आदि श्रेष्ठ देवगणोंके द्वारा भक्तिपूर्वक स्तुति करनेपर उन महात्माने हस्तिरूपको त्यागकर लिङ्गमें सन्निधान (निवास) कर लिया ॥ ३६ ॥

इस प्रकार श्रीवामनपुराणमें चौवालीसवाँ अध्याय समाप्त हुआ ॥ ४४ ॥

अथ पञ्चचत्वारिंशोऽध्यायः

सनत्कुमार उवाच

अथोवाच महादेवो देवान् ब्रह्मपुरोगमान्। ऋषीणां चैव प्रत्यक्षं तीर्थमाहात्म्यमुत्तमम् ॥ १ ॥
एतत् सांनिहितं प्रोक्तं सरः पुण्यतमं महत्। मयोपसेवितं यस्मात् तस्मान्मुक्तिप्रदायकम् ॥ २ ॥
इह ये पुरुषाः केचिद् ब्राह्मणाः क्षत्रिया विशः। लिङ्गस्य दर्शनादेव पश्यन्ति परमं पदम् ॥ ३ ॥
अहन्यहनि तीर्थानि आसमुद्रसरांसि च। स्थाणुतीर्थं समेष्यन्ति मध्यं प्राप्ते दिवाकरे ॥ ४ ॥

पैंतालीसवाँ अध्याय प्रारम्भ

(सांनिहितसर—स्थाणुतीर्थ, स्थाणुवट और स्थाणुलिङ्गका माहात्म्य वर्णन)

सनत्कुमारने कहा—इसके बाद महादेवने ऋषियोंके सामने (ही) ब्रह्मा आदि देवोंसे परमश्रेष्ठ तीर्थके माहात्म्यको कहा। ऋषियो! यह सांनिहित नामक सरोवर अत्यन्त पवित्र एवं महान् कहा गया है। यतः मेरे द्वारा यह सेवित किया गया है, अतः यह मुक्ति प्रदान करनेवाला है। यहाँ ब्राह्मण, क्षत्रिय एवं वैश्य सभी वर्णोंके पुरुष लिङ्गका दर्शन कर ही परम पदका दर्शन करते हैं। समुद्रसे लेकर सरोवर तकके तीर्थ प्रतिदिन भगवान् सूर्यके आकाशके मध्यमें आ जानेपर (दोपहरमें) स्थाणु तीर्थमें आ जाते हैं ॥ १–४ ॥

स्तोत्रेणानेन च नरो यो मां स्तोष्यति भक्तितः। तस्याहं सुलभो नित्यं भविष्यामि न संशयः ॥ ५ ॥
इत्युक्त्वा भगवान् रुद्रो ह्यन्तर्धानं गतः प्रभुः। देवाश्च ऋषयः सर्वे स्वानि स्थानानि भेजिरे ॥ ६ ॥
ततो निरन्तरं स्वर्गं मानुषैर्मिश्रितं कृतम्। स्थाणुलिङ्गस्य माहात्म्याद् दर्शनात् स्वर्गमाप्नुयात् ॥ ७ ॥
ततो देवाः सर्व एव ब्रह्माणं शरणं ययुः। तानुवाच तदा ब्रह्मा किमर्थमिह चागताः ॥ ८ ॥

जो मनुष्य इस स्तोत्रसे भक्तिपूर्वक मेरा स्तवन करेगा, उसके लिये मैं सदा सुलभ होऊँगा—इसमें कोई संदेह नहीं है। यह कहकर भगवान् शंकर अदृश्य हो गये। सभी देवता तथा ऋषिगण अपने-अपने स्थानको चले गये। उसके बाद पूरा—सारा-का-सारा स्वर्ग मनुष्योंसे भर गया, क्योंकि स्थाणुलिङ्गका यह माहात्म्य है कि उसका दर्शन करनेसे ही स्वर्ग प्राप्त हो जाता है। फिर सभी देवता ब्रह्माकी शरणमें गये तब ब्रह्माने उनसे पूछा—देवताओ! आप लोग यहाँ किस कार्यसे आये हैं? ॥ ५–८ ॥

ततो देवाः सर्व एव इदं वचनमब्रुवन्। मानुषेभ्यो भयं तीव्रं रक्षास्माकं पितामह ॥ ९ ॥
तानुवाच तदा ब्रह्मा सुरांस्त्रिदशनायकः। पांसुना पूर्यतां शीघ्रं सरः शक्र हितं कुरु ॥ १० ॥
ततो ववर्ष भगवान् पांसुना पाकशासनः। सप्ताहं पूरयामास सरो देवैस्तदा वृतः ॥ ११ ॥
तं दृष्ट्वा पांसुवर्षं च देवदेवो महेश्वरः। करेण धारयामास लिङ्गं तीर्थवरं तदा ॥ १२ ॥

तब सभी देवताओंने यह वचन कहा—पितामह! हम लोगोंको मनुष्योंसे बड़ा भय हो रहा है। आप हम सबकी रक्षा करें। उसके बाद देवताओंके नेता ब्रह्माने उन देवोंसे कहा—इन्द्र! सरोवरको

धूलिसे पाट दो और इस प्रकार इन्द्रका कल्याण करो। ब्रह्माके इस प्रकार समझानेपर पाक नामके राक्षसको मारनेवाले (पाकशासन) भगवान् इन्द्रने देवताओंके साथ सात दिनतक धूलिकी वर्षा की और सरोवरको धूलिसे पाट दिया। देवदेव महेश्वरने देवताओंद्वारा बरसायी गयी इस धूलिकी वर्षाको देखकर लिङ्ग और तीर्थवटको अपने हाथमें ले लिया ॥ ९-१२ ॥

तस्मात् पुण्यतमं तीर्थमाद्यं यत्रोदकं स्थितम्। तस्मिन् स्नातः सर्वतीर्थैः स्नातो भवति मानवः ॥ १३ ॥
यस्तत्र कुरुते श्राद्धं वटलिङ्गस्य चान्तरे। तस्य प्रीताश्च पितरो दास्यन्ति भुवि दुर्लभम् ॥ १४ ॥
पूरितं च ततो दृष्ट्वा ऋषयः सर्व एव ते। पांसुना सर्वगात्राणि स्पृशन्ति श्रद्धया युताः ॥ १५ ॥
तेऽपि निर्धूतपापास्ते पांसुना मुनयो गताः। पूज्यमानाः सुरगणैः प्रयाता ब्रह्मणः पदम् ॥ १६ ॥

इसलिये पहले जिस स्थानपर जल था, वह तीर्थ अत्यन्त पवित्र है। उसमें स्नान करनेवाला मनुष्य सभी तीर्थोंमें स्नान करनेका फल प्राप्त कर लेता है। जो मनुष्य वट और लिङ्गके बीचमें श्राद्ध करता है उसके पितर उससे संतुष्ट होकर उसे पृथ्वी-(भर)में दुर्लभ वस्तु सुलभ कर देते हैं—ऐसा सुनकर वे सभी ऋषि धूलिसे भरे हुए सरोवरको देखकर श्रद्धासे अपने सभी अङ्गोंमें धूलि मलने लगे। वे मुनि भी धूलि मलनेके कारण निष्पाप हो गये और देवताओंसे पूजित होकर ब्रह्मलोक चले गये ॥ १३-१६ ॥

ये तु सिद्धा महात्मानस्ते लिङ्गं पूजयन्ति च। व्रजन्ति परमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥ १७ ॥
एवं मत्वा तदा ब्रह्मा लिङ्गं शैलमयं तदा। आद्यलिङ्गं तदा स्थाप्य तस्योपरि दधार तत् ॥ १८ ॥
ततः कालेन महता तेजसा तस्य रञ्जितम्। तस्यापि स्पर्शनात् सिद्धः परं पदमवाप्नुयात् ॥ १९ ॥
ततो देवैः पुनर्ब्रह्मा विज्ञप्तो द्विजसत्तम। एते यान्ति परां सिद्धिं लिङ्गस्य दर्शनान्नराः ॥ २० ॥
तच्छ्रुत्वा भगवान् ब्रह्मा देवानां हितकाम्यया। उपर्युपरि लिङ्गानि सप्त तत्र चकार ह ॥ २१ ॥

जो सिद्ध महात्मा पुरुष लिङ्गकी पूजा करते वे आवागमनसे रहित होकर परमसिद्धिको प्राप्त करने लगे। ऐसा जानकर तब ब्रह्माने उस आदिलिङ्गको नीचे रख उसके ऊपर पाषाणमय लिङ्गको स्थापित कर दिया। कुछ समय बीत जानेपर उसके (आद्य लिङ्गके) तेजसे (वह पाषाण-मूर्ति-लिङ्ग भी) रञ्जित हो गया। सिद्ध-समुदाय उसका भी स्पर्श करनेसे परमपदको प्राप्त करने लगा। द्विजश्रेष्ठ ! तत्पश्चात् देवताओंने पुनः ब्रह्माको बतलाया भगवन् ! ये मनुष्य लिङ्गका दर्शन करके परम सिद्धिको प्राप्त करनेका लाभ उठा रहे हैं। देवताओंसे यह सुनकर भगवान् ब्रह्माने देवताओंके मंगलकी इच्छासे एकके ऊपर एक, इस प्रकार सात लिङ्गोंको स्थापित कर दिया ॥ १७-२१ ॥

ततो ये मुक्तिकामाश्च सिद्धाः शमपरायणाः। सेव्यं पांसुं प्रयत्नेन प्रयाताः परमं पदम् ॥ २२ ॥
पांसवोऽपि कुरुक्षेत्रे वायुना समुदीरिताः। महादुष्कृतकर्माणं प्रयान्ति परमं पदम् ॥ २३ ॥
अज्ञानाज्ज्ञानतो वापि स्त्रिया वा पुरुषस्य वा। नश्यते दुष्कृतं सर्वं स्थाणुतीर्थप्रभावतः ॥ २४ ॥
लिङ्गस्य दर्शनान्मुक्तिः स्पर्शनाच्च वटस्य च। तत्संनिधौ जले स्नात्वा प्राप्नोत्यभिमतं फलम् ॥ २५ ॥
पितृणां तर्पणं यस्तु जले तस्मिन् करिष्यति। बिन्दौ बिन्दौ तु तोयस्य अनन्तफलभाग्भवेत् ॥ २६ ॥

उसके बाद मुक्तिके अभिलाषी शम (दमादि)में लगे रहनेवाले सिद्धगण यत्नपूर्वक धूलिका सेवनकर परमपदको प्राप्त करने लगे। (सचमुच) कुरुक्षेत्रमें वायुके चलनेसे उड़ी हुई धूलि भी बड़े-बड़े पापियोंको मुक्ति दे देती है। स्त्री भी या पुरुषने चाहे जानेमें या अनजानेमें पाप किया हो तो उसके सारे पाप स्थाणु-तीर्थके प्रभावसे

नष्ट हो जाते हैं। लिङ्गका दर्शन करनेसे और वटका स्पर्श करनेसे मुक्ति प्राप्त होती है और उसके निकट जलमें स्नान करनेसे मनुष्य मनचाहे फलको प्राप्त करता है। उस जलमें पितरोंका तर्पण करनेवाला व्यक्ति जलके प्रत्येक बिन्दुमें अनन्त फलको प्राप्त करता है ॥ २२-२६ ॥

यस्तु कृष्णतिलैः सार्द्धं लिङ्गस्य पश्चिमे स्थितः। तर्पयेच्छ्रद्धया युक्तः स प्रीणाति युगत्रयम् ॥ २७ ॥
यावन्मन्वन्तरं प्रोक्तं यावल्लिङ्गस्य संस्थितिः। तावत्प्रीताश्च पितरः पिबन्ति जलमुत्तमम् ॥ २८ ॥
कृते युगे सांनिहत्यं त्रेतायां वायुसंज्ञितम्। कलिद्वापरयोर्मध्ये कूपं रुद्रह्रदं स्मृतम् ॥ २९ ॥
चैत्रस्य कृष्णपक्षे च चतुर्दश्यां नरोत्तमः। स्नात्वा रुद्रह्रदे तीर्थे परं पदमवाप्नुयात् ॥ ३० ॥
यस्तु वटे स्थितो रात्रिं ध्यायते परमेश्वरम्। स्थाणोर्वटप्रसादेन मनसा चिन्तितं फलम् ॥ ३१ ॥

इति श्रीवामनपुराणे पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

लिङ्गसे पश्चिम दिशामें काले तिलोंसे श्रद्धापूर्वक तर्पण करनेवाला व्यक्ति तीन युगोंतक (पितरोंको) तृप्त करता है। जबतक मन्वन्तर है और जबतक लिङ्गकी संस्थिति है, तबतक पितृगण संतुष्ट होकर उत्तम जलका पान करते हैं। सत्ययुगमें 'सान्निहत्य' सर, त्रेतामें 'वायु' नामका ह्रद, कलि एवं द्वापरमें 'रुद्रह्रद' नामके कूप सेवनीय माने गये हैं। चैत्रके कृष्णपक्षकी चतुर्दशीके दिन 'रुद्रह्रद' नामक तीर्थमें स्नान करनेवाला उत्तम पुरुष परमपद—मुक्तिको प्राप्त करता है। रात्रिके समय वटके नीचे रहकर परमेश्वरका ध्यान करनेवालेको स्थाणुवटके अनुग्रह-(दया-)से मनोवाञ्छित फल प्राप्त होता है ॥ २७-३१ ॥

इस प्रकार श्रीवामनपुराणमें पैंतालीसवाँ अध्याय समाप्त हुआ ॥ ४५ ॥

[अथ षट्चत्वारिंशोऽध्यायः]

सनत्कुमार उवाच

स्थाणोर्वटस्योत्तरतः शुक्रतीर्थं प्रकीर्तितम्। स्थाणोर्वटस्य पूर्वेण सोमतीर्थं द्विजोत्तम ॥ १ ॥
स्थाणोर्वटं दक्षिणतो दक्षतीर्थमुदाहृतम्। स्थाणोर्वटात् पश्चिमतः स्कन्दतीर्थं प्रतिष्ठितम् ॥ २ ॥
एतानि पुण्यतीर्थानि मध्ये स्थाणुरिति स्मृतः। तस्य दर्शनमात्रेण प्राप्नोति परमं पदम् ॥ ३ ॥
अष्टम्यां च चतुर्दश्यां यस्त्वेतानि परिक्रमेत्। पदे पदे यज्ञफलं स प्राप्नोति न संशयः ॥ ४ ॥

छियालीसवाँ अध्याय प्रारम्भ

(स्थाणु-लिङ्गके समीप असंख्य लिङ्गोंकी स्थापना और उनके दर्शन-अर्चनका माहात्म्य)

सनत्कुमारने कहा—द्विजोत्तम ! स्थाणुवटकी उत्तर दिशामें 'शुक्रतीर्थ' और स्थाणुवटकी पूर्व दिशामें 'सोमतीर्थ' कहा गया है। स्थाणुवटके दक्षिण 'दक्षतीर्थ' एवं स्थाणुवटके पश्चिममें 'स्कन्दतीर्थ' स्थित है। इन परम पावन तीर्थोंके बीचमें 'स्थाणु' नामका तीर्थ है। उसका दर्शन करनेमात्रसे परमपद-(मोक्ष-)की प्राप्ति होती है। जो मनुष्य अष्टमी और चतुर्दशीको इनकी प्रदक्षिणा करता है, वह एक-एक पगपर यज्ञ करनेका फल प्राप्त करता है—इसमें कोई सन्देह नहीं है ॥ १-४ ॥

एतानि मुनिभिः साध्यैरादित्यैर्वसुभिस्तदा। मरुद्भिर्वह्निभिश्चैव सेवितानि प्रयत्नतः ॥ ५ ॥
अन्ये ये प्राणिनः केचित् प्रविष्टाः स्थाणुमुत्तमम्। सर्वपापविनिर्मुक्ताः प्रयान्ति परमां गतिम् ॥ ६ ॥
अस्ति तत्संनिधौ लिङ्गं देवदेवस्य शूलिनः। उमा च लिङ्गरूपेण हरपार्श्वं न मुञ्चति ॥

तस्य दर्शनमात्रेण सिद्धिं प्राप्नोति मानवः । वटस्य उत्तरे पार्श्वे तक्षकेण महात्मना ॥ ८ ॥
प्रतिष्ठितं महालिङ्गं सर्वकामप्रदायकम् । वटस्य पूर्वदिग्भागे विश्वकर्मकृतं महत् ॥ ९ ॥
लिङ्गं प्रत्यङ्मुखं दृष्ट्वा सिद्धिमाप्नोति मानवः । तत्रैव लिङ्गरूपेण स्थिता देवी सरस्वती ॥ १० ॥

मुनियों, साध्यों, आदित्यों, वसुओं, मरुतों एवं अग्नियोंने इन तीर्थोंका यत्नपूर्वक सेवन किया है। जो भी अन्य कोई प्राणी उस उत्तम स्थाणुतीर्थमें प्रवेश करते हैं वे भी सभी पापोंसे मुक्त होकर परम गतिको प्राप्त करते हैं। उसीके निकट त्रिशूल धारण करनेवाले देवदेव भगवान् शंकरका लिङ्ग है। उमादेवी वहाँपर लिङ्गरूपमें रहनेवाले शंकरजीके पासमें ही रहती हैं; वे उनकी बगलसे अलग नहीं होतीं। उस लिङ्गके दर्शन करनेमात्रसे मनुष्य सिद्धिको प्राप्त करता है। वटके उत्तरी भागमें महात्मा तक्षकने सभी कामनाओंको सिद्ध करनेवाले महालिङ्गको प्रतिष्ठित किया है। वटके पूरबमें विश्वकर्माके द्वारा निर्मित किया गया महान् लिङ्ग है। पश्चिमकी ओर रहनेवाले लिङ्गका दर्शन कर मानवको सिद्धि प्राप्त होती है। वहींपर देवी सरस्वती लिङ्गरूपसे स्थित हैं ॥ ५–१० ॥

प्रणम्य तां प्रयत्नेन बुद्धिं मेधां च विन्दति । वटपार्श्वे स्थितं लिङ्गं ब्रह्मणा तत् प्रतिष्ठितम् ॥ ११ ॥
दृष्ट्वा वटेश्वरं देवं प्रयाति परमं पदम् । ततः स्थाणुवटं दृष्ट्वा कृत्वा चापि प्रदक्षिणम् ॥ १२ ॥
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा । स्थाणोः पश्चिमदिग्भागे नकुलीशो गणः स्मृतः ॥ १३ ॥
तमभ्यर्च्य प्रयत्नेन सर्वपापैः प्रमुच्यते । तस्य दक्षिणदिग्भागे तीर्थं रुद्रकरं स्मृतम् ॥ १४ ॥

मनुष्य उन्हें प्रयत्न-(श्रद्धा-विधि-) पूर्वक प्रणाम कर बुद्धि एवं तीव्र मेधा प्राप्त करता है। वटकी बगलमें ब्रह्माके द्वारा प्रतिष्ठापित वटेश्वर-लिङ्गका दर्शन करके मनुष्य परम पदको प्राप्त करता है। तत्पश्चात् जिसने स्थाणुवटका दर्शन और प्रदक्षिणा कर ली उसकी वह मानो सातों द्वीपवाली पृथिवीकी की हुई प्रदक्षिणा हो जाती है। स्थाणुकी पश्चिम दिशाकी ओर 'नकुलीश' नामके गण स्थित हैं। विधिपूर्वक उनकी पूजा करनेवाला मनुष्य सभी प्रकारके पापोंसे छूट जाता है। उनकी दक्षिण दिशामें 'रुद्रकरतीर्थ' है ॥ ११–१४ ॥

तस्मिन् स्नातः सर्वतीर्थे स्नातो भवति मानवः । तस्य चोत्तरदिग्भागे रावणेन महात्मना ॥ १५ ॥
प्रतिष्ठितं महालिङ्गं गोकर्णं नाम नामतः ।
आषाढमासे या कृष्णा भविष्यति चतुर्दशी । तस्यां योऽर्चति गोकर्णं तस्य पुण्यफलं शृणु ॥ १६ ॥
कामतोऽकामतो वापि यत् पापं तेन संचितम् । तस्माद् विमुच्यते पापात् पूजयित्वा हरं शुचिः ॥१७॥
कौमारब्रह्मचर्येण यत्पुण्यं प्राप्यते नरैः । तत्पुण्यं सकलं तस्य अष्टम्यां योऽर्चयच्छिवम् ॥ १८ ॥

जिसने उस-(रुद्रकरतीर्थ-)में स्नान कर लिया मानो उसने सभी तीर्थोंमें स्नान कर लिया। उसकी उत्तर दिशाकी ओर महात्मा रावणने गोकर्ण नामका प्रसिद्ध महालिङ्ग स्थापित किया है। आषाढमासके कृष्णपक्षकी चतुर्दशी तिथिमें जो गोकर्णकी अर्चना करता है उसके पुण्यफलको सुनो। यदि किसीने अपनी इच्छा या अनिच्छासे भी पापसंचय कर लिया है तो वह भगवान् शंकरकी पूजा करके पवित्र हो जाता है और वह संचित पापसे छूट जाता है। जो अष्टमी तिथिमें शिवका पूजन करता है उसे कौमार-अवस्था-(जन्मसे १६ वर्षकी अवस्था-)में ब्रह्मचर्य-पालनसे जो फल प्राप्त होता है वह सम्पूर्ण पुण्य-फल उसे प्राप्त होता है ॥ १५–१८ ॥

यशोऽर्जनं परमं रूपं सौभाग्यं धनसंपदः । कुमारेश्वरमाहात्म्यात् सिद्ध्यते नात्र संशयः ॥ १९ ॥
तस्य चोत्तरदिग्भागे लिङ्गं पूज्य विभीषणः । अजरश्चामरश्चैव कल्पयित्वा बभूव ह ॥ २० ॥
आषाढस्य तु मासस्य शुक्ला या चाष्टमी भवेत् । तस्यां पूज्य सोपवासो ह्यमृतत्वमवाप्नुयात् ॥ २१ ॥
खरेण पूजितं लिङ्गं तस्मिन् स्थाने द्विजोत्तम । तं पूजयित्वा यत्नेन सर्वकामानवाप्नुयात् ॥ २२ ॥

यदि मनुष्य उत्तम सौन्दर्य, सौभाग्य या धन-सम्पत्ति चाहता है तो (उसे कुमारेश्वरकी आराधना करनी चाहिये; क्योंकि) कुमारेश्वरके माहात्म्यसे उसे निस्सन्देह उन सबकी सिद्धि प्राप्त होती है। उन (कुमारेश्वर-)के उत्तर भागमें विभीषणने शिव-लिङ्गको स्थापित कर उसकी पूजा की, जिससे वे अजर और अमर हो गये। आषाढ़ महीनेके शुक्लपक्षकी अष्टमी तिथिको उपवास रहकर उसकी पूजा करनेवाला मनुष्य देवत्व प्राप्त कर लेता है। द्विजोत्तम! खरने वहाँपर लिङ्गकी पूजा की थी। उस लिङ्गकी विधिपूर्वक पूजा करनेवालेकी सभी कामनाएँ सिद्ध हो जाती हैं ॥ १९-२२ ॥

दूषणस्त्रिशिराश्चैव तत्र पूज्य महेश्वरम्। यथाभिलषितान् कामानापतुस्तौ मुदान्वितौ ॥ २३ ॥
चैत्रमासे सिते पक्षे यो नरस्तत्र पूजयेत्। तस्य तौ वरदौ देवौ प्रयच्छेतेऽभिवाञ्छितम् ॥ २४ ॥
स्थाणोर्वटस्य पूर्वेण हस्तिपादेश्वरः शिवः। तं दृष्ट्वा मुच्यते पापैरन्यजन्मनि संभवैः ॥ २५ ॥
तस्य दक्षिणतो लिङ्गं हारीतस्य ऋषेः स्थितम्। यत् प्रणम्य प्रयत्नेन सिद्धिं प्राप्नोति मानवः ॥ २६ ॥

दूषण एवं त्रिशिराने भी वहाँ महेश्वरकी पूजा की और वे प्रसन्न हो गये। उन दोनोंने अभिवाञ्छित मनोरथ प्राप्त कर लिये। चैत्र महीनेके शुक्लपक्षमें जो मनुष्य वहाँ पूजन करता है, उसकी समस्त इच्छाएँ वे दोनों देव पूरी कर देते हैं। 'हस्तिपादेश्वर' शिव स्थाणुवटकी पूर्व दिशामें हैं। उनका दर्शन करके मनुष्य अन्य जन्मोंमें बने पापोंसे छूट जाता है। उसके दक्षिणमें हारीत नामके ऋषिद्वारा स्थापित किया हुआ लिङ्ग है जिसको विधिपूर्वक प्रणाम करनेसे (ही) मनुष्य सिद्धि प्राप्त कर लेता है ॥ २३-२६ ॥

तस्य दक्षिणपार्श्वे तु वापीतस्य महात्मनः। लिङ्गं त्रैलोक्यविख्यातं सर्वपापहरं शिवम् ॥ २७ ॥
कङ्कालरूपिणा चापि रुद्रेण सुमहात्मना। प्रतिष्ठितं महालिङ्गं सर्वपापप्रणाशनम् ॥ २८ ॥
भुक्तिदं मुक्तिदं प्रोक्तं सर्वकिल्बिषनाशनम्। लिङ्गस्य दर्शनाच्चैव अग्निष्टोमफलं लभेत् ॥ २९ ॥
तस्य पश्चिमदिग्भागे लिङ्गं सिद्धप्रतिष्ठितम्। सिद्धेश्वरं तु विख्यातं सर्वसिद्धिप्रदायकम् ॥ ३० ॥

उसके निकट दक्षिण भागमें महात्मा वापीतके द्वारा संस्थापित सभी पापोंका हरण करनेवाला कल्याणकर्ता लिङ्ग है जो तीनों लोकोंमें प्रसिद्ध है। कङ्कालके रूपमें रहनेवाले महात्मा भगवान् रुद्रने भी समस्त पापोंका नाश करनेवाला महालिङ्ग प्रतिष्ठित किया है। महात्मा रुद्रद्वारा प्रतिष्ठापित वह लिङ्ग मुक्ति एवं भुक्तिका देनेवाला तथा सभी पापोंको नष्ट करनेवाला है। उस लिङ्गका दर्शन करनेसे ही अग्निष्टोम यज्ञके फलकी प्राप्ति हो जाती है। उसकी पश्चिम दिशामें सिद्धोंद्वारा प्रतिष्ठित सिद्धेश्वर नामसे विख्यात लिङ्ग है। वह सर्वसिद्धिप्रदाता है ॥ २७-३० ॥

तस्य दक्षिणदिग्भागे मृकण्डेन महात्मना। तत्र प्रतिष्ठितं लिङ्गं दर्शनात् सिद्धिदायकम् ॥ ३१ ॥
तस्य पूर्वे च दिग्भागे आदित्येन महात्मना। प्रतिष्ठितं लिङ्गवरं सर्वकिल्बिषनाशनम् ॥ ३२ ॥
चित्राङ्गदस्तु गन्धर्वो रम्भा चाप्सरसां वरा। परस्परं सानुरागौ स्थाणुदर्शनकाङ्क्षिणौ ॥ ३३ ॥
दृष्ट्वा स्थाणुं पूजयित्वा सानुरागौ परस्परम्। आराध्य वरदं देवं प्रतिष्ठाप्य महेश्वरम् ॥ ३४ ॥

उसकी दक्षिण दिशामें महात्मा मृकण्डने (शिव-) लिङ्गकी स्थापना की है। उस लिङ्गके दर्शन करनेसे सिद्धि प्राप्त होती है। उसके पूर्व भागमें महात्मा आदित्यने सम्पूर्ण पापोंको नष्ट करनेवाले श्रेष्ठ लिङ्गको प्रतिष्ठापित किया है। अप्सराओंमें श्रेष्ठ रम्भा और चित्राङ्गद नामके गन्धर्व—इन दोनोंने परस्परमें प्रेमपूर्वक स्थाणु भगवान्‌के दर्शन किये; फिर उनका पूजन किया और तब वरदानी देवकी स्थापनाकर आराधना की। (उनसे स्थापित लिङ्गोंका नाम हुआ चित्राङ्गद और रम्भेश्वर) ॥ ३१-३४ ॥

चित्राङ्गदेश्वरं दृष्ट्वा तथा रम्भेश्वरं द्विज । सुभगो दर्शनीयश्च कुले जन्म समाप्नुयात् ॥ ३५ ॥
तस्य दक्षिणतो लिङ्गं वज्रिणा स्थापितं पुरा । तस्य प्रसादात् प्राप्नोति मनसा चिन्तितं फलम् ॥ ३६ ॥
पराशरेण मुनिना तथैवाराध्य शंकरम् । प्राप्तं कवित्वं परमं दर्शनाच्छंकरस्य च ॥ ३७ ॥
वेदव्यासेन मुनिना आराध्य परमेश्वरम् । सर्वज्ञत्वं ब्रह्मज्ञानं प्राप्तं देवप्रसादतः ॥ ३८ ॥

द्विज ! चित्राङ्गदेश्वर एवं रम्भेश्वरका दर्शन करके मनुष्य सुन्दर और दर्शनीय (रूपवाला) हो जाता है एवं सत्कुलमें जन्म ग्रहण करता है । उसके दक्षिण भागमें इन्द्रने प्राचीन कालमें लिङ्गकी स्थापना की थी । इन्द्रद्वारा प्रतिष्ठापित लिङ्गके प्रसादसे मनुष्य मनोवाञ्छित फल प्राप्त कर लेता है । उसी प्रकार पराशर मुनिने शंकरकी आराधना की और भगवान् शंकरके दर्शनसे उत्कृष्ट कवित्वको प्राप्त किया । वेदव्यास मुनिने परमेश्वर-(शंकर-) की आराधना की और उनकी कृपासे सर्वज्ञता तथा ब्रह्मज्ञान प्राप्त किया ॥ ३५–३८ ॥

स्थाणोः पश्चिमदिग्भागे वायुना जगदायुना । प्रतिष्ठितं महालिङ्गं दर्शनात् पापनाशनम् ॥ ३९ ॥
तस्यापि दक्षिणे भागे लिङ्गं हिमवतेश्वरम् । प्रतिष्ठितं पुण्यकृतां दर्शनात् सिद्धिकारकम् ॥ ४० ॥
तस्यापि पश्चिमे भागे कार्तवीर्येण स्थापितम् । लिङ्गं पापहरं सद्यो दर्शनात् पुण्यमाप्नुयात् ॥ ४१ ॥
तस्याप्युत्तरदिग्भागे सुपार्श्वं स्थापितं पुनः । आराध्य हनुमांश्चाप सिद्धिं देवप्रसादतः ॥ ४२ ॥

स्थाणुके पश्चिम भागमें जगत्के प्राण-स्वरूप (जगत्प्राण) वायुने महालिङ्गको प्रतिष्ठित किया है, जो दर्शनमात्रसे ही पापका विनाश कर देता है । उसके भी दक्षिण भागमें हिमवतेश्वर लिङ्ग प्रतिष्ठित है । पुण्यात्माओंने उसे प्रतिष्ठित किया है । उसका दर्शन सिद्धि देनेवाला है । उसके पश्चिम भागमें कार्तवीर्यने (एक) लिङ्गकी स्थापना की है । (यह लिङ्ग) पापका तत्काल हरण करनेवाला है । (इसके) दर्शन करनेसे पुण्यकी प्राप्ति होती है । उसके भी उत्तरकी ओर बिल्कुल निकट स्थानमें (एक) लिङ्गकी स्थापना हुई है; हनुमान्ने उस लिङ्गकी आराधना कर शंकरकी कृपासे सिद्धि प्राप्त की ॥ ३९–४२ ॥

तस्यैव पूर्वदिग्भागे विष्णुना प्रभविष्णुना । आराध्य वरदं देवं चक्रं लब्धं सुदर्शनम् ॥ ४३ ॥
तस्यापि पूर्वदिग्भागे मित्रेण वरुणेन च । प्रतिष्ठितौ लिङ्गवरौ सर्वकामप्रदायकौ ॥ ४४ ॥
एतानि मुनिभिः साध्यैरादित्यैर्वसुभिस्तथा । सेवितानि प्रयत्नेन सर्वपापहराणि वै ॥ ४५ ॥
स्वर्णलिङ्गस्य पश्चात्तु ऋषिभिस्तत्त्वदर्शिभिः । प्रतिष्ठितानि लिङ्गानि येषां संख्या न विद्यते ॥ ४६ ॥
तथा चोत्तरतस्तस्य यावदोघवती नदी । सहस्रमेकं लिङ्गानां देवपश्चिमतः स्थितम् ॥ ४७ ॥

उसके भी पूर्वी भागमें प्रभावशाली विष्णुने वरदाता महादेवकी आराधना कर सुदर्शन चक्र प्राप्त किया था । उसके भी पूर्वी भागमें मित्र एवं वरुणने सभी अभिलाषाओंकी पूर्ति करनेवाले दो लिङ्गोंकी स्थापना की है । ये दोनों लिङ्ग सभी प्रकारके पापोंका विनाश करनेवाले हैं । मुनियों, साध्यों, आदित्यों एवं वसुओंद्वारा इन लिङ्गोंकी प्रयत्नपूर्वक सेवा की गयी है । तत्त्वदर्शी ऋषियोंने स्वर्णलिङ्गके पीछेकी ओर जिन लिङ्गोंको प्रतिष्ठित किया है, उनकी संख्या नहीं गिनी जा सकती । उसी प्रकार स्वर्णलिङ्गके उत्तर ओघवती नदीतक पश्चिमकी ओर महादेवके एक हजार लिङ्ग स्थित हैं ॥ ४३–४७ ॥

तस्यापि पूर्वदिग्भागे वालखिल्यैर्महात्मभिः । प्रतिष्ठिता रुद्रकोटिर्यावत्संनिहितं सरः ॥ ४८ ॥
दक्षिणेन तु देवस्य गन्धर्वैर्यक्षकिंनरैः । प्रतिष्ठितानि लिङ्गानि येषां संख्या न विद्यते ॥ ४९ ॥
तिस्रः कोट्योऽर्धकोटी च लिङ्गानां वायुरब्रवीत् । असंख्याताः सहस्राणि ये रुद्राः स्थाणुमाश्रिताः ॥ ५० ॥
एतज्ज्ञात्वा सदा नरः स्थाणुलिङ्गं समाश्रयेत् । यस्य प्रसादात् प्राप्नोति मनसा चिन्तितं फलम् ॥ ५१ ॥

उस-(नदी)के पूर्वी भागमें महात्मा वालखिल्योंने समिहित सगेश्वरतक करोड़ों रुद्रोंकी स्थापना की है गन्धर्वों, यक्षों एवं किन्नरोंने दक्षिण दिशाकी ओर भगवान् शङ्करके असंख्य लिङ्गोंकी स्थापना की है। मधुर कहना है कि साढ़े तीन करोड़ लिङ्गोंकी स्थापना हुई है। स्थाणुतीर्थमें अनन्त सहस्र रुद्र लिङ्ग विद्यमान हैं मनुष्यको चाहिये कि श्रद्धाके साथ स्थाणु लिङ्गका आश्रय ले। इससे स्थाणु लिङ्गकी दयासे मनोवाञ्छित फल मिलता है ॥ ४८–५१ ॥

अकामो वा सकामो वा प्रविश्य स्थाणुमन्दिरम्। विमुक्तः पातकैर्घोरैः प्राप्नोति परमं पदम् ॥ ५२ ॥
चैत्रमासे त्रयोदश्यां दिव्यनक्षत्रयोगतः। शुक्रार्कचन्द्रसंयोगे दिने पुण्यतमे शुभे ॥ ५३ ॥
प्रतिष्ठितं स्थाणुलिङ्गं ब्रह्मणा लोकधारिणा। ऋषिभिर्देवसंघैश्च पूजितं शाश्वतीः समाः ॥ ५४ ॥
तस्मिन् काले निराहारा मानवाः श्रद्धयान्विताः। पूजयन्ति शिवं ये वै ते यान्ति परमं पदम् ॥ ५५ ॥
तदारूढमिदं ज्ञात्वा ये कुर्वन्ति प्रदक्षिणम्। प्रदक्षिणीकृता तैस्तु सप्तद्वीपा वसुन्धरा ॥ ५६ ॥

इति श्रीवामनपुराणे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

जो मनुष्य निष्काम या सकामभावसे स्थाणु-मन्दिरमें प्रवेश करता है, वह घोर पापोंसे छुटकारा पाकर परम पदको प्राप्त करता है। जब चैत्र महीनेकी त्रयोदशी तिथिमें दिव्य नक्षत्रोंका योग हुआ और उसमें शुक्र, सूर्य, चन्द्रमाका (शुभ) संयोग हुआ तब अतीव पवित्र शुभ दिनमें जगत्का धारण और पोषण करनेवाले ब्रह्माने स्थाणु लिङ्गको प्रतिष्ठापित किया। ऋषियों एवं देवताओंके द्वारा अनन्त वर्षोंतक अर्थात् सदैव इसकी अर्चना होती रहेगी। जो मनुष्य उस समय निराहार रहते हुए व्रत करके श्रद्धासे शिवकी पूजा करता है, वह परम पदको प्राप्त करता है। जिन मनुष्योंने स्थाणु-लिङ्गको शिवसे आरूढ़ (निविष्ट) मानकर उसकी प्रदक्षिणा की, उन्होंने मानो सात द्वीपवाली पृथिवीकी प्रदक्षिणा कर ली ॥ ५२–५६ ॥

इस प्रकार श्रीवामनपुराणमें छियालीसवाँ अध्याय समाप्त हुआ ॥ ४६ ॥



[अथ सप्तचत्वारिंशोऽध्यायः]

मार्कण्डेय उवाच

स्थाणुतीर्थप्रभावं तु श्रोतुमिच्छाम्यहं मुने। केन सिद्धिरियं प्राप्ता सर्वपापभयापहा ॥ १ ॥

सैंतालीसवाँ अध्याय प्रारम्भ

(स्थाणुतीर्थके सन्दर्भमें राजा वेनका चरित्र, पृथु जन्म और उनका अभिषेक, वेनके उद्धारके लिये पृथुका प्रयत्न और वेनकी शिव स्तुति)

मार्कण्डेयजीने कहा—मुने! अब मैं आपसे स्थाणुतीर्थके प्रभावको सुनना चाहता हूँ। इस तीर्थमें किसने सभी प्रकारके पापों एवं भयोंको दूर करनेवाली सिद्धि प्राप्त की ? ॥ १ ॥

सनत्कुमार उवाच

शृणु सर्वमशेषेण स्थाणुमाहात्म्यमुत्तमम्। यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो भवति मानवः ॥ २ ॥
एकार्णवे जगत्यस्मिन् नष्टे स्थावरजङ्गमे।
विष्णोर्नाभिसमुद्भूतं पद्ममव्यक्तजन्मनः। तस्मिन् ब्रह्मा समुद्भूतः सर्वलोकपितामहः ॥ ३ ॥

तस्मान्मरीचिरभवन्मरीचेः कश्यपः सुतः। कश्यपादभवद् भास्वांस्तस्मान्मनुरजायत॥ ४॥
मनोस्तु क्षुवतः पुत्र उत्पन्नो मुखसंभवः। पृथिव्यां चतुरन्तायां राजासीद् धर्मरक्षिता॥ ५॥
तस्य पत्नी बभूवाथ भया नाम भयावहा। मृत्योः सकाशादुत्पन्ना कालस्य दुहिता तदा॥ ६॥

सनत्कुमारने कहा (उत्तर दिया)—मार्कण्डेय! तुम स्थाणुके उत्तम माहात्म्यको पूर्णतया सुनो, जिसको सुनकर मनुष्य सभी पापोंसे बिल्कुल छूट जाता है। इस अचर-सचर संसारके प्रलयकालीन समुद्रमें विलीन हो जानेपर अव्यक्तजन्मवाले विष्णुकी नाभिसे एक कमल उत्पन्न हुआ। उससे समस्त लोकोंके पितामह ब्रह्मा उत्पन्न हुए। उनसे मरीचि हुए और मरीचिके पुत्र हुए कश्यप। कश्यपसे सूर्य उत्पन्न हुए एवं उनसे उत्पन्न हुए मनु। मनुके छींकनेपर उनके मुँहसे एक पुत्रकी उत्पत्ति हुई। वह सारी पृथ्वीके धर्मकी रक्षा करनेवाला राजा हुआ। उस राजाकी भया नामकी पत्नी हुई, जो (सचमुच) भय उत्पन्न करनेवाली थी। वह कालकी कन्या थी और मृत्युके गर्भसे उत्पन्न हुई थी॥ २–६॥

तस्यां समभवद् वेनो दुरात्मा वेदनिन्दकः। स दृष्ट्वा पुत्रवदनं क्रुद्धो राजा वनं ययौ॥ ७॥
तत्र कृत्वा तपो घोरं धर्मेणावृत्य रोदसी। प्राप्तवान् ब्रह्मसदनं पुनरावृत्तिदुर्लभम्॥ ८॥
वेनो राजा समभवत् समस्ते क्षितिमण्डले। स मातामहदोषेण तेन कालात्मजात्मजः॥ ९॥
घोषयामास नगरे दुरात्मा वेदनिन्दकः। न दातव्यं न यष्टव्यं न होतव्यं कदाचन॥ १०॥

(फिर तो) उससे वेनने जन्म लिया जो दुरात्मा था तथा वेदोंकी निन्दा करनेवाला था। उस पुत्रके मुखको देखकर राजा क्रुद्ध हो गया और वनमें चला गया। उसने वहाँ घोर तपस्या की तथा पृथ्वी एवं आकाशके बीचके स्थानको धर्मसे व्याप्तकर नहीं लौटनेवाले स्थान उस ब्रह्मलोकको प्राप्त कर लिया। (और इधर) वेन सम्पूर्ण भूमण्डलका राजा हो गया। अपने नानाके उस दोषके कारण कालकन्या भयाके उस दुरात्मा वेद-निन्दक पुत्रने नगरमें यह घोषणा करा दी कि कभी भी (कोई) दान न दे, यज्ञ न करे एवं हवन न करे—(दान, यज्ञ, हवन करना अपराध माना जायेगा)॥ ७–१०॥

अहमेकोऽत्र वै वन्द्यः पूज्योऽहं भवतां सदा। मया हि पालिता यूयं निवसध्वं यथासुखम्॥ ११॥
तन्मत्तोऽन्यो न देवोऽस्ति युष्माकं यः परायणम्। एतच्छ्रुत्वा तु वचनमृषयः सर्व एव ते॥ १२॥
परस्परं समागम्य राजानं वाक्यमब्रुवन्। श्रुतिः प्रमाणं धर्मस्य ततो यज्ञः प्रतिष्ठितः॥ १३॥
यज्ञैर्विना नो प्रीयन्ते देवाः स्वर्गनिवासिनः। अप्रीता न प्रयच्छन्ति वृष्टिं सस्यस्य वृद्धये॥ १४॥
तस्माद् यज्ञैश्च देवैश्च धार्यते सचराचरम्। एतच्छ्रुत्वा क्रोधदृष्टिर्वेनः प्राह पुनः पुनः॥ १५॥

इस संसारमें एकमात्र मैं ही आप लोगोंका वन्दनीय और पूजनीय हूँ। आप लोग मुझसे रक्षित रहकर आनन्दपूर्वक निवास करें। मुझसे भिन्न कोई दूसरा देवता नहीं है, जो आप लोगोंका उत्तम आश्रय हो सके। वेनके इस वचनको सुननेके पश्चात् सभी ऋषियोंने आपसमें मिलकर (निश्चय किया और) राजासे यह वचन कहा—राजन्! धर्मके विषयमें वेद (शास्त्र) ही प्रमाण हैं। उन्हींसे यज्ञ विहित हैं, प्रतिष्ठित हैं—विष्णुरूपमें मान्य हैं। (उन) यज्ञोंके किये बिना स्वर्गमें रहनेवाले देवता सन्तुष्ट नहीं होते और बिना सन्तुष्ट हुए वे फसलकी वृद्धिके लिये जलकी वृष्टि नहीं करते। अतः विष्णुमय यज्ञों और देवताओंसे ही चर-अचर समस्त संसारका धारण और पोषण होता है। यह सुनकर वेन क्रोधसे आँखें लालकर बार-बार कहने लगा—॥ ११–१५॥

न यष्टव्यं न दातव्यमित्याह क्रोधमूर्च्छितः । ततः क्रोधसमाविष्टा ऋषयः सर्व एव ते ॥ १६ ॥
निजघ्नुर्मन्त्रपूतैस्ते कुशैर्वज्रसमन्वितैः । ततस्त्वराजके लोके तमसा संवृते तदा ॥ १७ ॥
दस्युभिः पीड्यमानास्तान् ऋषींस्ते शरणं ययुः । ततस्ते ऋषयः सर्वे ममन्थुस्तस्य वै करम् ॥ १८ ॥
सव्यं तस्मात् समुत्तस्थौ पुरुषो ह्रस्वदर्शनः । तमूचुर्ऋषयः सर्वे निषीदतु भवानिति ॥ १९ ॥

क्रोधसे व्याकुल (निरुमित्त्याकर) उसने 'न यज्ञ करना होगा और न दान देना होगा'—ऐसा कहा। उसके बाद ऋषियोंने भी क्रुद्ध होकर मन्त्रद्वारा वज्रमय कुशोंसे उसे मार डाला। उसके (मर जानेके) बाद (राजासे रहित) संसारमें अराजकता छा गयी, जिससे सर्वत्र अशान्ति फैल गयी। चोरों-डाकुओंने लोकजनोंको पीड़ित कर डाला। दस्युदलोंसे त्रस्त जनवर्ग उन ऋषियोंकी शरणमें गया, जिस ऋषिवर्गने उस वेनको मार डाला था। उसके बाद उन सभी ऋषियोंने उसके बायें हाथको मथित किया। उससे एक पुरुष निकला जो छोटा बौना दीख रहा था। सभी ऋषियोंने उससे कहा—'निषीदतु भवान्' अर्थात् आप बैठें ॥ १६–१९ ॥

तस्मान्निषादा उत्पन्ना वेनकल्मषसंभवाः । ततस्ते ऋषयः सर्वे ममन्थुर्दक्षिणं करम् ॥ २० ॥
मथ्यमाने करे तस्मिन् उत्पन्नः पुरुषोऽपरः । बृहत्सालप्रतीकाशो दिव्यलक्षणलक्षितः ॥ २१ ॥
धनुर्बाणाङ्कितकरश्चक्रध्वजसमन्वितः । तमुत्पन्नं तदा दृष्ट्वा सर्वे देवाः सवासवाः ॥ २२ ॥
अभ्यषिञ्चन् पृथिव्यां तं राजानं भूमिपालकम् । ततः स रञ्जयामास धर्मेण पृथिवीं तदा ॥ २३ ॥

उस बायें हाथके मथनेसे निकले हुए बौने पुरुषसे ऋषियोंद्वारा 'निषीदतु भवान्' कहनेके कारण 'निषीदतु' के आधारपर निषादोंकी उत्पत्ति हुई जो वेनकी पापमूर्ति थे। इसके बाद उस बौने पुरुषको राज्यकार्य-संचालनमें अनुपयुक्त समझकर उन सभी ऋषियोंने (पुनः मरे हुए) वेनके दायें हाथको मथा। उस हाथके मथे जानेपर बड़े शालवृक्षकी भाँति और दिव्य लक्षणोंसे युक्त एक दूसरा पुरुष निकला। उसके हाथमें धनुष, बाण, चक्र और ध्वजाकी रेखाएँ थीं। उस समय उसे उत्पन्न हुआ देखकर इन्द्रके सहित सभी देवताओंने उसको पृथ्वीमें भूलोकका पालन करनेवाले राजाके रूपमें (राजपदपर) अभिषिक्त कर दिया। उसके बाद उसने पृथिवीका धर्मपूर्वक रञ्जन किया—प्रजाको प्रसन्न रखा ॥ २०–२३ ॥

पित्राऽपरञ्जिता तस्य तेन सा परिपालिता । तत्र राजेतिशब्दोऽस्य पृथिव्या रञ्जनादभूत् ॥ २४ ॥
स राज्यं प्राप्य तेभ्यस्तु चिन्तयामास पार्थिवः । पिता मम अधर्मिष्ठो यज्ञव्युच्छित्तिकारकः ॥ २५ ॥
कथं तस्य क्रिया कार्या परलोकसुखावहा । इत्येवं चिन्तयानस्य नारदोऽभ्याजगाम ह ॥ २६ ॥
तस्मै स चासनं दत्त्वा प्रणिपत्य च पृष्टवान् । भगवन् सर्वलोकस्य जानासि त्वं शुभाशुभम् ॥ २७ ॥
पिता मम दुराचारो देवब्राह्मणनिन्दकः । स्वकर्मरहितो विप्र परलोकमवाप्तवान् ॥ २८ ॥

उसके पिताने जिस जनताको अपने कुकृत्योंसे अप्रसन्न बना दिया था उसी जनताको उसने भलीभाँति रञ्जित किया। सारी पृथ्वीका रञ्जन करनेके कारण ही उसे यथार्थरूपमें 'राजा' शब्दसे सम्बोधित किया जाने लगा। वह पृथ्वीपति राजा उनसे राज्य प्राप्त कर चिन्तन करने लगा कि मेरे पिता अधर्मी, पाप-मति और यज्ञका विध्वंस-उच्छेद करनेवाले थे। इसलिये कौन-सी क्रिया की जाय जो उन्हें परलोकमें सुख देनेवाली हो। (उसी समय) इस प्रकार चिन्तन करते हुए उसके पास नारदजी आ गये। उसने उन नारदजीको बैठनेके लिये आसन दिया और साष्टाङ्ग प्रणाम कर पूछा—भगवन्! आप सारे संसारके प्राणियोंके शुभ और अशुभको जानते हैं; (देखें,) मेरे पिता देवताओं और ब्राह्मणोंकी निन्दा करनेवाले दुराचारी थे। विप्रदेव! वे अपने कर्तव्य कर्मसे रहित थे और अब वे परलोक चले गये हैं (उनकी गतिके लिये मुझे कौन-सी क्रिया करनी चाहिये?) ॥ २४–२८ ॥

ततोऽपश्यन्नारदस्तं ध्यात्वा दिव्येन चक्षुषा । म्लेच्छमध्ये समुत्पन्नं क्षयकुष्ठसमन्वितम् ॥ २९ ॥
तच्छ्रुत्वा वचनं तस्य नारदस्य महात्मनः । चिन्तयामास दुःखार्त्तः कथं कार्यं मया भवेत् ॥ ३० ॥
इत्येवं चिन्तयानस्य मतिर्जाता महात्मनः । पुत्रः स कथ्यते लोके यः पितॄंस्त्रायते भयात् ॥ ३१ ॥
एवं संचिन्त्य स तदा नारदं पृष्टवान् मुनिम् । तारणं मत्पितुस्त्वद्य मया कार्यं कथं मुने ॥ ३२ ॥

उसके बाद नारदजीने अपनी दिव्य दृष्टिसे देखकर उससे बोले—राजन्! तुम्हारे पिता म्लेच्छोंके बीचमें उत्पन्न हुए हैं। उन्हें क्षयरोग और कुष्ठरोग हो गया है। महात्मा नारदके ऐसे वचनको सुनकर वह राजा दुःखी हो गया और विचारने लगा कि अब मुझे क्या करना चाहिये। इस प्रकार सोचते-विचारते उस महात्मा राजाको बुद्धि उत्पन्न हुई कि संसारमें पुत्र उसको कहते हैं जो पितरोंको नरकके भयसे तार दे। इस प्रकार विचार करके उस राजाने नारदमुनिसे पूछा—मुने! मैं उन दिवंगत पिताके उद्धारके लिये मुझे क्या करना चाहिये? ॥ २९–३२ ॥

नारद उवाच

गच्छ त्वं तस्य तं देहं तीर्थेषु कुरु निर्मलम् । यत्र [illegible] सरः संनिहितं प्रति ॥ ३३ ॥
एतच्छ्रुत्वा तु वचनं नारदस्य महात्मनः । संनिवेश्य राज्यभारं राजा स तु जगाम ह ॥ ३४ ॥
स गत्वा चोत्तरां भूमिं म्लेच्छमध्ये ददर्श ह । कुष्ठरोगेण महता क्षयेण च समन्वितम् ॥ ३५ ॥
ततः शोकेन महता संतप्तो वाक्यमब्रवीत् । हे म्लेच्छा नौमि पुरुषं स्वगृहं च नयाम्यहम् ॥ ३६ ॥

नारदजीने कहा—तुम [illegible] भगवान्के महान् तीर्थ [illegible] सांनिहित सरके [illegible] और जाओ एवं उनकी उस देहको तीर्थोंमें शुद्ध करो। तब राजा महात्मा नारदकी यह बात सुन करके मन्त्रीके ऊपर राज्य-भार सौंपकर चला गया। उसने उत्तर दिशामें जाकर म्लेच्छोंके बीच [illegible] कुष्ठ और क्षयरोगसे पीड़ित अपने पिताको [illegible]। [illegible] होकर उसने कहा कि म्लेच्छो! मैं इस पुरुषको प्रणाम करता हूँ और [illegible] ॥ ३३–३६ ॥

तत्राहमेनं [illegible] यदि मन्यध्वम् । तथेति सर्वे ते म्लेच्छाः पुरुषं तं दयापरम् ॥ ३७ ॥
ऊचुः प्रणतसर्वाङ्गा यथा जानासि तत्कुरु । ततः आनीय पुरुषाञ्छिबिकावाहनोचितान् ॥ ३८ ॥
[illegible] सुखेन नयत द्विजम् । ततः श्रुत्वा तु वचनं तस्य राज्ञो दयावतः ॥ ३९ ॥
गृहीत्वा शिबिकां क्षिप्रं कुरुक्षेत्रेण यान्ति ते । तत्र नीत्वा स्थाणुतीर्थे अवतार्य च ते गताः ॥ ४० ॥

[illegible] मैं इस पुरुषको वहाँ ले जाकर रोगसे मुक्त करूँ। वे सभी म्लेच्छ उस [illegible] —जैसा ठीक समझो, वैसा करो। उसके बाद उसने [illegible] और उन्हें कुछ पारिश्रमिक देकर कहा—इस द्विजको सुखपूर्वक ले जाओ। [illegible] उठाकर शीघ्रतासे कुरुक्षेत्र होते हुए स्थाणुतीर्थमें ले [illegible] चले गये ॥ ३७–४० ॥

ततः [illegible] स्नापयति स्म तदा । ततो वायुरन्तरिक्षे इदं वचनमब्रवीत् ॥ ४१ ॥
मा तात साहसं [illegible] प्रयत्नतः । अयं पापेन घोरेण अतीव परिवेष्टितः ॥ ४२ ॥
वेदनिन्दा [illegible] । सोऽयं स्नात्वा महत्तीर्थे नाशयिष्यति तत्क्षणात् ॥ ४३ ॥
एतद् वायोर्वचः श्रुत्वा दुःखेन महताऽन्वितः ।
[illegible] दुःखितः । एष [illegible] पापेन अतीव परिवेष्टितः ॥ ४४ ॥

स्थाणु तीर्थमें पहुँचनेपर जब वह राजा म्लेच्छोंके बीच उत्पन्न हुआ एवं क्षय और कुष्ठरोगसे आक्रान्त अपने पिताकी देहको मध्याह्न कालमें स्नान कराने लगा तो अन्तरिक्षमें वायुरूपसे देवताओंने यह वचन कहा कि तात ! इस प्रकारका साहस मत करो। तीर्थकी प्रयत्नपूर्वक रक्षा करो। यह अत्यन्त घोर पाप कर चुका है, (इसका) रोम रोम पापसे भरा है, गिरा है। वेदकी निन्दा करना महान् पाप है, जिसका अन्त नहीं होता। अतएव यह स्नान करके इस महान् तीर्थको तत्काल नष्ट कर देगा। वायुरूपी देवताओंके इन वचनको सुनकर दुःखी एवं शोकसे सन्तप्त हुए राजाने कहा—देवताओ ! यह घोर पापसे अत्यन्त परिणाम है ॥ ४१–४४ ॥

प्रायश्चित्तं करिष्येऽहं यद्वदिष्यन्ति देवता। ततस्ता देवता सर्वा इदं वचनमब्रुवन् ॥ ४५ ॥
स्नात्वा स्नात्वा च तीर्थेषु अभिषिञ्चस्व वारिणा। ओजसा कुलुरं यावत् प्रतिकूले सरस्वतीम् ॥ ४६ ॥
स्नात्वा मुक्तिमवाप्नोति पुरुषः श्रद्धयान्वितः। एष स्वपोषणपरो देवदूषणतत्परः ॥ ४७ ॥
ब्राह्मणैश्च परित्यक्तो नैव शुद्धयति कर्हिचित्। तस्मादेनं समुद्दिश्य स्नात्वा तीर्थेषु भक्तितः ॥ ४८ ॥
अभिषिञ्चस्व तोयेन ततः पूतो भविष्यति। इत्येतद्वचनं श्रुत्वा कृत्वा तस्याश्रमं ततः ॥ ४९ ॥
तीर्थयात्रां ययौ राजा उद्दिश्य जनकं स्वकम्। स तेषु प्लावनं कुर्वंस्तीर्थेषु च दिने दिने ॥ ५० ॥
अभ्यषिञ्चत् स्वपितरं तीर्थतोयेन नित्यशः। एतस्मिन्नेव काले तु सारमेयो जगाम ह ॥ ५१ ॥
स्थाणोर्मठे कौल्पतिर्देवद्रव्यस्य रक्षिता। परिग्रहस्य द्रव्यस्य परिपालयिता सदा ॥ ५२ ॥
प्रियश्च सर्वलोकेषु देवकार्यपरायणः। तस्यैवं वर्तमानस्य धर्ममार्गे स्थितस्य च ॥ ५३ ॥
कालेन चलिता बुद्धिर्देवद्रव्यस्य नाशने। तेनाधर्मेण युक्तस्य परलोकगतस्य च ॥ ५४ ॥
दृष्ट्वा यमोऽब्रवीद् वाक्यं श्वयोनिं व्रज मा चिरम्। तद्वाक्यानन्तरं जातः श्वा वै सौगन्धिके वने ॥ ५५ ॥

(परन्तु) देवगण 'आप लोग इसके लिये जो प्रायश्चित्त कहेंगे, उसे मैं करूँगा'। उसके ऐसा कहनेपर उन सभी देवताओंने यह बात कही—तीर्थमें बार-बार स्नान करके तीर्थ-जलद्वारा इसे बार-बार सींचो। सरस्वतीके तटपर 'ओजसतीर्थ'से 'कुलुक'पर्यन्त हर-एक तीर्थमें स्नान करनेवाला श्रद्धालु पुरुष मुक्तिको प्राप्त करता है। यह अपना ही पालन-पोषण करनेमें लगा रहता था एवं देवताओंकी निन्दा करनेमें तत्पर रहता था। ब्राह्मणोंने इसको पाप करनेके कारण त्याग दिया था। यह कभी भी शुद्ध नहीं हो सकता। इसलिये (इसकी यदि शुद्धि चाहते हो तो) इसके उद्देश्यसे तीर्थोंमें जाकर भक्तिपूर्वक स्नान करके तीर्थ जलसे इसे अभिषिक्त करो। इससे यह पवित्र हो जायगा। उसके बाद राजा देवताओंके इन वचनोंको सुननेके बाद वहाँ अपने पिताके लिये एक आश्रमका निर्माण कराकर उसके उद्देश्यसे तीर्थयात्रा करने चला गया। वह प्रतिदिन उन तीर्थोंमें स्नान करते हुए तीर्थजलसे अपने पिताको अभिषिक्त करने लगा। इसी समय वहाँ एक कुत्ता आ गया। (कुत्तेका इतिहास इस प्रकार है—) पूर्व कालमें वह कुत्ता स्थाणुतीर्थमें स्थित मठमें देव-द्रव्योंकी रक्षा करनेवाला—दानमें प्राप्त द्रव्यका सदा पालन करनेवाला—सर्वजनप्रिय एवं देवकृत्यमें रत कौल्पति नामका महन्त था। इस प्रकार वह अपना जीवनयापन कर रहा था। एक बार धर्म-मार्गमें स्थित रहते हुए भी उस कौल्पतिकी बुद्धि कुछ समयके बाद धर्ममार्गसे हट गयी। वह देवद्रव्यका नाश (दुरुपयोग) करने लगा। वह अधर्मी (बना) कौल्पति जब मरकर परलोकमें गया, तब यमराजने उसे (उसके कर्मविपाकको) देखकर कहा—तुम कुत्तेकी योनिमें जाओ, देर मत करो। उनके कहनेके पश्चात् वह महन्त सौगन्धिक वनमें कुत्तेकी योनिमें उत्पन्न हुआ ॥ ४५–५५ ॥

ततः कालेन महता श्वयूथपरिवारितः। परिभूतः सरमया दुःखेन महता वृतः ॥ ५६ ॥
त्यक्त्वा द्वैतवनं पुण्यं सान्निहत्यं ययौ सरः। तस्मिन् प्रविष्टमात्रस्तु स्थाणोरेव प्रसादतः ॥ ५७ ॥
अतीव तृषया युक्तः सरस्वत्यां ममज्ज ह। तत्र संप्लुतदेहस्तु विमुक्तः सर्वकिल्बिषैः ॥ ५८ ॥
आहारलोभेन तदा प्रविवेश कुटीरकम्। प्रविशन्तं तदा दृष्ट्वा श्वानं भयसमन्वितः ॥ ५९ ॥
स तं पस्पर्श शनकैः स्थाणुतीर्थे ममज्ज ह। पततः पूर्वतीर्थेषु विप्रुषैः परिषिञ्चितः ॥ ६० ॥
शुनोऽस्य गात्रसम्भूतैरम्बुबिन्दुभिः स सिञ्चितः। विरक्तदृष्टिश्च शुनः क्षेपेण च ततः परम् ॥ ६१ ॥
स्थाणुतीर्थस्य माहात्म्यात् स पुत्रेण च तारितः।
नियतस्तत्क्षणाज्जातो दिव्यदेहसमन्वितः। प्रणिपत्य तदा स्थाणुं स्तुतिं कर्तुं प्रचक्रमे ॥ ६२ ॥

उसके बाद बहुत समय व्यतीत होनेतक वह कुत्ता कुत्तोंके झुंडसे घिरा रहता था; फिर भी कुतियासे अपमानित होनेके कारण अत्यन्त दुःखित रहता था। इसलिये वह द्वैतवनको छोड़कर पवित्र सान्निहत्य-सरोवरमें चला गया। उसमें प्रवेश करते ही स्थाणु भगवान्की ही कृपासे अत्यन्त प्यासा होकर उसने सरस्वती नदीमें डुबकी लगायी। उसमें स्नान करनेसे ही वह समस्त पापोंसे विमुक्त हो गया। उसके बाद आहारके लोभसे उसने कुटीमें प्रवेश किया। उस कुत्तेको प्रवेश करते देखकर भयभीत होकर उस-(वेन-)ने उसका धीरेसे स्पर्श किया। स्पर्श करनेके बाद स्थाणुतीर्थमें उसने स्नान किया। पूर्वतीर्थमें स्नान करनेके बाद तीर्थके जलबिन्दुओंसे सिञ्चित करनेवाले पुत्रसे एवं उस कुत्तेके शरीरसे निकले जल-बिन्दुओंसे सिञ्चित होने तथा कुत्तेके भयसे स्थाणुतीर्थमें गिर जानेके कारण स्नान हो जानेके माहात्म्यसे उसकी दृष्टि विरक्त हो गयी। पुत्रने स्थाणुतीर्थके माहात्म्यसे अपने पिताका उद्धार कर दिया और संयतेन्द्रिय होकर उसने तत्काल दिव्य देह धारण कर भगवान् स्थाणुको प्रणाम किया और स्तुति करना प्रारम्भ किया ॥ ५६–६२ ॥

वेन उवाच

प्रपद्ये देवमीशानं त्वामजं चन्द्रभूषणम्। महादेवं महात्मानं विश्वस्य जगतः पतिम् ॥ ६३ ॥
नमस्ते देवदेवेश सर्वशत्रुनिषूदन। देवेश बलिविष्टम्भ देवदैत्यैश्च पूजित ॥ ६४ ॥
विरूपाक्ष सहस्राक्ष त्र्यक्ष यक्षेश्वरप्रिय। सर्वतः पाणिपादान्त सर्वतोऽक्षिशिरोमुख ॥ ६५ ॥
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठसि। शङ्कुकर्ण महाकर्ण कुम्भकर्णार्णवालय ॥ ६६ ॥

वेन स्तुति करने लगा—मैं अजन्मा चन्द्रमाके शिरोभूषणवाले, ईशानदेव, महात्मा, सारे संसारका पालन करनेवाले आप महादेवकी शरण ग्रहण करता हूँ। देवदेवेश! समस्त शत्रुओंके निषूदन! देवेश! बलिको निरस्त करनेवाले! देवों एवं दैत्योंसे पूजित! आपको नमस्कार है। हे (विरूप आँखवाले) विरूपाक्ष! हे (हजारों आँखोंवाले) सहस्राक्ष! हे तीन नेत्रोंवाले! हे यक्षेश्वरप्रिय! हे चारों ओरसे (हाथ-पैरवाले) पाणिपादमुख! हे चारों ओर आँख एवं मुखवाले! आपको नमस्कार है। आप सर्वत्र सुन सकनेवाले और सभी स्थानोंपर व्याप्त हैं। संसारमें आपने सभीको आवृत कर (ढक) रखा है। हे शङ्कुकर्ण! हे महाकर्ण! हे कुम्भकर्ण! हे समुद्र-निवासी! आपको नमस्कार है ॥ ६३–६६ ॥

गजेन्द्रकर्ण गोकर्ण पाणिकर्ण नमोऽस्तु ते। शतजिह्व शतावर्त शतोदर शतानन ॥ ६७ ॥
गायन्ति त्वां गायत्रिणो ह्यर्चयन्त्यर्कमर्चिणः। ब्रह्माणं त्वा शतक्रतो उद्वंशमिव मेनिरे ॥ ६८ ॥
मूर्तौ हि ते महामूर्ते समुद्राम्बुधरास्तथा। देवताः सर्वा एवात्र गोष्ठे गाव इवासते ॥ ६९ ॥
शरीरे तव पश्यामि सोममग्निं जलेश्वरम्। नारायणं तथा सूर्यं ब्रह्माणं च बृहस्पतिम् ॥ ७० ॥

हे गजेन्द्रकर्ण! हे गोकर्ण! हे पाणिकर्ण! हे शतजिह्व! हे शतावर्त! हे शतोदर! हे शतानन! आपको नमस्कार है। गायत्रीका जप करनेवाले विद्वान् आपकी ही महिमा गाते हैं। सूर्यकी पूजा करनेवाले सूर्यरूपसे आपकी ही पूजा करते हैं। आपको ही सभी लोग इन्द्रसे श्रेष्ठ वंशाख्य ब्रह्मा मानते हैं। महामूर्ते! आपकी मूर्तिमें समुद्र, मेघ और समस्त देवता ऐसे स्थित हैं जैसे गोशालामें गौएँ रहती हैं। मैं आपके शरीरमें सोम, अग्नि, वरुण, नारायण, सूर्य, ब्रह्मा और बृहस्पतिको देख रहा हूँ ॥ ६७–७० ॥

भगवान् कारणं कार्यं क्रियाकरणमेव तत्। प्रभवः प्रलयश्चैव सदसच्चापि दैवतम् ॥ ७१ ॥
नमो भवाय शर्वाय वरदायोग्ररूपिणे। अन्धकासुरहन्त्रे च पशूनां पतये नमः ॥ ७२ ॥
त्रिजटाय त्रिशीर्षाय त्रिशूलासक्तपाणये। त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्न नमोऽस्तु ते ॥ ७३ ॥
नमो मुण्डाय चण्डाय अण्डायोत्पत्तिहेतवे। डिण्डिमासक्तहस्ताय डिण्डिमुण्डाय ते नमः ॥ ७४ ॥

आप भगवान्, कारण, कार्य, क्रियाके करण, प्रभव, प्रलय, सत्, असत् एवं दैवत हैं। भव, शर्व, वरद, उग्र-रूप धारण करनेवाले, अन्धकासुरको मारनेवाले और पशुओंके पति पशुपतिको नमस्कार है। हे त्रिपुरनाशक! तीन जटावाले, तीन शिरवाले, हाथमें त्रिशूल लिये रहनेवाले एवं त्रिनेत्र (कहलानेवाले) आपको नमस्कार है। हे मुण्ड, चण्ड और अण्डकी उत्पत्तिके हेतु, डिण्डिमपाणि एवं डिण्डिमुण्ड! आपको नमस्कार है ॥ ७१–७४ ॥

नमोर्ध्वकेशदंष्ट्राय शुष्काय विकृताय च। धूम्रलोहितकृष्णाय नीलग्रीवाय ते नमः ॥ ७५ ॥
नमोऽस्त्वप्रतिरूपाय विरूपाय शिवाय च। सूर्यमालाय सूर्याय स्वरूपध्वजमालिने ॥ ७६ ॥
नमो मानातिमानाय नमः पटुतराय ते। नमो गणेन्द्रनाथाय वृषस्कन्धाय धन्विने ॥ ७७ ॥
संक्रन्दनाय चण्डाय पर्णधारपुटाय च। नमो हिरण्यवर्णाय नमः कनकवर्चसे ॥ ७८ ॥

हे ऊर्ध्वकेश, ऊर्ध्वदंष्ट्र, शुष्क, विकृत, धूम्र, लोहित, कृष्ण एवं नीलग्रीव! आपको नमस्कार है। अप्रतिरूप, विरूप, शिव, सूर्यमाल, सूर्य एवं स्वरूपध्वजमालीको नमस्कार है। मानातिमानको नमस्कार है। आप पटुतरको नमस्कार है। गणेन्द्रनाथ, वृषस्कन्ध एवं धन्वीको नमस्कार है। संक्रन्दन, चण्ड, पर्णधारपुट एवं हिरण्यवर्णको नमस्कार है। कनकवर्चसको नमस्कार है ॥ ७५–७८ ॥

नमः स्तुताय स्तुत्याय स्तुतिस्थाय नमोऽस्तु ते। सर्वाय सर्वभक्षाय सर्वभूतशरीरिणे ॥ ७९ ॥
नमो होत्रे च हन्त्रे च सितोदग्रपताकिने। नमो नम्याय नम्राय नमः कटकटाय च ॥ ८० ॥
नमोऽस्तु कृशनाशाय शयितायोत्थिताय च। स्थिताय धावमानाय मुण्डाय कुटिलाय च ॥ ८१ ॥
नमो नर्तनशीलाय लयवादित्रशालिने। नाट्योपहारलुब्धाय मुखवादित्रशालिने ॥ ८२ ॥

स्तुत किये गये तथा स्तुतिके योग्य (आप) को नमस्कार है। स्तुतिमें स्थित, सर्व, सर्वभक्ष एवं सर्वभूतशरीरी आपको नमस्कार है। होता, हन्ता तथा सफेद और ऊँची पताकावालेको नमस्कार है। नमन करनेयोग्य एवं नम्रको नमस्कार है। आप कटकटको नमस्कार है। कृशनाश, शयित, उत्थित, स्थित, धावमान, मुण्ड एवं कुटिलको नमस्कार है। नर्तनशील, लय वाद्यशाली, नाट्यके उपहारके लोभी एवं मुखोंसे बम-बम-जैसे मुँहसे बोले जानेवाले वाद्य-प्रेमीको नमस्कार है ॥ ७९–८२ ॥

नमो ज्येष्ठाय श्रेष्ठाय बलातिबलघातिने। कालनाशाय कालाय संसारक्षयकारिणे ॥ ८३ ॥
हिमवद्दुहितुः कान्त भैरवाय नमोऽस्तु ते। उग्राय च नमो नित्यं नमोऽस्तु दशबाहवे ॥ ८४ ॥
चितिभस्मप्रियायैव कपालासक्तपाणये। विभीषणाय भीष्माय भीमव्रतधराय च ॥ ८५ ॥
नमो विकृतवक्त्राय नमः पूतोग्रदृष्टये। पक्वाममांसलुब्धाय तुम्बिवीणाप्रियाय ८६ ॥

ज्येष्ठ, श्रेष्ठ, बलवान्‌से भी बलवान्‌को नष्ट करनेवाले, कालनाश, कालस्वरूप एवं संसारक्षयस्वरूप आपको नमस्कार है। हे हिमालयकी पुत्रीके पति—पार्वतीपति! आप भैरवको नमस्कार है और उग्ररूप आपको नित्य नमस्कार है। दस बाहुओंवाले (शिव) को नमस्कार है। चिताके भस्मको प्रिय माननेवाले, कपालपाणि, अत्यधिक भयंकर भयकर (भीम) एवं व्रतधर-(आप-)को (नमस्कार है)। विकृत मुँहवाले-(आप-)को नमस्कार है। पवित्र तेजस्विनी दृष्टिवाले, कच्चे-पक्के फलके गूदेको प्रिय माननेवाले, तुम्बी एवं वीणाको प्रिय माननेवालेको नमस्कार है ॥ ८३-८६ ॥

नमो वृषाङ्कवृक्षाय गोवृषाभिरूढिने नमः। कटङ्कटाय भीमाय नमः परपराय च ॥ ८७ ॥
नमः सर्ववरिष्ठाय वराय वरदायिने। नमो विरक्तरक्ताय भावनायाक्षमालिने ॥ ८८ ॥
विभेदभेदभिन्नाय छायायै तपनाय च। अघोरघोररूपाय घोरघोरतराय च ॥ ८९ ॥
नमः शिवाय शान्ताय नमः शान्ततमाय च। बहुनेत्रकपालाय एकमूर्त्ते नमोऽस्तु ते ॥ ९० ॥

वृषाङ्कवृक्षको नमस्कार है। गोवृषाभिरूढको नमस्कार है। कटङ्कट, भीम एवं परसे भी परको नमस्कार है। सर्ववरिष्ठ, वर एवं वरदायीको नमस्कार है। विरक्त एवं रक्तरूप, भावन एवं अक्षमालीको नमस्कार है। विभेद एवं भेदसे भिन्न, छाया, तपन, अघोर तथा घोररूप एवं घोरघोरतर रूपको नमस्कार है। शिव एवं शान्तको नमस्कार है। शान्ततम, बहुनेत्र एवं कपालधारीको नमस्कार है। हे एकमूर्ति! आपको नमस्कार है ॥ ८७-९० ॥

नमः क्षुद्राय लुब्धाय यज्ञभागप्रियाय च। पञ्चालाय सिताङ्गाय नमो यमनियामिने ॥ ९१ ॥
नमश्चित्रोरुघण्टाय घण्टाघण्टनिघण्टिने। सहस्रशतघण्टाय घण्टामालाविभूषिणे ॥ ९२ ॥
प्राणसंघट्टगर्वाय नमः किलिकिलिप्रिये। हुंहुंकाराय पाराय हुंहुंकारप्रियाय च ॥ ९३ ॥
नमः समसमे नित्यं गृहवृक्षनिकेतिने। गर्भमांसशृगालाय तारकाय तराय च ॥ ९४ ॥

क्षुद्र, लुब्ध, यज्ञभागप्रिय, पञ्चाल एवं सिताङ्गको नमस्कार है। यमके नियमनकर्ताको नमस्कार है। चित्रोरुघण्ट, घण्टाघण्टनिघण्टीको नमस्कार है। सहस्रशतघण्ट एवं घण्टामालाविभूषितको नमस्कार है। प्राणसंघट्टगर्व, किलिकिलिप्रिय, हुंहुंकार, पार एवं हुंहुंकारप्रियको नमस्कार है। समसम, गृहवृक्षनिकेती, गर्भमांसशृगाल, तारक एवं तरको नित्य नमस्कार है ॥ ९१-९४ ॥

नमो यज्ञाय यजिने हुताय प्रहुताय च। यज्ञवाहाय हव्याय तप्याय तपनाय च ॥ ९५ ॥
नमस्तु पयसे तुभ्यं तुण्डानां पतये नमः। अन्नदायान्नपतये नमो नानान्नभोजिने ॥ ९६ ॥
नमः सहस्रशीर्षाय सहस्रचरणाय च। सहस्रोद्यतशूलाय सहस्राभरणाय च ॥ ९७ ॥
बालानुचरगोप्त्रे च बालक्रीडाविलासिने। नमो बालाय वृद्धाय क्षुब्धाय क्षोभणाय च ॥ ९८ ॥

यज्ञ, यज्वान, हुत, प्रहुत, यज्ञवाह, हव्य, तप्य और तपनको नमस्कार है। पयस्‌रूप आपको नमस्कार है। तुण्डोंके पतिको नमस्कार है। अन्नद, अन्नपति एवं अनेक प्रकारके अन्नभोजीको नमस्कार है। हजारों सिरवाले, हजारों चरणवाले, हजारों शूलको उठाये हुए और हजारों आभूषणवालेको नमस्कार है। बालानुचरकी रक्षा करनेवाले, बालक्रीडामें विलास करनेवाले, बाल, वृद्ध, क्षुब्ध एवं क्षोभणको नमस्कार है ॥ ९५-९८ ॥

गङ्गालुलितकेशाय मुञ्जकेशाय वै नमः। नमः षट्कर्मतुष्टाय त्रिकर्मनिरताय च ॥ ९९ ॥
नग्नप्राणाय चण्डाय कृशाय स्फोटनाय च। धर्मार्थकाममोक्षाणां कथ्याय कथनाय च ॥ १०० ॥
सांख्याय सांख्यमुख्याय सांख्ययोगमुखाय च। नमो विरथरथ्याय चतुष्पथरथाय च ॥ १०१ ॥
कृष्णाजिनोत्तरीयाय व्यालयज्ञोपवीतिने।
वक्त्रसंधानकेशाय हरिकेश नमोऽस्तु ते। त्र्यम्बिकाम्बिकनाथाय व्यक्ताव्यक्ताय वेधसे ॥ १०२ ॥

गङ्गाद्युम्निकला और मुञ्जकेशको नमस्कार है । छः कर्मोंमें संतुष्ट तथा तीन कर्मोंमें रत रहनेवाले (आप) को नमस्कार है । नग्नप्राण, चण्ड, कृश, स्फोटन तथा धर्म, अर्थ, काम और मोक्षके कथन और कथनको नमस्कार है । सांख्य, सांख्यमुख्य, सांख्य-योगमुख, विरथस्थ तथा चतुष्पथरथको नमस्कार है । काले मृगचर्मके उत्तरीयवाले, सर्पके जनेऊवाले, वक्त्रसंधानकर्ता, ऋग्विकाम्यविकलाय, दृश्य एवं अदृश्य और नेत्रस्वरूप हरिकेश ! आपको नमस्कार है ॥ ९७–१०२ ॥

कामः कामदकामघ्न कृतात्मविचारिणे । नमः सर्वद पापघ्न कल्पसंख्याविचारिणे ॥ १०३ ॥
महासत्त्व महाबाहो महाबल नमोऽस्तु ते । महामेघ महाप्राज्ञ महाकाल महाद्युते ॥ १०४ ॥
मेघावर्त युगावर्त चन्द्रार्कपतये नमः । त्वमन्नमन्नभोक्ता च पक्वभुक् पावनोत्तम ॥ १०५ ॥
जरायुजाण्डजाश्चैव स्वेदजोद्भिज्जाश्च ये । त्वमेव देवदेवेश भूतग्रामश्चतुर्विधः ॥ १०६ ॥

हे काम ! हे कामद ! हे कामको नष्ट करनेवाले ! आप तृप्त और आत्मविचारकको नमस्कार है । हे सर्वद ! हे पाप दूर करनेवाले ! आप कल्पसंख्याविचारीको नमस्कार है । हे महासत्त्व ! हे महाबाहु ! हे महाबल ! हे महामेघ ! हे महाप्राज्ञ ! हे महाकाल एवं हे महाद्युति ! आपको नमस्कार है । हे मेघावर्त ! हे युगावर्त ! आप चन्द्रार्कपतिको नमस्कार है । आप ही अन्न, अन्नके भोक्ता, पक्वभुक् एवं पवित्रोंमें श्रेष्ठ हैं । हे देवदेवेश ! आप ही जरायुज, अण्डज, स्वेदज, उद्भिज्ज—चतुर्विध भूतसमुदाय हैं ॥ १०३–१०६ ॥

स्रष्टा चराचरस्यास्य पाता हन्ता तथैव च । त्वामाहुर्ब्रह्म विद्वांसो ब्रह्म ब्रह्मविदां गतिम् ॥ १०७ ॥
मनसः परमज्योतिस्त्वं वायुर्ज्योतिषामपि । हंसवृक्षे मधुकरमाहुस्त्वां ब्रह्मवादिनः ॥ १०८ ॥
यजुर्मयो ऋङ्मयस्त्वामाहुः साममयस्तथा । पठ्यसे स्तुतिभिर्नित्यं वेदोपनिषदां गणैः ॥ १०९ ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णावराश्च ये । त्वमेव मेघसङ्घाश्च विद्युतोऽशनिगर्जितम् ॥ ११० ॥

आप इस चराचरकी सृष्टि करनेवाले, पालन करनेवाले एवं संहार करनेवाले हैं । विद्वज्जन आपको ब्रह्म एवं ज्ञानियोंकी (वैराग्य) गति कहते हैं । आप मनकी परमज्योति हैं और ज्योतियोंके (धारण करनेवाले) वायु हैं । ब्रह्मवादीजन आपको हंसवृक्षपर रहनेवाला भ्रमर कहते हैं । वे आपको यजुर्मय, ऋङ्मय एवं साममय कहते हैं । वेद और उपनिषदोंके समूह स्तुतियोंद्वारा आपका ही नित्य पाठ करते हैं । आप ही ब्राह्मण, क्षत्रिय, वैश्य, शूद्र और अन्य अवर वर्ग, मेघसमूह, विद्युत् तथा मेघगर्जन भी हैं ॥ १०७–११० ॥

संवत्सरस्त्वमृतवो मासा मासार्धमेव च । युगा निमेषाः काष्ठाश्च नक्षत्राणि ग्रहाः कलाः ॥ १११ ॥
वृक्षाणां ककुभोऽसि त्वं गिरीणां हिमवान् गिरिः । व्याघ्रो मृगाणां पततां तार्क्ष्योऽनन्तश्च भोगिनाम् ॥ ११२ ॥
क्षीरोदोऽस्युदधीनां च यन्त्राणां धनुरेव च । वज्रं प्रहरणानां च व्रतानां सत्यमेव च ॥ ११३ ॥
त्वमेव द्वेष इच्छा च रागो मोहः शमाक्षमे । व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ ॥ ११४ ॥

आप युग, नक्षत्र, ग्रह, संवत्सर, ऋतु, मास, पक्ष, निमेष, काष्ठा और कला हैं । आप वृक्षोंमें ककुभ (अर्जुन), पर्वतोंमें हिमालय, पशुओंमें व्याघ्र, पक्षियोंमें गरुड और सर्पोंमें अनन्त हैं । आप समुद्रोंमें क्षीरसागर, यन्त्रोंमें धनुष, आयुधोंमें वज्र और व्रतोंमें सत्य हैं । आप ही द्वेष, इच्छा, राग, मोह, शम, क्षमा, व्यवसाय, धैर्य, लोभ, काम, क्रोध, जय और पराजय हैं ॥ १११–११४ ॥

त्वं शरी त्वं गदी चापि खट्वाङ्गी च शरासनी । छेत्ता भेत्ता प्रहर्तासि मन्ता नेता सनातनः ॥ ११५ ॥
दशलक्षणसंयुक्तो धर्मोऽर्थः काम एव च । [illegible] ॥ ११६ ॥

लतावल्ल्यस्तृणौषध्यः पशवो मृगपक्षिणः। द्रव्यकर्मगुणारम्भः कालपुष्पफलप्रदः ॥ ११७ ॥
आदिश्चान्तश्च वेदानां गायत्री प्रणवस्तथा। लोहितो हरितो नीलः कृष्णः पीतः सितस्तथा॥११८॥
कद्रुश्च कपिलश्चैव कपोतो मेचकस्तथा। सवर्णश्चाप्यवर्णश्च कर्त्ता हर्त्ता त्वमेव हि ॥ ११९ ॥

आप बाण धारण करनेवाले, गदा धारण करनेवाले, खट्वाङ्ग धारण करनेवाले एवं धनुर्धारी हैं। आप विदारण करनेवाले, प्रहार करनेवाले, अवबोधन (सतर्क) करनेवाले, प्राप्त करानेवाले और सनातन हैं। आप दस लक्षणोंसे संयुक्त धर्म, अर्थ एवं काम तथा समस्त समुद्र, नदियाँ, गङ्गा, पर्वत एवं सरोवर हैं। समस्त लताएँ, वल्लियाँ, तृण, ओषधियाँ; पशु, मृग, पक्षी; पृथ्वी, अप् आदि नवों द्रव्यों; उत्क्षेपण-आक्षेपण आदि पाँच कर्मों; रूप, रस, गन्ध आदि चौबीस गुणोंके आरम्भक भी आप ही हैं। आप ही समयपर फूल एवं फल देनेवाले हैं। आप वेदोंके आदि और अन्त हैं, गायत्री तथा प्रणव भी आप ही हैं। आप ही लोहित, नील, कृष्ण, पीत, सित, कद्रु, कपिल, कपोत, मेचक, सवर्ण, अवर्ण, कर्ता एवं हर्त्ता हैं ॥ ११५–११९ ॥

त्वमिन्द्रश्च यमश्चैव वरुणो धनदोऽनिलः। उपप्लवश्चित्रभानुः स्वर्भानुभानुरेव च ॥ १२० ॥
शिक्षाहोत्रं त्रिसौपर्णं यजुषां शतरुद्रियम्। पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम् ॥ १२१ ॥
तिन्दुको गिरिजो वृक्षो मुद्गं चाखिलजीवनम्। प्राणाः सत्त्वं रजश्चैव तमश्च प्रतिपत्पतिः ॥ १२२ ॥
प्राणोऽपानः समानश्च उदानो व्यान एव च। उन्मेषश्च निमेषश्च क्षुतं जृम्भितमेव च ॥ १२३ ॥

आप इन्द्र, यम, वरुण, कुबेर, पवन, उपप्लव, चित्रभानु, स्वर्भानु एवं भानु हैं। आप शिक्षा, होत्र, त्रिसौपर्ण, यजुर्वेदका शतरुद्रिय, पवित्रोंमें पवित्र एवं मङ्गलोंमें मङ्गल हैं। आप तिन्दुक, शिलाजतु, वृक्ष, मुद्ग, सबके जीवन, प्राण, सत्त्व, रज, तम तथा प्रतिपत्पति हैं। आप ही प्राण, अपान, समान, उदान, व्यान, उन्मेष, निमेष, छींक एवं जँभाई हैं ॥ १२०–१२३ ॥

लोहितान्तर्गतो दीप्तिर्महावक्त्रो महोदरः। शुचिरोमा हरिश्मश्रुरूर्ध्वकेशश्चलाचलः ॥ १२४ ॥
गीतवादित्रनृत्यज्ञो गीतवादित्रकप्रियः। मत्स्यो जालो जलौकाश्च कालः केलिकला कलिः॥१२५॥
अकालश्च विकालश्च दुष्कालः काल एव च। मृत्युश्च मृत्युकर्ता च यक्षो यक्षभयंकरः ॥ १२६ ॥
संवर्तकोऽन्तकश्चैव संवर्तकबलाहकः। घण्टा घण्टी महाघण्टी चिरी माली च मातलिः ॥१२७॥

आप लोहितके अन्तःस्थित, दीप्त, बड़े मुँहवाले, भारी पेटवाले, पवित्र रोमावलीवाले, हरिश्मश्रु, ऊर्ध्वकेश एवं चल तथा अचल हैं। आप गाने, बजाने, नृत्यकलाके विद्वान् हैं तथा गाना-बजाना करनेवालोंके भी आप प्रिय हैं। आप मत्स्य, जाल, जलौका, काल तथा केलि-कला एवं कलह हैं। आप अकाल, विकाल, दुष्काल और कालस्वरूप हैं। आप मृत्यु, मृत्युकर्ता, यक्ष तथा यक्षको भी भय देनेवाले हैं। आप संवर्तक, अन्तक एवं संवर्तकनामक बादल हैं। आप घण्ट, घण्टी, महाघण्टी, चिरी, माली और मातलि भी हैं ॥ १२४–१२७ ॥

ब्रह्मकालयमाग्नीनां दण्डी मुण्डी त्रिमुण्डभृक्। चतुर्युगश्चतुर्वेदश्चातुर्होत्रप्रवर्त्तकः ॥ १२८ ॥
चातुराश्रम्यनेता च चातुर्वर्ण्यकरस्तथा। नित्यमक्षप्रियो धूर्त्तो गणाध्यक्षो गणाधिपः ॥ १२९ ॥
रक्तमाल्याम्बरधरो गिरिको गिरिकप्रियः। शिल्पं च शिल्पिनां श्रेष्ठः सर्वशिल्पप्रवर्त्तकः ॥ १३० ॥
भगनेत्राङ्कुशश्चण्डः पूष्णो दन्तविनाशनः। स्वाहा स्वधा वषट्कारो नमस्कारो नमो नमः ॥ १३१ ॥

आप ब्रह्म, काल, यम और अग्निको दण्ड देनेवाले, मुण्डी एवं त्रिमुण्डधारी हैं। आप चतुर्युग, चतुर्वेद एवं चातुर्होत्रके प्रवर्तक हैं। आप चारों आश्रमोंके नेता तथा चारों वर्णोंकी सृष्टि करनेवाले हैं। आप नित्यद्यूतप्रिय,

(धर्म) धूर्तईके भी प्रयोक्ता, गणाध्यक्ष और गणोंके स्वामी हैं। आप लाल माला और लाल वस्त्र धारण करनेवाले हैं तथा गिरिक, गिरिकप्रिय, शिल्प, शिल्पिश्रेष्ठ तथा हर प्रकारके शिल्पोंके प्रवर्तक हैं। आप भगनेत्राङ्कुश, चण्ड एवं पूषाके दाँतोंके विनाशक हैं। आप स्वाहा, स्वधा, वषट्कार और नमस्कार हैं। आपको बारम्बार नमस्कार है ॥ १२८–१३१ ॥

गूढव्रतो गुह्यतपास्तारकस्तारकामयः। धाता विधाता संधाता पृथिव्या धरणोऽपरः ॥ १३२ ॥
ब्रह्मा तपश्च सत्यं च ब्रह्मचर्यमथार्जवम्। भूतात्मा भूतकृद् भूतिर्भूतभव्यभवोद्भवः ॥ १३३ ॥
भूर्भुवः स्वर्ऋतं चैव ध्रुवो दान्तो महेश्वरः। दीक्षितोऽदीक्षितः कान्तो दुर्दान्तो दान्तसम्भवः ॥ १३४ ॥
चन्द्रावर्तो युगावर्तः संवर्तकप्रवर्तकः। बिन्दुः कामो ह्यणुः स्थूलः कर्णिकारस्रजप्रियः ॥ १३५ ॥

आप गूढ़व्रतवाले, गुप्त तपस्यावाले, तारक और तारकमय हैं। आप धाता, विधाता, संधाता और पृथिवीके श्रेष्ठ धारण और पोषण करनेवाले हैं। आप ब्रह्मा, तप, सत्य, ब्रह्मचर्य और सरल एवं शुद्ध हैं। आप (पञ्च) भूतस्वरूप ऐश्वर्य और प्राणियोंके उत्पत्ति-स्थान हैं। आप भूः, भुवः, स्वः, ऋतः, ध्रुव कोमल तथा महेश्वर हैं। आप दीक्षित, अदीक्षित, कान्त, दुर्दान्त (उग्र) और दान्तसे उत्पन्न हैं। आप चन्द्रावर्त, युगावर्त, संवर्तक और प्रवर्तक हैं। आप बिन्दु, काम, अणु, स्थूल तथा कनेरकी मालाके प्रेमी हैं ॥ १३२–१३५ ॥

नन्दीमुखो भीममुखः सुमुखो दुर्मुखस्तथा। हिरण्यगर्भः शकुनिर्महोरगपतिर्विराट् ॥ १३६ ॥
अधर्महा महादेवो दण्डधारो गणोत्कटः। गोनर्दो गोप्रतारश्च गोवृषेश्वरवाहनः ॥ १३७ ॥
त्रैलोक्यगोप्ता गोविन्दो गोमार्गो मार्ग एव च। स्थिरः श्रेष्ठश्च स्थाणुश्च विक्रोशः क्रोश एव च ॥ १३८ ॥
दुर्वारणो दुर्विषहो दुःसहो दुरतिक्रमः। दुर्धर्षो दुष्प्रकाशश्च दुर्दर्शो दुर्जयो जयः ॥ १३९ ॥

आप नन्दीमुख, भीममुख, सुमुख तथा दुर्मुख हैं। आप हिरण्यगर्भ, शकुनि, महासर्पपति तथा विराट् हैं। आप अधर्मका नाश करनेवाले महादेव, दण्डधार, गणोत्कट, गोनर्द, गोप्रतार तथा गोवृषेश्वर-वाहन हैं। आप त्रैलोक्यरक्षक, गोविन्द, गोमार्ग तथा मार्ग हैं। आप स्थिर, श्रेष्ठ, स्थाणु, विक्रोश तथा क्रोश हैं। आप दुर्वारण, दुर्विषह, दुस्सह, दुरतिक्रम, दुर्धर्ष, दुष्प्रकाश, दुर्दर्श, दुर्जय तथा जय हैं ॥ १३६–१३९ ॥

शशाङ्कानलशीतोष्णः क्षुत्तृष्णा च निरामयः। आधयो व्याधयश्चैव व्याधिहा व्याधिनाशनः ॥ १४० ॥
समूहश्च समूहस्य हन्ता देवः सनातनः। शिखण्डी पुण्डरीकाक्षः पुण्डरीकवनालयः ॥ १४१ ॥
त्र्यम्बको दण्डधारश्च उग्रदंष्ट्रः कुलान्तकः।
विषापहः सुरश्रेष्ठः सोमपास्त्वं मरुत्पते। अमृताशी जगन्नाथो देवदेव गणेश्वरः ॥ १४२ ॥
मधुश्च्युतानां मधुपो ब्रह्मवाक् त्वं घृतच्युत। सर्वलोकस्य भोक्ता त्वं सर्वलोकपितामहः ॥ १४३ ॥

आप चन्द्र, अनल, शीत, उष्ण, क्षुधा, तृष्णा, निरामय, आधि-व्याधि, व्याधिहन्ता एवं व्याधियोंके नष्ट करनेवाले हैं। आप समूह हैं और समूहके हन्ता तथा सनातन देव हैं। आप शिखण्डी, पुण्डरीकाक्ष तथा पुण्डरीकवनके आश्रय हैं। मरुत्पति! हे देवदेव! आप तीन नेत्रवाले, दण्डधारी, भयंकर दाँतवाले, कुलके अन्त करनेवाले, विषको नष्ट करनेवाले, सुरश्रेष्ठ, सोमरस पीनेवाले, अमृताशी, जगत्के स्वामी तथा गणेश्वर हैं। आप मधुसंग्रह करनेवालोंमें मधुप, वाणियोंमें ब्रह्मवाक्, घृतच्युत, समस्त लोकोंका पालन-पोषण और उपसंहार करनेवाले एवं सर्वलोकके पितामह हैं ॥ १४०–१४३ ॥

हिरण्यरेताः पुरुषस्त्वमेकः त्वं स्त्री पुमांस्त्वं हि नपुंसकं च ।
बालो युवा स्थविरो देवदंष्ट्रा त्वत्तो गिरिर्विश्वकृद् विश्वहर्ता ॥ १४४ ॥
त्वं वै धाता विश्वकृतां वरेण्यस्त्वां पूजयन्ति प्रणताः सदैव ।
चन्द्रादित्यौ चक्षुषी ते भवान् हि त्वमेव चाग्निः प्रपितामहश्च ।
आराध्य त्वां सरस्वतीं वाग्लभन्ते अहोरात्रे निमिषोन्मेषकर्त्ता ॥ १४५ ॥
न ब्रह्मा न च गोविन्दः पौराणा ऋषयो न ते । माहात्म्यं वेदितुं शक्ता याथातथ्येन शंकर ॥ १४६ ॥
पुंसां शतसहस्राणि यत्समावृत्य तिष्ठति । महतस्तमसः पारे गोप्ता मन्ता भवान् सदा ॥ १४७ ॥

आप हिरण्यरेता तथा अद्वितीय पुरुष हैं । आप स्त्री, पुरुष तथा नपुंसक भी हैं । आप ही बालक, युवक, वृद्ध, देवदंष्ट्रा, गिरि, संसारके रचयिता तथा संसारके संहार करनेवाले भी हैं । आप विश्व रचनेवालोंमें वरणीय धाता हैं । विनम्र जन सदैव आपकी पूजा करते हैं । चन्द्रमा एवं सूर्य आपके नेत्रस्वरूप हैं । आप ही अग्नि एवं प्रपितामह हैं । सरस्वतीस्वरूप आपकी आराधना कर लोग (प्रांजल) वाणीकी प्राप्ति करते हैं । आप दिन और रात्रि हैं और निमेष एवं उन्मेषके कर्ता हैं । हे शंकर ! ब्रह्मा, गोविन्द तथा प्राचीन ऋषि भी आपकी महिमाको ठीक-ठीक नहीं जान सकते । आप (अपनेमें) लाखों पुरुषोंको समावृत कर स्थित हैं । आप सदा महान् तमसे परे रहनेवाले परम रक्षक एवं (सबके) अवबोधक हैं ॥ १४४–१४७ ॥

यं विनिद्रा जितश्वासाः सत्त्वस्थाः संयतेन्द्रियाः । ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥ १४८ ॥
या मूर्तयश्च सूक्ष्मास्ते न शक्या या निदर्शितुम् । ताभिर्मां सततं रक्ष पिता पुत्रमिवौरसम् ॥ १४९ ॥
रक्ष मां रक्षणीयोऽहं तवानघ नमोऽस्तु ते । भक्तानुकम्पी भगवान् भक्तश्चाहं सदा त्वयि ॥ १५० ॥
जटिने दण्डिने नित्यं लम्बोदरशरीरिणे । कमण्डलुनिषङ्गाय तस्मै रुद्रात्मने नमः ॥ १५१ ॥

निद्राजित (अर्थात् सदा जागरूक), श्वासपर विजय प्राप्त करनेवाले, सत्त्वगुणमें सदा स्थित एवं संयतेन्द्रिय योगिजन जिस ज्योतिका दर्शन करते हैं, उस योगात्मा (-आप-)को नमस्कार है । सूक्ष्म होनेके कारण आपकी जो मूर्तियाँ प्रदर्शित नहीं की जा सकतीं उनके द्वारा आप सदा मेरी इस प्रकार रक्षा करें जैसे पिता अपने औरस पुत्रकी रक्षा करता है । पुण्यात्मन् ! आप मेरी रक्षा करें । मैं आपका रक्षणीय हूँ । आपको नमस्कार है । आप भक्तोंपर अनुग्रह करनेवाले भगवान् हैं; मैं सदा आपका भक्त हूँ । जटी, दण्डी, लम्बोदरशरीरी तथा कमण्डलुनिषङ्ग रुद्रात्माको नमस्कार है ॥ १४८–१५१ ॥

यस्य केशेषु जीमूता नद्यः सर्वाङ्गसन्धिषु । कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥ १५२ ॥
संभक्ष्य सर्वभूतानि युगान्ते पर्युपस्थिते । यः शेते जलमध्यस्थस्तं प्रपद्येऽम्बुशायिनम् ॥ १५३ ॥
प्रविश्य वदनं राहोर्यः सोमं पिबते निशि । ग्रसत्यर्कं च स्वर्भानु रक्षितस्तव तेजसा ॥ १५४ ॥
ये चात्र पतिता गर्भा रुद्रगर्भस्य रक्षणे । नमस्तेऽस्तु स्वधा स्वाहा प्राप्नुवन्ति तदद्भुते ॥ १५५ ॥

जिनके केशोंमें बादल, समस्त अङ्गोंकी संधियोंमें नदियाँ एवं कुक्षिमें चारों समुद्र हैं, उन तोयात्मा भगवान्को नमस्कार है । प्रलयकाल उपस्थित होनेपर भूतोंको अपने उदरमें स्थित करके जो जलके मध्यमें शयन करते हैं उन जलशायी (विष्णु)की मैं शरण लेता हूँ । रात्रिमें आप जो राहुके मुखमें प्रवेश कर सोमको पीते हैं तथा आपके तेजसे रक्षित राहु सूर्यको ग्रस लेता है, ऐसे आपको नमस्कार है । रुद्रगर्भकी रक्षामें जो यहाँ गर्भ (बालराशि) गिरे, अतः वे उनसे रक्षित होकर आपको नमस्कार करते हैं; उन्हीं अद्भुत (तेजों)में स्वाहा तथा स्वधाको वे प्राप्त करते हैं ॥ १५२–१५५ ॥

येऽङ्गुष्ठमात्राः पुरुषा देहस्थाः सर्वदेहिनाम्। रक्षन्तु ते हि मां नित्यं ते मामाप्याययन्तु वै ॥ १५६ ॥
ये नदीषु समुद्रेषु पर्वतेषु गुहासु च। वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ॥ १५७ ॥
चतुष्पथेषु रथ्यासु चत्वरेषु सभासु च। हस्त्यश्वरथशालासु जीर्णोद्यानालयेषु च ॥ १५८ ॥
ये च पञ्चसु भूतेषु दिशासु विदिशासु च। चन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु ॥ १५९ ॥
रसातलगता ये च ये च तस्मात् परं गताः। नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्यश्च नित्यशः ॥ १६० ॥

सभी देहधारियोंकी देहमें स्थित अङ्गुष्ठमात्रमें निवास करनेवाले जो पुरुष हैं, वे नित्य मेरी रक्षा करें तथा वे मुझे सर्वदा संतृप्त करें। जो नदियों, समुद्रों, पर्वतों, गुहाओं, वृक्षकी जड़ों, गायोंके रहनेके स्थानों, घने जंगलों, चौराहों, गलियों, चबूतरों, सभाओं, हथसारों, घुड़सारों और रथशालाओं, जीर्ण बाग-बगीचों, आलयों, पञ्चभूतों, पूर्व, पश्चिम, उत्तर तथा दक्षिण दिशाओं एवं अग्निकोण, नैर्ऋत्यकोण, वायव्यकोण एवं ईशानकोणोंमें स्थित हैं। जो चन्द्र और सूर्यके बीचमें रहनेवाले, चन्द्र तथा सूर्यकी किरणोंमें स्थित, रसातलमें रहनेवाले एवं उससे भी आगे पहुँचे हुए हैं, उनको नित्य बारम्बार नमस्कार है; नमस्कार है; नमस्कार है ॥ १५६-१६० ॥

येषां न विद्यते संख्या प्रमाणं रूपमेव च। असंख्येयगणा रुद्रा नमस्तेभ्योऽस्तु नित्यशः ॥ १६१ ॥
प्रसीद मम भद्रं ते तव भावगतस्य च। त्वयि मे हृदयं देव त्वयि बुद्धिर्मतिस्त्वयि ॥ १६२ ॥
स्तुत्वैवं स महादेवं विरराम द्विजोत्तमः ॥ १६३ ॥

इति श्रीवामनपुराणे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

जिनकी कोई संख्या नहीं है और न प्रमाण तथा रूप ही है, उन अनगिनत रुद्रगणोंको सदा नमस्कार है। आपका कल्याण हो। आपके भक्तिभावमें स्थित मेरे ऊपर आप प्रसन्न हों। हे देव! आपहीमें मेरा हृदय, मेरी बुद्धि एवं मति है। द्विजोत्तमने इस प्रकार महादेवकी स्तुति करके विराम ले लिया ॥ १६१-१६३ ॥

इस प्रकार श्रीवामनपुराणमें सैंतालीसवाँ अध्याय समाप्त हुआ ॥ ४७ ॥

[अथाष्टचत्वारिंशोऽध्यायः]

सनत्कुमार उवाच

अथैनमब्रवीद् देवस्त्रैलोक्याधिपतिर्भवः। आश्वासनकरं चास्य वाक्यविद् वाक्यमुत्तमम् ॥ १ ॥
अहो तुष्टोऽस्मि ते राजन् स्तवेनानेन सुव्रत। बहुनात्र किमुक्तेन मत्समीपे वसिष्यसि ॥ २ ॥
उषित्वा सुचिरं कालं मम गात्रोद्भवः पुनः। असुरो ह्यन्धको नाम भविष्यसि सुरान्तकृत् ॥ ३ ॥
हिरण्याक्षगृहे जन्म प्राप्य वृद्धिं गमिष्यसि। पूर्वाधर्मेण घोरेण वेदनिन्दाकृतेन च ॥ ४ ॥

अड़तालीसवाँ अध्याय प्रारम्भ

(वेन-कृत शिव-स्तुति एवं स्थाणुतीर्थका माहात्म्य, वेन आदिकी सुगतिका वर्णन)

सनत्कुमारने कहा—इसके बाद किसीकी किसी प्रकारकी भी उक्तिके अभिप्रायको भलीभाँति जाननेवाले तीनों लोकोंके स्वामी शंकरभगवान्‌ने उस-(वेन-)को आश्वासन देनेवाला उत्तम वचन कहा—राजन्! सुव्रत! तुम्हारी इस स्तुतिसे मैं संतुष्ट हूँ। इस विषयमें अधिक कहनेसे क्या लाभ है; तुम मेरे निकट (में ही सदा) निवास करोगे। बहुत दिनोंतक निवास करनेके बाद तुम फिर देवोंको नष्ट करनेवाले अन्धक नामक असुर होकर मेरे शरीरसे उत्पन्न होओगे और वेदकी निन्दा करनेसे पूर्वकालिक प्रचण्ड पापके कारण पुनः हिरण्याक्षके घरमें उत्पन्न होकर बड़े होओगे—पनपोगे ॥ १-४ ॥

साभिलाषो जगन्मातुर्भविष्यसि यदा तदा। देहं शूलेन हत्वाहं पावयिष्यामि दशार्बुदम्॥ ५॥
तथाप्यकल्मषो भूत्वा स्तुत्वा मां भक्तितः पुनः। ख्यातो गणाधिपो भूत्वा नाम्ना भृङ्गिरिटिः स्मृतः॥ ६॥
मत्संनिधाने स्थित्वा त्वं ततः सिद्धिं गमिष्यसि। वेनप्रोक्तं स्तवमिमं कीर्तयेद् यः शृणोति च॥ ७॥
नाशुभं प्राप्नुयात् किंचिद् दीर्घमायुरवाप्नुयात्। यथा सर्वेषु देवेषु विशिष्टो भगवाञ्शिवः॥ ८॥
तथा स्तवो वरिष्ठोऽयं स्तवानां वेननिर्मितः। यशो राज्यसुखैश्वर्यधनमानाय कीर्तितः॥ ९॥

जब तुम जगत्‌की माता-(पार्वती-)की अभिलाषा करोगे तब मैं शूलद्वारा तुम्हारी देहका हनन करके दस करोड़ वर्षोंतकके लिये (तुम्हें) पवित्र करूँगा। उसके बाद वहाँ पापसे रहित होकर पुनः मेरी स्तुति करोगे और तब तुम भृङ्गिरिटि नामसे प्रसिद्ध गणाधिप बनोगे। फिर मेरी संनिधिमें रहकर तुम सिद्धिको प्राप्त करोगे। जो मनुष्य वेनके द्वारा कही हुई इस स्तुतिका कीर्तन करेगा या इसे सुनेगा वह कभी अशुभ-(अकल्याण-)को नहीं प्राप्त होगा और दीर्घ आयु प्राप्त करेगा। जैसे सभी देवताओंमें भगवान् शिवकी विशिष्टता है, वैसे ही वेनसे निर्मित यह स्तव सभी स्तवोंमें श्रेष्ठ (विशिष्ट) है। इसका कीर्तन यश, राज्य, सुख, ऐश्वर्य, धन एवं मानका देनेवाला है॥ ५-९॥

श्रोतव्यो भक्तिमास्थाय विद्याकामैश्च यत्नतः। व्याधितो दुःखितो दीनश्चौरराजभयान्वितः॥ १०॥
राजकार्यविमुक्तो वा मुच्यते महतो भयात्। अनेनैव तु देहेन गणानां श्रेष्ठतां व्रजेत्॥ ११॥
तेजसा यशसा चैव युक्तो भवति निर्मलः। न राक्षसाः पिशाचा वा न भूता न विनायकाः॥ १२॥
विघ्नं कुर्युर्गृहे तत्र यत्रायं पठ्यते स्तवः। शृणुयाद् या स्तवं नारी अनुज्ञां प्राप्य भर्तृतः॥ १३॥
मातृपक्षे पितुः पक्षे पूज्या भवति देववत्। शृणुयाद् यः स्तवं दिव्यं कीर्तयेद् वा समाहितः॥ १४॥
तस्य सर्वाणि कार्याणि सिद्धिं गच्छन्ति नित्यशः। मनसा चिन्तितं यच्च यच्च वाचाऽनुकीर्तितम्॥ १५॥
सर्वं सम्पद्यते तस्य स्तवनस्यानुकीर्तनात्।
मनसा कर्मणा वाचा कृतमेनो विनश्यति। वरं वरय भद्रं ते यत्त्वया मनसेप्सितम्॥ १६॥

विद्याकी इच्छा रखनेवालोंको श्रद्धासहित यत्नपूर्वक इस स्तुतिको सुनना चाहिये। व्याधिसे ग्रस्त, दुःखित, दीन, चोर या राजासे भयभीत अथवा राजकार्यसे अलग किया गया पुरुष (इस स्तुतिके द्वारा) महान् भयसे मुक्त होकर इसी देहसे गणोंमें श्रेष्ठता प्राप्त करता है एवं निर्मल होकर तेज एवं यशसे युक्त होता है। जिस गृहमें इस स्तवका पाठ होता है उसमें राक्षस, पिशाच, भूत या विनायकगण विघ्न नहीं करते। पतिकी आज्ञा प्राप्त कर इस स्तवका श्रवण करनेवाली नारी मातृपक्ष एवं पितृपक्षमें देवताके समान पूजनीया हो जाती है। जो मनुष्य समाहित होकर इस दिव्य स्तवको सुनेगा या कीर्तन करेगा, उसके सभी कार्य नित्य सिद्ध होंगे। इस स्तवका कीर्तन करनेवाले मनुष्यके मनसे चिन्तित तथा वचनके द्वारा कथित सभी कार्य सम्पन्न होते जायँगे और मानसिक, वाचिक तथा कायिक—सभी पाप विनष्ट हो जायँगे। तुम्हारे मनमें जो अभीष्ट हो उस वरको माँग लो; तुम्हारा कल्याण हो॥ १०-१६॥

वेन उवाच

अस्य लिङ्गस्य माहात्म्यात् तथा लिङ्गस्य दर्शनात्। मुक्तोऽहं पातकैः सर्वैस्तव दर्शनतः किल॥ १७॥
यदि तुष्टोऽसि मे देव यदि देयो वरो मम। देवस्वभक्षणाज्जातं श्वयोनौ तव सेवकम्॥ १८॥
एतस्यापि प्रसादं त्वं कर्तुमर्हसि शंकर। एतस्यापि भयान्मध्ये सरस्योऽहं निमज्जितः॥ १९॥
देवैर्निवारितः पूर्वं तीर्थेऽस्मिन् स्नानकाङ्क्षया। अयं कृतोपकारश्च तदर्थं तु वृणोम्यहम्॥ २०॥

तस्यैतद् वचनं श्रुत्वा तुष्टः प्रोवाच शंकरः। एषोऽपि पापनिर्मुक्तो भविष्यति न संशयः ॥ २१ ॥
प्रसादान्मे महाबाहो शिवलोकं गमिष्यति। तथा स्तवमिमं श्रुत्वा मुच्यते सर्वपातकैः ॥ २२ ॥
कुरुक्षेत्रस्य माहात्म्यं सरसोऽस्य महीपते। मम लिङ्गस्य चोत्पत्तिं श्रुत्वा पापैः प्रमुच्यते ॥ २३ ॥

वेनने कहा—इस लिङ्गके माहात्म्यसे, इसके तथा आपके दर्शनोंसे मैं समस्त पापोंसे निश्चित रूपसे छूट गया हूँ। देव! यदि आप मुझपर प्रसन्न हैं और मुझे वर देना चाहते हैं तो हे शङ्कर! आप उस सेवकपर कृपा करें जो देवद्रव्यका भक्षण करनेके कारण कुत्तेकी योनिमें उत्पन्न हुआ है। पहले इस तीर्थमें स्नान करनेके लिये देवोंके मना करनेपर भी इस (कुत्ते)के भयसे मैंने सरोवरमें स्नान किया। इसने मेरा उपकार किया है। अतएव मैं इसके लिये वर माँगता हूँ। उस-(वेन-)के इस वचनको सुनकर शंकर सन्तुष्ट होकर बोले—महाबाहो! यह भी मेरी कृपासे निःसन्देह सभी पापोंसे बिल्कुल छूट जायगा और शिवलोकको प्राप्त करेगा। इस स्तवको सुनकर मनुष्य सभी पापोंसे मुक्त हो जायगा। राजन्! इस कुरुक्षेत्र तथा इस सरोवरका माहात्म्य और मेरे लिङ्गकी उत्पत्तिका वर्णन सुननेसे मनुष्य पापसे बिल्कुल छूट जाता है ॥ १७–२३ ॥

सनत्कुमार उवाच

इत्येवमुक्त्वा भगवान् सर्वलोकनमस्कृतः। पश्यतां सर्वलोकानां तत्रैवान्तरधीयत ॥ २४ ॥
स च श्वा तत्क्षणादेव स्मृत्वा जन्म पुरातनम्। दिव्यमूर्तिधरो भूत्वा तं राजानमुपस्थितः ॥ २५ ॥
कृत्वा स्नानं ततो वैन्यः पितृदर्शनलालसः। स्थाणुतीर्थे कुटीं शून्यां दृष्ट्वा शोकसमन्वितः ॥ २६ ॥
दृष्ट्वा वेनोऽब्रवीद् वाक्यं हर्षेण महताऽन्वितः। सत्पुत्रेण त्वया वत्स त्रातोऽहं नरकार्णवात् ॥ २७ ॥

सनत्कुमारने कहा—इस प्रकार कहकर समस्त लोकोंद्वारा नमस्कृत भगवान् सभी लोगोंके देखते हुए वहीं अन्तर्हित हो गये। वह कुत्ता भी उसी समय पूर्वजन्मका स्मरण करके दिव्य शरीर धारणकर उस राजाके सामने उपस्थित हुआ। उसके बाद वेनका पुत्र पृथु स्नान करके पितृदर्शनकी अभिलाषासे स्थाणुतीर्थमें आनेपर कुटीको सूनी देख चिन्तित हो गया। वेन उसे देखकर बड़ी प्रसन्नतापूर्वक बोला—वत्स! तुमने नरक-सागरमें जानेसे मेरी रक्षा कर ली, अतः तुम सत्पुत्र सिद्ध हुए ॥ २४–२७ ॥

त्वयाभिषिञ्चितो नित्यं तीर्थस्य पुलिने स्थितः। अस्य साधोः प्रसादेन स्थाणोर्देवस्य दर्शनात् ॥ २८ ॥
मुक्तपापश्च सल्लोकं यास्ये यत्र शिवः स्थितः। इत्येवमुक्त्वा राजानं प्रतिष्ठाप्य महेश्वरम् ॥ २९ ॥
स्थाणुतीर्थे ययौ सिद्धिं तेन पुत्रेण तारितः। स च श्वा परमां सिद्धिं स्थाणुतीर्थप्रभावतः ॥ ३० ॥
विमुक्तः कलुषैः सर्वैर्जगाम भवमन्दिरम्। राजा पितृऋणैर्मुक्तः परिपाल्य वसुन्धराम् ॥ ३१ ॥
पुत्रानुत्पाद्य धर्मेण कृत्वा यज्ञं निरर्गलम्। दत्त्वा कामांश्च विप्रेभ्यो भुक्त्वा भोगान् पृथग्विधान् ॥ ३२ ॥

तीर्थके तटपर रहने एवं तुम्हारे द्वारा नित्य अभिषिञ्चित होनेके कारण तथा इस साधुके अनुग्रह एवं स्थाणुदेवके दर्शन करनेसे मैं पापोंसे छूटकर उस स्वर्गलोकको जा रहा हूँ, जहाँ शिवजी (भव) स्थित हैं। राजा पृथुसे ऐसा कहनेके पश्चात् उस पुत्रद्वारा (पापनिर्मुक्त) तारित वेनने स्थाणुतीर्थमें महेश्वरको प्रतिष्ठित करके सिद्धि प्राप्त कर ली। स्थाणुतीर्थके प्रभावसे वह कुत्ता भी पापसे रहित होकर परम सिद्धिको प्राप्त हुआ और शिवलोकको चला गया। राजा पृथु पितृ-ऋणसे मुक्त हो गये और पृथ्वीका पालन करते हुए उन्होंने धर्मपूर्वक पुत्रोंको उत्पन्न करके बाधारहित होकर यज्ञ (यज्ञानुष्ठान) किया। उन्होंने ब्राह्मणोंको मनोऽभिलषित पदार्थोंका दान दिया तथा भाँति-भाँतिके भोगोंका उपभोग किया ॥ २८–३२ ॥

ऋणेभ्योऽथ ऋषेर्मुक्त्वा कामैः संतर्प्य च स्त्रियः। अभिषिच्य सुतं राज्ये कुरुक्षेत्रं ययौ नृपः ॥ ३३ ॥
तत्र तप्त्वा तपो घोरं पूजयित्वा च शङ्करम्। आत्मेच्छया तनुं त्यक्त्वा प्रयातः परमं पदम् ॥ ३४ ॥
एतत्प्रभावं तीर्थस्य स्थाणोर्यः शृणुयान्नरः। सर्वपापविनिर्मुक्तः प्रयाति परमां गतिम् ॥ ३५ ॥

इति श्रीवामनपुराणे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

पितरोंको (भी) ऋणसे मुक्त तथा स्त्रियोंके मनोरथोंको संतुष्टि प्रदान करनेके पश्चात् पुत्रको राज्यपर अभिषिक्त कर पृथु राजा कुरुक्षेत्रमें चले गये। वहाँ घोर तपस्या तथा शङ्करका पूजन करके अपनी इच्छासे शरीरका त्याग कर उन्होंने परमपदको प्राप्त किया। जो मनुष्य स्थाणुतीर्थके इस प्रभावको सुनेगा, वह सभी पापोंसे छूट जायगा और परम गतिको प्राप्त करेगा ॥ ३३–३५ ॥

इस प्रकार श्रीवामनपुराणमें अड़तालीसवाँ अध्याय समाप्त हुआ ॥ ४८ ॥

[अथैकोनपञ्चाशत्तमोऽध्यायः]

मार्कण्डेय उवाच

चतुर्युगानामुत्पत्तिं विस्तरेण ममानघ। तथा ब्रह्मेश्वराणां च श्रोतुमिच्छा प्रवर्तते ॥ १ ॥

उनचासवाँ अध्याय प्रारम्भ

(चार युगोंकी उत्पत्ति-कथा, ब्रह्म-कृत शिवकी स्तुति और स्थाणुतीर्थका माहात्म्य)

मार्कण्डेयने कहा—निष्पाप ! चार युगों और ब्रह्मेश्वरोंकी उत्पत्तिको विस्तारपूर्वक सुननेकी मेरी इच्छा हो रही है (अतः आप उसे सुनानेकी कृपा करें) ॥ १ ॥

सनत्कुमार उवाच

शृणु सर्वमशेषेण कथयिष्यामि तेऽनघ। ब्रह्मणः स्रष्टुकामस्य यद् वृत्तं पद्मजन्मनः ॥ २ ॥
उत्पन्न एव भगवान् ब्रह्मा लोकपितामहः। ससर्ज सर्वभूतानि स्थावराणि चराणि च ॥ ३ ॥
पुनश्चिन्तयतः सृष्टिं जाता कन्या मनोरमा। नीलोत्पलदलश्यामा तनुमध्या सुलोचना ॥ ४ ॥
तां दृष्ट्वाभिमतां ब्रह्मा मैथुनायाजुहाव ताम्। तेन पापेन महता शिरोऽशीर्यत वेधसः ॥ ५ ॥

सनत्कुमार बोले—अनघ ! सृष्टिकी कामना करनेवाले एवं कमलसे उत्पन्न होनेवाले ब्रह्माका जो वृत्तान्त है, उसे मैं तुमसे पूर्णतः कहता हूँ, सुनो। लोक-पितामह भगवान् ब्रह्माने उत्पन्न होते ही पहले अचर और चर-रूप सम्पूर्ण भूतोंकी रचना की। पुनः उनके सृष्टिकी चिन्ता करनेपर एक नीले कमल-दलके समान श्याम, पतले मध्य भागवाली, सुलोचना, मन-मोहिनी कन्या उत्पन्न हुई। उस मनोहर कन्याको देखकर ब्रह्माने उसे संतानोत्पत्ति-हेतु बुलाया। (अतः) उस महान् पापसे ब्रह्माका मस्तक गिर गया ॥ २–५ ॥

तेन शीर्णेन स ययौ तीर्थं त्रैलोक्यविश्रुतम्। सांनिहत्यं सरः पुण्यं सर्वपापक्षयावहम् ॥ ६ ॥
तत्र पुण्ये स्थाणुतीर्थे ऋषिसिद्धनिषेविते। सरस्वत्युत्तरे तीरे प्रतिष्ठाप्य चतुर्मुखम् ॥ ७ ॥
आराधयामास तदा धूपैर्गन्धैर्मनोरमैः। उपहारैस्तथा हृद्यै रौद्रसूक्तैर्दिने दिने ॥ ८ ॥
तस्यैवं भक्तियुक्तस्य शिवपूजारतस्य च। स्वयमेवाजगामाथ भगवान् नीललोहितः ॥ ९ ॥
समागतं शिवं दृष्ट्वा ब्रह्मा लोकपितामहः। प्रणम्य शिरसा भूमौ स्तुतिं तस्य चकार ह ॥ १० ॥

वे (ब्रह्माजी) उस गिरे मस्तकको लेकर सभी पापोंका विनाश करनेवाले तीनों लोकोंमें विख्यात सांनिहत्य नामके तीर्थमें गये। ऋषि और सिद्धोंसे सेवित उस पवित्र स्थाणुतीर्थमें सरस्वतीके उत्तरी तटपर



चतुर्मुख ब्रह्मा

पितृभ्योऽथ ऋणैर्मुक्त्वा कामैः संतर्प्य च स्त्रियः। अभिषिच्य सुतं राज्ये कुरुक्षेत्रं ययौ नृपः ॥ ३३ ॥
तत्र गत्वा तपो घोरं पूजयित्वा च शङ्करम्। आत्मेच्छया तनुं त्यक्त्वा प्रयातः परमं पदम् ॥ ३४ ॥
एतत्प्रभावं तीर्थस्य स्थाणोर्यः शृणुयान्नरः। सर्वपापविनिर्मुक्तः प्रयाति परमां गतिम् ॥ ३५ ॥

इति श्रीवामनपुराणे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

पितरोंको (भी) ऋणसे मुक्त तथा स्त्रियोंके मनोरथोंको संतुष्टि प्रदान करनेके पश्चात् पुत्रको राज्यपर अभिषिक्त कर पृथु राजा कुरुक्षेत्रमें चले गये। वहाँ घोर तपस्या तथा शङ्करका पूजन करके अपनी इच्छासे शरीरका त्याग कर उन्होंने परमपदको प्राप्त किया। जो मनुष्य स्थाणुतीर्थके इस प्रभावको सुनेगा, वह सभी पापोंसे छूट जायगा और परम गतिको प्राप्त करेगा ॥ ३३–३५ ॥

इस प्रकार श्रीवामनपुराणमें अड़तालीसवाँ अध्याय समाप्त हुआ ॥ ४८ ॥

[अथैकोनपञ्चाशत्तमोऽध्यायः]

मार्कण्डेय उवाच

चतुर्मुखानामुत्पत्तिं विस्तरेण ममानघ। तथा ब्रह्मेश्वराणां च श्रोतुमिच्छा प्रवर्तते ॥ १ ॥

उनचासवाँ अध्याय प्रारम्भ

(चार मुखोंकी उत्पत्ति-कथा, ब्रह्म-कृत शिवकी स्तुति और स्थाणुतीर्थका माहात्म्य)

मार्कण्डेयने कहा—निष्पाप ! चार मुखों और ब्रह्मेश्वरोंकी उत्पत्तिको विस्तारपूर्वक सुननेकी मेरी इच्छा हो रही है (अतः आप उसे सुनानेकी कृपा करें) ॥ १ ॥

सनत्कुमार उवाच

शृणु सर्वमशेषेण कथयिष्यामि तेऽनघ। ब्रह्मणः स्रष्टुकामस्य यद् वृत्तं पद्मजन्मनः ॥ २ ॥
उत्पन्न एव भगवान् ब्रह्मा लोकपितामहः। ससर्ज सर्वभूतानि स्थावराणि चराणि च ॥ ३ ॥
पुनश्चिन्तयतः सृष्टिं जज्ञे कन्या मनोरमा। नीलोत्पलदलश्यामा तनुमध्या सुलोचना ॥ ४ ॥
तां दृष्ट्वाभिमतां ब्रह्मा मैथुनायाजुहाव ताम्। तेन पापेन महता शिरोऽशीर्यत वेधसः ॥ ५ ॥

सनत्कुमार बोले—अनघ ! सृष्टिकी कामना करनेवाले एवं कमलसे उत्पन्न होनेवाले ब्रह्माका जो वृत्तान्त है, उसे मैं तुमसे पूर्णतः कहता हूँ, सुनो। लोक-पितामह भगवान् ब्रह्माने उत्पन्न होते ही पहले अचर और चर-रूप सम्पूर्ण भूतोंकी रचना की। पुनः उनके सृष्टिकी चिन्ता करनेपर एक नीले कमल-दलके समान श्याम, पतले मध्य भागवाली, सुलोचना, मन-मोहिनी कन्या उत्पन्न हुई। उस मनोहर कन्याको देखकर ब्रह्माने उसे संतानोत्पत्ति-हेतु बुलाया। (पर,) उस महान् पापसे ब्रह्माका मस्तक गिर गया ॥ २–५ ॥

तेन पापेन स ययौ तीर्थं त्रैलोक्यविश्रुतम्। सांनिहत्यं सरः पुण्यं सर्वपापक्षयावहम् ॥ ६ ॥
तत्र पुण्ये स्थाणुतीर्थे ऋषिसिद्धनिषेविते। सरस्वत्युत्तरे तीरे प्रतिष्ठाप्य चतुर्मुखम् ॥ ७ ॥
आराधयामास तदा धूपैर्गन्धैर्मनोरमैः। उपहारैस्तथा हृद्यै रौद्रसूक्तैर्दिने दिने ॥ ८ ॥
तस्यैवं भक्तियुक्तस्य शिवपूजारतस्य च। स्वयमेवाजगामाथ भगवान् नीललोहितः ॥ ९ ॥
समागतं शिवं दृष्ट्वा ब्रह्मा लोकपितामहः। प्रणम्य शिरसा भूमौ स्तुतिं तस्य चकार ह ॥ १० ॥

वे (ब्रह्मा) इस लिये उस पापसे छूटनेके लिये सभी पापोंका विनाश करनेवाले तीनों लोकोंमें विख्यात सांनिहत्य नामके तीर्थमें गये; ऋषि और सिद्धोंसे सेवित उस पवित्र स्थाणुतीर्थमें सरस्वतीके उत्तरी भाग

चतुर्मुख- (चार मुखवाले शिवलिङ्ग) की स्थापित कर प्रतिदिन मनोरम धूप, गन्ध, सुन्दर उपहारों एवं श्रद्धा-पूर्वक उसकी उपासना करने लगे। उनके इस प्रकार भक्तिपूर्वक शिवपूजामें तन्मय हो जानेपर भगवान् नीललोहित (शङ्करजी) स्वयं ही वहाँ आ गये। लोकपितामह ब्रह्माने उन आये हुए शिवको देखकर सिर झुकाकर प्रणाम किया और पुनः वे (ब्रह्माजी) उन (शिव)की स्तुति करने लगे ॥ ६—१० ॥

ब्रह्मोवाच

नमस्तेऽस्तु महादेव भूतभव्य भवाश्रय। नमस्ते स्तुतिनित्याय नमस्त्रैलोक्यपालिने ॥ ११ ॥
नमः पवित्रदेहाय सर्वकल्मषनाशिने। चराचरगुरो गुह्यगुह्यानां च प्रकाशकृत् ॥ १२ ॥
रोगा न यान्ति भिषजैः सर्वरोगविनाशन। वीरपाञ्चिनमंवीन वीतशोक नमोऽस्तु ते ॥ १३ ॥
वारिकल्लोलसंक्षुब्धमहाबुद्धिविघट्टिने। त्वन्नामजापिनो देव न भवन्ति भवाश्रयाः ॥ १४ ॥

ब्रह्माने कहा—भूत, भव्य तथा भवके आश्रयस्वरूप महादेवजी! आपको नमस्कार है। नित्य-स्तुति किये जानेवाले और तीनों लोकोंके रक्षक! आपको नमस्कार है। सभी पापोंको नष्ट करनेवाले एवं पवित्र देहवाले! आपको नमस्कार है। चर और अचरके गुरु! आप रहस्योंके भी रहस्यको (गुप्तसे गुप्त तत्त्वको) प्रकाशित करनेवाले हैं। वैद्योंकी दवाओंसे दूर न होनेवाले, सभी रोगोंका विनाश करनेवाले! व्याघ्रचर्मधारी! शोकसे रहित शिव! आपको नमस्कार है। जलकी उत्ताल तरङ्गोंसे महाबुद्धिके विघटन करनेमें (स्वयं भी) संक्षुब्ध देव! आपके नामका जप करनेवाले प्राणी संसारमें नहीं पड़ते ॥ ११—१४ ॥

नमस्ते नित्यनित्याय नमस्त्रैलोक्यपालन। शंकरायाप्रमेयाय व्याधीनां शमनाय च ॥ १५ ॥
परायापरिमेयाय सर्वभूतप्रियाय च। योगेश्वराय देवाय सर्वपापक्षयाय च ॥ १६ ॥
नमः स्थाणवे सिद्धाय सिद्धवन्दिस्तुताय च। भूतसंसारदुर्गाय विश्वरूपाय ते नमः ॥ १७ ॥
फणीन्द्रोक्तमहिम्ने ते फणीन्द्राङ्गदधारिणे। फणीन्द्रवरहाराय भास्कराय नमो नमः ॥ १८ ॥

नित्यके भी नित्य आपको नमस्कार है। तीनों लोकोंके पालक! कल्याणकारी (निश्चयात्मिका बुद्धिसे भी अगम्य) अप्रमेय शारीरिक-मानसिक रोगोंके नाश करनेवाले आपको नमस्कार है। सबसे परे, अपरिमेय (मापमें न आने योग्य), सभी प्राणियोंके प्रिय देव एवं सभी पापोंके क्षय करनेवाले योगेश्वर आपको नमस्कार है। (आप) स्थाणुस्वरूप सिद्ध एवं सिद्धों तथा वन्दियोंके द्वारा स्तुत आपको नमस्कार है। संसारके प्राणियोंके लिये दुर्ग बने हुए आप विश्वरूपके लिये नमस्कार है। सर्पराजके द्वारा बखानी गयी महिमावाले, सर्पराजके बाजूबंद एवं माला धारण करनेवाले भास्करस्वरूप आपको बारम्बार नमस्कार है ॥ १५—१८ ॥

एवं स्तुतो महादेवो ब्रह्माणं प्राह शङ्करः। न च मन्युस्त्वया कार्यो भाविन्यर्थे कदाचन ॥ १९ ॥
पुरा वराहकल्पे ते यन्मयाऽपहृतं शिरः। चतुर्मुखं च तद्भूत न कदाचिन्नशिष्यति ॥ २० ॥
अस्मिन् सांनिहिते तीर्थे लिङ्गानि मम भक्तितः। प्रतिष्ठाय विमुक्तस्त्वं सर्वपापैर्भविष्यसि ॥ २१ ॥
सृष्टिकामेन च पुरा त्वयाऽहं प्रेरितः किल। तेनाहं त्वां तथेत्युक्त्वा भूतानां देहपञ्चिवम् ॥ २२ ॥
दीर्घकालं तपस्तप्त्वा मग्नः संनिहिते स्थितः। सुमहान्तं ततः कालं त्वं प्रतीक्षां समाचर ॥ २३ ॥

इस प्रकार स्तुति किये जानेपर शङ्करने ब्रह्मासे कहा—ब्रह्मन्! जो कार्य अवश्यम्भावी है उसके लिये आपको कभी भी चिन्ता नहीं करनी चाहिये। पहले वराह-कल्पमें मैंने आपका जो मस्तक काट लिया था वही चार मुख हो गया। अब वह कभी नष्ट नहीं होगा। इस सांनिहित तीर्थमें भक्तिपूर्वक मेरे लिङ्गोंकी प्रतिष्ठा

करके आप सभी पापोंसे छूट जायँगे। प्राचीनकालमें सृष्टि रचनेकी इच्छासे आपने मुझे अनुप्रेरित किया था, अतः मैं ऐसा ही होगा यह कहकर भूतोंके देशमें रहनेवालेकी भाँति दीर्घकालतक तप करके संनिहितमें विलीन होकर स्थित रहा। उसके बाद आपने बहुत दिनोंतक मेरी प्रतीक्षा की ॥ १९–२३ ॥

स्रष्टारं सर्वभूतानां मनसा कल्पितं त्वया। सोऽब्रवीत् त्वां तदा दृष्ट्वा मां मग्नं तत्र चाम्भसि ॥ २४ ॥
यदि मे नाग्रजस्त्वन्यस्ततः स्रक्ष्याम्यहं प्रजाः। त्वयैवोक्तश्च नैवास्ति त्वदन्यः पुरुषोऽग्रजः ॥ २५ ॥
स्थाणुरेष जले मग्नो विवशः कुरु मद्धितम्। स सर्वभूतानसृजद् दक्षादींश्च प्रजापतीन् ॥ २६ ॥

फिर आपने अपने मनमें सभी प्राणियोंकी सृष्टि करनेवालेका ध्यान किया। तब उन्होंने मुझे वहाँ जलमें निमग्न देखकर आपसे कहा कि यदि मुझसे अन्य कोई बड़ा पहले हुआ न माना जाय तो मैं प्रजाकी सृष्टि करूँगा। आपने कहा—आपके सिवा कोई दूसरा अग्रज पुरुष नहीं है। ये स्थाणु जलमें विलीन तथा विवश पड़े हैं। आप मेरा कल्याण करें। फिर उन्होंने दक्ष आदि प्रजापतियों तथा समस्त भूतोंकी सृष्टि की ॥ २४–२६ ॥

यैरिमं प्रकरोत् सर्वं भूतग्रामं चतुर्विधम्। ताः सृष्टमात्राः क्षुधिताः प्रजाः सर्वाः प्रजापतिम् ॥ २७ ॥
बिभक्षयिषवो ब्रह्मन् सहसा प्राद्रवंस्तथा। स भक्ष्यमाणस्त्राणार्थी पितामहमुपाद्रवत् ॥ २८ ॥
अथासां च महावृत्तिः प्रजानां संविधीयताम्। दत्तं ताभ्यस्त्वया ह्यन्नं स्थावराणां महौषधीः ॥ २९ ॥
जङ्गमानि च भूतानि दुर्बलानि बलीयसाम्। विहितान्नाः प्रजाः सर्वाः पुनर्जग्मुर्यथागतम् ॥ ३० ॥

(इस तरह) जिन्होंने इस चार प्रकारके प्राणि-समुदायको उत्पन्न किया, सृष्टि होते ही वे सभी प्रजाएँ क्षुधित हो गयीं और प्रजापतिको खानेकी इच्छासे उन्हींपर लपक पड़ीं। जब उन्होंने उन्हींका भक्षण करनेकी चेष्टा की, तब प्राण पानेकी इच्छासे वे पितामहके पास दौड़कर गये और उनसे बोले—प्रजाओंकी जीविकाका विधान कीजिये। फिर आपने उन्हें अन्न (जीवन-साधन) प्रदान किया। अचल प्राणियोंकी महौषधियाँ और निर्बल चल प्राणी शक्तिशाली प्राणियोंके अन्न (प्राणन-शक्ति) बने। इस प्रकार जीवन-निर्वाहके लिये प्राणन-शक्तिका विधान हुआ। फिर सभी प्रजाएँ अपने स्थानको लौट गयीं ॥ २७–३० ॥

ततो ववृधिरे सर्वाः प्रीतियुक्ताः परस्परम्। भूतग्रामे विवृद्धे तु तुष्टे लोकगुरौ त्वयि ॥ ३१ ॥
समुत्तिष्ठञ्जलात् तस्मात् प्रजाः संदृष्टवानहम्। ततोऽहं ताः प्रजा दृष्ट्वा विहिताः स्वेन तेजसा ॥ ३२ ॥
क्रोधेन महता युक्तो लिङ्गमुत्पाट्य चाक्षिपम्। तत् क्षिप्तं सरसो मध्ये ऊर्ध्वमेव यदा स्थितम् ॥ ३३ ॥
तदा प्रभृति लोकेषु स्थाणुरित्येष विश्रुतः। सकृद् दर्शनमात्रेण विमुक्तः सर्वकिल्बिषैः ॥ ३४ ॥
प्रयाति मोक्षं परमं यस्मान्नावर्तते पुनः। यश्चेह तीर्थे निवसेत् कृष्णाष्टम्यां समाहितः ॥ ३५ ॥
स मुक्तः पातकैः सर्वैरगम्यागमनोद्भवैः। इत्युक्त्वा भगवान् देवस्तत्रैवान्तरधीयत ॥ ३६ ॥

फिर वे सभी परस्पर प्रेमपूर्वक रहकर बढ़ने लगे। प्राणि-समुदायके बढ़ने एवं लोकके गुरु आपके संतुष्ट होनेपर मैंने उस जलसे निकलकर प्रजाको देखा। उसके बाद अपने तेजसे उत्पन्न हुई उन प्रजाओंको देखकर मैंने क्रोधसे भरकर मैंने लिङ्गको उखाड़कर फेंक दिया। तालाबके बीचमें फेंका गया वह (लिङ्ग) ऊपर स्थिर हो गया। तभीसे वह (लिङ्ग) संसारमें 'स्थाणु' नामसे प्रसिद्ध हो गया। इस-(लिङ्ग-) का एक बार भी दर्शन करनेसे मनुष्य सभी पापोंसे छूटकर मोक्षपद प्राप्त कर लेता है, जहाँसे वह फिर नहीं लौटता। कृष्णाष्टमीके दिन समाहित होकर—एकाग्रचित्त हो इस तीर्थमें निवास करनेवाला व्यक्ति अगम्यागमनसे होनेवाले सभी पापोंसे छूट जाता है—ऐसा कहकर भगवान् महादेव वहीं अन्तर्हित हो गये ॥ ३१–३६ ॥

ब्रह्मा विशुद्धपापस्तु पूज्यं देवं चतुर्मुखम्। लिङ्गानि देवदेवस्य ससृजे सम्मुखस्ततः ॥ ३७ ॥
आद्यं ब्रह्मसरः पुण्यं हरिपार्श्वे प्रतिष्ठितम्। द्वितीयं ब्रह्मसदनं स्वकीये ह्याश्रमे कृतम् ॥ ३८ ॥
तस्यैव पूर्वदिग्भागे तृतीयं च प्रतिष्ठितम्। चतुर्थं ब्रह्मणा लिङ्गं सरस्वत्यास्तटे कृतम् ॥ ३९ ॥
एतानि ब्रह्मतीर्थानि पुण्यानि पावनानि च। ये पश्यन्ति निराहारास्ते यान्ति परमां गतिम् ॥ ४० ॥

पापके क्षीण हो जानेके कारण ब्रह्माने भी चतुर्मुख महादेवका पूजन कर तत्पश्चात् देवाधिदेव-(शिव-)के लिङ्गोंकी सृष्टि की। पहले तो उन्होंने हरिकी बगलमें ब्रह्मसरको स्थापित किया और दूसरा अपने आश्रममें ब्रह्मसदनका निर्माण किया। उसीकी पूर्व दिशामें ब्रह्माने तृतीय लिङ्गको एवं सरस्वती नदीके तटपर चतुर्थ लिङ्गको प्रतिष्ठित किया। जो प्राणी उपवासपूर्वक इन पवित्र और पापनाशक ब्रह्मतीर्थोंका दर्शन करते हैं, वे परम गतिको प्राप्त करते हैं ॥ ३७–४० ॥

कृते युगे हरेः पार्श्वे त्रेतायां ब्रह्मणाश्रमे। द्वापरे तस्य पूर्वेण सरस्वत्यास्तटे कलौ ॥ ४१ ॥
एतानि पूजयित्वा च दृष्ट्वा भक्तिसमन्विताः। विमुक्ताः कलुषैः सर्वैः प्रयान्ति परमां गतिम् ॥ ४२ ॥
सृष्टिकाले भगवता पूजितस्तु महेश्वरः। सरस्वत्युत्तरे तीरे नाम्ना ख्यातश्चतुर्मुखः ॥ ४३ ॥
तं प्रणम्य श्रद्दधानो मुच्यते सर्वकिल्बिषैः। लोलार्ककरसंभूतैस्तथा वैभाण्डसंकरैः ॥ ४४ ॥

सत्ययुगमें हरिकी बगलमें, त्रेतामें ब्रह्माके आश्रममें, द्वापरमें उसके पूर्व तथा कलिमें सरस्वतीके तटपर स्थित लिङ्गोंका भक्तिपूर्वक पूजन एवं दर्शन करनेसे मनुष्य सभी पापोंसे छूटकर परम गतिको प्राप्त करते हैं। सृष्टि करनेके समय सरस्वतीके उत्तरी तटपर भगवान् ब्रह्मासे अर्चित भगवान् महेश्वर चतुर्मुख नामसे विख्यात हुए। मनुष्य उनको श्रद्धाके साथ प्रणाम कर लोलार्कसङ्कर्य (चंचलसे उत्पन्न वर्णसंकर) तथा वैभाण्डसङ्कर्यसे उत्पन्न सभी पापोंसे मुक्त हो जाता है ॥ ४१–४४ ॥

तथैव द्वापरे प्राप्ते स्वाश्रमे पूज्य शङ्करम्। विमुक्तो राजसैर्भावैर्वर्णसंकरसम्भवैः ॥ ४५ ॥
ततः कृष्णचतुर्दश्यां पूजयित्वा तु मानवः। विमुक्तः पातकैः सर्वैरभोज्यान्नसम्भवैः ॥ ४६ ॥
कलिकाले तु संप्राप्ते वसिष्ठाश्रममाश्रितः। चतुर्मुखं स्थापयित्वा ययौ सिद्धिमनुत्तमाम् ॥ ४७ ॥
तत्रापि ये निराहाराः श्रद्दधाना जितेन्द्रियाः। पूजयन्ति महादेवं ते यान्ति परमं पदम् ॥ ४८ ॥
इत्येतत् स्थाणुतीर्थस्य माहात्म्यं कीर्तितं तव। यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो भवति मानवः ॥ ४९ ॥

॥ इति श्रीवामनपुराणे एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

उसी प्रकार द्वापरयुगके आनेपर अपने आश्रममें शङ्करका पूजन कर ब्रह्मा वर्णसङ्कर्यसे उत्पन्न होनेवाले रजोगुणके भावोंसे मुक्त हुए। मनुष्य कृष्णचतुर्दशी तिथिमें वहाँ शङ्करजीका पूजन कर अभक्ष्य अन्नके भक्षण करनेसे होनेवाले समस्त पापोंसे विमुक्त हो जाता है। कलियुग आनेपर वसिष्ठाश्रममें स्थित होकर ब्रह्माने चतुर्मुख-(शङ्कर-)की स्थापना की तथा उत्तम सिद्धि प्राप्त की। जो लोग वहाँ निराहार, श्रद्धायुक्त और जितेन्द्रिय होकर महादेवकी पूजा करेंगे वे परमपदको प्राप्त करेंगे। इस प्रकार मैंने आपसे स्थाणुतीर्थका माहात्म्य बतलाया, जिसे सुनकर मनुष्य सभी पापोंसे मुक्त हो जाता है ॥ ४५–४९ ॥

इस प्रकार श्रीवामनपुराणमें उनचासवाँ अध्याय समाप्त हुआ ॥ ४९ ॥

[अथ पञ्चाशत्तमोऽध्यायः]

देवदेव उवाच

एवं पृथूदको देवाः पुण्यः पापभयापहः । तं गच्छध्वं महातीर्थं यावत् संनिधिशोधितम् ॥ १ ॥
यदा मृगशिरोऋक्षे शशिसूर्यौ बृहस्पतिः । तिष्ठन्ति सा तिथिः पुण्या त्वक्षया परिगीयते ॥ २ ॥
तं गच्छध्वं सुरश्रेष्ठा यत्र प्राची सरस्वती । पितॄनाराधयध्वं हि तत्र श्राद्धेन भक्तितः ॥ ३ ॥
ततो मुरारिवचनं श्रुत्वा देवाः सवासवाः । समाजग्मुः कुरुक्षेत्रे पुण्यतीर्थं पृथूदकम् ॥ ४ ॥

पचासवाँ अध्याय प्रारम्भ

(कुरुक्षेत्रके पृथूदक-तीर्थके सन्दर्भमें अक्षय-तृतीयाके महत्त्वकी कथा)

देवदेव-(महादेव-)ने कहा—देवताओ ! इस प्रकार पृथूदक-तीर्थ पाप-भयको नष्ट करनेवाला और पवित्र है । तुमलोग 'संनिहित' तालाबतक (उस) ज्ञात (व्याप्त) होनेवाले महातीर्थमें जाओ । जिस तिथिमें चन्द्रमा, सूर्य एवं बृहस्पति—ये तीनों ग्रह मृगशिरा नक्षत्रमें स्थित होते हैं, उस पवित्र तिथिको 'अक्षया' तिथि कहते हैं । श्रेष्ठ देवताओ ! जहाँ सरस्वती नदी पूर्व दिशामें बह रही है, वहाँ जाकर भक्ति-श्रद्धासे श्राद्ध करके पितरोंकी आराधना करो । भगवान्‌का निर्देश सुनकर इन्द्रके सहित सभी देवता कुरुक्षेत्रमें विद्यमान पृथूदक नामवाले पवित्र तीर्थमें गये ॥ १–४ ॥

तत्र स्नात्वा सुराः सर्वे बृहस्पतिमचोदयन् ।
विशस्व भगवन् ऋक्षमिमं मृगशिरं कुरु । पुण्यां तिथिं पापहरां तव कालोऽयमागतः ॥ ५ ॥
प्रवर्तते रविस्तत्र चन्द्रमाऽपि विशत्यसौ । त्वदायत्तं गुरो कार्यं सुराणां तत् कुरुष्व च ॥ ६ ॥
इत्येवमुक्तो देवैस्तु देवाचार्योऽब्रवीदिदम् ।
यदि वर्षाधिपोऽहं स्यां ततो यास्यामि देवताः । बाढमूचुः सुराः सर्वे ततोऽसौ प्राक्रमन्मृगम् ॥ ७ ॥

वहाँ स्नान करके सभी देवताओंने बृहस्पतिसे कहा—भगवन् ! इस मृगशिरा नक्षत्रमें आप प्रविष्ट होकर पापविनाशिनी पवित्र तिथिका निर्माण (विधान) करें । आपका यह (निर्दिष्ट) समय आ गया है । सूर्य उस नक्षत्रमें स्थित हैं तथा चन्द्रमा भी उसमें प्रविष्ट हो गये हैं । हे बृहस्पति ! देवताओंका कार्य आपके अधीन है, आप उसे पूरा करें । देवताओंके इस प्रकार कहनेपर देवोंके गुरु बृहस्पतिने यह कहा—देवताओ ! यदि मैं वर्ष-स्वामी बनूँ तो (मृगशिरा नक्षत्रपर) जाऊँगा । सभी देवोंने कहा—ठीक है । तब उन्होंने (बृहस्पतिने) मृगशिरा नक्षत्रमें प्रवेश किया ॥ ५–७ ॥

आषाढे मासि मार्गर्क्षे चन्द्रक्षयतिथिर्हि या । तस्यां पुरन्दरः प्रीतः पिण्डं पितृषु भक्तितः ॥ ८ ॥
प्रादात् तिलमधुमिश्रं हविष्यान्नं कुरुष्वथ । ततः प्रीतास्तु पितरस्तां प्राहुस्तनयां निजाम् ॥ ९ ॥
मेनां देवाश्च शैलाय हिमयुक्ताय वै ददुः ।
तां मेनां हिमवाँल्लब्ध्वा प्रसादाद् दैवतेष्वथ । प्रीतिमानभवच्चासौ रराम च यथेच्छया ॥ १० ॥
ततो हिमाद्रिः पितृकन्यया समं समर्पयन् वै विषयान् यथेष्टम् ।
अजीजनत् सा तनयाश्च तिस्रो रूपातियुक्ताः सुरयोषितोपमाः ॥ ११ ॥

इति श्रीवामनपुराणे पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

आषाढ़ मासमें मृगशिरा नक्षत्रमें चन्द्रक्षय (अमावस्या) तिथिके आ जानेपर इन्द्रने प्रसन्न होकर पितरोंको भक्तिके साथ तिलोंसे मिले और मधुसे मिला हुआ हविष्यान्नका पिण्ड प्रदान किया । तब पितरोंने

देवोंको अपनी मेना नामकी कन्या दी। देवताओंने उसे हिमवान्‌को सौंप दिया। देवोंके आग्रहसे उस मेनाको पाकर वे हिमवान् प्रसन्न हो गये और इच्छानुकूल विनोद-विलासमें लग गये। हिमवान् निर्दिष्ट की गयी उस कन्याके साथ दाम्पत्यसुखमें आसक्त हो गये। फिर उस मेनाने भी सुन्दर रूपोंवाली अत्यन्त सुन्दरी तीन कन्याओंको उत्पन्न किया ॥ ८–११ ॥

इस प्रकार श्रीवामनपुराणमें पचासवाँ अध्याय समाप्त हुआ ॥ ५० ॥

[अथैकपञ्चाशत्तमोऽध्यायः]

पुलस्त्य उवाच

मेनायाः कन्यकास्तिस्रो जाता रूपगुणान्विताः। सुनाभ इति च ख्यातश्चतुर्थस्तनयोऽभवत् ॥ १ ॥
रक्ताङ्गी रक्तनेत्रा च रक्ताम्बरविभूषिता। रागिणी नाम संजाता ज्येष्ठा मेनासुता मुने ॥ २ ॥
शुभाङ्गी पद्मपत्राक्षी नीलकुञ्चितमूर्धजा। श्वेतमाल्याम्बरधरा कुटिला नाम चापरा ॥ ३ ॥
नीलाञ्जनचयप्रख्या नीलेन्दीवरलोचना। रूपेणानुपमा काली जघन्या मेनकासुता ॥ ४ ॥

इक्यावनवाँ अध्याय प्रारम्भ

(मेनाकी तीन कन्याओंका जन्म, कुटिला और रागिणीको शाप, उमाकी तपस्या, शिवद्वारा उमाकी परीक्षा एवं मन्दराचलपर गमन)

पुलस्त्यजी बोले—मेनाको रूप और गुणोंसे सम्पन्न तीन कन्याएँ उत्पन्न हुईं और चौथा सुनाभ नामसे विख्यात पुत्र उत्पन्न हुआ। मुने! मेनाकी जेठी कन्या 'रागिणी' नामकी थी जो लाल अङ्गों एवं लाल आँखोंवाली थी। वह लाल वस्त्रोंसे सुशोभित रहती थी। दूसरी 'कुटिला' नामकी कन्या थी जो सुन्दर शरीरवाली, कमलदललोचना, नीले एवं घुँघराले बालोंवाली थी तथा उज्ज्वल माला और उज्ज्वल वस्त्र धारण किये रहती थी। मेनाकी तीसरी कन्याका नाम था 'काली'। उसका रंग नीले अञ्जनके ढेरके समान और आँखें नीले कमलके जैसी थीं। वह अत्यन्त सुन्दर थी ॥ १–४ ॥

जातास्ताः कन्यकास्तिस्रः षडब्दात् परतो मुने। कर्तुं तपः प्रयातास्ता देवास्ता ददृशुः शुभाः ॥ ५ ॥
ततो दिवाकरैः सर्वैर्वसुभिश्च तपस्विनी। कुटिला ब्रह्मलोकं तु नीता शशिकरप्रभा ॥ ६ ॥
अथोचुर्देवताः सर्वाः किं त्वियं जनयिष्यति। पुत्रं महिषहन्तारं ब्रह्मन् व्याख्यातुमर्हसि ॥ ७ ॥
ततोऽब्रवीत् सुरपतिर्नेयं शक्ता तपस्विनी। शार्वं धारयितुं वेगं वराकी मुच्यतां त्वियम् ॥ ८ ॥

मुने! वे तीनों कन्याएँ जन्मसे छः वर्षके बाद तपस्या करने चली गयीं। देवताओंने उन सुन्दरी कन्याओंको देखा, फिर आदित्य तथा वसुगण चन्द्रमाकी किरणोंके समान कान्तिवाली तपस्विनी (मझली कन्या) कुटिलाको ब्रह्मलोकमें ले गये। उसके बाद सभी देवताओंने ब्रह्मासे कहा कि ब्रह्मन्! आप बतलायें कि क्या यह कन्या महिषासुरको मारनेवाले पुत्रको जनेगी? तब इन्द्रने कहा—यह बेचारी तपस्विनी शिवका तेज धारण करनेमें समर्थ नहीं है; इसे छोड़ दो ॥ ५–८ ॥

ततस्तु कुटिला क्रुद्धा ब्रह्माणं प्राह नारद। तथा यतिष्ये भगवन् यथा शार्वं सुदुर्धरम् ॥ ९ ॥
धारयिष्याम्यहं तेजस्तथैव शृणु सत्तम। तपसाहं सुतप्तेन समाराध्य जनार्दनम् ॥ १० ॥
यथा हरस्य मूर्धानं नमयिष्ये पितामह। तथा देव करिष्यामि सत्यं सत्यं मयोदितम् ॥ ११ ॥

नारद ! उसके बाद कुपित होकर कुटिलाने ब्रह्मासे कहा—भगवन् ! शङ्करके दुर्धरणीय तेजको जैसे धारण कर सकूँ, मैं वैसा उपाय करूँगी । सत्तम ! आप सुनें, कठिनतर तपस्यासे जनार्दन भगवान्‌की उत्तम उपासना करके मैं उनके तेजको वैसे ही धारण करूँगी जिससे शङ्करका सिर नत कर दूँ । पितामह देव ! मैंने जो कहा है वह सत्य है, सत्य है; मैं वैसा ही करूँगी ॥ ९-११ ॥

पुलस्त्य उवाच

ततः पितामहः क्रुद्धः कुटिलां प्राह दारुणाम् । भगवानादिकृद् ब्रह्मा सर्वेशोऽपि महामुने ॥ १२ ॥

पुलस्त्यजी बोले—महामुने ! उसके बाद आदिकर्ता सबके उपास्य पितामह भगवान् ब्रह्माने उग्र स्वभाववाली कुटिलासे कुपित होकर कहा—॥ १२ ॥

ब्रह्मोवाच

यस्मान्मद्वचनं पापे न क्षान्तं कुटिले त्वया । तस्मान्मच्छापनिर्दग्धा सर्वा आपो भविष्यसि ॥ १३ ॥
इत्येवं ब्रह्मणा शप्ता हिमवद्दुहिता मुने । आपोमयी ब्रह्मलोकं प्लावयामास वेगिनी ॥ १४ ॥
तामुद्वृत्तजलां दृष्ट्वा प्रबबन्ध पितामहः । ऋक्सामाथर्वयजुर्भिर्वाङ्मयैर्बन्धनैर्दृढम् ॥ १५ ॥
सा बद्धा संस्थिता ब्रह्मन् तत्रैव गिरिकन्यका । आपोमयी प्लावयन्ती ब्रह्मणो विमला जटाः ॥ १६ ॥

ब्रह्माने कहा—पापिनी कुटिले ! जिस कारण तुमने मेरे वचनको सहन नहीं किया, उसी कारण मेरे शापसे तुम निर्दग्ध होकर पूर्णतः जलमयी हो जाओगी । मुने ! इस प्रकार ब्रह्मासे अभिशप्त हिमालय-पुत्री (कुटिला) जलमयी होकर (अपने) वेगसे ब्रह्मलोकको जलसे आप्लावित करने लगी । पितामहने उसके उमड़कर बहते हुए जलकी धाराको देखकर ऋक्, साम, अथर्व और यजुकी स्तुतियोंका पाठ करके उसे स्तुतिद्वारा दृढतापूर्वक बाँध दिया । ब्रह्मन् ! जलमयी वह पर्वतपुत्री ब्रह्माकी निर्मल जटाको भिगोती हुई वहीं बद्ध (अवरुद्ध) हो गयी ॥ १३-१६ ॥

या सा रागवती नाम सापि नीता सुरैर्दिवम् । ब्रह्मणे तां निवेद्यैवं तामप्याह प्रजापतिः ॥ १७ ॥
सापि क्रुद्धाऽब्रवीन्नूनं तथा तप्स्ये महत्तपः । यथा मन्नामसंयुक्तो महिपत्नो भविष्यति ॥ १८ ॥
तामप्युवाच भगवान् ब्रह्मा सन्ध्या पापे भविष्यसि । या मद्वाक्यमलङ्घ्यं वै सुरैर्लङ्घयसे बलात् ॥ १९ ॥
सापि जाता मुनिश्रेष्ठ सन्ध्या रागवती ततः । प्रतीच्छन् कृत्तिकायोगं शैलेयी विग्रहं दृढम् ॥ २० ॥

जो रागवती (रागिणी) नामकी थी उसे भी देवतागण स्वर्गमें ले गये और उन्होंने ब्रह्माको उसे समर्पित कर दिया । उससे भी ब्रह्माने उसी प्रकार कहा । उसने भी क्रुद्ध होकर कहा—मैं निश्चय ही ऐसी कठिन तपस्या करूँगी, जिससे मेरे नामसे सम्बद्ध पुत्र महिषको मारनेवाला होगा । ब्रह्माने उसे भी शाप दिया—पापे ! देवोंसे भी अनुल्लङ्घ्य मेरे वचनको उल्लङ्घन करनेसे तुम सन्ध्या हो जाओगी । मुनिश्रेष्ठ ! उसके बाद वह शैलतनया रागवती भी सन्ध्या हो गयी और दृढ शरीर धारण कर कृत्तिकायोगकी प्रतीक्षा करने लगी ॥ १७-२० ॥

ततो गते कन्यके द्वे शप्ते मेना तपस्विनी । तपसो वारयामास उमेत्येवाब्रवीच्च सा ॥ २१ ॥
सैव मात्रा तदा नाम्नाऽऽख्याता निरुक्ता शुभा । उमेत्येव हि कन्यायाः सा जगाम तपोवनम् ॥ २२ ॥
ततः सा मनसा देवं शूलपाणिं वृषध्वजम् । रुद्रं चेतसि संधाय तपस्तेपे सुदुष्करम् ॥ २३ ॥
ततो ब्रह्माऽब्रवीद् देवान् गच्छध्वं हिमवत्सुताम् । इहानयध्वं तां कालीं तपस्यन्तीं हिमालये ॥ २४ ॥

(इस प्रकार) दो कन्याओंके शापित होकर चली जानेपर तपस्विनी मेनाने (तीसरी कन्याको) तपस्या करनेसे रोका । उसने उसे उमा ऐसा कहा । शिवकी ही प्रिया, तपस्यामयी माता (मेना)ने कन्याका यही दो अक्षरोंसे संयुक्त शुभ नाम रखा । उमा भी तपोवनको चली गयी । उसके बाद उसने मनमें शूलपाणि वृषध्वज रुद्रका ध्यानकर

कठिन तपस्या की। फिर ब्रह्माने देवताओंसे कहा—देवताओ! तुमलोग हिमालयपर तप करती हुई हिमालयकी पुत्री कालीके पास जाओ और उसे यहाँ लिवा लाओ ॥ २१—२४ ॥

ततो देवाः समाजग्मुर्ददृशुः शैलनन्दिनीम्। तेजसा विजितास्तस्या न शेकुरुपसर्पितुम् ॥ २५ ॥
कथं हि मातामहनप्तृकं वधे स्वभ्रातरं भ्रातृसुतं च मातुः ॥ ९० ॥
एषा श्रुतिश्चापि पुरातनी किल गायन्ति यां वेदविदो महर्षयः।
कृत्वा च यस्या मतमुत्तमाया· स्वर्गं व्रजन्ति त्वतिपापिनोऽपि ॥ ९१ ॥
गां ब्राह्मणं वृद्धमथाप्तवाक्यं बालं स्वबन्धुं ललनामदुष्टाम्।
कृतापराधा अपि नैव वध्या आचार्यमुख्या गुरवस्तथैव ॥ ९२ ॥
एवं जानन् धर्ममग्र्यं सुरेन्द्रा नाहं हन्यां भ्रातरं मातुलेयम्।
यदा दैत्यो निर्गमिष्यद् गुहान्त· तदा शक्त्या घातयिष्यामि शत्रुम् ॥ ९३ ॥

इस प्रिय-तथ्य वचनको सुनकर हँसते हुए कार्तिकेय देवताओंसे बोले—मैं नानाके नाती, माताके भतीजे और अपने ममेरे भाईको कैसे मारूँ। (इस विषयमें) यह (इनको न मारनेकी) प्राचीन श्रुति भी है, जिसे वेदज्ञाता महर्षिगण गाया करते हैं। (इसी प्रकार) गौ, ब्राह्मण, वृद्ध, यथार्थवक्ता, बालक, अपना सम्बन्धी, दोषरहित स्त्री तथा आचार्य आदि गुरुजन अपराध करनेपर भी अवध्य होते हैं। इस उत्तम श्रुतिके अनुसार आचरण करनेवाले महान् पापी भी स्वर्गलोकको जाते हैं। सुरश्रेष्ठो! मैं इस श्रेष्ठ धर्मको जानते हुए (ऐसी दशामें—गुफामें छिपी अवस्थामें) अपने भाईको नहीं मार सकूँगा। जब दैत्य गुफाके भीतरसे बाहर निकलेगा तब मैं शक्तिसे उस (देव-)शत्रुका संहार करूँगा (तब हमें धर्मबाधा नहीं होगी)॥ ९०—९३॥

श्रुत्वा कुमारवचनं भगवान्महर्षे कृत्वा मतिं स्वहृदये गुहमाह शक्रः।
मत्तो भवान् न मतिमान् वदसे किमर्थं वाक्यं शृणुष्व हरिणा गदितं हि पूर्वम् ॥ ९४ ॥
नैकस्यार्थे बहून् हन्यादिति शास्त्रेषु निश्चयः। एकं हन्याद् बहुभ्योऽर्थे न पापी तेन जायते ॥ ९५ ॥
एतच्छ्रुत्वा मया पूर्वं समयस्थेन चाग्निज। निहतो नमुचि· पूर्वं सोदरोऽपि ममानुजः ॥ ९६ ॥
तस्माद् बहूनामर्थाय समौञ्चं महिषासुरम्। घातयस्व पराक्रम्य शक्त्या पावकदत्तया ॥ ९७ ॥

महर्षे! कुमारका वचन सुननेके बाद इन्द्रने अपने हृदयमें विचारकर गुहसे कहा—आप मुझसे अधिक मतिमान् नहीं हैं। आप (ऐसा) क्यों बोल रहे हैं। पहले समयमें भगवान् श्रीहरिकी कही हुई बातको सुनिये। शास्त्रोंमें यह निश्चय किया गया है कि एक व्यक्तिकी रक्षाके लिये बहुतोंका संहार नहीं करना चाहिये। परंतु बहुतोंके कल्याणके लिये एकका वध करनेमें मनुष्य पापी नहीं होता। अग्निपुत्र! इस शास्त्रनिर्णयको सुनकर पहले समयमें मैंने मेल रहनेपर भी अपने सहोदर छोटे भाई नमुचिको मार दिया। अतः बहुतोंके कल्याणके लिये तुम क्रौञ्चसहित महिषासुरका संहार अग्निद्वारा दी हुई शक्तिसे बलपूर्वक कर डालो॥ ९४—९७॥

पुरन्दरवचः श्रुत्वा क्रोधादारक्तलोचन·। कुमारः प्राह वचनं कम्पमानः शतक्रतुम् ॥ ९८ ॥
मूढ किं ते बलं बाह्वो· शारीरं चापि वृत्रहन्। येनाधिक्षिपसे मां त्वं ध्रुवं न मतिमानसि ॥ ९९ ॥
तमुवाच सहस्राक्षस्त्वत्तोऽहं बलवान् गुह। तं गुहः प्राह एहेहि युद्ध्यस्व बलवान् यदि ॥१००॥
शक्रः प्राहाथ बलवान् ज्ञायते कृत्तिकासुत। प्रदक्षिणं शीघ्रतरं यः कुर्यात् मौञ्चमेव हि ॥१०१॥

इन्द्रकी बात सुनकर कुमारकी आँखें क्रोधसे लाल हो गयीं। आवेशमें काँपते हुए कुमारने इन्द्रसे कहा—मूढ वृत्रारि! तुम्हारी बाहुओं और शरीरमें कितनी शक्ति है, जिसके बलपर तुम मेरे ऊपर (मतिमन्द कहकर) आक्षेप कर रहे हो। तुम निश्चय ही बुद्धिमान् नहीं हो। हजार आँखोंवाले इन्द्रने उनसे कहा—गुह! मैं तुमसे बलवान् हूँ।

[illegible] कविश्वनाथे महिष नामक दैत्य [illegible] । [illegible] लिये [illegible] सेना छिन्न-भिन्न हो गयी । [illegible] हाथमें [illegible] लेकर [illegible] और [illegible] ॥ [illegible]–८१ ॥

गतस्तु सेनाग्रनिमेन मर्दिता ते हंसचक्रप्रमुखा गणेश्वराः ।
[illegible] पलायिता रणे स्कन्दं भयार्ताः शरणं प्रपेदिरे ॥ ८२ ॥
भगवान् [illegible] पीड्य महोग्र[illegible] तारकं स्वासिनमापतन्तम् ।
हत्वैव शक्त्या हृदये बिभेद स भिन्नमर्मा न्यपतत् पृथिव्याम् ॥ ८३ ॥
तस्मिन्हते भ्रातरि भग्नदर्पो भयातुरोऽभून्महिषो महान्ते ।
संत्यज्य संग्रामशिरो द्रुतन्तु जगाम शैलं स हिमाचलाख्यम् ॥ ८४ ॥
बाणोऽपि वीरे निहतेऽथ तारके गते हिमाद्रिं महिषे भयार्ते ।
भयाद् विवेशोग्रमपां निधानं गणैर्हते पश्यति स्वापराधे ॥ ८५ ॥

इसके बाद [illegible] उस वेगोद्[illegible] वीरने उन गणोंसहित हंसचक्र आदि गणेश्वरोंको हरा दिया । वे सभी [illegible] स्कन्दकी शरणमें गये । महेश्वरके पुत्र कुमारने अपने गणोंको निरुत्साह तथा [illegible] [illegible] शक्तिके प्रहारसे उसका हृदय विदीर्ण कर डाला । हृदय फट जानेके कारण वह पृथ्वीपर गिर पड़ा । भाई ! उस भाईके मर जानेपर महिषासुरका अभिमान चूर हो गया । वह दुरात्मा डरसे व्याकुल होकर युद्धभूमिसे भागकर हिमालय पर्वतपर चला गया । वीर तारकके मारे जाने, उसके महिषके [illegible] गणोंद्वारा अपनी सेनाका संहार किये जानेपर बाण भी डरके कारण अगाध समुद्रमें प्रवेश कर गया ॥ ८३—८५ ॥

हत्वा कुमारो रणमूर्ध्नि तारकं प्रगृह्य शक्तिं महता जवेन ।
मयूरमारुह्य [illegible] ययौ निहन्तुं महिषासुरस्य ॥ ८६ ॥
स दृष्ट्वा प्रेक्ष्य शिखण्डिकेतनं समापतन्तं धृतशक्तिपाणिनम् ।
[illegible] हिमाचलं गतो क्रौञ्चं समभ्येत्य गुहां विवेश ॥ ८७ ॥
शैलं प्रविष्टं न विनाशितुं न्वशकत् यत्नाद् भगवान् गुहोऽपि ।
[illegible] भक्तिं गतं [illegible] संचिन्तयन्नेव ततः स्थितोऽभूत् ॥ ८८ ॥
ततोऽभ्ययात् [illegible] हरो [illegible] ।
[illegible] सशैलं भिन्द्धि शक्त्या कुरु देवकार्यम् ॥ ८९ ॥

तत्र कार्तिकेय दितिजेन तस्य श्रुत्वा वचः ... दृष्ट्वा वितत्य।
कथं हि सनातनमद्य वधे सम्भवं ... च ... ॥ १० ॥
यदा श्रुतिश्चापि पुराणरूपं हितं ... च ... नरेन्द्र।
... च यत्ना ... तथैव ... नैवोऽपि ॥ ११ ॥
इत्याराध्य ... नैव ... लब्धुं ... ।
एवं तत्र धर्मज्ञं श्रुत्वा ... आचार्यतुल्या गुरुवत्सदैव ॥ १२ ॥
यदा दैत्यो निर्गमिष्यद् गुहान्तं तदा हत्वा ... मनुलेयम्।
... वचनको सुनकर हँसते हुए कार्तिकेय ... ॥ १३ ॥

... और ... मनमें ... कैसे मारूँ। (इन ...) यह (इनको न मारनेकी) प्राचीन श्रुति भी है, जिसे ... दोषरहित ... भी ... इसी प्रकार) ... , वृद्ध, पराधीन, ... अपना सम्बन्धी, आवरण ... जाते हैं। सुरश्रेष्ठ ! मैं इस श्रेष्ठ धर्मको जानते हुए (ऐसी दशामें—... बिना अवस्थान) ... धर्मको नहीं मार सकूँगा। जब दैत्य गुफाके भीतरसे बाहर निकलेगा ... (तब) शत्रुका संहार करूँगा (तब ही धर्मबाधा नहीं होगी) ॥ १०—१३ ॥

श्रुत्वा कुमारवचनं भगवान्महर्षिं कृत्वा मतिं स्वहृदये गुहमाह शक्रः।
मत्तो भवान् न मतिमान् वदसे किमर्थं वाक्यं शृणुष्व हरिणा गदितं हि पूर्वम् ॥ १४ ॥
नैकस्यार्थे बहून् हन्यादिति शास्त्रेषु निश्चयः। एकं हन्याद् बहुभ्योऽर्थे न पापी तेन जायते ॥ १५ ॥
एतच्छ्रुत्वा मया पूर्वं समयस्थेन चाग्निज। निहतो नमुचिः पूर्वं सोदरोऽपि ममानुजः ॥ १६ ॥
तस्माद् बहूनामर्थाय ... महिषासुरम्। घातयस्व पराक्रम्य शक्त्या पावकदत्तया ॥ १७ ॥

... कुमारका वचन सुननेके बाद ... अपने हृदयमें विचार गुहसे कहा—आप मुझसे अधिक ... नहीं हैं। आप (ऐसा) क्यो बोल रहे हैं। पहले समयमें भगवान् श्रीहरिकी कही हुई बातको सुनिये। शास्त्रोंमें निश्चय ... एक ... व्यक्तिका ... लिये बहुतोंका ... नहीं करना चाहिये ... बहुतोंके ... एकको मारनेसे मनुष्य पापी नहीं होता ... सुनकर मुझे ... रहनेपर भी अपने सहोदर ... नमुचिको ... महिषासुरका संहार ... शक्तिसे ...

... श्रुत्वा ... कुमार ...
... न ... शरीरं चापि ...
सहस्रा ... गुह ...
... शक्तिः ...

... बात सुनकर कुमार ...
... और ...
... बुद्धिमान नहीं हो ...

तद् कार्तिकेयः प्रियमेव तथ्यं श्रुत्वा वचः प्राह सुरान् विहस्य।
कथं हि मातामहनप्तृकं वधे स्वभ्रातरं भ्रातृसुतं च मातुः ॥ ९० ॥
एषा श्रुतिश्चापि पुरातनी किल गायन्ति यां वेदविदो महर्षयः।
कृत्वा च यस्या मतमुत्तमायाः स्वर्गं प्रजन्ति ह्यतिपापिनोऽपि ॥ ९१ ॥
गां ब्राह्मणं वृद्धमथाप्तवाक्यं बालं स्वबन्धुं ललनामदुष्टाम्।
कृतापराधा अपि नैव वध्या आचार्यमुख्या गुरवस्तथैव ॥ ९२ ॥
एवं जानन् धर्ममग्र्यं सुरेन्द्रा नाहं हन्यां भ्रातरं मातुलेयम्।
यदा दैत्यो निर्गमिष्यद् गुहान्तः तदा शक्त्या घातयिष्यामि शत्रुम् ॥ ९३ ॥

इस प्रिय-तथ्य वचनको सुनकर हँसते हुए कार्तिकेय देवताओंसे बोले—मैं नानाके नाती, माताके भतीजे और अपने ममेरे भाईको कैसे मारूँ ! (इस विषयमें) यह (इनको न मारनेकी) प्राचीन श्रुति भी है, जिसे वेदज्ञाता महर्षिगण गाया करते हैं। (इसी प्रकार) गौ, ब्राह्मण, वृद्ध, यथार्थवक्ता, बालक, अपना सम्बन्धी, दोषरहित स्त्री तथा आचार्य आदि गुरुजन अपराध करनेपर भी अवध्य होते हैं। इस उत्तम श्रुतिके अनुसार आचरण करनेवाले महान् पापी भी स्वर्गलोकको जाते हैं। सुरश्रेष्ठो ! मैं इस श्रेष्ठ धर्मको जानते हुए (ऐसी दशामें—गुफामें छिपी अवस्थामें) अपने भाईको नहीं मार सकूँगा। जब दैत्य गुहाके भीतरसे बाहर निकलेगा तब मैं शक्तिसे उस (देव-)शत्रुका संहार करूँगा (तब हमें धर्मबाधा नहीं होगी) ॥ ९०—९३ ॥

श्रुत्वा कुमारवचनं भगवान्महर्षे कृत्वा मतिं स्वहृदये गुहमाह शक्रः।
मत्तो भवान् न मतिमान् वदसे किमर्थं वाक्यं शृणुष्व हरिणा गदितं हि पूर्वम् ॥ ९४ ॥
नैकस्यार्थे बहून् हन्यादिति शास्त्रेषु निश्चयः। एकं हन्याद् बहुभ्योऽर्थे न पापी तेन जायते ॥ ९५ ॥
एतच्छ्रुत्वा मया पूर्वं समयस्थेन पावकिज। निहतो नमुचिः पूर्वं सोदर्योऽपि ममानुजः ॥ ९६ ॥
तस्माद् बहूनामर्थाय सक्रौञ्चं महिषासुरम्। घातयस्व पराक्रम्य शक्त्या पावकदत्तया ॥ ९७ ॥

महर्षे ! कुमारका वचन सुननेके बाद इन्द्रने अपने हृदयमें विचारकर गुहसे कहा—आप मुझसे अधिक मतिमान् नहीं हैं। आप (ऐसा) क्यों बोल रहे हैं। पहले समयमें भगवान् श्रीहरिकी कही हुई बातको सुनिये। शास्त्रोंमें यह निश्चय किया गया है कि एक व्यक्तिकी रक्षाके लिये बहुतोंका संहार नहीं करना चाहिये। परंतु बहुतोंके कल्याणके लिये एकका वध करनेसे मनुष्य पापी नहीं होता। अग्निपुत्र ! इस शास्त्रनिर्णयको सुनकर पहले समयमें मैंने मेल रहनेपर भी अपने सहोदर छोटे भाई नमुचिको मार दिया। अतः बहुतोंके कल्याणके लिये तुम क्रौञ्चसहित महिषासुरका संहार अग्निद्वारा दी हुई शक्तिसे बलपूर्वक कर डालो ॥ ९४—९७ ॥

पुरन्दरवचः श्रुत्वा क्रोधादारक्तलोचनः। कुमारः प्राह वचनं कम्पमानः शतक्रतुम् ॥ ९८ ॥
मूढ किं ते बलं बाह्वोः शारीरं चापि वृत्रहन्। येनाधिक्षिपसे मां त्वं ध्रुवं न मतिमानसि ॥ ९९ ॥
तमुवाच सहस्राक्षस्त्वत्तोऽहं बलवान् गुह। तं गुहः प्राह एहीहि युद्धस्व बलवान् यदि ॥१००॥
शक्रः प्राहाथ बलवान् ज्ञायते कृत्तिकासुत। प्रदक्षिणं शीघ्रतरं यः कुर्यात् क्रौञ्चमेव हि ॥१०१॥

इन्द्रकी बात सुनकर कुमारकी आँखें क्रोधसे लाल हो गयीं। आवेशमें काँपते हुए कुमारने इन्द्रसे कहा—मूढ वृत्रारि ! तुम्हारी बाहुओं और शरीरमें कितनी शक्ति है, जिसके बलपर तुम मेरे ऊपर (मतिमन्द कहकर) आक्षेप कर रहे हो। तुम निश्चय ही बुद्धिमान् नहीं हो। हजार आँखोंवाले इन्द्रने उनसे कहा—गुह ! मैं तुमसे शक्तिशाली हूँ।

गर्म नि:श्वास छोड़ा। वह सर्वथा अनुपम था। उसके बाद आकाशसे एक सुन्दर घोड़ा गिरा और अशरीरिणी वाणी—आकाशवाणी हुई कि यह बलवान् अश्व एक दिनमें हजारों योजन जा सकता है। शत्रुसे सजे हुए उस राजा ऋतध्वजको वह घोड़ा सौंपकर वे महर्षि (पुनः) तपस्या करने लगे। उसके बाद राजपुत्रने दैत्यके पास जाकर उसे बाणसे घायल कर दिया॥ ५–८॥

नारद उवाच

केनाम्बरतलाद् वाजी निसृष्टो वद सुव्रत। वाक् कस्याऽदेहिनी जाता परं कौतूहलं मम॥ ९॥

नारदने कहा (पुनः पूछा)—सुव्रत! आप यह बतलायें कि किसने आकाशसे इस अश्वको गिराया था एवं आकाशवाणी किसकी थी? (इस विषयमें) मुझे बड़ी उत्सुकता है॥ ९॥

पुलस्त्य उवाच

विश्वावसुर्नाम महेन्द्रगायनो गन्धर्वराजो बलवान् यशस्वी।
निसृष्टवान् भूतले तुरङ्गं ऋतध्वजस्यैव सुतार्थमाशु॥ १०॥

पुलस्त्यजी बोले—महेन्द्रका गुणगान करनेवाले बलशाली विश्वावसु नामके यशस्वी गन्धर्वराजने अपनी पुत्रीके लिये ऋतध्वजके हेतु उस समय अश्वको पृथ्वीपर गिराया था॥ १०॥

नारद उवाच

कोऽर्थो गन्धर्वराजस्य येनाश्वोऽप्रैषीन्महाजवम्। राज्ञः कुवलयाश्वस्य कोऽर्थो नृपसुतस्य च॥ ११॥

नारदने कहा (फिर पूछा)—महान् वेगशाली इस अश्वको भेजनेमें गन्धर्वराजका क्या उद्देश्य था तथा राजपुत्र राजा कुवलयाश्वका इसमें क्या लाभ था? (कृपया इसे भी बतलाइये।)॥ ११॥

पुलस्त्य उवाच

विश्वावसोः शीलगुणोपपन्ना आसीत्पुरंध्रीषु वरा त्रिलोके।
लावण्यराशिः शशिकान्तितुल्या मदालसा नाम मदालसेव॥ १२॥
तां नन्दने देवरिपुस्तरस्वी संक्रीडतीं रूपवतीं ददर्श।
पातालकेतुस्तु जहार तन्वीं तस्यार्थतः सोऽश्ववरः प्रदत्तः॥ १३॥
हत्वा च दैत्यं नृपतेस्तनूजो लब्ध्वा वधोरूमपि संस्थितोऽभूद्।
रराज यथा देवपतिर्महेन्द्रः शच्या तथा राजसुतो मृगाक्ष्या॥ १४॥

पुलस्त्यजी बोले—विश्वावसुकी मदसे अलसायी-सी मदालसा नामकी एक (भोलीभाली) कन्या थी। वह शील और गुणसे सम्पन्न, त्रिलोकीकी स्त्रियोंमें उत्तम, सुन्दरताकी खानि और चन्द्रमाकी कान्तिके समान (कोमलकिशोरी) थी। नन्दनवनमें क्रीडा कर रही उस सौन्दर्यशालिनीको देवताओंके शत्रु पातालकेतुने देखा और तुरन्त उसे उठा ले गया। उसीके कारण वह श्रेष्ठ घोड़ा दिया गया था। दैत्यको मारनेके बाद श्रेष्ठ ऊरुवाली स्त्रीको पाकर राजपुत्र निश्चिन्त हो गये। राजपुत्र (उस) मृगनयनीके साथ ऐसे सुशोभित हो रहे थे जैसे शचीके साथ इन्द्र सुशोभित होते हैं॥ १२–१४॥

नारद उवाच

एवं निरस्ते महिषे तारके च महासुरे। हिरण्याक्षसुतो धीमान् किमचेष्टत वै पुनः॥ १५॥

नारदने पुनः पूछा—इस प्रकार महान् असुर तारक और महिषके निरस्त—समाप्त हो जानेपर हिरण्याक्षके बुद्धिमान् पुत्र (अन्धक)ने पुनः क्या किया?॥ १५॥

दैत्येश! ब्रह्मर्षिकी गोपर प्रमत्त सेनाको देखकर ग्रथिराजने समस्त जगत्‌के लिये कल्याणकारी, सत्य एवं उचित जो श्लोक कहा है क्या उसे आपने नहीं सुना है? (उन्होंने कहा है—) प्राणोंका छोड़ देना अच्छा है, परंतु चुगलखोरोंकी बातमें दिलचस्पी लेना उचित नहीं। मौन रहना अच्छा है, किंतु असत्य बोलना ठीक नहीं। नपुंसक होकर रहना ठीक है, परंतु परस्त्रीगमन उचित नहीं। भीख माँगना अच्छा है, किंतु बार-बार दूसरेके धनका उपभोग करना उचित नहीं। प्रह्लादका वचन सुननेके बाद काम-पीडित अन्धक क्रोधसे अंधा होकर 'यह वही शत्रुकी जननी है'—यह कहते हुए दौड़ पड़ा। उसके बाद दूसरे और दानव भी यन्त्रसे छूटे हुए पत्थरकी गोलीके समान उसके पीछे दौड़ चले। परंतु अव्यय नन्दीने हाथमें वज्र उठाकर बलपूर्वक उन सबको रोक दिया॥ २८—३१॥

मयतारपुरोगास्ते वारिता द्राविताश्च तथा। कुलिशेनाहतास्तूर्णं जग्मुर्भीता दिशो दश॥ ३२॥
तानर्दितान् रणे दृष्ट्वा नन्दिनाऽन्धकदानवः। परिघेण समाहत्य पातयामास नन्दिनम्॥ ३३॥
शैलादिं पतितं दृष्ट्वा धावमानं तथान्धकम्। शतरूपाऽभवद् गौरी भयात् तस्य दुरात्मनः॥ ३४॥
ततः स देवीगणमध्यसंस्थितः परिभ्रमन् भाति महाऽसुरेन्द्रः।
यथा वने मत्तकरी परिभ्रमन् करेणुमध्ये मदलोलदृष्टिः॥ ३५॥

वज्रकी मारसे रोक दिये गये और भगाये जाते हुए वे मय एवं तारक आदि सभी दैत्य डरकर दसों दिशाओंमें भाग गये। संग्राममें अन्धकासुरने उन सभीको नन्दीद्वारा पीड़ित देखकर नन्दीको परिघसे मारकर गिरा दिया। नन्दीको गिरा हुआ और अन्धकको दौड़कर आते हुए देखकर गौरी उस दुष्टात्माके भयसे सैकड़ों रूपवाली हो गयीं। उसके बाद देवियोंके बीच घूमता हुआ (वह) दैत्य ऐसा लग रहा था जैसा कि वनमें हथिनियोंके बीच घूमता हुआ मदसे चञ्चल दृष्टिवाला मतवाला हाथी सुशोभित होता है॥ ३२—३५॥

न परिज्ञातवांस्तत्र का तु सा गिरिकन्यका। नात्राश्चर्यं न पश्यन्ति चत्वारोऽमी सदैव हि॥ ३६॥
न पश्यतीह जात्यन्धो रागान्धोऽपि न पश्यति।
न पश्यति मदोन्मत्तो लोभाक्रान्तो न पश्यति। सोऽपश्यमानो गिरिजां पश्यन्नपि तदान्धकः॥ ३७॥
प्रहारं नाददत् तासां युवत्य इति चिन्तयन्। ततो देव्या स दुष्टात्मा शतावर्या निराहतः॥ ३८॥
कुट्टितः प्रवरैः शस्त्रैर्निपपात महीतले। वीक्ष्यान्धकं निपतितं शतरूपा विभावरी॥ ३९॥
तस्मात् स्थानादपाक्रम्य गताऽन्तर्धानमम्बिका। पतितं चान्धकं दृष्ट्वा दैत्यदानवयूथपाः॥ ४०॥
कुर्वन्तः सुमहाशब्दं प्राद्रवन्त रणार्थिनः। तेषामापततां शब्दं श्रुत्वा तस्थौ गणेश्वरः॥ ४१॥

(पर) वह नहीं समझ रहा था कि उनमें वे गिरिनन्दिनी कौन हैं? इसमें (उसके न समझनेमें) कोई आश्चर्य नहीं है; क्योंकि संसारमें ये चार प्रकारके व्यक्ति सदा ही (ठीक-ठीक) नहीं देख पाते। जन्मका अन्धा नहीं देखता, प्रेममें अन्धा हुआ नहीं देखता, मदोन्मत्त नहीं देखता एवं लोभसे पराभूत भी नहीं देखता है। अतः अन्धक उस समय देखते हुए भी गिरिजाको नहीं देख पा रहा था। उस दानवने उन सभीको युवती समझकर उनपर आघात नहीं किया, फिर तो शतावरीदेवीने (ही) उस दुष्टात्मापर आघात कर दिया। उत्कृष्ट कोटिके शस्त्रोंसे छिन्नकर वह पृथ्वीपर गिर पड़ा। अन्धकको गिरा हुआ देखकर शतरूपोंवाली विभावरी अम्बिका उस स्थानसे हटकर अन्तर्हित हो गयीं। अन्धकको गिरा हुआ देख दैत्यों एवं दानवोंके सेनापति युद्धके लिये ललकारते हुए दौड़ पड़े। आक्रमण करनेवाले उन-(दैत्यों-) के शब्दको सुनकर गणेश्वर खड़े हो गये॥ ३६—४१॥

करनेके लिये निश्चय किया। उन व्यापक शङ्करने महाव्रतका निर्णय करनेके बाद अस्थियोंसे धैर्य धारण कराया और वे शैल आदि (नन्दी) को उनकी रक्षाके लिये नियुक्त कर पृथ्वीपर विचरण करने लगे। उन्होंने कानोंमें तन्त्रानुसार महामुद्रा धारण की। महानागोंके कुण्डल एवं कमरमें महाशङ्खकी मेखला धारण कर ली॥ २–५॥

कपालं दक्षिणे हस्ते सव्ये गृह्य कमण्डलुम्। एकाहवासी वृक्षे हि शैलसानुनदीचरन्॥ ६॥
स्थानं त्रैलोक्यमास्थाय मूलाहारोऽम्बुभोजनः। वाय्वाहारस्तथा तस्थौ नववर्षशतं क्रमात्॥ ७॥
ततो घोटां मुखे क्षिप्य निरुच्छ्वासोऽभवद् यतिः। विस्तीर्णे हिमवत्पृष्ठे रम्ये समशिलातले॥ ८॥
ततो घोटा विदार्यैव कपालं परमेष्ठिनः। सार्चिष्मती जटामध्यान्निष्पन्ना धरणीतले॥ ९॥

दाहिने हाथमें कपाल एवं बायें हाथमें कमण्डलु लेकर वे वृक्षके नीचे (कभी) पड़े रहते, कभी पहाड़की चोटियोंपर तथा नदियोंके तटपर चक्कर लगाते रहते। प्रथम (आरम्भमें) मूलफल खाकर फिर जल पीकर, उसके बाद वायु पीकर (यम-नियमका) व्रत पालन करनेवाले उन्होंने क्रमशः तीनों लोकोंमें नौ सौ वर्ष व्यतीत किये। उसके बाद उन्होंने हिमालयके ऊपर रमणीय तथा समतल पर्वतीय चट्टानपर आसन लगा लिया और अपने मुखमें काठकी बनी गुल्ली डालकर श्वास रोक लिया—कुम्भक प्राणायाम कर लिया। उसके बाद शङ्करके कपालको फाड़कर ज्वालामयी वह गुल्ली (उनकी) जटाके बीचसे निकलकर पृथ्वीपर गिर पड़ी॥ ६–९॥

घोटया तु पतन्त्याऽद्रिर्दारितः क्ष्मासमोऽभवत्। आवर्त्तीर्थवरः पुण्यः केदार इति विश्रुतः॥ १०॥
ततो हरो वरं प्रादात् केदाराय वृषध्वजः। पुण्यवृद्धिकरं ब्रह्मन् पापघ्नं मोक्षसाधनम्॥ ११॥
ये जलं तावके तीर्थे पीत्वा संयमिनो नराः। मधुमांसनिवृत्ता ये ब्रह्मचारिव्रते स्थिताः॥ १२॥
षण्मासाद् धारयिष्यन्ति निवृत्ताः परपाकतः। तेषां हृत्पङ्कजेष्वेव मल्लिङ्गं भविता ध्रुवम्॥ १३॥

उस गुल्लीके गिरनेसे पर्वत टूट-फूटकर पृथ्वीके समान (समतल) हो गया और वहाँ केदार नामका प्रसिद्ध तीर्थ बन गया। ब्रह्मन्! उसके बाद वृषध्वज महादेवने केदारको पुण्यकी वृद्धि करनेवाले एवं पापके विनाश करनेवाले और मोक्षके साधनका वर दिया तथा यह भी वर दिया कि जो संयमी मनुष्य पराक्कभोजनको त्यागकर तथा व्रतचर्या धारणकर तुम्हारा जल पीते हुए यहाँ छः महीनेतक निवास करेंगे उनके हृदयकमलमें निश्चय ही मेरे लिङ्गकी सत्ता प्रत्यक्ष प्रकट होगी॥ १०–१३॥

न चास्य पापाभिरतिर्भविष्यति कदाचन। पितॄणामक्षयं श्राद्धं भविष्यति न संशयः॥ १४॥
स्नानदानतपांसीह होमजप्यादिकाः क्रियाः। भविष्यन्त्यक्षया नॄणां मृतानामपुनर्भवः॥ १५॥
एतद् वरं हरात् तीर्थं प्राप्य पुण्यानि देवताः। पुनाति पुंसां केदारस्त्रिनेत्रवचनं यथा॥ १६॥
केदाराय वरं दत्त्वा जगाम त्वरितो हरः। स्नातुं भानुसुतां देवीं कालिन्दीं पापनाशिनीम्॥ १७॥

उन्हें कभी पापमें अभिरुचि नहीं होगी तथा उनसे किया गया पितरोंका श्राद्ध अक्षय होगा—इसमें कोई सन्देह नहीं है। मनुष्योंद्वारा यहाँ की गयी स्नान, दान, तपस्या, होम एवं जप आदिकी क्रियाएँ अक्षय होंगी तथा इस स्थानपर मनुष्योंके मरनेपर उनका पुनर्जन्म नहीं होगा। महादेवसे इस प्रकारका वर पाकर यह केदारतीर्थ त्रिनेत्र महादेवके वचनके अनुकूल प्राणिवर्गको पवित्र एवं देवताओंका पोषण करने लगा। केदारतीर्थको वर देकर महादेव पापविनाशिनी रवितनया देवी कालिन्दी (यमुना)में स्नान करनेके लिये शीघ्र चले गये॥ १४–१७॥

तत्र स्नात्वा शुचिर्भूत्वा जगामाथ सरस्वतीम्। वृतां तीर्थवरैः पुण्यैः प्लक्षजां पापनाशिनीम्॥ १८॥
अवतीर्णस्ततः स्नातुं निमग्नश्च महाम्भसि। द्रुपदां च

पुलस्त्यजी बोले—नारद ! मुर असुरके विनाशकी कथा अद्भुत है, वह पापका विनाश करनेवाली और पवित्रकारिणी है; मैं उसे कहूँगा; तुम सुनो । दनुकी कोखसे कश्यपका औरस पुत्र मुर उत्पन्न हुआ । उसने श्रेष्ठ देवोंद्वारा संग्राममें दैत्योंको पराजित देखा । उसके बाद मृत्युसे भयभीत होकर उसने बहुत वर्षोंतक तपस्या करते हुए व्यापक अजेय ब्रह्माकी आराधना की । उसके बाद उसके ऊपर संतुष्ट होकर ब्रह्माने कहा—वत्स ! वर माँगो । उस दैत्यने पितामहसे यह श्रेष्ठ वर माँगा—॥ २९–३२ ॥

यं यं करतलेनाहं स्पृशेयं समरे विभो । स स मद्धस्तसंस्पृष्टस्त्वमरोऽपि मरत्वतः ॥ ३३ ॥
बाढमित्याह भगवान् ब्रह्मा लोकपितामहः । ततोऽभ्यागान्महातेजा मुरः सुरगिरिं बली ॥ ३४ ॥
समेत्याह्वयते देवं यक्षं किंनरमेव वा । न कश्चिद् युयुधे तेन समं दैत्येन नारद ॥ ३५ ॥
ततोऽमरावतीं क्रुद्धः [redacted] गत्वा शक्रमाह्वयत् । न चास्य सह योद्धुं वै मतिं चक्रे पुरंदरः ॥ ३६ ॥

विभो ! युद्धमें मैं जिसे हाथसे छू दूँ वह मेरे हाथसे छूते ही अमर (देवता) होनेपर भी मृत्युको प्राप्त हो जाय । लोकपितामह भगवान् ब्रह्माने कहा—बहुत ठीक; ऐसा ही होगा । उसके बाद महातेजस्वी बलशाली मुर देवगिरि-पर जा पहुँचा । [पुलस्त्यजी कहते हैं कि] नारदजी ! वहाँ पहुँचकर उसने देवता, यक्ष, किंनर आदिको युद्धके लिये ललकारा, किंतु किसीने भी उसके साथ युद्ध नहीं किया । उसके बाद क्रुद्ध होकर वह अमरावतीकी ओर चला गया और इन्द्रको संग्राम करनेके लिये ललकारने लगा । किंतु इन्द्रने भी उसके साथ युद्ध करनेका विचार नहीं किया ॥ ३३–३६ ॥

ततः स करमुद्यम्य प्रविवेशामरावतीम् । प्रविशन्तं न तं कश्चिन्निवारयितुमुत्सहेत् ॥ ३७ ॥
स गत्वा शक्रसदनं प्रोवाचेन्द्रं मुरस्तदा । देहि युद्धं सहस्राक्ष नो चेत् स्वर्गं परित्यज ॥ ३८ ॥
इत्येवमुक्तो मुरुणा ब्रह्मन् हरिहयस्तदा । स्वर्गराज्यं परित्यज्य भूचरः समजायत ॥ ३९ ॥
ततो गजेन्द्रकुलिशौ हृतौ शक्रस्य शत्रुणा । सकलत्रो महातेजाः सह देवैः सुतेन च ॥ ४० ॥
कालिन्द्या दक्षिणे कूले निवेश्य स्वपुरं स्थितः । मुरुश्चापि महाभोगान् बुभुजे स्वर्गसंस्थितः ॥ ४१ ॥

उसके बाद हाथ उठाये हुए उसने अमरावतीमें प्रवेश किया । परंतु किसीने भी प्रवेश करते हुए उसको रोकनेका साहस नहीं किया । उसके बाद इन्द्रके भवनमें जाकर मुरने इन्द्रसे कहा—सहस्राक्ष ! मुझसे संग्राम करो, अन्यथा स्वर्गको छोड़ दो । ब्रह्मन् ! मुरके इस प्रकार कहनेपर इन्द्र (युद्ध न कर) स्वर्गका राज्य छोड़कर पृथ्वीपर विचरण करने लगे । उसके बाद (उस) शत्रुने इन्द्रके गजराज (ऐरावत) और वज्रको छीन लिया । महातेजस्वी इन्द्र अपनी पत्नी, पुत्र और देवताओंके साथ कालिन्दीके दक्षिण तटपर अपना नगर बसाकर रहने लगे और मुर स्वर्गमें रहते हुए महान् भोगोंका उपभोग करने लगा ॥ ३७–४१ ॥

दानवाश्चापरे रौद्रा मयतारपुरोगमाः । मुरमासाद्य मोदन्ते स्वर्गे सुकृतिनो यथा ॥ ४२ ॥
स कदाचिन्महीपृष्ठं समायातो महासुरः । एकाकी कुञ्जरारूढः सरयूं निम्नगां प्रति ॥ ४३ ॥
स सरय्वास्तटे वीरं राजानं सूर्यवंशजम् । ददर्श रघुनामानं दीक्षितं यज्ञकर्मणि ॥ ४४ ॥
तमुपेत्याब्रवीद् दैत्यो युद्धं मे दीयतामिति । नो चेन्निवर्तनां यज्ञो नेष्टव्या देवतास्त्वया ॥ ४५ ॥

मय और तारक आदि दूसरे भयङ्कर दानव भी मुरके निकट पहुँचकर स्वर्गमें पुण्यात्माओंके समान आमोद-प्रमोद करने लगे । वह महान् असुर किसी समय पृथ्वीपर आया और अकेला ही हाथीपर चढ़कर सरयू नदीके तटपर उपस्थित हुआ । उसने सरयूके किनारे सूर्यवंशमें उत्पन्न हुए एवं यज्ञकर्ममें दीक्षित रघु नाम[illegible] वीरको

दैत्योंमें श्रेष्ठ मुरने यमराजसे कहा—यम ! वह कहाँ रहता है, जिसे कठिनतासे जीता जा सकता है ? उसका संयमन करनेके लिये मैं तैयार होकर वहाँ स्वयं जाऊँगा । यमराजने उससे कहा—तुम क्षीरसागरमें जाओ । वहाँ लोकस्वामी जगन्मूर्ति भगवान् विष्णु रहते हैं । मुरने उनकी बात सुनकर कहा—धर्मराज ! मैं केशवके पास जा रहा हूँ, परंतु तुम तबतक मनुष्योंका नियमन मत करना । उस (मुर-) ने कहा—तुम जाओ । तबतक मैं तुम्हारे नियामकको जैसे भी हो जीतनेका प्रयत्न करूँगा । उसके बाद तुम युद्ध करना । इतना कहकर मुरु या मुर दैत्य क्षीरसागरमें जा पहुँचा । वहाँ (जाकर उसने देखा कि) चतुर्भुजधारी जनार्दन अनन्त नागकी शय्यापर (पड़े हुए) हैं ॥५८–६२ ॥

नारद उवाच

चतुर्मूर्त्तिः कथं विष्णुरेक एव निगद्यते । सर्वगत्वात् कथमपि अव्यक्तत्वाच्च तद्वद ॥ ६३ ॥

नारदजीने पूछा—आप (कृपया) यह बतलायें कि विष्णु एक होनेपर भी चतुर्मूर्ति क्यों कहे जाते हैं । क्या सर्वगत एवं अव्यक्त होनेके कारण तो नहीं कहा जाता ? (आप) उसे कहें ॥ ६३ ॥

पुलस्त्य उवाच

अव्यक्तः सर्वगोऽपीह एक एव महामुने । चतुर्मूर्त्तिर्जगन्नाथो यथा ब्रह्मंस्तथा शृणु ॥ ६४ ॥
अप्रतर्क्यमनिर्देश्यं शुक्लं शान्तं परं पदम् । वासुदेवाख्यमव्यक्तं स्मृतं द्वादशपत्रकम् ॥ ६५ ॥

पुलस्त्यजी बोले—ब्रह्मन् ! अव्यक्त एवं सर्वव्यापी होनेपर भी वे एक ही हैं । जिस कारणसे जगन्नाथ चतुर्मूर्ति कहे जाते हैं, उसे बताता हूँ, सुनो । वासुदेव नामक श्रेष्ठ पद (तर्क या अनुमानद्वारा अज्ञेय) एवं निर्देश किये जानेमें अशक्य, शुक्र (शुद्ध), शान्तियुक्त, अव्यक्त (अप्रकट) एवं द्वादशपत्रक (ॐ नमो भगवते वासुदेवाय—) द्वादशाक्षर मन्त्रवाला) कहा गया है ॥ ६४-६५ ॥

नारद उवाच

कथं शुक्लं कथं शान्तमप्रतर्क्यमनिन्दितम् । कान्यस्य द्वादशैवोक्ता पत्रका तानि मे वद ॥ ६६ ॥

नारदजीने पुनः पूछा—किस प्रकार वे शुक्र, शान्त, अप्रतर्क्य एवं अनिन्दित हैं ? मुझे बताइये कि उनके कथित द्वादशपत्रक कौन हैं ॥ ६६ ॥

पुलस्त्य उवाच

शृणुष्व गुह्यं परमं परमेष्ठिप्रभाषितम् । श्रुतं सनत्कुमारेण तेनाख्यातं च तन्मम ॥ ६७ ॥

पुलस्त्यजी बोले—पितामह ब्रह्माने जिस परम गुह्य वचनको कहा है, उसे सुनिये । सनत्कुमारने उसे सुना था और उन्होंने मुझसे कहा था ॥ ६७ ॥

नारद उवाच

कोऽयं सनत्कुमारेति यस्योक्तं ब्रह्मणा स्वयम् । तथापि तेन गदितं वद मामनुपूर्वशः ॥ ६८ ॥

नारदजीने फिर कहा—इस विषयमें स्वयं ब्रह्माने जिनसे कहा है, वे सनत्कुमार कौन हैं ? और उन्होंने भी आपसे जो कहा है उसे क्रमशः मुझसे कहें ॥ ६८ ॥

पुलस्त्य उवाच

धर्मस्य भार्याहिंसाख्या तस्यां पुत्रचतुष्टयम् । संजातं मुनिशार्दूल योगशास्त्रविचारकम् ॥ ६९ ॥
ज्येष्ठः सनत्कुमारोऽभूद् द्वितीयश्च सनातनः । तृतीयः सनको नाम चतुर्थश्च सनन्दन ॥ ७० ॥
सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम् । दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक् … म् ॥ ७१ ॥

यदा तु लोकविद्विष्टं दुष्टं कर्म करिष्यति । त्रैलोक्यजननीं चापि अभिवाञ्छिष्यतेऽधमः ॥१०॥
घातयिष्यति वा विप्रं यदा प्रक्षिप्य चासुरान् । तदास्य स्वयमेवाहं करिष्ये कायशोधनम् ॥११॥
एवमुक्त्वा गतः शम्भुः स्वस्थानं मन्दराचलम् । त्वत्पिताऽपि समभ्यागात् त्वामादाय रसातलम् ॥१२॥
एतेन कारणेनाम्बा शैलेयी भविता तव । सर्वस्यापीह जगतो गुरुः शम्भुः पिता ध्रुवम् ॥१३॥

(किंतु) यह अधम जब संसारके विरोधमें बुरा कर्म करेगा तथा त्रैलोक्य-जननीकी चाह करेगा अथवा असुरोंको भेजकर जब यह विप्रोंका वध करायेगा, तब मैं स्वयं इसके शरीरकी शुद्धि करूँगा । ऐसा कहकर शम्भु अपने स्थान मन्दराचलपर चले गये और तुम्हारे पिता तुमको लेकर रसातलमें चले आये । इसी कारण शैलपुत्री तुम्हारी माता एवं समस्त जगत्के गुरु शम्भु निश्चय ही तुम्हारे पिता हैं ॥ १०–१३ ॥

भवानपि तपोयुक्तः शास्त्रवेत्ता गुणाप्लुतः । नेदृशे पापसंकल्पे मतिं कुर्याद् भवद्विधः ॥ १४ ॥
त्रैलोक्यप्रभुरव्यक्तो भवः सर्वनमस्कृतः । अजेयस्तस्य भार्येयं न त्वमर्होऽमरार्दन ॥ १५ ॥
न चापि शक्तः प्राप्तुं तां भवाञ्शैलनृपात्मजाम् । अजित्वा सगणं रुद्रं स च कामोऽद्य दुर्लभः ॥ १६ ॥
यस्तरेत् सागरं दोर्भ्यां पातयेद् भुवि भास्करम् । मेरुमुत्पाटयेद् वापि स जयेच्छूलपाणिनम् ॥ १७ ॥

आप भी तपस्या करनेवाले एवं शास्त्रके ज्ञाता तथा अनेक अलौकिक गुणोंसे भूषित हो । अतः आप-जैसे पुरुषको इस प्रकारके पाप करनेमें मानसिक निश्चय भी नहीं करना चाहिये । देवताओंको कष्ट देनेवाले, तीनों लोकोंपर शासन करनेवाले और सबसे वन्दित अव्यक्त भगवान् शङ्कर (सर्वथा) अजेय हैं । उनकी ये भार्या हैं । तुम न तो इनके योग्य हो और न समर्थ ही । गणोंके सहित शङ्करको बिना जीते तुम उन पर्वतराजकी कन्याको प्राप्त करना चाहते हो, सो तो यह मनोरथ पूरा होना कठिन है । शूलपाणि शङ्करको वही जीत सकता है, जो अपनी भुजाओंसे समुद्रको पार कर जाय अथवा सूर्यको पृथ्वीपर गिरा दे या मेरु-पर्वतको उखाड़ दे ॥ १४–१७ ॥

उताहोस्विदिमाः शक्याः क्रियाः कर्तुं नरैर्बलात् । न च शक्यो हरो जेतुं सत्यं सत्यं मयोदितम् ॥ १८ ॥
किं त्वया न श्रुतं दैत्य यथा दण्डो महीपतिः । परस्त्रीकामवान् मूढः सराष्ट्रो नाशमाप्तवान् ॥ १९ ॥
आसीद् दण्डो नाम नृपः प्रभूतबलवाहनः । स वव्रे महातेजाः पौरोहित्याय भार्गवम् ॥ २० ॥
ईजे च विविधैर्यज्ञैर्नृपतिः शुक्रपालितः । शुक्रस्यासीच्च दुहिता अरजा नाम नामतः ॥ २१ ॥

उपर्युक्त सभी कार्य भले ही मनुष्य बलसे कर ले, किंतु शङ्कर नहीं जीते जा सकते; यह मैंने सच-सच कह दिया है । दैत्य ! क्या तुमने यह नहीं सुना है कि परस्त्रीकी अभिलाषा करनेवाला दण्ड नामका मूर्ख राजा अपने राष्ट्रके साथ विनष्ट हो गया । (सुनो, प्राचीन कालमें) प्रचुर सेना एवं वाहनोंसे भरा-पूरा दण्ड नामका एक राजा था । उस महातेजस्वीने पुरोहितके स्थानपर शुक्राचार्यको वृत किया था । शुक्राचार्यके निर्देशनमें उस राजाने भाँति-भाँतिके यज्ञोंका अनुष्ठान किया । शुक्राचार्यकी अरजा नामकी एक कन्या थी ॥ १८–२१ ॥

शुक्रः कदाचिदगमद् वृषपर्वाणमासुरम् । तेनार्चितश्चिरं तत्र तस्थौ भार्गवसत्तम ॥ २२ ॥
अरजा स्वगृहे वह्निं शुश्रूषन्ती महासुर । अतिष्ठत सुचार्वङ्गी ततोऽभ्यागान्नराधिपः ॥ २३ ॥
स पप्रच्छ क्व शुक्रेति तमूचुः परिचारिकाः । गतः स भगवान् शुक्रो याजनाय दनोः सुतम् ॥ २४ ॥
पप्रच्छ नृपतिः का तु तिष्ठते भार्गवाश्रमे । तास्तमूचुर्गुरोः पुत्री संनिष्ठत्यरजा नृप ॥ २५ ॥

किसी समय शुक्राचार्य वृषपर्वा नामके असुरके पास गये हुए थे। भार्गव वंशमें श्रेष्ठ वे (शुक्र) उससे पूजित—सत्कृत होकर बहुत समयतक वहीं रुके रह गये। महासुर! सुन्दरी अरजा अपने घरमें अग्निकी सेवा—हवनादि कार्य करती हुई रह गयी थी। इतनेमें एक दिन राजा दण्ड वहाँ पहुँच गया। उसने पूछा—शुक्राचार्य कहाँ हैं? घरकी सेविकाओंने उससे कहा—वे भगवान् शुक्र दनुनन्दन-(वृषपर्वा-)के यहाँ यज्ञ कराने गये हैं। राजाने पूछा—शुक्राचार्यके आश्रममें (यह) कौन स्त्री रह रही है? उन लोगोंने उत्तर दिया—राजन्! (यह) गुरुजीकी कन्या अरजा है॥ २२—२५॥

तामाश्रमे शुक्रसुतां द्रष्टुमिक्ष्वाकुनन्दनः। प्रविवेश महाबाहुर्ददर्शारजसं ततः॥ २६॥
तां दृष्ट्वा कामसंतप्तस्तत्क्षणादेव पार्थिवः। संजातोऽन्धक दण्डस्तु कृतान्तबलचोदितः॥ २७॥
ततो विसर्जयामास भृत्यान् भ्रातॄन् सुहृत्तमान्। शुक्रशिष्यानपि बली एकाकी नृप आव्रजत्॥ २८॥
तमागतं शुक्रसुता प्रत्युत्थाय यशस्विनी। पूजयामास संहृष्टा भ्रातृभावेन दानव॥ २९॥

महाबाहु इक्ष्वाकुनन्दन (दण्ड) शुक्राचार्यकी उस कन्याको देखनेके लिये आश्रममें प्रविष्ट हुआ और उसने अरजाको देखा। अन्धक! कालबलसे प्रेरित होकर राजा उसे देखकर तत्काल ही कामसे पीडित हो गया। उसके बाद बलवान् राजाने भृत्यों, भाइयों, घनिष्ठ मित्रों एवं शुक्राचार्यके शिष्योंको भी (वहाँसे) हटा दिया और (वहाँ) अकेला आ गया। शुक्राचार्यकी यशस्विनी कन्याने आये हुए उस राजाका भ्रातृभावसे प्रसन्नतापूर्वक स्वागत-सत्कार किया॥ २६—२९॥

ततस्तामाह नृपतिर्बाले कामाग्नितापितम्। मां समाह्लादयस्वाद्य स्वपरिष्वङ्गवारिणा॥ ३०॥
साऽपि प्राह नृपश्रेष्ठ मा विनीनश आतुरः। पिता मम महाक्रोधात् त्रिदशानपि निर्दहेत्॥ ३१॥
मूढबुद्धे भवान् भ्राता ममासि त्वनयाप्लुतः। भगिनी धर्मतस्तेऽहं भवाञ्शिष्यः पितुर्मम॥ ३२॥
सोऽब्रवीद् भीरु मां शुक्रः कालेन परिधक्ष्यति। कामाग्निर्निर्दहति मामद्यैव तनुमध्यमे॥ ३३॥

उसके बाद राजाने उससे पूछा—बाले! मैं कामाग्निसे संतप्त हूँ। आज तुम अपने आलिङ्गनरूपी जलसे मुझे आनन्दित करो। वह (अरजा) बोली—नरपतिप्रवर! (कामसे) अधीर होकर अपनेको विनष्ट मत करो। मेरे पिता अपने महान् क्रोधसे देवताओंको भी भस्म कर सकते हैं। मूढ-बुद्धे! तुम मेरे भाई हो। परंतु अनीतिसे ओतप्रोत हो गये हो। मैं धर्मसे तुम्हारी बहन हूँ; क्योंकि तुम मेरे पिताके शिष्य हो। उस (दण्डक) ने कहा—भीरु! शुक्र (भविष्यमें) किसी समय मुझे जला देंगे; परंतु कृशोदरि! कामकी आग तो मुझे आज ही (अभी) जलाये जा रही है॥ ३०—३३॥

सा प्राह दण्डं नृपतिं मुहूर्तं परिपालय। तमेव याचस्व गुरुं स ते दास्यत्यसंशयम्॥ ३४॥
दण्डोऽब्रवीत् सुतन्वङ्गि कालक्षेपो न मे क्षमः। च्युतावसरकर्तृत्वे विघ्नो जायेत सुन्दरि॥ ३५॥
ततोऽब्रवीच्च विरजा नाहं त्वां पार्थिवात्मज। दातुं शक्ता स्वमात्मानं स्वतन्त्रा न हि योषितः॥ ३६॥
किं वा ते बहुनोक्तेन मा त्वं नाशं नराधिप। गच्छस्व शुक्रशापेन सभृत्यज्ञातिबान्धवः॥ ३७॥

उस-(अरजा-)ने राजा दण्डसे कहा—राजन्! एक क्षण प्रतीक्षा करो। तुम उन गुरुसे ही याचना करो। वे तुम्हें निःसन्देह मुझको दे देंगे। दण्डने कहा—सुन्दरि! मैं समयकी प्रतीक्षा करनेमें असमर्थ हूँ। बहुधा अवसर चूक जानेपर कार्यमें विघ्न हो जाया करता है। उसके बाद अरजाने कहा—राजपुत्र! मैं स्वयं अपनेको तुम्हें अर्पित करनेमें समर्थ नहीं हूँ; क्योंकि स्त्रियाँ स्वतन्त्र नहीं होतीं। अथवा नरपते! तुमसे अधिक कहनेसे

क्या (लाभ), (बस मैं इतना ही कहती हूँ कि इस असत् प्रस्तावके कारण—) तुम शुक्राचार्यके शापसे भृत्य, जाति और बन्धुओंके साथ अपना विनाश मत करो ॥ ३४—३७ ॥

ततोऽब्रवीन्नरपति सुतनु शृणु चेष्टितम्। चित्राङ्गदाया यद् वृत्तं पुरा देवयुगे शुभे ॥ ३८ ॥
विश्वकर्मसुता साध्वी नाम्ना चित्राङ्गदाऽभवत्। रूपयौवनसम्पन्ना पद्महीनेव पद्मिनी ॥ ३९ ॥
सा कदाचिन्महारण्यं सखीभिः परिवारिता। जगाम नैमिषं नाम स्नातुं कमललोचना ॥ ४० ॥
सा स्नातुमवतीर्णा च अथाभ्यागान्नरेश्वर।
सुदेवतनयो धीमान् सुरथो नाम नामतः। तां ददर्श च तन्वङ्गीं शुभाङ्गो मदनातुर ॥ ४१ ॥

उसके बाद राजाने कहा—सुन्दरि ! प्राचीन कालमें—पवित्र देवयुगमें घटित चित्राङ्गदाका एक वृत्तान्त सुनो। विश्वकर्माकी चित्राङ्गदा नामकी एक साध्वी कन्या थी। वह रूप और यौवनसे सम्पन्न मानो कमलसे रहित कमलिनी थी। कमलके समान नेत्रोंवाली वह किसी समय अपनी सखियोंसे घिरी हुई—सखियोंके साथ नैमिष नामके महारण्यमें स्नान करनेके लिये गयी। वह स्नान करनेके लिये जलमें जैसे ही उतरी, वैसे ही सुदेवके पुत्र बुद्धिमान् राजा सुरथ वहाँ पहुँचे। उन्होंने उस कृशाङ्गीको देखा। सुन्दर शरीरवाले वे उसे देखकर कामातुर हो गये ॥ ३८—४१ ॥

न दृष्ट्वा सा सखीराह वचनं सत्यसंयुतम्। असौ नराधिपसुतो मदनेन कदर्थ्यते ॥ ४२ ॥
मदर्थं च परम मह्यं स्वप्रदानं सुरूपिणः। सख्यस्तामब्रुवन् बाला न प्रगल्भाऽसि सुन्दरि ॥ ४३ ॥
अस्वातन्त्र्यं तवास्तीह प्रदाने स्वात्मनोऽनघे। पिता तवास्ति धर्मिष्ठः सर्वशिल्पविशारदः ॥ ४४ ॥
न ते युक्तमिहात्मानं दातुं नरपते स्वयम्। एतस्मिन्नन्तरे राजा सुरथः सत्यवाक् सुधीः ॥ ४५ ॥
समभ्येत्याऽब्रवीदेनां कन्दर्पशरपीडितः। त्वं मुग्धे मोहयसि मां दृष्ट्यैव मदिरेक्षणे ॥ ४६ ॥

उनको देखकर उस (चित्राङ्गदा) ने अपनी सखियोंसे सत्य (छिपावरहित) वचन कहा—यह राजपुत्र मेरे ही लिये कामपीड़ित होकर कष्ट पा रहा है। अतः मुझे यह उचित (प्रतीत होता) है कि इस सौन्दर्यशाली व्यक्तिको मैं अपनेको समर्पित कर दूँ। उसकी 'बाला' सहेलियोंने उससे कहा कि सुन्दरि ! तुम सयानी (वयस्क) नहीं हो। निष्पाप नारि ! स्वयंको दान करनेमें तुम्हें स्वतन्त्रता नहीं है, तुम्हारे पिता परम धार्मिक हैं और सभी शिल्पकर्मोंमें परम निपुण हैं, इसलिये यहाँ तुम्हें अपनेको राजाके लिये (दान) दे देना ठीक नहीं है। इसी बीच कामबाणसे पीड़ित सत्यवक्ता बुद्धिमान् सुरथने उसके पास आकर कहा—मुग्धे ! मदिरेक्षणे ! तुम अपनी दृष्टिसे ही मुझे मोहित कर रही हो ॥ ४२—४६ ॥

त्वद्दृष्टिशरपातेन स्मरेणाभ्येत्य ताडितः। तस्मात् कुचतले तल्पे अभिशायितुमर्हसि ॥ ४७ ॥
नोचेत् प्रधक्ष्यते कामो भूयो भूयोऽतिदर्शनात्। ततः सा चारुसर्वाङ्गी राज्ञो राजीवलोचना ॥ ४८ ॥
वार्यमाणा सखीभिस्तु प्रादादात्मानमात्मना। एवं पुरा तया तन्व्या परित्रातः स भूपतिः ॥ ४९ ॥
तस्मान्मामपि सुश्रोणि त्वं परित्रातुमर्हसि। अरजस्काऽब्रवीद् दण्ड तस्या यद् वृत्तमुत्तरम् ॥ ५० ॥
किं त्वया न परिज्ञातं तस्मात् ते कथयाम्यहम्। तदा तया तु तन्वङ्ग्या सुरथस्य महीपते ॥ ५१ ॥
आत्मा प्रदत्तः स्वातन्त्र्यात् ततस्तामशपत् पिता। यस्माद् धर्मं परित्यज्य स्वीभावान्मन्दचेतसे ॥ ५२ ॥
आत्मा प्रदत्तस्तस्माद्धि न विवाहो भविष्यति। विवाहरहिता नैव सुखं लप्स्यसि भर्तृतः ॥ ५३ ॥

कामदेवने उपस्थित होकर तुम्हारी दृष्टिरूपी बाणसे मुझे घायल कर दिया है। इसलिये तुम मुझे अपने कुचतलरूपी शय्यापर सुलानेकी योग्या हो। ऐसा न करनेपर बार-बार तुम्हारे देखनेसे काम मुझे जला ही डालेगा।

तथाऽन्या गुह्यकसुता नन्दयन्तीति विश्रुता।
अञ्जनस्यैव तत्रापि समेष्यति तपस्विनी। तथाऽपरा वेदवती पर्जन्यदुहिता शुभा ॥ ८० ॥
यदा तिस्रः समेष्यन्ति सप्तगोदावरे जले। हाटकाख्ये महादेवे तदा संयोगमेष्यसि ॥ ८१ ॥
इत्येवमुक्ता मुनिना बाला चित्राङ्गदा तदा। सप्तगोदावरं तीर्थमगमत् त्वरिता ततः ॥ ८२ ॥
सम्प्राप्य तत्र देवेशं पूजयन्ती त्रिलोचनम्। समध्यास्ते शुचिपरा फलमूलाशनाऽभवत् ॥ ८३ ॥
स चर्षिर्ज्ञानसम्पन्नः श्रीकण्ठायतनेऽलिखत्। श्लोकमेकं महाख्यानं तस्याश्च प्रियकाम्यया ॥ ८४ ॥
न सोऽस्ति कश्चित् त्रिदशोऽसुरो वा यक्षोऽथ मर्त्यो रजनीचरो वा।
इदं हि दुःखं मृगशावनेत्र्या निर्मार्जयेद् यः स्वपराक्रमेण ॥ ८५ ॥
इत्येवमुक्त्वा स मुनिर्जगाम द्रष्टुं विभुं पुष्करनाथमीड्यम्।
नदीं पयोष्णीं मुनिवृन्दवन्द्यां संचिन्तयन्नेव विशालनेत्राम् ॥ ८६ ॥

इति श्रीवामनपुराणे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

इसके सिवाय वहींपर अञ्जन नामक गुह्यककी प्रसिद्ध नन्दयन्ती नामकी तपस्विनी पुत्री तथा वेदवती नामक पर्जन्यकी कल्याणमयी पुत्री भी आयेगी। जब वे तीनों हाटकेश्वर महादेवके पास सप्तगोदावरमें आयेंगी उस समय तुम उनसे मिलोगी। मुनिके इस प्रकार कहनेपर बाला चित्राङ्गदा वहाँसे शीघ्र सप्तगोदावर नामके तीर्थमें गयी। वहाँ जानेके बाद वह देवाधिदेव त्रिलोचनकी पूजा तथा फल-मूलका भक्षण करती हुई पवित्रता-पूर्वक रहने लगी और उन ज्ञानसम्पन्न ऋषिने उसकी हित-कामनासे प्रेरित होकर श्रीकण्ठके मन्दिरमें महान् आख्यानसे युक्त एक श्लोक लिखा—'ऐसा कोई देवता, असुर, यक्ष, मनुष्य या राक्षस नहीं है, जो अपने पराक्रमसे इस मृगनयनीका दुःख दूर कर सके। इस प्रकार श्लोक कहने-(लिखने-)के बाद उस विशालाक्षीके विषयमें सोच-विचार करते हुए वे मुनि पूज्य विभु पुष्करनाथका दर्शन करनेके लिये मुनिवृन्दसे वन्द्य पयोष्णी नदीके तटपर चले गये ॥ ८०-८६ ॥

इस प्रकार श्रीवामनपुराणमें तिरसठवाँ अध्याय समाप्त हुआ ॥ ६३ ॥

[अथ चतुःषष्टितमोऽध्यायः]

दण्ड उवाच

चित्राङ्गदायास्तत्रैव तस्या यथासुखम्। स्मरन्त्याः सुरथं वीरं महान् कालः समभ्यगात् ॥ १ ॥
विश्वकर्माऽपि मुनिना शप्तो वानरतां गतः। न्यपतन्मेरुशिखराद् भूपृष्ठं विधिचोदितः ॥ २ ॥
वनं घोरं सुगुल्माढ्यं नदीं शाल्किनीमनु। शाल्वेयं पर्वतश्रेष्ठं समावसति सुन्दरि ॥ ३ ॥
तत्रासतोऽस्य सुचिरं फलमूलान्यथादतः। कालोऽत्यगाद् वरारोहे बहुवर्षगणो वने ॥ ४ ॥

चौंसठवाँ अध्याय प्रारम्भ

(चित्राङ्गदा-सन्दर्भ, विश्वकर्माका बन्दर होना, वेदवती आदिका उपाख्यान, जाबालिका बन्धन-मोचन)

दण्डने कहा—अरजे! वहाँ वीर सुरथका स्मरण करते हुए आनन्दपूर्वक चित्राङ्गदाका लंबा समय व्यतीत हो गया। मुनिद्वारा शापित होनेके कारण विश्वकर्मा भी बन्दर हो गये। होनहारवश वे मेरुकी ऊँची चोटीसे गिरकर पृथ्वीपर आ गये। सुन्दरि! (फिर) वे शाल्किनी नदीके निकट घने झुरमुटोंसे भरे भयङ्कर वनमें पर्वतश्रेष्ठ शाल्वेयपर रहने लगे। वरारोहे! उस वनमें फल-मूल खाकर रहते हुए उनके बहुत वर्ष बीत गये ॥ १-४ ॥

एकदा दैत्यशार्दूलः कन्दराख्यः सुतां प्रियाम्। प्रनिगृह्य समभ्यागाद् ख्यातां देववतीमिति ॥ ५ ॥
तां च तद् वनमायान्तीं समं पित्रा वराननाम्। ददर्श वानरश्रेष्ठः प्रजग्राह बलात् करे ॥ ६ ॥
ततो गृहीतां कपिना स दैत्यः स्वसुतां शुभे। कन्दरो वीक्ष्य संक्रुद्धः खड्गमुद्यम्य चाद्रवत् ॥ ७ ॥
तमापतन्तं दैत्येन्द्रं दृष्ट्वा शाखामृगो बली। तयैव सह चार्वङ्ग्या हिमाचलमुपागतः ॥ ८ ॥

एक समय कन्दर नामका दैत्य वीर 'देववती' नामसे प्रसिद्ध अपनी प्रिय पुत्रीको साथ लेकर वहाँ आया। उसके बाद पिताके साथ वनमें आ रही उस सुन्दरीको उस वानरश्रेष्ठने देखा, (उसने) बलपूर्वक उसका हाथ पकड़ लिया। शुभे! दैत्य कन्दर अपनी कन्याको बन्दरसे पकड़ी गयी देखकर अत्यन्त क्रुद्ध हो गया और तलवार उठाकर दौड़ पड़ा। बलशाली बन्दर (अपने पीछे) उस दैत्येन्द्रको आते देखकर उस सुन्दरी कन्याको साथ लिये हिमालयपर चला गया ॥ ५–८ ॥

ददर्श च महादेवं श्रीकण्ठं यमुनातटे। तस्याविदूरे गहनमाश्रमं ऋषिवर्जितम् ॥ ९ ॥
तस्मिन् महाश्रमे पुण्ये स्थाप्य देववतीं कपिः। न्यमज्जत स कालिन्द्यां पश्यतो दानवस्य हि ॥ १० ॥
सोऽजानत् तां मृतां पुत्रीं समं शाखामृगेण हि। जगाम च महातेजाः पातालं निलयं निजम् ॥ ११ ॥
स चापि वानरो देव्या कालिन्द्या वेगतो हृतः। नीतः शिविति विख्यातं देशं शुभजनावृतम् ॥ १२ ॥

उसने यमुनाके तटपर महादेव श्रीकण्ठका दर्शन किया। (उसने) उससे थोड़ी दूरपर ऋषियोंसे रहित एक दुर्गम आश्रम भी देखा। उस पवित्र महाश्रममें देववतीको रखकर वह बन्दर दैत्य कन्दरके देखते-देखते कालिन्दी-(के जल-) में डूब गया। उस कन्दरने बन्दरके साथ पुत्रीको (डूबकर) मरी हुई समझ लिया। अतः (निराश होकर) वह महातेजस्वी पातालमें स्थित अपने घरमें चला गया और वेगपूर्वक उस बन्दरको भी देवी कालिन्दी भी शुभजनोंसे व्याप्त शिवि नामसे प्रसिद्ध स्थानमें बहाकर ले गयी ॥ ९–१२ ॥

ततस्तीर्त्वाऽथ वेगेन स कपिः पर्वतं प्रति। गन्तुकामो महातेजा यत्र न्यस्ता सुलोचना ॥ १३ ॥
अथापश्यत् समायान्तमञ्जनं गुह्यकोत्तमम्। नन्दयन्त्या समं पुत्र्या गत्वा जिगमिषुः कपिः ॥ १४ ॥
तां दृष्ट्वाऽमन्यत श्रीमान् सेयं देववती ध्रुवम्। तन्मे वृथा श्रमो जातो जलमज्जनसम्भवः ॥ १५ ॥
इति संचिन्तयन्नेव समाद्रवत सुन्दरीम्। सा तद्भयाच्च न्यपतन्नदीं चैव हिरण्वतीम् ॥ १६ ॥

उसके बाद महातेजस्वी उस बन्दरने तेजीसे तैरकर उसे पार करनेके बाद उस पर्वतपर जानेकी इच्छा की, जहाँ वह सुनयना रखी गयी थी। उसके बाद उसने नन्दयन्ती नामकी पुत्रीके साथ आते हुए श्रेष्ठ गुह्यक अञ्जनको देखा। जानेकी इच्छा करनेवाला वह बन्दर (उसके) निकट गया। उसे देखकर श्रीमान् कपिने सोचा कि सचमुच यह वही देववती है। अतः जलमें डूबनेका मेरा परिश्रम व्यर्थ हो गया। इस प्रकार सोचता हुआ वह बन्दर उस सुन्दरीकी ओर दौड़ा। उसके भयसे वह कन्या हिरण्वती नदीमें कूद पड़ी ॥ १३–१६ ॥

गुह्यको वीक्ष्य तनयां पतितामापगाजले। दुःखशोकसमाक्रान्तो जगामाञ्जनपर्वतम् ॥ १७ ॥
तत्रासौ तप आस्थाय मौनव्रतधरः शुचिः। समास्ते वै महातेजाः संवत्सरगणान् बहून् ॥ १८ ॥
नन्दयन्त्यपि वेगेन हिरण्वत्याऽपवाहिता। नीता देशं महापुण्यं कोशलं साधुभिर्युतम् ॥ १९ ॥
गच्छन्ती सा च रुदती ददृशे वटपादपम्। प्ररोहमात्रतननुं उग्राधरशिरेश्वरम् ॥ २० ॥

कन्याको नदीके जलमें कूदती हुई देखकर गुह्यक दुःख और शोकसे विह्वल होता हुआ अञ्जन पर्वतपर चला गया। वह महातेजस्वी वहाँ पवित्रतापूर्वक मौनव्रत धारण करके बहुत वर्षोंतक तप करता रहा। हिरण्वती भी (जलधाराके) वेगसे नन्दयन्तीको भी बहा ले गयी और सज्जनोंसे सेवित महापवित्र कोशल देशमें उसे पहुँचा

नदीके भीषण प्रवाहसे मैं इस निर्जन देशमें आ गयी हूँ। जाबालिने उसकी कही हुई बातको सुनकर कहा—सुन्दरि! तुम यमुनाके किनारे श्रीकण्ठके पास जाओ। वहाँ मेरे पिताजी मध्याह्नमें शिवजीकी पूजा करनेके लिये आते हैं। तुम वहाँ जाकर उनको अपना समाचार सुनाओ। इससे तुम्हारा कल्याण होगा॥ ४५—४८॥

ततस्तु त्वरिता काले नन्दयन्ती तपोनिधिम्। परित्राणार्थमगमद्धिमाद्रेर्यमुनां नदीम्॥ ४९॥
सा त्वदीर्घेण कालेन कन्दमूलफलाशना। सम्प्राप्ता शङ्करस्थानं यत्रागच्छति तापसः॥ ५०॥
ततः सा देवदेवेशं श्रीकण्ठं लोकवन्दितम्। प्रतिवन्द्य ततोऽपश्यदक्षरांस्तान्महामुने॥ ५१॥
तेषामर्थं हि विज्ञाय सा तदा चारुहासिनी। तज्जाबाल्युदितं श्लोकमलिखच्चान्यमात्मनः॥ ५२॥

उसके बाद नन्दयन्ती अपनी रक्षाके लिये शीघ्रतापूर्वक हिमाचलसे चल पड़ी और यमुनाके तीरपर स्थित तपोनिधि-(ऋतध्वज-) के पास पहुँच गयी। कन्द-मूल-फल खाती हुई वह कुछ ही समयमें शङ्करके (भी) उस स्थानपर पहुँची जहाँ तपस्वी आया करते थे। महामुने! उसके बाद उसने विश्ववन्दित देवाधिदेव श्रीकण्ठकी पूजाकर उन (लिखे) अक्षरोंको देखा। उनका अर्थ जानकर मधुर मुस्कान करती हुई उसने जाबालिद्वारा कथित श्लोक तथा अपना एक अन्य श्लोक लिखा—॥ ४९—५२॥

मुद्गलेनास्मि गदिता राजपत्नी भविष्यति। सा चावस्थामिमां प्राप्ता कश्चिन्मां त्रातुमीश्वरः॥ ५३॥
इत्युल्लिख्य शिलापट्टे गता स्नातुं यमस्वसाम्। ददर्श चाश्रमवरं मत्तकोकिलनादितम्॥ ५४॥
ततोऽमन्यत सात्रर्षिर्नूनं तिष्ठति सत्तमः। इत्येवं चिन्तयन्ती सा सम्प्रविष्टा महाश्रमम्॥ ५५॥
ततो ददर्श देवाभां स्थितां देववतीं शुभाम्। संशुष्कास्यां चलन्नेत्रां परिम्लानामिवाब्जिनीम्॥ ५६॥

'महर्षि मुद्गलने कहा था कि मैं राजपत्नी होऊँगी, किंतु मैं इस अवस्थामें आ गयी हूँ। क्या कोई मेरा उद्धार करनेमें समर्थ है?' शिलापट्टपर यह लिखकर वह स्नान करनेके लिये यमुनाके किनारे चली गयी और उस स्थानपर मतवाली कोकिलोंके स्वरों (काकली)से निनादित एक सुन्दर आश्रम देखा। उसने सोचा—इस स्थानपर श्रेष्ठ ऋषि अवश्य रहते होंगे। ऐसा सोचती हुई उस महान् आश्रममें प्रविष्ट हुई। उसके बाद उसने दैवी शोभासे युक्त, मुर्झायी हुई कमलिनीके समान सूखे मुख एवं चञ्चल नेत्रोंवाली देववतीको वहाँ बैठी हुई देखा॥ ५३—५६॥

सा चापतन्तीं ददृशे यक्षजां दैत्यनन्दिनी। केयमित्येव संचिन्त्य समुत्थाय स्थिताभवत्॥ ५७॥
ततोऽन्योन्यं समालिङ्ग्य गाढं गाढं सुहृत्तया। पप्रच्छतुस्तथान्योऽन्यं कथयामासतुस्तदा॥ ५८॥
ते परिज्ञाततत्त्वार्थे अन्योन्यं ललनोत्तमे। समासीने कथाभिस्ते नानारूपाभिरादरात्॥ ५९॥
एतस्मिन्नन्तरे प्राप्तः श्रीकण्ठं स्नातुमादरात्। स तत्त्ववेत्ता मुनिश्रेष्ठो अक्षराण्यवलोकयन्॥ ६०॥

देववतीने यक्षपुत्रीको आती हुई देखा और यह कौन है—ऐसा विचारकर वह उठ खड़ी हुई। उसके बाद सखीभावसे उन दोनोंने आपसमें गाढ़ आलिङ्गन किया—वे एक दूसरेके गले लगीं तथा परस्पर पूछ-ताछ और बातचीत करने लगीं। वे दोनों उत्तम ललनाएँ एक दूसरीकी सच्ची घटनाओंको जानकर बैठ गयीं एवं आदरपूर्वक अनेक प्रकारकी कथाएँ कहने लगीं। इसी बीच वे तत्त्वज्ञाता मुनिश्रेष्ठ श्रीकण्ठके निकट स्नान करनेके लिये आये और उन्होंने पत्थरपर लिखे हुए अक्षरोंको देखा॥ ५७—६०॥

स दृष्ट्वा वाचयित्वा च तमर्थमधिगम्य च। मुहूर्तं ध्यानमास्थाय व्यजानाच्च तपोनिधिः ॥ ६१ ॥
ततः सम्पूज्य देवेशं त्वरया स ऋतध्वजः। अयोध्यामगमत् क्षिप्रं द्रष्टुमिक्ष्वाकुमीश्वरम् ॥ ६२ ॥
तं दृष्ट्वा नृपतिश्रेष्ठं तापसो वाक्यमब्रवीत्। श्रूयतां नरशार्दूल विज्ञप्तिर्मम पार्थिव ॥ ६३ ॥
मम पुत्रो गुणैर्युक्तः सर्वशास्त्रविशारदः। उद्बद्धः कपिना राजन् विषयान्ते तवैव हि ॥ ६४ ॥

उन्हें देख और पढ़कर तथा उनका अर्थ समझकर वे तपोनिधि एक क्षणमें ध्यान लगाकर (सब कुछ ठीक-ठीक) जान गये। उसके बाद महर्षि ऋतध्वज शीघ्रतासे देवेश्वरकी पूजाकर राजा इक्ष्वाकुका दर्शन करनेके लिये तुरंत ही अयोध्या चले गये। श्रेष्ठ नरपतिका दर्शन करके तपस्वी ऋतध्वजने कहा—नरशार्दूल ! राजन् ! मेरी विज्ञप्ति (याचिका) सुनिये। राजन् ! आपके ही राज्यकी सीमामें एक बन्दरने सर्वशास्त्रोंमें निपुण, अच्छे गुणोंसे युक्त मेरे पुत्रको बाँध रखा है ॥ ६१–६४ ॥

तं हि मोचयितुं नान्यः शक्तस्त्वत्तनयादृते। शकुनिर्नाम राजेन्द्र स शस्त्रविधिपारगः ॥ ६५ ॥
तन्मुनेर्वाक्यमाकर्ण्य पिता मम कृशोदरि। आदिदेश प्रियं पुत्रं शकुनिं तापसान्वये ॥ ६६ ॥
ततः स प्रहितः पित्रा भ्राता मम महाभुजः। समागतो बन्धनोद्देशं समं हि परमर्षिणा ॥ ६७ ॥
दृष्ट्वा न्यग्रोधमत्युच्चं प्ररोहास्तृतदिङ्मुखम्। ददर्श वृक्षशिखरे उद्बद्धमृषिपुत्रकम् ॥ ६८ ॥

राजेन्द्र ! अस्त्र-विधिमें पारङ्गत आपके शकुनि नामक पुत्रके सिवाय दूसरा कोई उसे छुड़ा नहीं सकता। कृशोदरि ! मुनिके उस वचनको सुनकर मेरे पिताने अपने पुत्र (मेरे भाई) शकुनिको उन तपस्वीके पुत्रके (बन्धन छुड़ानेके) सम्बन्धमें उचित आदेश दिया। उसके बाद पिताके द्वारा भेजा गया वह शक्तिशाली मेरा भाई उन श्रेष्ठ ऋषिके साथ ही बन्धनके स्थानपर आया। चारों ओर बरोहोंसे ढके हुए अत्यन्त ऊँचे वटवृक्षको देखनेके बाद उसने वृक्षकी ऊँची चोटीपर बँधे हुए ऋषिके पुत्रको (बँधा हुआ) देखा ॥ ६५–६८ ॥

तांश्च सर्वांल्लतापाशान् दृष्टवान् स समन्ततः। दृष्ट्वा स मुनिपुत्रं तं सजटासंयतं वटे ॥ ६९ ॥
धनुरादाय बलवानधिज्यं स चकार ह। लाघवादृषिपुत्रं तं रक्षंश्चिच्छेद मार्गणैः ॥ ७० ॥
कपिना यत् कृतं सर्वं लतापाशं चतुर्दिशम्। पञ्चवर्षशते काले गते शकलितं शरैः ॥ ७१ ॥
लताच्छन्नं ततस्तूर्णमारुरोह मुनिर्वटम्। प्राप्तं सपितरं दृष्ट्वा जाबालिः संयतोऽपि सन् ॥ ७२ ॥
आदरात् पितरं मूर्ध्ना ववन्दे तु विधानतः। सम्परिष्वज्य स मुनिर्मूर्ध्न्याघ्राय सुतं ततः ॥ ७३ ॥

(फिर) उसने (फैले हुए) उन समस्त लताजालोंको चारों ओरसे (अच्छी तरह) देखा एवं बड़के पेड़में एवं अपनी जटाओंसे बँधे मुनिपुत्रको देखकर उस पराक्रमीने धनुष लेकर उसकी प्रत्यञ्चा (डोरी) चढ़ायी एवं वह ऋषि-पुत्रकी रक्षा करते हुए निपुणतासे बाणोंद्वारा लताजालोंको काटने लगा। पाँच सौ वर्ष बीत जानेपर चारों ओर बन्दरके द्वारा बनाया गया लताजाल बाणोंसे जब काट दिया गया तब ऋषि ऋतध्वज लताओंसे ढके उस वटवृक्षपर शीघ्र चढ़ गये। जाबालिने अपने पिताको आया देखकर बँधे रहनेपर भी अत्यन्त आदरके साथ यथाविधि सिरसे (सिर झुकाकर) प्रणाम किया। उस मुनिने (पुत्रका) मस्तक सूँघकर उसको अच्छी तरह गले लगाया ॥ ६९–७३ ॥

उन्मोचयितुमारब्धो न शशाक सुसंयतम्। ततस्तूर्णं धनुर्न्यस्य बाणांश्च शकुनिर्बली ॥ ७४ ॥
आरुरोह वटं तूर्णं जटा मोचयितुं तदा। न च शक्नोति संच्छिन्नं दृढं कपिवरेण हि ॥ ७५ ॥
यदा न शकितास्तेन सम्प्रमोचयितुं जटाः। तदाऽवतीर्णः शकुनिः स[illegible] ७६

जग्राह च धनुर्बाणांश्चकार शरमण्डपम्। लाघवादर्द्धचन्द्रैस्तां शाखां चिच्छेद स त्रिधा ॥ ७७ ॥
शाखया कृत्तया चासौ भारवाही तपोधनः। शरसोपानमार्गेण अवतीर्णोऽथ पादपात् ॥ ७८ ॥
तस्मिंस्तदा स्वे तनये ऋतध्वजत्राते नरेन्द्रस्य सुतेन धन्विना।
जावालिना भारवहेन संयुतः समाजगामाथ नदीं स सूर्यजाम् ॥ ७९ ॥

इति श्रीवामनपुराणे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

फिर वे बन्धन खोलने लगे; परंतु अत्यन्त दृढ़ बन्धनको वे खोल न सके। तब पराक्रमी शकुनि शीघ्र ही धनुष और बाणोंको रखकर जटा खोलनेके लिये बरगदके पेड़पर चढ़ गया। पर (वह भी) कपिद्वारा दृढ़तापूर्वक बनाये गये बन्धनको न खोल सका। जब वह जटाओंको नहीं खोल सका, तब श्रेष्ठ ऋषिके साथ शकुनि नीचे उतर आया। फिर उसने धनुष एवं बाण लिया तथा एक शरमण्डप बनाया। उसके बाद उसने हल्के हाथ अर्द्धचन्द्राकार बाणोंसे उस शाखाको तीन टुकड़ोंमें काट दिया। कटी हुई शाखाके साथ ही भारवाही तपोधन बाणकी सीढ़ियोंके मार्गसे वृक्षके नीचे उतर आये। राजाके धनुर्धारी पुत्रद्वारा अपने पुत्रकी रक्षा हो जानेके बाद ऋतध्वज भारवाही जाबालिके साथ सूर्यपुत्री (यमुना) नदीके तटपर गये ॥ ७४—७९ ॥

इस प्रकार श्रीवामनपुराणमें चौंसठवाँ अध्याय समाप्त हुआ ॥ ६४ ॥

[अथ पञ्चषष्टितमोऽध्यायः]

दण्डक उवाच

एतस्मिन्नन्तरे बाले यक्षासुरसुते शुभे। समागते हरं द्रष्टुं श्रीकण्ठं योगिनां वरम् ॥ १ ॥
ददृशाते परिम्लानसंशुष्ककुसुमं विभुम्। बहुनिर्माल्यसंयुक्तं गते तस्मिन् ऋतध्वजे ॥ २ ॥
ततस्तं वीक्ष्य देवेशं ते उभे अपि कन्यके। स्नापयेतां विधानेन पूजयेतामहर्निशम् ॥ ३ ॥
ताभ्यां स्थिताभ्यां तत्रैव ऋषिरभ्यागमद् वनम्। द्रष्टुं श्रीकण्ठमव्यक्तं गालवो नाम नामतः ॥ ४ ॥

पैंसठवाँ अध्याय प्रारम्भ

(गालव-प्रसङ्ग, चित्राङ्गदा-वेदवती-वृत्तान्त, कन्याओंकी खोज, घृताची-वृत्तान्त, जाबालिकी जटाओंसे मुक्ति, विश्वकर्माकी शाप-मुक्ति, इन्द्रद्युम्नादिका सप्तगोदावरमें आना, शिव-स्तुति, सप्तगोदावरमें सम्मेलन, कन्याओंका विवाह)

दण्डकने कहा—बाले! इसी बीच यक्ष और असुरकी दोनों कन्याएँ योगीश्वर श्रीकण्ठ महादेवका दर्शन करनेके लिये आयीं। उन ऋतध्वजके चले जानेपर उन दोनोंने महादेवके चारों ओर मुर्झाये तथा सूखे हुए फूल और विसर्जनके बाद समर्पित की गयी अन्य बहुत-सी वस्तुएँ पड़ी हुई देखीं। उसके बाद उन देवेशका दर्शन कर वे दोनों कन्याएँ विधिसे दिन-रात श्रीकण्ठ भगवानको स्नान करातीं एवं उनका पूजन करती थीं। उसी स्थानपर उन दोनोंके रहते हुए गालव नामके ऋषि अव्यक्तस्वरूपवाले श्रीकण्ठका दर्शन करनेके लिये इस वनमें आये ॥ १—४ ॥

स दृष्ट्वा कन्यकायुग्मं कस्येदमिति चिन्तयन्। प्रविवेश शुचिः स्नात्वा कालिन्द्या विमले जले ॥ ५ ॥
ततोऽनुपूजयामास श्रीकण्ठं गालवो मुनिः। गायेते सुस्वरं गीतं यक्षासुरसुते ततः ॥ ६ ॥
ततः स्वरं समाकर्ण्य गालवस्ते अजानत। गन्धर्वकन्यके चैते संदेहो नात्र विद्यते ॥ ७ ॥
सम्पूज्य देवमीशानं गालवस्तु विधानतः। कृतजप्यः समभ्यास्ते कन्याभ्यामभिवादितः ॥ ८ ॥

※

उन्होंने उन दोनों कन्याओंको देखकर 'ये किसकी कन्याएँ हैं'—इस प्रकार सोचते विचारते हुए कालिन्दीके निर्मल जलमें प्रवेश किया। गालव ऋषिने स्नान करनेके बाद पवित्र होकर श्रीकण्ठ महादेवकी पूजा की। उसके बाद यक्ष और असुरकी दोनों कन्याओंने मधुर स्वरसे गीत गाया। तब (उनके) स्वरको सुनकर गालवने यह जान लिया कि ये दोनों निस्सन्देह गन्धर्वकी ही कन्याएँ हैं। गालवने विधिसे श्रीकण्ठदेवकी पूजा कर जप किया। उसके बाद दोनों कन्याओंसे अभिनन्दित होकर वे बैठ गये॥ ५–८॥

ततः पप्रच्छ स मुनिः कन्यके कस्य कथ्यताम्। कुलालङ्कारकरणे भक्तियुक्ते भवत्य हि॥ ९॥
तमूचतुर्मुनिश्रेष्ठं याथातथ्यं शुभानने। ज्ञातो विदितवृत्तान्तो गालवस्तपतां वरः॥ १०॥
समुष्य तत्र रजनीं ताभ्यां सम्पूजितो मुनिः। प्रातरुत्थाय गौरीशं सम्पूज्य च विधानतः॥ ११॥
ते उपेत्याब्रवीद्यास्ये पुष्करारण्यमुत्तमम्। आमन्त्रयामि वां कन्ये समनुज्ञातुमर्हथः॥ १२॥

उसके बाद उन मुनिने उन दोनों कन्याओंसे पूछा—कन्याओ! तुम दोनों यह बतलाओ कि शङ्करमें भक्ति करनेवाली कुलकी शोभा रूपा तुम दोनों किसकी कन्याएँ हो? शुभानने! उन दोनों कन्याओंने उन मुनिश्रेष्ठसे सब बातें बतलायीं। तब तपस्वियोंमें श्रेष्ठ गालवने सम्पूर्ण वृत्तान्त (पूर्वोक्त) जान लिया। उन दोनोंसे सत्कृत होकर मुनिने वहाँ रात्रिमें निवास किया और प्रातःकाल उठकर विधिपूर्वक गौरीपति शङ्करका पूजन किया। उसके बाद उन दोनोंके पास जाकर उन्होंने कहा—मैं परम उत्तम पुष्कर वनमें जाऊँगा। मैं तुम दोनोंसे अनुरोधकर विदा लेना चाहता हूँ। तुम दोनों मुझे अनुज्ञा (अनुमति) दो॥ ९—१२॥

ततस्ते ऊचतुर्ब्रह्मन् दुर्लभं दर्शनं तव। किमर्थं पुष्करारण्यं भवान् यास्यत्यथादरात्॥ १३॥
ते उवाच महातेजा महत्कार्यसमन्वितः। कार्तिकी पुण्यदा भाविमासान्ते पुष्करेषु हि॥ १४॥
ते ऊचतुर्वयं यामो भवान् यत्र गमिष्यति। न त्वया स विना ब्रह्मन्निह स्थातुं हि शक्नुवः॥ १५॥
बाढमाह ऋषिश्रेष्ठस्ततो नत्वा महेश्वरम्। गते ते ऋषिणा सार्द्धं पुष्करारण्यमादरात्॥ १६॥

उसके बाद उन दोनोंने कहा—ब्रह्मन्! आपका दर्शन दुर्लभ है। किस कारण आप पुष्करारण्यमें जा रहे हैं। इसके बाद धार्मिक कृत्य करनेवाले महातेजस्वी (मुनि)ने उन दोनोंसे आदरपूर्वक कहा—आगे महीनेके अन्तमें पुष्करमें पुण्यदायिनी कार्तिकी पूर्णिमा होगी। उन दोनोंने कहा—(तो) आप जहाँ जायँगे, वहीं हम भी चलेंगी। ब्रह्मन्! आपके बिना हम दोनों यहाँ नहीं रह सकतीं। ऋषिश्रेष्ठने कहा—ठीक है। उसके बाद आदरपूर्वक महेश्वरको प्रणामकर ऋषिके साथ वे दोनों (कन्याएँ) पुष्करारण्य चली गयीं॥ १३—१६॥

तथाऽन्ये ऋषयस्तत्र समायाताः सहस्रशः। पार्थिवा जानपदाश्च मुक्त्वैकं तमृतध्वजम्॥ १७॥
ततः स्नाताश्च कार्तिक्यामृषयः पुष्करेष्वथ। राजानश्च महाभागा नाभागेक्ष्वाकुसंयुताः॥ १८॥
गालवोऽपि समं ताभ्यां कन्यकाभ्यामवातरत्। स्नातुं वै पुष्करे तीर्थे मध्यमे धनुषाकृतौ॥ १९॥
निमग्नश्चापि ददृशे महामत्स्यं जलेशयम्। वह्वीभिर्मत्स्यकन्याभिः प्रीयमाणं पुनः पुनः॥ २०॥

वहाँ केवल उन ऋतध्वजके सिवाय अन्य हजारों ऋषि, राजा एवं जनपद निवासी भी आये। उसके बाद ऋषियों एवं नाभाग तथा इक्ष्वाकु आदि महाभाग्यवान् राजाओंने कार्तिकी पूर्णिमाके दिन पुष्कर तीर्थमें स्नान किया। गालव भी उन दोनों कन्याओंके साथ धनुषकी आकृतिवाले मध्यम पुष्करतीर्थमें स्नान करनेके लिये उतरे। (जलमें) निमग्न होनेपर उन्होंने देखा कि एक जलचर महामत्स्य जलमें स्थित है और अनेक मत्स्य-कन्याएँ उसे पुनः-पुनः प्रसन्न करनेमें लगी हुई हैं॥ १७—२०॥

स ताश्चाह तिमिर्मुग्धाः यूयं धर्मं न जानथ। जनापवादं घोरं हि न शक्तः सोढुमुल्बणम् ॥ २१ ॥
तास्तमूचुर्महामत्स्यं किं न पश्यसि गालवम्। तापसं कन्यकाभ्यां वै विचरन्तं यथेच्छया ॥ २२ ॥
यद्यसावपि धर्मात्मा न बिभेति तपोधनः। जनापवादात् तत्किं त्वं बिभेषि जलमध्यगः ॥ २३ ॥
ततस्ताश्चाह स तिमिर्नैव वेत्ति तपोधनः। रागान्धो नापि च भयं विजानाति सुबालिशः ॥ २४ ॥

उस मत्स्यने उन (मछलियों)से कहा—भोली प्रकृति होनेके कारण तुम सभी लोक-धर्म नहीं जानती हो। मैं जनताद्वारा किये जानेवाले कठोर अपवाद (निन्दा) सहन नहीं कर सकता। (तब) उन सभी-(मछलियों-)ने कहा—क्या तुम स्वच्छन्दतासे विचरते हुए तपस्वी गालवको दो कन्याओंके साथ नहीं देख रहे हो? यदि धर्मात्मा एवं तपस्वी होते हुए भी वे लोक-निन्दासे नहीं डरते तो जलमें रहनेवाले तुम क्यों डर रहे हो? उसके बाद उस तिमि-(मत्स्य-)ने उनसे कहा—तपस्वी लोक-निन्दाको नहीं जानते एवं प्रेममें अन्धा होनेसे प्रचण्डमूर्ख बनकर लोक-निन्दाके भयको भी नहीं समझते ॥ २१—२४ ॥

तच्छ्रुत्वा मत्स्यवचनं गालवो व्रीडया युतः। नोत्ततार निमग्नोऽपि तस्थौ स विजितेन्द्रियः ॥ २५ ॥
स्नात्वा ते अपि रम्भोरू समुत्तीर्य तटे स्थिते। प्रतीक्षन्त्यौ मुनिवरं तद्दर्शनसमुत्सुके ॥ २६ ॥
वृत्ता च पुष्करे यात्रा गता लोका यथागतम्। ऋषयः पार्थिवाश्चान्ये नाना जानपदास्तदा ॥ २७ ॥
तत्र स्थितैका सुदती विश्वकर्मतनूरुहा। चित्राङ्गदा सुचार्वङ्गी वीक्षन्ती तनुमध्यमे ॥ २८ ॥

मत्स्यके उस वचनको सुनकर गालव लज्जित हो गये। (फिर तो) वे जितेन्द्रिय मुनि जलमें निमग्न होनेपर भी ऊपर नहीं आये, भीतर ही डूबे रहे। वे दोनों कदली-सदृश-रूपवाली सुन्दरियाँ स्नान करनेके बाद जलसे बाहर निकल कर तीरपर खड़ी हो गयीं एवं मुनिश्रेष्ठका दर्शन करनेके लिये उत्कण्ठित होकर उनकी प्रतीक्षा करने लगीं। पुष्करकी यात्रा पूरी होनेपर सभी ऋषि, राजा और नगरवासी लोग जहाँसे आये थे, वहाँ चले गये। वहाँ केवल सुन्दर दाँतोंवाली एवं पतली सुन्दर शरीरवाली विश्वकर्माकी कन्या चित्राङ्गदा उन दोनों कृशोदरियों-(कन्याओं-) को देखती हुई रह गयी ॥ २५—२८ ॥

ते स्थिते चापि वीक्षन्त्यौ प्रतीक्षन्त्यौ च गालवम्। संस्थिते निर्जने तीर्थे गालवोऽन्तर्जले तथा ॥ २९ ॥
ततोऽभ्यागाद् वेदवती नाम्ना गन्धर्वकन्यका। पर्जन्यतनया साध्वी घृताचीगर्भसम्भवा ॥ ३० ॥
सा चाभ्येत्य जले पुण्ये स्नात्वा मध्यमपुष्करे। ददर्श कन्यात्रितयमुभयोस्तटयोः स्थितम् ॥ ३१ ॥
चित्राङ्गदामथाभ्येत्य पर्यपृच्छदनिष्ठुरम्। कासि केन च कार्येण निर्जने स्थितवत्यसि ॥ ३२ ॥

वे दोनों भी (उसे) देखती एवं गालवकी प्रतीक्षा करती हुई निर्जन तीर्थमें पड़ी रहीं और गालव जलके भीतर ही स्थित रहे। उसके बाद वेदवती नामकी गन्धर्व-कन्या वहाँ आयी। वह साध्वी घृताचीके गर्भसे उत्पन्न हुई थी एवं पर्जन्य नामक गन्धर्वकी पुत्री थी। उसने आकर मध्यम पुष्कर तीर्थके पवित्र जलमें स्नान किया और दोनों तटोंपर स्थित (उन) तीनों कन्याओंको देखा। इसके बाद चित्राङ्गदाके समीप जाकर उसने सरलतासे पूछा—तुम कौन हो? और किस कार्यसे इस निर्जन स्थानमें स्थित हो? ॥ २९—३२ ॥

सा तामुवाच पुत्रीं मां विन्दस्व सुरवर्धकेः। चित्राङ्गदेति सुश्रोणि विख्यातां विश्वकर्मणः ॥ ३३ ॥
साऽहमभ्यागता भद्रे स्नातुं पुण्यां सरस्वतीम्। नैमिषे काञ्चनाक्षीं तु विख्यातां धर्ममातरम् ॥ ३४ ॥
तत्रागताथ राज्ञाऽहं दृष्ट्वा वैदर्भकेण हि। सुरथेन स कामार्तो मामेव शरणं गतः ॥ ३५ ॥
मयात्मा तस्य दत्तश्च सखीभिर्वार्यमाणया। ततः शप्ताऽसि तातेन वियुक्तासि च भूभुजा ॥ ३६ ॥

उस (चित्राङ्गदा-) ने उस (वेदवती) से कहा—हे सुश्रोणि ! मुझे देवशिल्पी विश्वकर्माकी चित्राङ्गदा नामसे प्रसिद्ध पुत्री जानो । भद्रे ! . नैमिषमें धर्मकी जननी काञ्चनाक्षी नामसे प्रसिद्ध पवित्र सरस्वती नदीमें स्नान करने आयी थी । वहाँ आनेपर विदर्भवंशमें उत्पन्न राजा सुरथने मुझे देखा और कामपीडित होकर मेरी शरणमें आया । सखियोंके रोकनेपर भी मैंने उन्हें अपनेको समर्पित कर दिया । उसके बाद पिताजीने मुझे शाप दे दिया और मैं राजासे वियोगिनी हो गयी ॥ ३३–३६ ॥

मर्तुं कृतमतिर्भद्रे वारिता गुह्यकेन च । श्रीकण्ठमगमं द्रष्टुं ततो गोदावरं जलम् ॥ ३७ ॥
तस्मादिमं समायाता तीर्थप्रवरमुत्तमम् । न चापि दृष्टः सुरथः स मनोह्लादनः पतिः ॥ ३८ ॥
भवती चात्र का बाले वृत्ते यात्राफलेऽधुना । समागता हि तच्छंस मम सत्येन भामिनि ॥ ३९ ॥
मागधीयच्छ्रूयतां याऽस्मि मन्दभाग्या कृशोदरी । यया यात्राफले वृत्ते समायाताऽस्मि पुष्करम् ॥ ४० ॥

भद्रे ! मैंने मरनेका विचार किया; परंतु गुह्यकने मुझे रोक दिया । उसके बाद मैं श्रीकण्ठभगवान्‌का दर्शन करनेके लिये गयी और वहाँसे गोदावर जलके निकट गयी, (और अब) वहाँसे मैं इस श्रेष्ठ उत्तम तीर्थमें आ गयी हूँ । किंतु मनको आनन्दित करनेवाले उन सुरथ पतिको मैंने नहीं देखा । बाले ! यात्राफलके समाप्त होनेपर (पर्वकी समाप्ति हो जानेपर) आज यहाँ आनेवाली आप कौन हैं ? भामिनि ! मुझे सच-सच बतलाओ । उसने कहा—कृशोदरि ! मैं मन्दभागिनी कौन हूँ तथा यात्राफलके समाप्त होनेपर पुष्करमें क्यों आयी हूँ, उसे सुनो ॥ ३७–४० ॥

पर्जन्यस्य घृताच्यां तु जाता वेदवतीति हि । रममाणा वनोद्देशे दृष्टाऽस्मि कपिना सखि ॥ ४१ ॥
स चाब्रवीत्समभ्येत्य का त्वं यासि देववतीति हि । आनीताऽस्याश्रमात् केन भूपृष्ठान्मेरुपर्वतम् ॥ ४२ ॥
ततो मयोक्तो नैवास्मि कपे देववतीत्यहम् । नाम्ना वेदवतीत्येवं मेरोरपि कृताश्रया ॥ ४३ ॥
ततस्तेनातिदुष्टेन वानरेण ह्यभिद्रुता । समारूढाऽस्मि सहसा बन्धुजीवं नगोत्तमम् ॥ ४४ ॥

मैं पर्जन्य नामक गन्धर्वकी पुत्री हूँ तथा घृताचीके गर्भसे उत्पन्न हुई हूँ । मेरा नाम वेदवती है । सखि ! वनप्रदेशमें भ्रमण कर रही मुझको एक बन्दरने देखा । उसने समीपमें आकर मुझसे कहा—तुम कौन हो ? कहाँ जा रही हो ? (निश्चय ही तुम) देववती हो । पृथ्वीपर रहनेवाले आश्रमसे मेरु पर्वतपर तुम्हें कौन लाया है ? इसपर मैंने कहा—कपे ! मैं देववती नहीं हूँ, मेरा नाम वेदवती है । मेरु पर्वतपर ही मैंने अपना आश्रम बना लिया है । उसके बाद अत्यन्त दुष्ट उस बन्दरसे खदेड़ी जाती हुई मैं बन्धुजीव- (गुलदुपहरिया)के उत्तम वृक्षपर शीघ्रतासे चढ़ गयी ॥ ४१–४४ ॥

तेनापि वृक्षस्तरसा पादाक्रान्तस्त्वभज्यत । ततोऽस्य विपुलां शाखां समालिङ्ग्य स्थिता त्वहम् ॥ ४५ ॥
ततः प्लवङ्गमो वृक्षं प्राक्षिपत् सागराम्भसि । सह तेनैव वृक्षेण पतिताऽस्म्यहमाकुला ॥ ४६ ॥
ततोऽम्बरतलाद् वृक्षं निपतन्तं ददृशुः । ददृशुः सर्वभूतानि स्थावराणि चराणि च ॥ ४७ ॥
ततो हाहाकृतं लोकैर्मां पतन्तीं निरीक्ष्य हि । ऊचुश्च सिद्धगन्धर्वाः कष्टं सेयं महात्मनः ॥ ४८ ॥
इन्द्रद्युम्नस्य महिषी गदिता ब्रह्मणा स्वयम् । मनोः पुत्रस्य वीरस्य सहस्रक्रतुयाजिनः ॥ ४९ ॥

उसने शीघ्र ही पैरके आघातसे उस वृक्षको तोड़ दिया । उसके बाद मैं उस वृक्षकी एक बड़ी डालीको पकड़कर स्थित रही । फिर बन्दरने उस वृक्षको समुद्रके जलमें फेंक दिया । मैं अत्यन्त घबड़ाकर उस वृक्षके साथ ही जलमें गिर पड़ी । उसके बाद चर और अचर सभी प्राणियोंने आकाशसे गिरनेवाले उस वृक्षको देखा ।

उसके बाद उसीके साथ मुझको भी गिरती हुई देखकर सभी लोग हाहाकार करने लगे। सिद्ध और गन्धर्वलोग कहने लगे—हाय! यह कष्टकी बात है। इसके सम्बन्धमें तो ब्रह्माने स्वयं कहा था कि यह कन्या हजारों यज्ञोंके करनेवाले मनुके वीर पुत्र इन्द्रद्युम्नकी राजरानी होगी (पर यह क्या हो गया !) ॥ ४५–४९ ॥

तां वाणीं मधुरां श्रुत्वा मोहमस्म्यागता ततः। न च जाने स केनापि वृक्षश्छिन्नः सहस्रधा ॥ ५० ॥
ततोऽस्मि वेगाद् बलिना हुतानलसखेन हि। समानीतास्म्यहमिमं त्वं दृष्टा चाद्य सुन्दरि ॥ ५१ ॥
तदुत्तिष्ठस्व गच्छावः पृच्छावः क इमे स्थिते। कन्यके अनुपश्ये हि पुष्करस्योत्तरे तटे ॥ ५२ ॥
एवमुक्त्वा वराङ्गी सा तया सुतनुकन्यया। जगाम कन्यके द्रष्टुं प्रष्टुं कार्यसमुत्सुका ॥ ५३ ॥

उस मधुर वाणीको सुननेके बाद मुझे मूर्च्छा आ गयी। मैं यह नहीं जानती कि उस वृक्षको किसने सहस्रों टुकड़ोंमें काट डाला। उसके बाद अग्निके सखा बलवान् वायुने मुझे शीघ्रतासे यहाँ ला दिया है। सुन्दरि! तुमको आज मैंने यहाँ देखा है। इसलिये उठो, हम दोनों चलें; और फिर पूछें तथा देखें कि पुष्कर तीर्थके उत्तरी तटपर दिखायी देनेवाली ये दोनों कन्याएँ कौन हैं? ऐसा कहकर इस कार्यके करनेमें उत्कण्ठित वह सुन्दरी उस सुन्दर तथा दुर्बल देहवाली कन्याके साथ उस पार की दोनों कन्याओंको देखने तथा वस्तुस्थिति पूछनेके लिये वहाँ गयी ॥ ५०–५३ ॥

ततो गत्वा पर्यपृच्छत् ते ऊचतुरुभे अपि। याथातथ्यं तयोस्ताभ्यां स्वमात्मानं निवेदितम् ॥ ५४ ॥
ततस्ताश्चतुरोऽपीह सप्तगोदावरं जलम्। सम्प्राप्य तीर्थे तिष्ठन्ति अर्चन्त्यो हाटकेश्वरम् ॥ ५५ ॥
ततो वहन् पर्वगणान् बभ्रमुस्ते जनास्त्रयः। तासामर्थाय शकुनिर्जाबालिः स ऋतध्वजः ॥ ५६ ॥
भारवाही ततः खिन्नो दशाब्दशतिके गते। काले जगाम निर्वेदात् समं पित्रा तु शाकलम् ॥ ५७ ॥

उसके बाद वहाँ जाकर उसने उन दोनोंसे पूछा। उन दोनोंने अपनी सच्ची घटना उन दोनोंसे बतायी। उसके बाद चारों कन्याएँ सप्तगोदावर जलके समीप जाकर हाटकेश्वर भगवान्‌की पूजा करती हुई तीर्थमें रहने लगीं। इधर शकुनि, जाबालि और ऋतध्वज—ये तीनों व्यक्ति उन कन्याओंके लिये अनेक वर्षोंतक भ्रमण करते रहे। तब एक हजार वर्ष बीत जानेपर भार-वहन करनेवाले (जाबालि) खिन्न होकर पिताके साथ शाकल जनपदमें चले गये ॥ ५४–५७ ॥

तस्मिन्नरपतिः श्रीमानिन्द्रद्युम्नो मनोः सुतः। समभ्यास्ते स विज्ञाय सार्घपात्रो विनिर्ययौ ॥ ५८ ॥
सम्यक् सम्पूजितस्तेन सजाबालिर्ऋतध्वजः। स चेक्ष्वाकुसुतो धीमान् शकुनिर्भ्रातृजोऽर्चितः ॥ ५९ ॥
ततो वाक्यं मुनिः प्राह इन्द्रद्युम्नमृतध्वजः। राजन् नष्टाऽबलाऽस्माकं नन्दयन्तीति विश्रुता ॥ ६० ॥
तस्यार्थे चैव वसुधा अस्माभिरटिता नृप। तस्मादुत्तिष्ठ मार्गस्व साहाय्यं कर्तुमर्हसि ॥ ६१ ॥

वहाँ मनुके पुत्र श्रीमान् राजा इन्द्रद्युम्न निवास कर रहे थे। वे इस समाचारको जानकर अर्घपात्र हाथमें लिये बाहर निकले। उन्होंने विधिपूर्वक सुन्दर रीतिसे जाबालि और ऋतध्वजकी पूजा की तथा उस इक्ष्वाकुनन्दन बुद्धिमान् भतीजे शकुनिकी भी अर्चना की। उसके बाद ऋतध्वज मुनिने इन्द्रद्युम्नसे कहा— राजन्! हमलोगोंकी नन्दयन्ती नामसे प्रसिद्ध (अयानी) कन्या खो गयी है। राजन्! उसके लिये हमलोगोंने सारी पृथ्वीपर भ्रमण किया है। इसलिये (कृपया) उठिये, पता लगाइये और हमारी सहायता कीजिये ॥ ५८–६१ ॥

अथोवाच नृपो ब्रह्मन् ममापि ललनोत्तमा । नष्टा कृतश्रमस्यापि कस्याहं कथयामि ताम् ॥ ६२ ॥
आकाशात् पर्वताकारः पतमानो नगोत्तमः । सिद्धानां वाक्यमाकर्ण्य बाणैश्छिन्नः सहस्रधा ॥ ६३ ॥
न चैव सा वरारोहा विभिन्ना लाघवान्मया । न च जानामि सा कुत्र तस्माद् गच्छामि मार्गितुम् ॥ ६४ ॥
इत्येवमुक्त्वा स नृपः समुत्थाय त्वरान्वितः । स्यन्दनानि द्विजाभ्यां स भ्रातृपुत्राय चार्पयत् ॥ ६५ ॥

इसके बाद राजाने कहा—ब्रह्मन् ! मेरी भी एक उत्तम लाडिली कन्या खो गयी है । उसे ढूँढनेमें मैं परिश्रम कर चुका हूँ । उसके विषयमें मैं किससे कहूँ । सिद्धोंका वचन सुनकर आकाशसे नीचे गिरनेवाले पर्वतके समान श्रेष्ठ वृक्षको मैंने बाणोंसे हजारों टुकड़ोंमें काट डाला । मेरी हस्तकौशलसे उस सुन्दरी कन्याको चोट नहीं लगी । मैं नहीं जानता हूँ कि वह कहाँ है ? अतः उसे ढूँढनेके लिये मैं (भी) चल रहा हूँ । ऐसा कहनेके बाद वे राजा शीघ्रतासे उठे । उन्होंने उन दोनों ब्राह्मणों तथा अपने भतीजेके लिये रथ दे दिये ॥ ६२–६५ ॥

तेऽधिरुह्य रथांस्तूर्णं मार्गन्ते वसुधां क्रमात् । बदर्याश्रममासाद्य ददृशुस्तपसां निधिम् ॥ ६६ ॥
तपसा कर्शितं दीनं मलपङ्कजटाधरम् । निःश्वासायासपरमं प्रथमे वयसि स्थितम् ॥ ६७ ॥
समुपेत्याब्रवीद् राजा इन्द्रद्युम्नो महाभुजः । तपस्विन् यौवने घोरमास्थितोऽसि सुदुश्चरम् ॥ ६८ ॥
तपः किमर्थं तच्छंस किमभिप्रेतमुच्यताम् । सोऽब्रवीत् को भवान् ब्रूहि ममात्मानं सुहृत्तया ॥ ६९ ॥
परिपृच्छसि शोकार्तं परिखिन्नं तपोन्वितम् । स प्राह राजाऽस्मि विभो तपस्विन् शाकले पुरे ॥ ७० ॥
मनोः पुत्रः प्रियो भ्राता इक्ष्वाकोः कथितं तव । स चास्मै पूर्वचरितं सर्वं कथितवान् नृपः ॥ ७१ ॥

वे रथोंपर चढ़कर शीघ्रतासे क्रमशः पृथ्वीपर खोज करने लगे । (इस क्रममें) उन लोगोंने बदरिकाश्रममें जाकर तपस्या करनेसे दुबले और धूल मिट्टीसे भरे, जटा धारण किये हुए, जोर-जोरसे साँस ले रहे एक तपोमूर्ति युवकको देखा । महाबाहु राजा इन्द्रद्युम्नने उसके पास जाकर कहा—तपस्विन् ! यह बतलाओ कि युवा-अवस्थामें ही तुम अत्यन्त दुष्कर कठोर तप क्यों कर रहे हो ? यह भी बतलाओ कि तुम्हारी अभिलाषा क्या है ? उसने कहा—आप मुझसे यह बतायें कि चिन्तासे ग्रस्त अत्यन्त दुखी एवं तपश्चर्यासे युक्त मुझसे प्रेमपूर्वक पूछनेवाले आप कौन हैं ? उसने कहा—तपस्विन् ! विभो ! मैं मनुका पुत्र एवं इक्ष्वाकुका प्रिय भाई शाकलपुरका राजा हूँ । मैंने अपना परिचय करा दिया । उस राजाने भी उनसे पहलेकी सारी कथा कह सुनायी ॥ ६६–७१ ॥

श्रुत्वा प्रोवाच राजर्षिर्मा मुञ्चस्व कलेवरम् । आगच्छ यामि तन्वङ्गीं विचेतुं भ्रातृजोऽसि मे ॥ ७२ ॥
इत्युक्त्वा सम्परिष्वज्य नृपं धमनिसंततम् । समारोप्य रथं तूर्णं तापसाभ्यां न्यवेदयत् ॥ ७३ ॥
ऋतध्वजः सपुत्रस्तु तं दृष्ट्वा पृथिवीपतिम् । प्रोवाच राजन्नेह्येहि करिष्यामि तव प्रियम् ॥ ७४ ॥
यासौ चित्राङ्गदा नाम त्वया दृष्टा हि नैमिषे । सप्तगोदावरं तीर्थं सा मयैव विसर्जिता ॥ ७५ ॥

(ऊपर कही बातोंको) सुनकर राजर्षिने कहा—तुम अपने शरीरका त्याग मत करो । तुम मेरे भतीजे हो । आओ, मैं उस सुन्दरीकी खोज करने जा रहा हूँ । इतना कहकर उन्होंने उभरी शिराओंसे भरे हुए राजाको गले लगाया और उन्हें रथपर चढ़ाकर शीघ्र उन दोनों तपस्वियोंके पास पहुँचा दिया । पुत्रके सहित ऋतध्वजने उन राजाको देखकर कहा—राजन् ! आइये ! आइये ! मैं आपका प्रिय-कार्य करूँगा । आपने नैमिषारण्यमें जिस चित्राङ्गदाको देखा था, उसे मैंने ही सप्तगोदावर नामके तीर्थमें छोड़ दिया था ॥ ७२–७५ ॥

तदागच्छथ गच्छामः सौदेवस्यैव कारणात् । तत्रास्माकं समेष्यन्ति कन्यास्तिस्रस्तथापराः ॥ ७६ ॥
इत्येवमुक्त्वा स ऋषिः समाश्वास्य सुदेवजम् । शकुनिं पुरतः कृत्वा सेन्द्रद्युम्नः सपुत्रकः ॥ ७७ ॥
स्यन्दनेनाश्वयुक्तेन गन्तुं समुपचक्रमे । सप्तगोदावरं तीर्थं यत्र ताः कन्यका गताः ॥ ७८ ॥
एतस्मिन्नन्तरे तन्वी घृताची शोकसंयुता । विचचारोदयगिरिं विचिन्वन्ती सुतां निजाम् ॥ ७९ ॥

तो आइये, हमलोग सुदेवके पुत्रके कार्यसे ही वहाँ चलें । वहाँपर हमलोगोंको अन्य तीन कन्याएँ भी मिलेंगी । इस प्रकार कहकर उन्होंने ऋषि सुदेवके पुत्रको सान्त्वना दे करके एवं शकुनिको आगे कर इन्द्रद्युम्न और पुत्रके साथ घोड़े जुते रथसे सप्तगोदावर तीर्थमें जानेकी योजना बनायी—जहाँ वे कन्याएँ गयी थीं । इस बीच दुर्बलाङ्गी घृताची शोकसे चिन्तित होकर अपनी कन्याको ढूँढ़ती हुई उदयगिरिपर विचरण करने लगी ॥ ७६–७९ ॥

तमाससाद च कपिं पर्यपृच्छत् तथाप्सराः । किं बाला न त्वया दृष्टा कपे सत्यं वदस्व माम् ॥ ८० ॥
तस्यास्तद् वचनं श्रुत्वा स कपिः प्राह बालिकाम् । दृष्टा देववती नाम्ना मया न्यस्ता महाश्रमे ॥ ८१ ॥
कालिन्द्या विमले तीर्थे मृगपक्षिसमन्विते । श्रीकण्ठायतनस्याग्रे मया सत्यं तवोदितम् ॥ ८२ ॥
सा प्राह वानरपते नाम्ना वेदवतीति सा । न हि देववती ख्याता तदागच्छ व्रजावहे ॥ ८३ ॥

वहाँ घृताची अप्सराको वह बन्दर मिल गया । घृताची अप्सराने उससे पूछा—कपे ! मुझसे सच कहो कि क्या तुमने लड़कीको नहीं देखा है ? उसके वचनको सुनकर उस कपिने कहा—मैंने देववती नामकी बालिकाको देखा है और उसे मृगों तथा पक्षियोंसे भरे कालिन्दीके विमल तीर्थमें श्रीकण्ठके मन्दिरके सामने स्थित महाश्रममें रख दिया है । मैंने तुमसे यह सत्य बात कही है । उस-(घृताची-)ने कहा—कपिराज ! वह वेदवती नामसे विख्यात है, वह देववती नहीं है । तो आओ; हम दोनों वहाँ चलें ॥ ८०–८३ ॥

घृताच्यास्तद्वचः श्रुत्वा वानरस्त्वरितक्रमः । पृष्ठतोऽस्याः समागच्छन्नदीमन्वेव कौशिकीम् ॥ ८४ ॥
ते चापि कौशिकीं प्राप्ता राजर्षिप्रवरास्त्रयः । द्वितयं तापसाभ्यां च रथैः परमवेगिभिः ॥ ८५ ॥
अवतीर्य रथेभ्यस्ते स्नातुमभ्यागमन् नदीम् । घृताच्यपि नदीं स्नातुं सुपुण्यामाजगाम ह ॥ ८६ ॥
तामन्वेव कपिः प्रायाद् दृष्टो जाबालिना तथा । दृष्ट्वैव पितरं प्राह पार्थिवं च महाबलम् ॥ ८७ ॥

घृताचीकी उस बातको सुनकर बन्दर शीघ्रतासे पग बढ़ाता हुआ उसके पीछे-पीछे कौशिकी नदीकी ओर चला । वे तीनों श्रेष्ठ राजर्षि भी दोनों तपस्वियों- (जाबालि और ऋतध्वज-)के साथ बहुत तेज चलनेवाले रथोंपर चढ़कर कौशिकी नदीके समीप पहुँचे । वे लोग रथसे उतरकर स्नान करनेके लिये नदीके निकट आये । घृताची भी उस परम पवित्र नदीमें स्नान करने आयी । बन्दर भी उनके पीछे ही आ गया । जाबालिने उसे देखा । देखते ही उन्होंने पिता एवं महाबलशाली राजासे कहा— ॥ ८४–८७ ॥

स एव पुनरायाति वानरस्तात वेगवान् । पूर्वं जटास्वेव बलाद्येन बद्धोऽस्मि पादपे ॥ ८८ ॥
तज्जाबालिवचः श्रुत्वा शकुनिः क्रोधसंयुतः । सशरं धनुरादाय इदं वचनमब्रवीत् ॥ ८९ ॥
ब्रह्मन् प्रदीयतां मह्यमाज्ञां तात वदस्व माम् । यावदेनं निहन्म्यद्य शरेणैकेन वानरम् ॥ ९० ॥
इत्येवमुक्ते वचने सर्वभूतहिते रतः । महर्षिः शकुनिं प्राह हेतुयुक्तं वचो महत् ॥ ९१ ॥

तात ! यह वही बन्दर फिर तेजीसे (यहाँ) आ रहा है, जिसने पहले मुझे जबर्दस्ती जटाजालसे वृक्षके पेड़में बाँध दिया था । जाबालिके उस वचनको सुनकर अत्यन्त कुपित हुए शकुनिने बाणसहित धनुषको लेकर यह वचन कहा—ब्रह्मन् ! मुझे आज्ञा दीजिये; तात ! मुझसे कहिये; क्या मैं एक बाणसे ही इस

बन्दरको मार डालूँ ? ऐसा कहनेपर समस्त प्राणियोंकी भलाईमें लगे रहनेवाले महर्षिने शकुनिसे अत्यन्त युक्तियुक्त वचन कहा— ॥ ८८–९१ ॥

न कश्चित्तात केनापि बध्यते हन्यतेऽपि वा। वधबन्धौ पूर्वकर्मवश्यौ नृपतिनन्दन ॥ ९२ ॥
इत्येवमुक्त्वा शकुनिमृषिर्वानरमब्रवीत्। एह्येहि वानरास्माकं साहाय्यं कर्तुमर्हसि ॥ ९३ ॥
इत्येवमुक्तो मुनिना वाले स कपिकुञ्जरः।
कृताञ्जलिपुटो भूत्वा प्रणिपत्येदमब्रवीत्। ममाज्ञा दीयतां ब्रह्मन् शाधि किं करवाण्यहम् ॥ ९४ ॥
इत्युक्ते प्राह स मुनिस्तं वानरपतिं वचः। मम पुत्रस्त्वयोद्बद्धो जटासु वटपादपे ॥ ९५ ॥

तात ! (वस्तुतः) न तो किसीको कोई बाँधता है और न मारता ही है। नृपनन्दन ! वध और बन्धन पूर्वजन्ममें किये गये कर्मोंके फलाधीन होते हैं। शकुनिसे इस प्रकार कहकर मुनिने बन्दरसे कहा—बन्दर ! आओ, आओ ! तुम्हें हमलोगोंकी सहायता करनी चाहिये। बाले ! मुनिके ऐसा कहनेपर उस श्रेष्ठ कपिने करबद्ध प्रणाम करते हुए यह कहा—ब्रह्मन् ! मुझे आज्ञा दीजिये; मुझे निर्देश दीजिये कि मैं क्या करूँ ? उसके ऐसा कहनेपर मुनिने उस कपिपतिसे यह वचन कहा—तुमने मेरे पुत्रको बड़के पेड़में जटाओंसे बाँध रखा था ॥ ९२–९५ ॥

न चोन्मोचयितुं वृक्षाच्छक्नुयामोऽपि यत्नतः। तद्वनेन नरेन्द्रेण त्रिधा कृत्वा तु शाखिनः ॥ ९६ ॥
शाखां वहति मत्सूनुः शिरसा तां विमोचय। दशवर्षशतान्यस्य शाखां वै वहतोऽगमन् ॥ ९७ ॥
न च सोऽस्ति पुमान् कश्चिद् यो ह्युन्मोचयितुं क्षमः। स ऋषेर्वाक्यमाकर्ण्य कपिर्जाबालिनो जटाः ॥ ९८ ॥
शनैरुन्मोचयामास क्षणादुन्मोचिताश्च ताः। ततः प्रीतो मुनिश्रेष्ठो वरदोऽभूदृतध्वजः ॥ ९९ ॥

विशेष यत्न करनेपर भी हमलोग उस पेड़से इसको उन्मुक्त (अलग) नहीं कर सके। इसलिये इस राजाने उस वृक्षके तीन टुकड़े कर दिये। मेरा पुत्र आजतक सिरपर उसकी डालीको ढो रहा है। अब तुम उसे उन्मुक्त कर दो। इस डालीको ढोते हुए उसको एक हजार वर्ष बीत गये हैं। ऐसा कोई पुरुष नहीं है जो इसे छुड़ानेमें समर्थ हो। उस बन्दरने ऋषिकी बात सुनकर जाबालिकी जटाओंको धीरे-धीरे खोल दिया। वे जटाएँ क्षणभरमें ही खुल गयीं। उसके बाद प्रसन्न होकर मुनिश्रेष्ठ ऋतध्वज वर देनेके लिये तैयार हो गये ॥ ९६–९९ ॥

कपिं प्राह वृणीष्व त्वं वरं यन्मनसेप्सितम्। ऋतध्वजवचः श्रुत्वा इमं वरमयाचत ॥ १०० ॥
विश्वकर्मा महातेजा कपित्वे प्रतिसंस्थितः। ब्रह्मन् भवान् वरं मह्यं यदि दातुमिहेच्छति ॥ १०१ ॥
तत्त्वद्दत्तो महाघोरो मम शापो निवर्त्यताम्। चित्राङ्गदायाः पितरं मां त्वथरं तपोधन ॥ १०२ ॥
अभिजानीहि भवतः शापाद्वानरतां गतम्। सुबहूनि च पापानि मया यानि कृतानि हि ॥ १०३ ॥
कपिचापल्यदोषेण तानि मे यान्तु संक्षयम्। ततो ऋतध्वजः प्राह शापस्यान्तो भविष्यति ॥ १०४ ॥
यदा घृताच्यां तनयं जनिष्यसि महाबलम्। इत्येवमुक्तः संहृष्टः स तदा कपिकुञ्जरः ॥ १०५ ॥

(फिर) उन्होंने बन्दरसे कहा—तुम अपना मनोऽभिलषित वर माँगो। ऋतध्वजकी बात सुनकर कपि-योनिमें स्थित महातेजस्वी विश्वकर्माने यह वर माँगा—ब्रह्मन् ! यदि आप मुझे वर देनेके लिये इच्छा कर रहे हैं तो मुझे दिये गये अपने महाघोर शापका निवारण कर दें। तपोधन ! चित्राङ्गदाके पिता मुझ त्वष्टाको आप पहचान लें। आपके शापसे (ही) मैं बन्दर हो गया हूँ। कपिकी (स्वाभाविक) चञ्चलताकी दोषसे

मैंने जिन बहुत-से पापोंको किया है, वे सभी नष्ट हो जायँ। उसके बाद ऋतध्वजने कहा—जब तुम घृताचीसे महाबलवान् पुत्र उत्पन्न करोगे तब शापका अन्त होगा। तब ऐसा कहनेपर वह कपिश्रेष्ठ अत्यन्त हर्षित हो गया ॥ १००—१०५ ॥

स्नातुं तूर्णं महानद्यामवतीर्णः कृशोदरि। ततस्तु सर्वे क्रमशः स्नात्वाऽर्च्य पितृदेवताः ॥ १०६ ॥
जग्मुर्हृष्टा रथेभ्यस्ते घृताची दिवमुत्पतत्। तामन्वेव महावेगः स कपिः प्लवतां वरः ॥ १०७ ॥
ददृशे रूपसम्पन्नां घृताचीं स प्लवङ्गमः। सापि तं बलिनां श्रेष्ठं दृष्ट्वैव कपिकुञ्जरम् ॥ १०८ ॥
ज्ञात्वाऽथ विश्वकर्माणं कामयामास कामिनी। ततोऽनुपर्वतश्रेष्ठे ख्याते कोलाहले कपिः ॥ १०९ ॥
रमयामास तां तन्वीं सा च तं वानरोत्तमम्। एवं रमन्तौ सुचिरं सम्प्राप्तौ विन्ध्यपर्वतम् ॥ ११० ॥

कृशोदरि! वह शीघ्र ही महानदीमें स्नान करनेके लिये उतरा। उसके बाद वे सब क्रमशः स्नानकर पितरों और देवोंके तर्पण-अर्चन कर रथसे चले गये एवं घृताची स्वर्गमें उड़ गयी। महावेगशाली श्रेष्ठ कपिने भी उसका अनुसरण किया। उस बन्दरने रूपसे सम्पन्न घृताचीको देखा। उस कामिनी-(घृताची-)ने भी बलवानोंमें श्रेष्ठ उत्तम कपिको देखकर एवं उसे विश्वकर्मा जानकर उसकी कामना की। उसके बाद कोलाहल नामसे विख्यात श्रेष्ठ पर्वतपर उस बन्दरने घृताचीके साथ एवं घृताचीने उस श्रेष्ठ बन्दरके साथ आनन्द-क्रीड़ा की। इस प्रकार बहुत दिनोंतक क्रीड़ा करते हुए वे दोनों विन्ध्यपर्वतपर पहुँचे ॥ १०६—११० ॥

रथैः पञ्चापि तत्तीर्थं सम्प्राप्तास्ते नरोत्तमाः। मध्याह्नसमये प्रीताः सप्तगोदावरं जलम् ॥ १११ ॥
प्राप्य विश्राममन्विच्छन्नवतेरुस्त्वरान्विताः। तेषां सारथयश्चाश्वान् स्नात्वा पीतोदकाप्लुतान् ॥ ११२ ॥
रमणीये वनोद्देशे प्रचारार्थं समुत्सृजन्। शाड्वलाढ्येषु देशेषु मुहूर्त्तादेव वाजिनः ॥ ११३ ॥
तृप्ताः समाद्रवन् सर्वे देवायतनमुत्तमम्। तुरङ्गखुरनिर्घोषं श्रुत्वा ता योषितां वराः ॥ ११४ ॥
किमेतदिति चोक्त्वैव प्रजग्मुर्हाटकेश्वरम्। आरुह्य वलभीं तास्तु समुदैक्षन्त सर्वशः ॥ ११५ ॥

वे पाँचों श्रेष्ठ व्यक्ति भी उल्लसित होकर रथद्वारा दोपहरके समय सप्तगोदावर जलवाले उस तीर्थमें पहुँचे। वहाँ जाकर वे विश्राम करनेके लिये शीघ्रतासे नीचे उतरे। उनके सारथियोंने भी स्नान किया एवं घोड़ोंको जल पिलाकर तथा नहला-धुलाकर (उन्हें) सुन्दर वन-प्रदेशमें विचरण करनेके लिये छोड़ दिया। मुहूर्तभरमें ही हरियालीसे हरे भरे स्थानमें वे घोड़े तृप्त हो गये। उसके बाद वे सभी (घोड़े) उत्तम देव-मन्दिरके पास दौड़ने लगे। घोड़ोंके टापका शब्द सुनकर श्रेष्ठ स्त्रियाँ 'यह क्या है' ऐसा कहकर हाटकेश्वर (के मन्दिरमें) गयीं एवं ऊपर चढ़कर सभी ओर देखने लगीं ॥ १११—११५ ॥

अपश्यंस्तीर्थसलिले स्नायमानान् नरोत्तमान्।
ततश्चित्राङ्गदा दृष्ट्वा जटामण्डलधारिणम्। सुरथं हसती प्राह संरोहत्पुलका सखीम् ॥ ११६ ॥
योऽसौ युवा नीलघनप्रकाशः संदृश्यते दीर्घभुजः सुरूपः।
स एव नूनं नरदेवसूनुर्वृतो मया पूर्वतरं पतिर्यः ॥ ११७ ॥
यश्चैष जाम्बूनदतुल्यवर्णः श्वेतं जटाभारमधारयिष्यत्।
स एष नूनं तपतां वरिष्ठो ऋतध्वजो नात्र विचारमस्ति ॥ ११८ ॥
ततोऽब्रवीद्देवी दृष्ट्वा नन्दयन्ती सखीजनम्। एषोऽपरोऽस्यैव सुतो जाबालिनात्र संशयः ॥ ११९ ॥
इत्येवमुक्त्वा वचनं वलभ्या अवतीर्य च। समास्तताग्रतः शम्भोर्गायन्त्यो गीतिकां शुभाम् ॥ १२० ॥

उन कन्याओंने तीर्थके जलमें स्नान करतेहुए उन श्रेष्ठ पुरुषोंको देखा । फिर चित्राङ्गदाने जटा मण्डल धारण करनेवाले नृपति सुरथको देखा । रोमाञ्चित होकर उसने हँसती हुई सखीसे कहा—'मेघके समान वर्ण तथा लम्बी भुजाओंवाला यह जो सुन्दर युवा पुरुष दिखलायी पड़ रहा है, निश्चय ही पहले (जन्ममें) मैंने उसी राजपुत्रको पतिरूपसे वरण किया था । इसमें कुछ विचारनेकी आवश्यकता नहीं है । स्वर्णके समान वर्णवाले जो व्यक्ति श्वेत जटाभारको धारण किये हुए हैं वे निश्चय ही तापसियोंमें श्रेष्ठ ऋतध्वज ही हैं (इसमें शङ्का नहीं है) । उसके बाद चन्द्रवतीने सखियोंसे हर्षित होकर कहा—यह दूसरा व्यक्ति निस्सन्देह इन्हीं ऋतध्वजके पुत्र जान पड़ते हैं । इस प्रकार कहकर वे सभी उनसे उतरीं एवं शङ्करके सामने बैठकर कल्याण करनेवाले शिवका गान करने (स्तुति करने) लगीं—॥ ११६–१२० ॥

नमोऽस्तु शर्व शम्भो त्रिनेत्र चारुगात्र त्रैलोक्यनाथ उमापते दक्षयज्ञविध्वंसकर कामाङ्गनाशन घोर पापप्रणाशन महापुरुष महोग्रमूर्ते सर्वसत्त्वक्षयंकर शुभङ्कर महेश्वर त्रिशूलधारिन् स्मरारे गुहावासिन् दिग्वासः महाशङ्खशेखर जटाधर कपालमालाविभूषितशरीर वामचक्षुः वामदेव प्रजाध्यक्ष भगाक्ष्णोः क्षयङ्कर भीमसेन महासेननाथ पशुपते कामाङ्गदहन चत्वरवासिन् शिव महादेव ईशान शङ्कर भीम भव वृषभध्वज जटिल प्रौढ महानाट्येश्वर भूरिरत्न अविमुक्तक रुद्र रुद्रेश्वर स्थाणो एकलिङ्ग कालिन्दीप्रिय श्रीकण्ठ नीलकण्ठ अपराजित रिपुभयङ्कर सन्तोषपते वामदेव अघोर तत्पुरुष महाघोर अघोरमूर्ते शान्त सरस्वतीकान्त कीनाट सहस्रमूर्ते महोद्भव विभो कालाग्निरुद्र रुद्र हर महीधरप्रिय सर्वतीर्थाधिवास हंस कामेश्वर केदाराधिपते परिपूर्ण मुचुकुन्द मधुनिवासिन् कृपाणपाणे भयङ्कर विद्याराज सोमराज कामराज रञ्जक अञ्जनराजकन्याहृदयकमलवसते समुद्रशायिन् गजमुख घण्टेश्वर गोकर्ण ब्रह्मयोने सहस्रवक्त्राक्षिचरण हाटकेश्वर नमोऽस्तु ते ॥

एतस्मिन्नन्तरे प्राप्ताः सर्वे स्वर्गाधिवासिनः । द्रष्टुं त्रैलोक्यकर्तारं भास्वरं हाटकेश्वरम् ॥१२१॥

हे शर्व ! हे शम्भो ! हे तीन नेत्रवाले ! हे सुन्दर गात्रवाले ! हे तीनों लोकोंके स्वामिन् ! हे उमापते ! हे दक्ष यज्ञको विध्वस्त करनेवाले ! हे कामदेवको नाश करनेवाले ! हे घोर ! हे पापके नष्ट करनेवाले ! हे महापुरुष ! हे भयङ्कर मूर्तिवाले ! हे सम्पूर्ण प्राणियोंके क्षय करनेवाले ! हे शुभ करनेवाले ! हे महेश्वर ! हे त्रिशूलधारिन् ! हे कामशत्रो ! हे गुफामें रहनेवाले ! हे दिगम्बर ! हे महाशङ्खके शिरोभूषणवाले ! हे जटाधर ! हे कपालमालासे विभूषित शरीरवाले ! हे वामचक्षु ! हे वामदेव ! हे प्रजाध्यक्ष ! हे भगाक्षिक्षयकारिन् ! हे भीमसेन ! हे महासेनानाथ ! हे पशुपते ! हे कामदेवके दहनवाले ! हे चत्वरवासिन् (चबूतरेपर वास करनेवाले) ! हे शिव ! हे महादेव ! हे ईशान ! हे शङ्कर ! हे भीम ! हे भव ! हे वृषभध्वज ! हे जटिल ! हे प्रौढ ! हे महानाट्यके ईश्वर ! हे भूरिरत्न (रत्नराशि) ! हे अविमुक्तक ! हे रुद्र ! हे रुद्रेश्वर ! हे स्थाणो ! हे एकलिङ्ग ! हे कालिन्दीप्रिय ! हे श्रीकण्ठ ! हे नीलकण्ठ ! हे अपराजित ! हे रिपुभयङ्कर ! हे सन्तोषपते ! हे वामदेव ! हे अघोर ! हे तत्पुरुष ! हे महाघोर ! हे अघोरमूर्ते ! हे शान्त ! हे सरस्वतीकान्त ! हे कीनाट ! हे सहस्रमूर्ते ! हे महोद्भव ! हे विभो ! हे कालाग्निरुद्र ! हे रुद्र ! हे हर ! हे महीधरप्रिय ! हे सर्वतीर्थनिवास ! हे हंस ! हे कामेश्वर ! हे केदाराधिपते ! हे परिपूर्ण ! हे मुचुकुन्द ! हे मधुनिवासिन् ! हे कृपाणपाणे ! हे भयङ्कर ! हे विद्याराज ! हे सोमराज ! हे कामराज ! हे रञ्जक ! हे अञ्जनराजकन्या (वन्नी)के हृदयमें सदा रहनेवाले ! हे समुद्रशायिन् ! हे गजमुख ! हे घण्टेश्वर ! हे गोकर्ण ! हे ब्रह्मयोने ! हे हजार मुख, आँख एवं चरणवाले ! हे हाटकेश्वर ! आपको नमस्कार है ।

इसी बीच समस्त ऋषि एवं राजालोग तीनों लोकोंके कर्ता भगवान् त्र्यम्बक हाटकेश्वरका दर्शन करने वहाँ पहुँच गये—॥ १२१ ॥

समारूढाश्च सुस्नाता ददृशुर्योषितश्च ताः। स्थितास्तु पुरतस्तस्य गायन्त्यो गेयमुत्तमम् ॥१२२॥
ततः सुदेवतनयो विश्वकर्मसुतां प्रियाम्। दृष्ट्वा हृषितचित्तस्तु संरोहत्पुलको बभौ ॥१२३॥
ऋतध्वजोऽपि तन्वङ्गीं दृष्ट्वा चित्राङ्गदां स्थिताम्। प्रत्यभिज्ञाय योगात्मा बभौ मुदितमानसः ॥१२४॥
ततस्तु सहसाऽभ्येत्य देवेशं हाटकेश्वरम्। सम्पूजयन्तस्त्र्यक्षं ते स्तुवन्तः संस्थिताः क्रमात् ॥१२५॥

और भलीभाँति स्नान करनेके बाद ऊपर चढ़कर उन लोगोंने देवताके अभिमुख बैठकर गीत गाती हुई (स्तुति करती हुई) स्त्रियोंको देखा। उसके बाद वसुदेवके पुत्र अपनी प्रिया विश्वकर्माकी पुत्रीको देखकर हर्षसे गद्गद हो गये। योगी ऋतध्वज भी तन्वङ्गी चित्राङ्गदाको वहाँ स्थित देख एवं पहचानकर महान् हर्षमें भर गये। उसके बाद सभी व्यक्ति शीघ्र ही देवाधिदेव हाटकेश्वर भगवान्‌के निकट गये एवं त्रिलोचनकी पूजा कर क्रमशः खड़े होकर स्तुति करने लगे ॥ १२२-१२५ ॥

चित्राङ्गदापि तान् दृष्ट्वा ऋतध्वजपुरोगमान्। समं ताभिः कृशाङ्गीभिरभ्युत्थायाभ्यवादयत् ॥ १२६ ॥
स च ताः प्रतिनन्द्यैव समं पुत्रेण तापसः। समं नृपतिभिर्हृष्टः संविवेश यथासुखम् ॥ १२७ ॥
ततः कपिवरः प्राप्तो घृताच्या सह सुन्दरि। स्नात्वा गोदावरीतीर्थे दिदृक्षुर्हाटकेश्वरम् ॥ १२८ ॥
ततोऽपश्यत् सुतां तन्वीं घृताची शुभदर्शनाम्। साऽपि तां मातरं दृष्ट्वा हृष्टाऽभूद्वरवर्णिनी ॥ १२९ ॥

चित्राङ्गदाने भी उन ऋतध्वज आदिको देखकर उन तन्वङ्गी-(कन्याओं-) के साथ उठकर प्रणाम किया। पुत्रसहित उन तपस्वीने उन्हें आशीर्वाद दिया और वे प्रसन्नतासे राजाओंके साथ सुखपूर्वक बैठ गये। सुन्दरि! उसके बाद गोदावरीतीर्थमें स्नानकर हाटकेश्वर भगवान्‌का दर्शन करनेकी इच्छावाला वह श्रेष्ठ वन्दर भी घृताचीके साथ वहाँ पहुँचा। फिर घृताचीने अपनी शोभाशालिनी कृशाङ्गी पुत्रीको देखा। वह सुन्दरी भी अपनी उस माताको देखकर हर्षित हो गयी ॥ १२६-१२९ ॥

ततो घृताची स्वां पुत्रीं परिष्वज्य न्यपीडयत्। स्नेहात् सबाष्पनयनां मुहुस्तां परिजिघ्रती ॥ १३० ॥
ततो ऋतध्वजः श्रीमान् कपिं वचनमब्रवीत्। गच्छानेतुं गुह्यकं त्वमञ्जनाद्रौ महाञ्जनम् ॥ १३१ ॥
पातालादपि दैत्येशं वीरं कन्दरमालिनम्। स्वर्गाद् गन्धर्वराजानं पर्जन्यं शीघ्रमानय ॥ १३२ ॥
इत्येवमुक्ते मुनिना प्राह देववती कपिम्। गालवं वानरश्रेष्ठ इहानेतुं त्वमर्हसि ॥ १३३ ॥

उसके बाद घृताचीने अपनी पुत्रीको भलीभाँति गले लगाया। स्नेहसे आँखोंमें आँसू भरकर वह (अपनी) पुत्रीको बार-बार सूँघने लगी—आशीर्वादात्मक शुभ भावना करने लगी। उसके बाद श्रीमान् ऋतध्वजने कपिसे कहा—तुम महाञ्जन नामके गुह्यकको ले आनेके लिये अञ्जन नामक पर्वतपर चले जाओ। फिर पातालसे वीर दैत्येश्वर कन्दरमालीको और स्वर्गसे गन्धर्वराज पर्जन्यको यहाँ शीघ्र बुला लाओ। मुनिके इस प्रकार कहनेपर देववतीने वन्दरसे कहा—कपिश्रेष्ठ! गालवको भी आप यहाँ बुला लावें ॥ १३०-१३३ ॥

इत्येवमुक्ते वचने कपिर्मारुतविक्रमः। गत्वाऽञ्जनं समामन्त्र्य जगामामरपर्वतम् ॥ १३४ ॥
पर्जन्यं तत्र चामन्त्र्य प्रेषयित्वा महाश्रमे। सप्तगोदावरे तीर्थे पातालमगमत् कपिः ॥ १३५ ॥
तत्रामन्त्र्य महावीर्यं कपिः कन्दरमालिनम्। पातालादभिनिष्क्रम्य महीं पर्यचरज्जवी ॥ १३६ ॥
गालवं तपसो योनिं दृष्ट्वा माहिष्मतीमनु। समुत्पत्यानयच्छीघ्रं सप्तगोदावरं जलम् ॥ १३७ ॥
तत्र स्नात्वा विधानेन सम्प्राप्तो हाटकेश्वरम्। ददर्श नन्दयन्ती च स्थितां देववतीमपि ॥ १३८ ॥

ऐसा कहनेपर वायुके समान पराक्रमवाला कपि अञ्जन पर्वतपर पहुँच गया और (गुरुजनको) आमन्त्रित करके सुमेरु पर्वतपर प्रविष्ट हो गया। वहाँ उसने पर्जन्यको आमन्त्रित किया और सप्तगोदावर तीर्थमें स्थित महाभवनमें जा बैठनेके बाद वह फिर पातालोकमें प्रविष्ट हो गया। वहाँ (जाकर उसने) महापराक्रमी कन्दरमालीको आमन्त्रित किया। वेगशाली बन्दर फिर पातालसे निकलकर पृथ्वीपर घूमने-फिरने लगा। तदनन्तर कन्याओंको इन्द्रलोकके निकट देखकर उसने छलाँग मारी और उन्हें शीघ्र सप्तगोदावरके जलके निकट ला दिया। वहाँ उसने स्नान करनेके बाद वह हाटकेश्वरके समीप पहुँचा और उसने वहाँ बैठी हुई नन्दयन्ती तथा देववतीको देखा ॥ १३४–१३८ ॥

तं दृष्ट्वा गालवं चैव समुत्थायाभ्यवादयत् ।
स चार्चयित्वा महादेवं महर्षीनभ्यवादयत् । ते चापि नृपतिश्रेष्ठास्तं सम्पूज्य तपोधनम् ॥१३९॥
हर्षमतुलं गत्वा उपविष्टा यथासुखम् । तेषूपविष्टेषु तदा वानरेणाभिमन्त्रिताः ॥१४०॥
समायाता महात्मानो यक्षगन्धर्वदानवाः । तानागतान् समीक्ष्यैव पुत्र्यस्ताः पृथुलोचनाः ॥१४१॥
स्नेहार्द्रनयनाः सर्वास्तदा सस्वजिरे पितॄन् । नन्दयन्त्यादिका दृष्ट्वा सपितृका वरानना ॥१४२॥
बाष्पव्याकुलनयना जाता विश्वकर्मसुता तदा । अथ तामाह स मुनिः सत्यं सत्यध्वजो वचः ॥१४३॥

उन सभीने गालवको देखकर उठकर उनको प्रणाम किया। उन्होंने भी महादेवकी पूजा कर महर्षियोंको प्रणाम किया। उन श्रेष्ठ राजाओंने भी उन तपस्वीकी पूजा की तथा वे अत्यन्त हर्षित होकर सुखपूर्वक बैठ गये। उनके बैठ जानेपर कपिद्वारा आमन्त्रित किये गये यक्ष, महानुभाव गन्धर्व एवं दानव वहाँ आ गये। उन्हें आया हुआ देखते ही उन विशालनयना पुत्रियोंके नेत्रोंमें स्नेहसे आँसू भर आये। वे सभी अपने-अपने पिताके गले लग गयीं। नन्दयन्ती आदिको पिताके साथ उपस्थित हुई देखकर विश्वकर्माकी सुन्दरी पुत्रीके नेत्रोंमें (पिताकी स्मृतिमें) आँसू छलक आये। उसके बाद ऋतध्वज मुनिने उससे सच्ची बात कह दी—॥ १३९–१४३ ॥

मा विषादं कृथाः पुत्रि पिताऽयं तव वानरः । सा तद्वचनमाकर्ण्य व्रीडोपहतचेतना ॥१४४॥
कथं तु विश्वकर्माऽसौ वानरत्वं गतोऽधुना । दुष्पुत्र्यां मयि जातायां तस्मात् त्यक्ष्ये कलेवरम् ॥१४५॥
इति संचिन्त्य मनसा ऋतध्वजमुवाच ह । परित्रायस्व मां ब्रह्मन् पापोपहतचेतनाम् ॥१४६॥
पितृघ्नी मर्तुमिच्छामि तदनुज्ञातुमर्हसि । अथोवाच मुनिस्तन्वीं मा विषादं कृथाधुना ॥१४७॥

पुत्रि ! तुम उदास मत होओ। यह बन्दर ही तुम्हारा पिता है। उस वचनको सुनकर वह लजा गयी; क्योंकि मुझ कुपुत्रीके जन्म लेनेके कारण ये विश्वकर्मा इस समय बन्दर हो गये हैं; अतः (उसने सोचा-) मैं अपने शरीरका त्याग करूँगी। मनमें इस प्रकार विचारकर उसने ऋतध्वजसे कहा—ब्रह्मन् ! मैं पापसे नष्टचित्तवाली हूँ। आप मेरी रक्षा करें। पिताका घात करनेवाली मैं मरना चाहती हूँ। अतः आप आज्ञा दें। तब मुनिने उस तन्वङ्गीसे कहा—'तुम विषाद मत करो ॥ १४४–१४७ ॥

भाव्यस्य नैव नाशोऽस्ति तस्मा त्याक्षीः कलेवरम् । भविष्यति पिता तुभ्यं भूयोऽप्यमरवर्धकिः ॥१४८॥
जातेऽपत्ये घृताच्यां तु नात्र कार्या विचारणा । इत्येवमुक्ते वचने मुनिना भावितात्मना ॥१४९॥
घृताची तां समभ्येत्य प्राह चित्राङ्गदां तदा । पुत्रि त्यजस्व शोकं त्वं मामेवेदभिरागमः ॥१५०॥
भविष्यति पितुस्तुभ्यं मत्सकाशान्न संशयः । इत्येवमुक्ता संहृष्टा ययौ चित्राङ्गदा तदा ॥१५१॥

भवितव्यताका विनाश नहीं होता—होनी होकर रहती है। इसलिये शरीरका परित्याग मत करो। घृताचीकी कोखसे पुत्रके उत्पन्न हो जानेपर तुम्हारे पिता फिर भी देवताओंके शिल्पी हो जायँगे—इसमें सन्देह

नहीं है। मनके ऊपर नियन्त्रण रखनेवाले मुनिके इस प्रकार कहनेपर घृताचीने चित्राङ्गदाके पास जाकर उससे कहा—पुत्रि ! तुम चिन्ता करना छोड़ दो। तुम्हारे पिताद्वारा मुझसे दस महीनोंमें निःसंदेह एक पुत्र उत्पन्न होगा। (फिर सुतरां शाप-विमोचन हो जायगा।) ऐसा कहनेपर चित्राङ्गदा हर्षित हो गयी ॥ १४८–१५१ ॥

प्रतीक्षन्ती सुचार्वङ्गी विवाहे पितृदर्शनम्। सर्वास्ता अपि तावन्तं कालं सुतनुकन्यकाः ॥१५२॥
प्रत्यैक्षन्त विवाहं हि तस्या एव प्रियेप्सया। ततो दशसु मासेषु समतीतेष्वथाप्सराः ॥१५३॥
तस्मिन् गोदावरीतीर्थे प्रसूता तनयं नलम्। जातेऽपत्ये कपित्वाच्च विश्वकर्माप्यमुच्यत ॥१५४॥

सुन्दरी (चित्राङ्गदा) अपने विवाहमें मिलनेवाले पिताके दर्शनकी (उत्सुकतासे) प्रतीक्षा करने लगी। वे सुन्दरी सभी कन्याएँ भी प्रियकी प्राप्तिकी वाञ्छासे उसके विवाहके समयकी प्रतीक्षा करने लगीं। दस महीने बीत जानेपर अप्सराने उस गोदावरी तीर्थमें पुत्रको उत्पन्न किया, जो (आगे चलकर) नल (नामक) हुआ। पुत्रके उत्पन्न हो जानेपर विश्वकर्मा भी वानरत्वसे छूट गये ॥ १५२–१५४ ॥

समभ्येत्य प्रियां पुत्रीं पर्यष्वजत चादरात्। ततः प्रीतेन मनसा सस्मार सुरवर्द्धकिः ॥१५५॥
सुरगणामधिपं शक्रं सहैव सुरकिन्नरैः। त्वष्ट्राऽथ संस्मृतः शक्रो मरुद्गणवृतस्तदा ॥१५६॥
सुरैः सरुद्रैः सम्प्राप्तस्तत्तीर्थं हाटकाह्वयम्। समायातेषु देवेषु गन्धर्वेष्वप्सरस्सु च ॥१५७॥
इन्द्रद्युम्नो मुनिश्रेष्ठमृतध्वजमुवाच ह। जाबालेर्दीयतां ब्रह्मन् सुता कन्दरमालिनः ॥१५८॥
गृह्णातु विधिवत् पाणिं दैतेय्यास्तनयस्तव। नन्दयन्तीं च शकुनिः परिणेतुं स्वरूपवान् ॥१५९॥

अपनी प्रिय पुत्रीके पास जाकर उन्होंने उसको स्नेहपूर्वक गले लगाया। उसके बाद प्रसन्न मनसे देवशिल्पीने देवताओं एवं किन्नरोंसहित देवराज इन्द्रका स्मरण किया। देवशिल्पीके स्मरण करनेपर इन्द्र मरुद्गणों, देवों एवं रुद्रोंके साथ हाटक नामके तीर्थमें आ गये। देवताओं, गन्धर्वों और अप्सराओंके आनेपर इन्द्रद्युम्नने मुनिश्रेष्ठ ऋतध्वजसे कहा—ब्रह्मन् ! जाबालिको कन्दरमालीकी कन्याका दान कर दें। आपका पुत्र विधिवत् दैत्यनन्दिनीका पाणिग्रहण कर ले। स्वरूपवान् शकुनि नन्दयन्तीसे विवाह करें ॥ १५५–१५९ ॥

ममयं वेदवत्यस्तु त्वाष्ट्रेयी सुरथस्य च। बाढमित्यब्रवीद्धृष्टो मुनिर्मनुसुतं नृपम् ॥१६०॥
ततोऽनुचक्रुः संहृष्टा विवाहविधिमुत्तमम्। ऋत्विजोऽभूद् गालवस्तु हुत्वा हव्यं विधानतः ॥१६१॥
गायन्ते तत्र गन्धर्वा नृत्यन्तेऽप्सरसस्तथा। आदौ जाबालिनः पाणिर्गृहीतो दैत्यकन्यया ॥१६२॥
इन्द्रद्युम्नेन तदनु वेदवत्या विधानतः। ततः शकुनिना पाणिर्गृहीतो यक्षकन्यया ॥१६३॥
चित्राङ्गदायाः कल्याणि सुरथः पाणिमग्रहीत्। एवं क्रमाद् विवाहस्तु निर्वृत्तस्तनुमध्यमे ॥१६४॥

यह वेदवती मेरी (इन्द्रद्युम्न की) और त्वष्टा-(विश्वकर्मा-) की पुत्री (चित्राङ्गदा) सुरथकी पत्नी हो। मुनिने मनुपुत्र राजासे कहा—ठीक है। उसके बाद उन लोगोंने प्रसन्नतापूर्वक भलीभाँति विवाह की विधिको पूरा किया। विधिसे हव्यका हवन करनेवाले गालव ऋत्विक् बने। उस समय वहाँ गन्धर्वोंने गाना गाया और अप्सराओंने नृत्य किया। सबसे पहले दैत्यकन्याने जाबालिका पाणिग्रहण किया। कल्याणि ! उसके बाद विधिपूर्वक इन्द्रद्युम्नने वेदवतीका, शकुनिने यक्ष-कन्याका तथा सुरथने चित्राङ्गदाका पाणिग्रहण किया। कृशोदरि ! इस प्रकार विवाहकार्य क्रमशः सम्पन्न हुआ ॥ १६०–१६४ ॥

वृत्ते मुनिर्विवाहे तु शक्रादीन् प्राह दैवतान्। अस्मिंस्तीर्थे भवद्भिस्तु समगोदावरे सदा ॥१६५॥
स्थेयं विशेषतो मासमिमं माधवमुत्तमम्। बाढमुक्त्वा सुराः सर्वे जग्मुर्हृष्टा दिवं क्रमात् ॥१६६॥

मुनयो मुनिमादाय सपुत्रं जग्मुरादरात्। भार्यामादाय राजानः स्वं स्वं नगरमागताः ॥ १६७ ॥
प्रहृष्टाः सुखिनस्तस्थुः भुञ्जन्तो विषयान् प्रियान्।
चित्राङ्गदाया कल्याणि एवं वृत्तं पुरा किल। तन्मां कमलपत्राक्षि भजस्व ललनोत्तमे ॥ १६८ ॥
इत्येवमुक्त्वा नरदेवसूनुस्तां भूमिदेवस्य सुतां वरोरुम्।
स्तुत्वा मृगाक्षीं मृदुना क्रमेण सा चापि वाक्यं नृपतिं बभाषे ॥ १६९ ॥

इति श्रीवामनपुराणे पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

विवाह-कार्य सम्पन्न हो जानेपर मुनि-(ऋतध्वज-) ने इन्द्र आदि देवताओंसे कहा—इस सप्तगोदावर तीर्थमें आपलोग सदा निवास करें। विशेषरूपसे इस उत्तम वैशाख महीनेमें आपलोग यहाँ अवश्य रहें। देवता लोग 'ऐसा ही हो'—(ऐसा) कहकर प्रसन्नतापूर्वक स्वर्ग चले गये। मुनिलोग पुत्रसहित मुनि-(ऋतध्वज-) को सादर साथ लेकर चले गये। राजा लोग भी अपनी-अपनी पत्नीके साथ अपने-अपने नगरमें आ गये। सभी लोग प्रिय विषयोंका उपभोग करते हुए आनन्दपूर्वक रहने लगे। कल्याणि! चित्राङ्गदाका पूर्व वृत्तान्त इस प्रकारका है। इसलिये सरोजनयने! ललनोत्तमे! तुम मुझे अङ्गीकार करो। ऐसा कहकर राजपुत्र (दण्ड) ब्राह्मणकी उस सुन्दरी मृगनयनी पुत्रीकी कोमल वाणीसे स्तुति करने लगे। उसने भी राजासे (आगेवाला वचन) कहा—॥ १६५–१६९ ॥

इस प्रकार श्रीवामनपुराणमें पैंसठवाँ अध्याय समाप्त हुआ ॥ ६५ ॥



[अथ षट्षष्टितमोऽध्यायः]

अरजा उवाच

नात्मानं तव दास्यामि बहुनोक्तेन किं तव। रक्षन्ती भवतः शापादात्मानं च महीपते ॥ १ ॥

छाछठवाँ अध्याय प्रारम्भ

(दण्डक-अरजाके प्रसङ्गमें शुक्रद्वारा दण्डकको शाप, प्रह्लादका अन्धकको उपदेश और अन्धक-शिव-सन्दर्भ)

अरजाने कहा—पृथिवीपते! आपके अधिक कहनेसे क्या लाभ? (थोड़ेमें समझ लीजिये कि पिताके) शापसे आपकी और अपनी रक्षा करती हुई ही मैं अपनेको आपके लिये समर्पित नहीं करूँगी ॥ १ ॥

प्रह्लाद उवाच

इत्थं विवदमानां तां भार्गवेन्द्रसुतां बलात्। कामोपहतचित्तात्मा व्यध्वंसयत मन्दधीः ॥ २ ॥
तां कृत्वा च्युतचारित्रां मदान्धः पृथिवीपतिः। निष्क्रम्याश्रमात् तस्माद् गतश्च नगरं निजम् ॥ ३ ॥
साऽपि शुक्रसुता तन्वी अरजा रजसाप्लुता। आश्रमादथ निर्गत्य बहिस्तस्थावधोमुखी ॥ ४ ॥
चिन्तयन्ती स्वपितरं रुदती च मुहुर्मुहुः। महाग्रहोपतप्तेव राहुणा रोहिणी प्रिया ॥ ५ ॥

प्रह्लादने कहा—कामसे अंधे हुए उस मूर्खने इस प्रकार विवाद (विरोध) करती हुई श्रेष्ठ भार्गव शुक्रकी पुत्री उस कन्याको हठात् आक्रान्त (भ्रष्टशील) कर दिया। मदसे अंधा बना हुआ वह चरित्रसे च्युत ही करके उस आश्रमसे बाहर निकलकर अपने नगर चला गया। उसके बाद रजसे लथपथ वह कृशाङ्गी शुक्रपुत्री अरजा भी आश्रमसे बाहर निकलकर नीचे मुख लटकाये बैठ गयी। राहुसे पीड़ित चन्द्र-प्रिया रोहिणीके समान वह अपने पिताका चिन्तन करती हुई बारम्बार (बिलख बिलखकर) रोने लगी ॥ २–५ ॥

ततो बहुतिथे काले समाप्ते यज्ञकर्मणि । पातालादागमच्छुक्रः स्वमाश्रमपदं मुनिः ॥ ६ ॥
आश्रमान्ते च ददृशे सुतां दैत्य रजस्वलाम् । मेघलेखामिवाकाशे संध्यारागेण रञ्जिताम् ॥ ७ ॥
तां दृष्ट्वा परिपप्रच्छ पुत्रि केनासि धर्षिता । कः क्रीडति सरोषेण सममाशीविषेण हि ॥ ८ ॥
कोऽद्यैव याम्यां नगरीं गमिष्यति सुदुर्मतिः । कस्त्वां शुद्धसमाचारां विध्वंसयति पापकृत् ॥ ९ ॥
ततः स्वपितरं दृष्ट्वा कम्पमाना पुनः पुनः । रुदन्ती व्रीडयोपेता मन्दं मन्दमुवाच ह ॥ १० ॥

उसके बाद जब बहुत दिनोंका समय बीत गया और यज्ञ समाप्त हो गया तब शुक्रमुनि पातालसे अपने आश्रममें आये । दैत्य ! उन्होंने आश्रमके बाहर आकाशमें सन्ध्याके समय लालिमासे रञ्जित मेघमालाकी तरह धूलसे लिपटी हुई अपनी पुत्रीको देखा । उसे देखकर उन्होंने पूछा—पुत्रि ! किसने तुम्हारा धर्षण (अपमान) किया है ? क्रोधभरे साँपसे कौन खेल कर रहा है ? पवित्र आचरणवाली तुम्हें शीलसे च्युत कर कौन दुर्बुद्धि पापी आज ही यमपुरी जानेवाला है ? उसके बाद अपने पिताको देखकर बारम्बार काँपती, रोती एवं लजाती हुई अरजाने धीरे-धीरे कहा—॥ ६–१० ॥

तव शिष्येण दण्डेन वार्यमाणेन चासकृत् । बलादनाथा रुदती नीताऽहं वचनीयताम् ॥ ११ ॥
एतत् पुत्र्या वचः श्रुत्वा क्रोधसंरक्तलोचनः । उपस्पृश्य शुचिर्भूत्वा इदं वचनमब्रवीत् ॥ १२ ॥
यस्मात् तेनाविनीतेन मत्तो ह्यभयमुत्तमम् । गौरवं च निरस्कृत्य च्युतधर्माऽरजा कृता ॥ १३ ॥
तस्मात् सराष्ट्रः सबलः सभृत्यो वाहनैः सह । सप्तरात्रान्तराद् भस्म ग्राववृष्ट्या भविष्यति ॥ १४ ॥

बार-बार बरजनेपर भी आपके शिष्य दण्डने रोती हुई मुझ अनाथाको बलपूर्वक निन्दनीया बना दिया है—हमारा शीलभ्रंश कर दिया है । कन्याकी इस बातको सुनकर शुक्राचार्यकी आँखें क्रोधसे अत्यन्त लाल हो गयीं । उन्होंने आचमन करके शुद्ध होकर यह (शाप-) वचन कहा—चूँकि उस उद्दण्डने मुझसे प्राप्त उत्तम अभय एवं गौरवको तिरस्कृतकर अरजाको धर्मसे च्युत किया है, अतः वह सात रात्रियों-(दिनों-) में उपलवृष्टिके कारण राष्ट्र, सेना, भृत्य एवं वाहनोंसहित विनष्ट हो जायगा—हो जाय ॥ ११–१४ ॥

इत्येवमुक्त्वा मुनिपुङ्गवोऽसौ शप्त्वा स दण्डं स्वसुतामुवाच ।
त्वं पापमोक्षार्थमिहैव पुत्रि तिष्ठस्व कल्याणि तपश्चरन्ती ॥ १५ ॥
शप्त्वैवं भगवान् शुक्रो दण्डमिक्ष्वाकुनन्दनम् । जगाम शिष्यसहितः पातालं दानवालयम् ॥ १६ ॥
दण्डोऽपि भस्मसाद् भूतः सराष्ट्रबलवाहनः । महता ग्राववर्षेण सप्तरात्रान्तरे तदा ॥ १७ ॥
एवं दण्डकारण्यं परित्यजन्ति देवताः । आलयं राक्षसानां तु कृतं देवेन शम्भुना ॥ १८ ॥

उन मुनिश्रेष्ठने ऐसा कहकर दण्डको शाप देनेके बाद अपनी पुत्रीसे कहा—पुत्रि ! कल्याणि ! पापसे छुटकारा पानेके लिये तुम तपस्या करती हुई यहीं रहो । भगवान् शुक्र इक्ष्वाकुनन्दन दण्डको इस प्रकार शाप देकर शिष्यके साथ दानवोंके निवास-स्थान पाताललोकमें चले गये । उसके बाद दण्ड भी बहुत बड़ी उपलवृष्टिके कारण सात रात्रियोंके भीतर ही अपने राष्ट्र, सेना और वाहनोंके साथ नष्ट हो गया । यही कारण है कि देवताओंने दण्डकारण्यको छोड़ दिया और शम्भुने उसे राक्षसोंका स्थान बना दिया ॥ १५–१८ ॥

एवं परकलत्राणि नयन्ति सुकृतीनपि । भस्मभूतान् प्राकृतांस्तु महान्तं च पराभवम् ॥ १९ ॥
तस्मादन्धक दुर्बुद्धिर्न कार्या भवता त्वियम् । प्राकृताऽपि दहत्यग्निः किमुताद्रिनन्दिनी ॥ २० ॥
शङ्करोऽपि न दैत्येश शक्यो जेतुं सुरासुरैः । द्रष्टुमप्यमितौजस्कः किमु योधयितुं रणे ॥ २१ ॥

इस प्रकार (जैसा कि ऊपर वर्णित है, परनारियाँ अपनेको (अपवित्र करनेवाले) पुण्यात्माओंको भी जलाकर राख (नष्ट) कर देती हैं, फिर साधारण मनुष्य तो बहुत बड़ा तिरस्कार प्राप्त करते हैं। अतः अन्धक! आपको ऐसी दुर्बुद्धि नहीं करनी चाहिये। साधारण स्त्री भी जला सकती है तो पार्वतीका क्या कहना। दैत्येश्वर! सुर या असुर कोई भी महादेवको नहीं जीत सकता। जब रणमें अपरिमित ओजसे सम्पन्न शंकरको देखा भी नहीं जा सकता तब उनसे युद्ध करना कैसे सम्भव है ॥१०–२१॥

पुलस्त्य उवाच

इत्येवमुक्ते वचने क्रुद्धस्ताम्रेक्षणः श्वसन्। वाक्यमाह महातेजाः प्रह्लादं चान्धकासुरः ॥ २२ ॥
किं ममासौ रणे योद्धुं शक्तस्त्रिणयनोऽसुर। एकाकी धर्मरहितो भस्मारुणितविग्रहः ॥ २३ ॥
नान्धको बिभियादिन्द्रात्तथामरेभ्यः कथंचन। स कथं वृषपत्राक्षाद् बिभेति स्त्रीमुखेक्षकात् ॥ २४ ॥
तच्छ्रुत्वाऽस्य वचो घोरं प्रह्लादः प्राह नारद। न सम्यगुक्तं भवता विरुद्धं धर्मतोऽर्थतः ॥ २५ ॥

पुलस्त्यजी बोले—ऐसा वचन कहनेपर क्रुद्ध एवं लाल-लाल आँखें किये हुए महातेजस्वी अन्धकासुरने लंबी साँस लेते हुए प्रह्लादसे कहा—असुर! क्या शरीरपर राख लपेटे, (भिक्षु, अतः) धर्मसे रहित अकेला वह त्रिनयन लड़ाईके मैदानमें मुझसे युद्ध कर सकता है? जो अन्धक इन्द्र या (अन्य) देवताओंसे कभी नहीं डरता वह बैलकी सवारी करनेवाले तथा स्त्रीका मुख निहारनेवाले त्रिनेत्र-(शंकर-) से कैसे डर सकता है! नारद! उसके उस कठोर वचनको सुनकर प्रह्लादने कहा—आप यह उचित नहीं कह रहे हैं। आपका कहना धर्म एवं अर्थके विपरीत है ॥ २२–२५ ॥

हुताशनपतङ्गाभ्यां सिंहक्रोष्टुकयोरिव। गजेन्द्रमशकाभ्यां च रुक्मपाषाणयोरिव ॥ २६ ॥
एतेषामेभिरुदितं यावदन्तरमन्धक। तावदेवान्तरं चास्ति भवतो वा हरस्य च ॥ २७ ॥
वारितोऽसि मया वीर भूयो भूयश्च वार्यसे। शृणुष्व वाक्यं देवर्षेरसितस्य महात्मनः ॥ २८ ॥
यो धर्मशीलो जितमानरोषो विद्याविनीतो न परोपतापी।
स्वदारतुष्टः परदारवर्जी न तस्य लोके भयमस्ति किंचित् ॥ २९ ॥

अन्धक! अग्नि और जुगनू, सिंह और सियार, गजेन्द्र और मशक तथा सोने और पत्थरमें जितना अन्तर कहा जाता है, उतना ही अन्तर आप और शङ्करकी तुलनामें है। वीर! आपको मैंने रोका है और (अब भी) बार-बार रोक रहा हूँ। आप देवर्षि असितका वचन सुनें—जो व्यक्ति धर्मनिष्ठ, अभिमान और क्रोधको जीतनेवाला, विद्यासे विनम्र, किसीको दुःख न देनेवाला, अपनी पत्नीमें सन्तुष्ट तथा परस्त्रीका त्याग करनेवाला होता है, उसे संसारमें कोई भय नहीं होता ॥ २६–२९ ॥

यो धर्महीनः कलहप्रियः सदा परोपतापी श्रुतिशास्त्रवर्जितः।
परार्थदारेप्सुरवर्णसंगमी सुखं न विन्देत परत्र चेह ॥ ३० ॥
धर्मान्वितोऽभूद् भगवान् प्रभाकरः संत्यक्तरोषश्च मुनिः स वारुणिः।
विद्याऽन्वितोऽभून्मनुरर्कपुत्रः स्वदारसंतुष्टमनास्त्वगस्त्यः ॥ ३१ ॥
एतानि पुण्यानि कृतान्यमीभिर्मया नियद्धानि कुलक्रमोक्त्या।
तेजोऽन्विताः शापवरक्षमाश्च जाताश्च सर्वे सुरसिद्धपूज्याः ॥ ३२ ॥
अधर्मयुक्तोऽङ्गसुतो बभूव विमुच्य नित्यं कलहप्रियोऽभूत्।
परोपतापी नमुचिर्दुरात्मा परार्थलेप्सुर्नहुषश्च राजा ॥ ३३ ॥

जो व्यक्ति धर्मसे हीन, कलहसे प्रेम रखनेवाला, सदा दूसरोंको दुःख देनेवाला, वेद-शास्त्र (के अध्ययन-) से रहित, दूसरेके धन और दूसरेकी स्त्रीकी इच्छा रखनेवाला तथा भिन्न वर्णके साथ सम्बन्ध करनेवाला होता है, वह इस लोक और परलोकमें सुख नहीं पा सकता। भगवान् सूर्य धर्मसे युक्त थे, महर्षि वारुणिने (वसिष्ठने) क्रोध छोड़ दिया था, सूर्यपुत्र मनु विद्यावान् थे और अगस्त्य ऋषि अपनी पत्नीमें सन्तुष्ट थे। मैंने कुलके क्रमानुसार इन पुण्य करनेवालोंका उल्लेख किया है। शाप और वर देनेमें समर्थ ये सभी तेजस्वीलोग देवताओं और सिद्धोंके पूज्य हुए। अङ्गपुत्र (वेन) अधार्मिक और शक्तिशाली तथा नित्य कलहप्रिय था। दुरात्मा नमुचि परसंतापी एवं राजा नहुष पर-स्त्रीपर अधिकार प्राप्त करना चाहता था॥ ३०-३३॥

परार्थलिप्सुर्दितिजो हिरण्यदृक् मूर्खस्तु तस्याप्यनुजः सुदुर्मतिः।
अवर्णसंगी यदुरुत्तमौजा एते विनष्टास्त्वनयात् पुरा हि॥ ३४॥
तस्माद् धर्मो न संत्याज्यो धर्मो हि परमा गतिः। धर्महीना नरा यान्ति रौरवं नरकं महत्॥ ३५॥
धर्मस्तु गदितः पुम्भिस्तारणे दिवि चेह च। पतनाय तथाऽधर्म इह लोके परत्र च॥ ३६॥
त्याज्यं धर्मान्वितैर्नित्यं परदारोपसेवनम्।
नयन्ति परदारा हि नरकानेकविंशतिम्। सर्वेषामपि वर्णानामेष धर्मो ध्रुवोऽन्धक॥ ३७॥

दितिका पुत्र हिरण्याक्ष परधनका लालची था। उसका छोटा भाई दुर्बुद्धि एवं मूर्ख था तथा पराक्रमी यदु भिन्न जातिके साथ सम्बन्ध करनेवाला था। ये सभी पूर्वकालमें दुर्नीतिके कारण नष्ट हो गये। इसलिये धर्मको नहीं छोड़ना चाहिये; क्योंकि धर्म ही उत्तम गति है। धर्मसे हीन मनुष्य महान् रौरव नरकमें जाते हैं। पूर्वजोंने धर्मको ही परलोकको पार करनेवाला बताया है तथा अधर्मको इस लोक और परलोकमें पतनका हेतु बताया है। धर्मनिष्ठ व्यक्तियोंको परस्त्रीका सेवन करना सदैव वर्जनीय बताया है; यतः परस्त्रियाँ इक्कीस नरकोंमें ले जाती हैं। अन्धक! सभी वर्णोंके लिये यह निश्चित धर्म है॥ ३४-३७॥

परार्थपरदारेषु यदा वाञ्छां करिष्यति। स याति नरकं घोरं रौरवं बहुलाः समाः॥ ३८॥
एवं पुराऽसुरपते देवर्षिरसितोऽव्ययः। प्राह धर्मव्यवस्थानं खगेन्द्रायारुणाय हि॥ ३९॥
तस्मात् सुदूरतो वर्जेत् परदारान् विचक्षणः। नयन्ति निकृतिप्रज्ञं परदाराः पराभवम्॥ ४०॥

जो मनुष्य दूसरेके धन और दूसरेकी स्त्रीमें कामना करता है, वह बहुत वर्षोंके लिये भयंकर रौरव नरकमें चला जाता है। असुरराज! प्राचीन समयमें महात्मा देवर्षि असितने गरुड़ तथा अरुणसे धर्मकी यह व्यवस्था कही थी। इसलिये विद्वान् व्यक्ति दूसरी स्त्रियोंको दूरसे ही परित्याग कर दे; क्योंकि परस्त्रियाँ नीच बुद्धिवाले मनुष्योंको तिरस्कृत करा देती हैं॥ ३८-४०॥

पुलस्त्य उवाच

इत्येवमुक्ते वचने प्रह्लादं प्राह चान्धकः। भवान् धर्मपरस्त्वेको नाहं धर्मं समाचरे॥ ४१॥
इत्येवमुक्त्वा प्रह्लादमन्धकः प्राह शम्बरम्। गच्छ शम्बर शैलेन्द्रं मन्दरं वद शङ्करम्॥ ४२॥
भिक्षो किमर्थं शैलेन्द्रं स्वर्गतुल्यं सकन्दरम्। परिभुञ्जसि केनाद्य तव दत्तो वदस्व माम्॥ ४३॥
तिष्ठन्ति शासने मह्यं देवाः शक्रपुरोगमाः। तत् किमर्थं निवससे मामनादृत्य मन्दरे॥ ४४॥

पुलस्त्यजी बोले—इस प्रकारका वचन कहनेपर अन्धकने प्रह्लादसे कहा कि आप अकेले धर्मनिष्ठ हैं। मैं धर्मका व्यवहार नहीं करता। प्रह्लादसे इस प्रकार कहकर अन्धकने शम्बरसे कहा—शम्बर! तुम मन्दर

पर्वतपर जाओ और शङ्करसे कहो—भिक्षुक ! तुम गुफामें रहनेवाले होकर और सबके समान मन्दर पर्वतका उपभोग क्यों कर रहे हो ? मुझे बतलाओ कि तुमको इसे किसने दे दिया है ? इन्द्र आदि देवता मेरा शासन मानते हैं । तुम मेरा अपमान करके इस मन्दर पर्वतपर कैसे रह रहे हो ? ॥ ४१–४४ ॥

यद्यीप्सस्तव शैलेन्द्र क्रियतां वचनं मम । यथ हि भवत पत्नी सा मे शीघ्रं प्रदीयताम् ॥ ४५ ॥
इत्युक्तः स तदा तेन शम्बरो मन्दरं द्रुतम् । जगाम तत्र यत्रास्ते सह देव्या पिनाकधृक् ॥ ४६ ॥
गत्वोवाचान्धकवचो याथातथ्यं दनोः सुतः । तमुत्तरं हरः प्राह शृण्वत्या गिरिकन्यया ॥ ४७ ॥
ममायं मन्दरो दत्तः सहस्राक्षेण धीमता । तन्न शक्नोम्यहं त्यक्तुं विनाज्ञां वृत्रवैरिणः ॥ ४८ ॥

यदि यह पर्वतराज तुम्हें अभीष्ट है तो मेरे कहनेके अनुसार कार्य करो । तुम्हारी जो यह स्त्री है, उसे मुझे शीघ्र दे दो । उसके ऐसा कहनेपर शम्बर शीघ्रतासे उस मन्दर पर्वतपर गया, जहाँ पिनाकपाणि शङ्कर देवीके साथ निवास कर रहे थे । दनुपुत्रने वहाँ जाकर अन्धकके वचनको ज्यों-का-त्यों कहा । शङ्करने पर्वतनन्दिनीके सुनते हुए उसे उत्तर दिया । बुद्धिमान् इन्द्रने मुझे यह मन्दर पर्वत दिया है । इसलिये वृत्रासुरके वैरी इन्द्रकी आज्ञाके बिना मैं इसे नहीं छोड़ सकता ॥ ४५–४८ ॥

यच्चाब्रवीद् दीयतां मे गिरिपुत्रीति दानव । तदेषा यातु स्वं कामं नाहं वारयितुं क्षमः ॥ ४९ ॥
ततोऽब्रवीद् गिरिसुता शम्बरं मुनिसत्तम । ब्रूहि गत्वान्धकं वीरं मम वाक्यं विपश्चितम् ॥ ५० ॥
अहं पताका संग्रामे भवान्शम्भुश्च देविनौ । प्राणद्यूतं परिस्तीर्य यो जेष्यति स लप्स्यते ॥ ५१ ॥
इत्येवमुक्तो मतिमान् शम्बरोऽन्धकमागमत् । समागम्याब्रवीद् वाक्यं शर्वगौर्योश्च भाषितम् ॥ ५२ ॥

दानवने जो यह कहा कि गिरिनन्दिनीको मुझे दे दो, तो ये अपनी इच्छासे जा सकती हैं । मैं इन्हें नहीं रोक सकता । मुनिसत्तम ! उसके बाद गिरिपुत्री पार्वतीने शम्बरसे कहा—वीर ! तुम जाकर विद्वान् अन्धकसे मेरी बात कहो—संग्राममें मैं तो पताका हूँ । आप और शङ्कर खेलनेवाले हैं । प्राणोंका द्यूत फैलाकर (हार जीतका दाँव लगाकर) जो जीतेगा वह मुझे प्राप्त करेगा । ऐसा कहनेपर बुद्धिमान् शम्बर अन्धकके पास गया एवं उसने शङ्कर तथा गौरीकी कही हुई बातें (ज्यों-की-त्यों) उससे कह दीं ॥ ४९–५२ ॥

तच्छ्रुत्वा दानवपतिः क्रोधदीप्तेक्षणः श्वसन् । समाहूयाब्रवीद् वाक्यं दुर्योधनमिदं वचः ॥ ५३ ॥
गच्छ शीघ्रं महाबाहो भेरीं सांग्रामिकीं दृढाम् । ताडयस्व सुविश्रब्धं दुःशीलामिव योषितम् ॥ ५४ ॥
समादिष्टोऽन्धकेनाथ भेरीं दुर्योधनो बलात् । ताडयामास वेगेन यथा प्राणेन भूयसा ॥ ५५ ॥
सा ताडिता बलवता भेरी दुर्योधनेन हि । सस्वरं भैरवं राव ररास सुरभी यथा ॥ ५६ ॥

उसे सुनकर दानवपतिकी आँखें क्रोधसे जलने लगीं । लम्बी साँस लेते हुए दुर्योधनको बुलाकर उसने कहा—महाबाहो ! शीघ्र जाओ एवं मारू या संग्रामके समयमें बजनेवाले जुझाऊ नगाड़ेको (नक्कारेको) जोर जोरसे ऐसे पीटो जैसे दुराचारिणीको कोई (उसके अपराधके कारण उसका अभिभावक आदि निश्चयतासे) ताड़ित करता है । उसके बाद अन्धकसे आदेश प्राप्त कर दुर्योधन अत्यन्त बलपूर्वक जी जानसे वेगपूर्वक भेरीको बजाने लगा । बलवान् दुर्योधनद्वारा बलपूर्वक बजायी जाती हुई वह भेरी सहसा भयंकर ध्वनिमें घरघराने लगी, जिस प्रकार सुरभी घरघराती है ॥ ५३–५६ ॥

तस्यास्तं स्वरमाकर्ण्य सर्व एव महासुराः । समायाताः सभां तूर्णं किमेतदिति वादिनः ॥ ५७ ॥
याथातथ्यं च तान् सर्वानाह सेनापतिर्बली । ते चापि बलिनां श्रेष्ठाः सन्नद्धा युद्धकाङ्क्षिणः ॥ ५८ ॥

सहान्धका निर्ययुस्ते गजैरुष्ट्रैर्हयै रथैः। अन्धको रथमास्थाय पञ्चनल्वप्रमाणतः ॥ ५९ ॥
त्र्यम्बकं स पराजेतुं कृतबुद्धिर्विनिर्ययौ। जम्भः कुजम्भो हुण्डश्च तुहुण्डः शम्बरो बलिः ॥ ६० ॥
बाणः कार्तस्वरो हस्ती सूर्यशत्रुर्महोदरः। अयःशंकुः शिबिः शाल्वो वृषपर्वा विरोचनः ॥ ६१ ॥
हयग्रीवः कालनेमिः संह्लादः कालनाशनः। शरभः शलभश्चैव विप्रचित्तिश्च वीर्यवान् ॥ ६२ ॥
दुर्योधनश्च पाकश्च विपाकः कालशम्बरौ।
एते चान्ये च बहवो महावीर्या महाबलाः। प्रजग्मुरुत्सुका योद्धुं नानायुधधरा रणे ॥ ६३ ॥
इत्थं दुरात्मा दनुसैन्यपालस्तदान्धको योद्धुमना हरेण।
महाचलं मन्दरमभ्युपेयिवान् स कालपाशावसितो हि मन्दधीः ॥ ६४ ॥

इति श्रीवामनपुराणे षट्षष्टितमोऽध्यायः ॥ ६६ ॥

उसकी उस ध्वनिको सुनकर सभी बड़े असुर 'यह क्या है ?'— ऐसा कहते हुए शीघ्रतासे सभामें आ गये। पराक्रमी सेनापतिने उन सभीसे उचित और सत्य वचन कहा। युद्धकी इच्छा करनेवाले बलवानोंमें श्रेष्ठ वे सभी वीर तैयार हो गये। हाथी, ऊँट, घोड़ों और रथोंसहित वे सभी अन्धकके साथ बाहर निकले। पाँच नल्व— अर्थात् चार सौ (४००) हाथके प्रमाणवाले रथपर चढ़कर अन्धक त्रिलोचन शंकरको जीतनेका निश्चय कर बाहर निकला। जम्भ, कुजम्भ, हुण्ड, तुहुण्ड, शम्बर, बलि, बाण, कार्तस्वर, हस्ती, सूर्यशत्रु, महोदर, अयःशङ्कु, शिबि, शाल्व, वृषपर्वा, विरोचन, हयग्रीव, कालनेमि, संह्लाद, कालनाशन, शरभ, शलभ, पराक्रमी विप्रचित्ति, दुर्योधन, पाक, विपाक, काल एवं शम्बर—ये सभी तथा अन्य अनेक महापराक्रमशाली एवं महाबलवान् राक्षस भाँति-भाँतिके आयुधोंको लेकर प्रबल इच्छासे संग्राममें लड़नेके लिये चल पड़े। इस प्रकार काल-पाशसे बँधा हुआ वह अल्पमति दनुसैन्यपति दुरात्मा अन्धक शंकरसे युद्ध करनेके विचारसे महान् पर्वत मन्दरपर गया ॥ ५७—६४ ॥

इस प्रकार श्रीवामनपुराणमें छाछठवाँ अध्याय समाप्त हुआ ॥ ६६ ॥

[अथ सप्तषष्टितमोऽध्यायः]

पुलस्त्य उवाच

हरोऽपि शम्बरं याते समाहूयाथ नन्दिनम्। प्राहामन्त्रय शैलादीन् ये स्थितास्तव शासने ॥ १ ॥
ततो महेशवचनान्नन्दी तूर्णतरं गतः। उपस्पृश्य जलं श्रीमान् सस्मार गणनायकान् ॥ २ ॥
नन्दिना संस्मृताः सर्वे गणनाथाः सहस्रशः। समुत्पत्य त्वरायुक्ताः प्रणतास्त्रिदशेश्वरम् ॥ ३ ॥
आगतांश्च गणान्नन्दी कृताञ्जलिपुटोऽव्ययः। सर्वान् निवेदयामास शङ्कराय महात्मने ॥ ४ ॥

सड़सठवाँ अध्याय प्रारम्भ

(नन्दिद्वारा आहूत गणोंका वर्णन, उनसे हरि और हरका एकत्व प्रतिपादन, गणोंको सदाशिवका दर्शन और गणोंद्वारा मन्दरका भर जाना)

पुलस्त्यजी बोले—शम्बरके चले जानेपर शंकरने भी नन्दीको बुलाकर कहा—नन्दिन्! तुम्हारे शासनमें जो पर्वत आदि रहते हैं, उन्हें इस (माङ्गलिक) कार्यमें आनेके लिये आमन्त्रित करो। उसके बाद महेशके कहनेसे नन्दी शीघ्रातिशीघ्र गये और उन्होंने जलका आचमन कर गणनायकोंका स्मरण किया। नन्दीसे स्मरण किये गये सभी गणनाथोंने हजारोंकी संख्यामें शीघ्रतासे आकर त्रिदशेश्वर शंकरको प्रणाम किया। अविनाशी नन्दीने महात्मा शंकरसे हाथ जोड़कर सभी आये हुए गणोंको निवेदित किया ॥ १—४ ॥



मन्दारपर अवस्थित भगवान् शङ्कर

सहान्धका निर्ययुस्ते गजैरुष्ट्रैर्हयै रथैः। अन्धको रथमास्थाय पञ्चनल्वप्रमाणतः ॥ ५९ ॥
त्र्यम्बकं स पराजेतुं कृतबुद्धिर्विनिर्ययौ। जम्भः कुजम्भो हुण्डश्च तुहुण्डः शम्बरो बलिः ॥ ६० ॥
बाणः कार्तस्वरो हस्ती सूर्यशत्रुर्महोदरः। अयःशंकुः शिबिः शाल्वो वृषपर्वा विरोचनः ॥ ६१ ॥
हयग्रीवः कालनेमिः संह्लादः कालनाशनः। शरभः शलभश्चैव विप्रचित्तिश्च वीर्यवान् ॥ ६२ ॥
दुर्योधनश्च पाकश्च विपाकः कालशम्बरौ।
एते चान्ये च बहवो महावीर्या महाबलाः। प्रजग्मुरुत्सुका योद्धुं नानायुधधरा रणे ॥ ६३ ॥
इत्थं दुरात्मा दनुसैन्यपालस्तदान्धको योद्धुमना हरेण।
महाचलं मन्दरमभ्युपेयिवान् स कालपाशावसितो हि मन्दधीः ॥ ६४ ॥

इति श्रीवामनपुराणे षट्षष्टितमोऽध्यायः ॥ ६६ ॥

उसकी उस ध्वनिको सुनकर सभी बड़े असुर 'यह क्या है !'— ऐसा कहते हुए शीघ्रतासे सभामें आ गये। पराक्रमी सेनापतिने उन सभीसे उचित और सत्य वचन कहा। युद्धकी इच्छा करनेवाले बलवानोंमें श्रेष्ठ वे सभी वीर तैयार हो गये। हाथी, ऊँट, घोड़ों और रथोंसहित वे सभी अन्धकके साथ बाहर निकले। पाँच नल्व— अर्थात् चार सौ (४००) हाथके प्रमाणवाले रथपर चढ़कर अन्धक त्रिलोचन शंकरको जीतनेका निश्चय कर बाहर निकला। जम्भ, कुजम्भ, हुण्ड, तुहुण्ड, शम्बर, बलि, बाण, कार्तस्वर, हस्ती, सूर्यशत्रु, महोदर, अयःशङ्कु, शिबि, शाल्व, वृषपर्वा, विरोचन, हयग्रीव, कालनेमि, संह्लाद, कालनाशन, शरभ, शलभ, पराक्रमी विप्रचित्ति, दुर्योधन, पाक, विपाक, काल एवं शम्बर—ये सभी तथा अन्य अनेक महापराक्रमशाली एवं महाबलवान् राक्षस भाँति-भाँतिके आयुधोंको लेकर प्रबल इच्छासे संग्राममें लड़नेके लिये चल पड़े। इस प्रकार काल-पाशसे बँधा हुआ वह अल्पमति दनुसैन्यपति दुष्टात्मा अन्धक शंकरसे युद्ध करनेके विचारसे महान् पर्वत मन्दरपर गया ॥ ५७-६४ ॥

इस प्रकार श्रीवामनपुराणमें छाछठवाँ अध्याय समाप्त हुआ ॥ ६६ ॥

[अथ सप्तषष्टितमोऽध्यायः]

पुलस्त्य उवाच

गतेऽपि शम्बरे याते समाहूयाथ नन्दिनम्। प्राहामन्त्रय शैलादीन् ये स्थितास्तव शासने ॥ १ ॥
ततो महेशवचनान्नन्दी तूर्णतरं गतः। उपस्पृश्य जलं श्रीमान् सस्मार गणनायकान् ॥ २ ॥
नन्दिना संस्मृताः सर्वे गणनाथाः सहस्रशः। समुत्पत्य त्वरायुक्ताः प्रणतास्त्रिदशेश्वरम् ॥ ३ ॥
आगतांश्च गणान् नन्दी कृताञ्जलिपुटोऽव्ययः। सर्वान् निवेदयामास शङ्कराय महात्मने ॥ ४ ॥

सड़सठवाँ अध्याय प्रारम्भ

(नन्दिद्वारा आहूत गणोंका वर्णन, उनसे हरि और हरका एकत्व प्रतिपादन, गणोंको महाशिवका दर्शन और गणोंद्वारा मन्दरका भर जाना)

पुलस्त्यजी बोले—शम्बरके चले जानेपर शंकरने भी नन्दीको बुलाकर कहा—नन्दिन् ! तुम्हारे शासनमें जो पर्वत आदि रहते हैं, उन्हें इस (माङ्गलिक) कार्यमें आनेके लिये आमन्त्रित करो। उसके बाद महेशके कहनेसे नन्दी शीघ्रातिशीघ्र गये और उन्होंने जलका आचमन कर गणनायकोंका स्मरण किया। नन्दीसे स्मरण किये गये सभी गणनाथोंने हजारोंकी संख्यामें शीघ्रतासे आकर त्रिदशेश्वर शंकरको प्रणाम किया। अविनाशी नन्दीने महात्मा शंकरसे हाथ जोड़कर सभी आये हुए गणोंको निवेदित किया ॥ १-४ ॥



मन्दरपर अवस्थित भगवान् शङ्कर

नन्द्युवाच

यानेतान् पश्यसे शम्भो त्रिनेत्राञ्जटिलाञ्शुचीन्। एते रुद्रा इति ख्याताः कोट्य एकादशैव तु ॥ ५ ॥
वानरास्यान् पश्यसे यान् शार्दूलसमविक्रमान्। एतेषां द्वारपालास्ते मन्नामानो यशोधनाः ॥ ६ ॥
षण्मुखान् पश्यसे यांश्च शक्तिपाणीञ्शिखिध्वजान्। षट् च षष्टिस्तथा कोट्यः स्कन्दनाम्नः कुमारकान् ॥ ७ ॥
एतावत्यस्तथा कोट्यः शाखा नाम षडाननाः। विशाखास्तावदेवोक्ता नैगमेयाश्च शङ्कर ॥ ८ ॥

नन्दीने कहा—शम्भो ! तीन नेत्रोंवाले और जटा धारण करनेवाले तथा पवित्र जिन गणोंको आप देख रहे हैं, उन्हें रुद्र कहते हैं। इनकी संख्या ग्यारह कोटि है। बन्दरके समान मुँह और सिंहके समान पराक्रमवाले जिन्हें आप देख रहे हैं, वे मेरे नामको धारण करनेवाले यशस्वी इनके द्वारपाल हैं। हाथमें शक्ति लिये तथा मयूरध्वजी जिन छः मुखवालोंको आप देख रहे हैं, वे स्कन्द नामके कुमार हैं। इनकी संख्या छाछठ करोड़ है। शंकर ! इतने ही छः मुख धारण करनेवाले शाखा नामके गण हैं और इतने ही विशाख और नैगमेय नामके गण हैं ॥ ५–८ ॥

सप्तकोटिशतं शम्भो अमी वै प्रमथोत्तमाः। एकैकं प्रति देवेश तावत्यो ह्यपि मातरः ॥ ९ ॥
भस्मारुणितदेहाश्च त्रिनेत्राः शूलपाणयः। एते शैवा इति प्रोक्तास्तव भक्ता गणेश्वराः ॥ १० ॥
तथा पाशुपताश्चान्ये भस्मप्रहरणा विभो। एते गणास्त्वसंख्याताः सहायार्थं समागताः ॥ ११ ॥
पिनाकधारिणो रौद्रा गणाः कालमुखापरे। तव भक्ताः समायाता जटामण्डलिनोऽद्भुताः ॥ १२ ॥

शम्भो ! इन उत्तम प्रमथोंकी संख्या सात सौ करोड़ है। देवेश ! प्रत्येकके साथ उतनी ही मातृकाएँ भी हैं। इन भस्मविभूषित शरीरवाले शूलपाणि त्रिनेत्रधारियोंको शैव कहा जाता है। ये सभी गणेश्वर आपके भक्त हैं। विभो ! भस्मरूपी अस्त्र धारण करनेवाले अन्य अनगिनत पाशुपत गण सहायताके लिये आये हैं। पिनाक धारण करनेवाले जटामण्डलसे युक्त, अद्भुत भयङ्कर कालमुखनामक आपके अन्य गण (भी) आये हैं ॥ ९–१२ ॥

खट्वाङ्गयोधिनो वीरा रक्तचर्मसमावृताः। इमे प्राप्ता गणा योद्धुं महाव्रतिन उत्तमाः ॥ १३ ॥
दिग्वाससो मौनिनश्च [illegible]। निराश्रया नाम गणाः समायाता जयन्त्युत ॥ १४ ॥
सार्धद्विनेत्राः पद्माक्षाः श्रीवत्साङ्कितवक्षसः। समायाताः खगारूढा वृषभध्वजिनोऽव्ययाः ॥ १५ ॥
महापाशुपता नाम चक्रशूलधरास्तथा। भैरवो विष्णुना सार्धमभेदेनार्चितो हि यैः ॥ १६ ॥

खट्वाङ्गसे संग्राम करनेवाले, लाल ढालसे युक्त महाव्रती नामके ये उत्तम गण युद्धके लिये आये हैं। घण्टा नामके आयुधको धारण करनेवाले दिगम्बर और मौनी तथा निराश्रय [illegible] नेत्रोंवाले, पद्माक्ष एवं श्रीवत्ससे चिह्नित वक्ष स्थलवाले गरुड़ पक्षीपर चढ़े हुए [illegible] आ गये हैं। चक्र तथा शूल धारण करनेवाले महापाशुपत [illegible] साथ भैरवकी पूजा (यहाँ) की है ॥ १३–१६ ॥

इमे मृगेन्द्रवदनाः शूलबाणधनुर्धराः [illegible]
एते चान्ये च बहवः शतशोऽथ सहस्रशः [illegible]
ततोऽभ्येत्य गणाः सर्वे प्रणेमुर्वृषभध्वजम् [illegible]
महापाशुपतान् दृष्ट्वा समुत्थाय [illegible]

आपके रोमोंसे उत्पन्न हुए ये सभी [illegible]
आदि गण तथा दूसरे भी सैकड़ों एवं हजारों [illegible] आपकी सहायताके

इच्छाके अनुसार आप इन्हें आदेश दें। उसके बाद सभी गणोंने पास जाकर वृषभध्वजको प्रणाम किया। भगवान्ने हाथसे उन्हें विश्वस्तकर बैठाया। महापाशुपत नामके अपने अध्यक्षोंको देखनेके बाद महेश्वरने उठकर उनको गले लगाया। उन लोगोंने महेश्वरको अभिवन्दित किया ॥ १७–२० ॥

ततस्तदद्भुततमं दृष्ट्वा सर्वे गणेश्वराः। सुचिरं विस्मिताक्षाश्च वैलक्ष्यमगमत् परम् ॥ २१ ॥
विस्मिताक्षान् गणान् दृष्ट्वा शैलादिर्योगिनां वरः। प्राह प्रहस्य देवेशं शूलपाणिं गणाधिपम् ॥ २२ ॥
विस्मितामी गणा देव सर्व एव महेश्वर। महापाशुपतानां हि यत् त्वयालिङ्गनं कृतम् ॥ २३ ॥
तदेतेषां महादेव स्फुटं त्रैलोक्यविन्दकम्। रूपं ज्ञानं विवेकं च वदस्व स्वेच्छया विभो ॥ २४ ॥
प्रमथाधिपतेर्वाक्यं विदित्वा भूतभावनः। बभाषे तान् गणान् सर्वान् भावाभावविचारिणः ॥ २५ ॥

उसके बाद उस अत्यन्त विचित्र दृश्यको देखकर सभी गणेश्वरोंकी आँखें आश्चर्यसे भर गयीं। उसके बाद वे सभी बहुत ही लज्जित हो गये। गणोंको अचरजभरे नेत्रोंवाला देखकर योगिश्रेष्ठ शैलादि नन्दीने हँसकर गणाधिप देवेश शूलपाणिसे कहा—देव! महेश्वर! महापाशुपतोंको आपने जो गले लगाया है, उससे ये सभी गण आश्चर्यमें पड़ गये हैं। अतः महादेव! विभो! इनके तीनों लोकोंमें विख्यात रूप, ज्ञान एवं विवेकका अपने इच्छानुसार वर्णन करें। प्रमथोंके अधिपति नन्दीकी बात सुनकर भूतभावन महादेव भाव और अभावका विचार करनेवाले उन गणोंसे कहने लगे—॥ २१–२५ ॥

रुद्र उवाच

भवद्भिर्भक्तिसंयुक्तैर्हरो भावेन पूजितः। अहंकारविमूढैश्च निन्दद्भिर्वैष्णवं पदम् ॥ २६ ॥
तेनाज्ञानेन भवतोनादृत्यातुविरोधिताः। योऽहं स भगवान् विष्णुर्विष्णुर्यः सोऽहमव्ययः ॥ २७ ॥
नावयोर्वै विशेषोऽस्ति एका मूर्तिर्द्विधा स्थिता। तदमीभिर्नरव्याघ्रैर्भक्तिभावयुतैर्गणैः ॥ २८ ॥
यथाहं वै परिज्ञातो न भवद्भिस्तथा ध्रुवम्। येनाहं निन्दितो नित्यं भवद्भिर्मूढबुद्धिभिः ॥ २९ ॥
तेन ज्ञानं हि वो नष्टं नातस्त्वालिङ्गिता मया। इत्येवमुक्ते वचने गणाः प्रोचुर्महेश्वरम् ॥ ३० ॥

रुद्रने कहा—अहंकारसे विमूढ किंतु मेरी भक्तिसे युक्त आपलोगोंने वैष्णवपदकी निन्दा करते हुए भावपूर्वक शंकरकी पूजा की है। इसी अज्ञानके हेतु आप सभीका अनादर कर उनका विशेष आग्रह किया गया। जो मैं हूँ वही भगवान् विष्णु हैं एवं जो विष्णु हैं वही अविनाशी मैं हूँ। हम दोनोंमें कोई अन्तर नहीं है। एक ही मूर्ति दो रूपोंमें अवस्थित है। अतः भक्तिभावसे युक्त इन पुरुषश्रेष्ठ गणोंने जैसा मुझे जाना है, निश्चय ही उस प्रकार आपलोग मुझे नहीं जानते। जड-बुद्धिवाले आप लोगोंने यतः नित्य मेरी निन्दा की है अतः आपलोगोंका ज्ञान नष्ट हो गया। इसीलिये मैंने आपलोगोंको गले नहीं लगाया है। इस प्रकार कहनेपर गणोंने महेश्वरसे कहा—॥ २६–३० ॥

कथं भवान् यथैक्येन संस्थितोऽस्ति जनार्दनः। भवान् हि निर्मलः शुद्धः शान्तः शुक्लो निरञ्जनः ॥ ३१ ॥
स चाप्यञ्जनसंकाशः कथं तेनेह युज्यते। तेषां वचनमर्थाढ्यं श्रुत्वा जीमूतवाहनः ॥ ३२ ॥
विहस्य मेघगम्भीरं गणानिदमुवाच ह। श्रूयतां सर्वमाख्यास्ये स्वयशोवर्द्धनं वचः ॥ ३३ ॥
न त्वेव योग्या यूयं हि महाज्ञानस्य कर्हिचित्। अपवादभयाद् गुह्यं भवतां हि प्रकाशये ॥ ३४ ॥

आप एवं जनार्दन ऐक्यरूपसे कैसे रहते हैं? आप निर्मल, शुद्ध, शान्त, शुक्ल और निर्दोष एवं अज्ञानसे रहित हैं; किंतु वे अञ्जनके तुल्य हैं; अतः उनसे आपका मेल कैसे होता है? उनके अभिप्रायगर्भ ...

बाद जीमूतवाहन शंकरने मेघके समान गम्भीर वाणीमें हँसकर कहा—अपना कार्य बतानेवाला सम्पूर्ण भाव मैं बतलाता हूँ, उसे सुनो—तुमलोग कभी भी नरकज्ञानके योग्य नहीं हो। परन्तु आश्चर्य है कि मैं आप सबके सामने गोपनीय वस्तु स्थितिको प्रकाशित करता हूँ ॥ ३१-३४ ॥

प्रियत्वं मयि चैतेन यन्मयि त्वास्तु नित्यशः। एकरूपात्मकं देहं कुरुध्वं यत्नमास्थिताः ॥ ३५ ॥
पयसा हविषा चैव स्नपनेन प्रयत्नतः। चन्दनादिभिरेकाग्रैर्न मे प्रीतिः प्रजायते ॥ ३६ ॥
यत्नात् क्रकचमादाय छिन्दध्वं मम विग्रहम्। तत्कार्ये भवद्भक्ता रक्षामि स्वयशोऽर्थतः ॥ ३७ ॥
माऽयं यदि ध्यते लोको महान्तमपवादिनम्। यथा पतन्ति नरके हरभक्ताः सनातने ॥ ३८ ॥

मुझमें निरन्तर चित्त लगाये रहनेसे भी अन्य कोई प्रिय है। तुमलोग यत्नपूर्वक एक स्वरूपात्मक शरीरको समझो। प्रयत्नपूर्वक दूध या घीसे स्नान कराने तथा स्थिरचित्ततापूर्वक चन्दन आदिद्वारा लेप करनेसे मुझे प्रसन्नता नहीं उत्पन्न होती। आरा लेकर मेरी देहको भले ही चीर डालो परन्तु अपनी कीर्तिके लिये नरकके योग्य आप भक्तोंकी मैं (उससे) रक्षा करता ही हूँ। (क्योंकि) यह संसार मुझे इस प्रकारका महान् कलंक न लगाये कि शंकरके तपस्वी भक्त नरकमें जाते हैं ॥ ३५-३८ ॥

व्रजन्ति नरकं घोरमित्येवं परिवादिनः। अतोऽर्थं न क्षिपाम्यद्य भवतो नरकेऽद्भुते ॥ ३९ ॥
यन्निन्दथ जगन्नाथं पुष्कराक्षं न सन्मयम्। स चैव भगवाञ्छर्वः सर्वव्यापी गणेश्वरः ॥ ४० ॥
न तस्य सदृशो लोके विद्यते सचराचरे। श्वेतमूर्तिः स भगवान् पीतो रक्तोऽञ्जनप्रभः ॥ ४१ ॥
तस्मात् परतरं लोके नान्यद् धर्मं हि विद्यते।
सात्त्विकं राजसं चैव तामसं मिश्रकं तथा। स एव धत्ते भगवान् सर्वपूज्यः सदाशिवः ॥ ४२ ॥

इस प्रकारकी निन्दा करनेवाले लोग भयंकर नरकमें जाते हैं। इसलिये मैं आपलोगोंको अद्भुत नरकमें नहीं डालता। आपलोग मेरे स्वरूप जिन कमलनयन जगन्नाथकी निन्दा करते हैं वे ही सर्वव्यापी गणेश्वर भगवान् शर्व हैं। इस समस्त चर और अचर लोकमें उनके समान कोई नहीं है। वे भगवान् श्वेतमूर्ति पीत रक्त एवं अञ्जनके सदृश कान्तिवाले हैं। संसारमें उनसे श्रेष्ठ कोई दूसरा धर्म नहीं है। सर्वपूज्य वे सदाशिव (सदा मङ्गल करनेवाले) भगवान् ही सभी सात्त्विक राजस तामस एवं मिश्रित भावोंको धारण करते हैं ॥ ३९-४२ ॥

शङ्करस्य वचः श्रुत्वा शैवाद्याः प्रमथोत्तमाः। प्रोचुर्भगवन् ब्रूहि सदाशिवविशेषणम् ॥ ४३ ॥
तेषां तद् भाषितं श्रुत्वा प्रमथानामथेश्वरः। दर्शयामास तद्रूपं सदाशिवं निरञ्जनम् ॥ ४४ ॥
ततः पश्यन्ति हि गणास्तमीशं वै सहस्रशः। सहस्रवक्त्रचरणं सहस्रभुजमीश्वरम् ॥ ४५ ॥
दण्डपाणिं सुदुर्दृश्यं लोकैर्व्याप्तं समन्ततः। दण्डसंस्थाऽस्य दृश्यन्ते देवप्रहरणास्तथा ॥ ४६ ॥

शंकरके वचनको सुनकर शैव आदि श्रेष्ठ गणोंने कहा—भगवन्! आप सदाशिवकी विशेषता प्रकट करनेवाले गुणको कहिये। प्रमथेश्वरने उनके इस वचनको सुनकर उन्हें निरञ्जन सदाशिवस्वरूपको दिखलाया। उसके बाद हजारों गणोंने उन ईश्वरको हजारों मुख चरण एवं भुजाओंवाला हुआ देखा। वे लोकोंमें सभी ओर व्याप्त थे दण्डपाणि एवं अत्यधिक सुदुर्दृश्य थे। देवताओंके अस्त्र उनके दण्डमें स्थित दिखायी पड़ रहे थे ॥ ४३-४६ ॥

तत एकमुखं भूयो ददृशुः शङ्करं गणाः। रौद्रैश्च वैष्णवैश्चैव वृतं चिह्नैः सहस्रशः ॥ ४७ ॥
अर्धेन वैष्णववपुरर्धेन हरविग्रहः। खगध्वजं वृषारूढं खगारूढं वृषध्वजम् ॥ ४८ ॥
यथा यथा त्रिनयनो रूपं धत्ते गुणात्मकः। तथा तथा त्वजायन्त महाशङ्करगणाः ॥ ४९ ॥

ततोऽभवच्चैकरूपी शङ्करो बहुरूपवान् ।
द्विरूपश्चाभवद् योगी एकरूपोऽप्यरूपवान् । क्षणाच्छ्वेतः क्षणाद् रक्तः पीतो नीलः क्षणादपि ॥ ५० ॥
मिश्रको वर्णहीनश्च महापाशुपतस्तथा । क्षणाद् भवति रुद्रेन्द्रः क्षणाच्छम्भुः प्रभाकरः ॥ ५१ ॥
क्षणाद्धाच्छङ्करो विष्णुः क्षणाच्छर्वः पितामहः । ततस्तदद्भुततमं दृष्ट्वा शैवादयो गणाः ॥ ५२ ॥
अजानन्त तदैक्येन ब्रह्मविष्ण्वीशभास्करान् । यदाऽभिन्नममन्यन्त देवदेवं सदाशिवम् ॥ ५३ ॥
तदा निर्धूतपापास्ते समजायन्त पार्षदाः । तेष्वेवं धूतपापेषु अभिन्नेषु हरीश्वरः ॥ ५४ ॥
प्रीतात्मा विभ्रभौ शम्भुः प्रीतियुक्तोऽब्रवीद् वचः । परितुष्टोऽस्मि वः सर्वे ज्ञानेनानेन सुव्रताः ॥ ५५ ॥
वृणुध्वं वरमानन्त्यं दास्ये वो मनसेप्सितम् ।
ऊचुस्ते देहि भगवन् वरमस्माकमीश्वर । भिन्नदृष्ट्युद्भवं पापं यत्तद् भ्रंशं प्रयातु नः ॥ ५६ ॥

उसके बाद पुनः गणोंने रुद्र एवं विष्णुके हजारों चिह्नोंसे युक्त एकमुख शङ्करको देखा । उस रूपका आधा भाग शङ्करके शरीरका था और आधा भाग गरुडध्वज था । (एक आधा भाग) गरुडध्वज वृषारूढ था एवं (दूसरा आधा भाग) वृषभध्वज गरुडपर आरूढ़ था । गुणोंमें अग्रणी त्रिलोचन जैसे-जैसे रूप धारण करते जाते थे, वैसे-वैसे ही महापाशुपतगण भी होते जाते थे । उसके बाद एकरूपवाले शंकर बहुत रूपवाले हो गये । वे योगी दो रूप धारण करनेवाले, एक रूप धारण करनेवाले एवं बिना रूपके भी हो गये । वे प्रतिक्षण श्वेत, रक्त, पीत, नील, मिश्र वर्णवाले एवं वर्णहीन होते गये । महापाशुपतोंका भी स्वरूप उनके रूपके अनुरूप होता गया । श्रीशंकर किसी क्षणमें इन्द्र, किसी क्षणमें सूर्य, किसी क्षणमें विष्णु एवं किसी क्षणमें पितामहके रूपमें स्वरूप बदलते गये । यह अत्यन्त आश्चर्यजनक दृश्य देखकर शैव आदि गणोंने ब्रह्मा, विष्णु, ईश एवं सूर्यको (इनसे) अभिन्न समझा । उन लोगोंने जब देवाधिदेव सदाशिवको (सभी देवोंसे) अभिन्न मान लिया तब वे सभी पार्षद पापसे रहित हो गये । इस प्रकार अभेद-बुद्धिके कारण उनके पापसे विमुक्त हो जानेसे हरीश्वर शम्भु प्रसन्न हो गये । उन्होंने संतुष्ट होकर कहा—सुव्रतो ! तुम्हारे इस प्रकारके ज्ञानसे मैं प्रसन्न हूँ । अब बहुतों-से वर फिर माँगो । मैं तुम्हें इच्छित वर दूँगा । उन्होंने कहा—भगवन् ! महेश्वर ! हमें यह वर दें कि भेदभाव रखनेके कारण उत्पन्न हमारे (शेष) सभी पाप नष्ट हो जायँ ॥ ४७–५६ ॥

पुलस्त्य उवाच

बाढमित्यब्रवीच्छर्वश्चक्रे निर्धूतकल्मषान् । सम्परिष्वजताव्यक्तस्तान् सर्वान् गणयूथपान् ॥ ५७ ॥
इति विभुना प्रणतार्तिहरेण गणपतयो वृषमेघरथेन ।
श्रुतिगदितानुगमेनेव मन्दरं गिरिमवतत्य समध्यवसन्तम् ॥ ५८ ॥
आच्छादितो गिरिवरः प्रमथैर्घनाभैराभाति शुक्लतनुरीश्वरपादजुष्टः ।
नीलाजिनाततनुः शरदभ्रवर्णो यद्वद् विभाति बलवान् वृषभो हरस्य ॥ ५९ ॥

इति श्रीवामनपुराणे सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

पुलस्त्यजी बोले—शंकरने कहा 'ऐसा ही होगा ।' उसके बाद अदृश्य होते हुए शंकरने उन सभी गणाधिपोंको आलिङ्गित कर उन्हें पापसे (सर्वथा) रहित कर दिया । उसके बाद श्रुतिकी उक्तिका जैसे (शास्त्रोंमें) अनुगमन होता है उसी प्रकार वृष एवं मेघवाहन शरणागतोंके कष्टको हरण करनेवाले शंकरके साथ सभी गणपति मन्दरपर्वतको चारों ओरसे घेरकर रहने लगे । मेघके समान प्रमथोंसे घिरे शिव-चरणकी सेवा करनेवाले शुभ्र शरीरवाला पर्वतराज ऐसे सुशोभित हो रहा था जैसे नीले मृगचर्मसे ढके शरीरवाला एवं शरत्कालीन मेघके समान श्वेत रंगवाला शंकरका बलवान् वृषभ सुशोभित होता है ॥ ५७–५९ ॥

इस प्रकार श्रीवामनपुराणमें सड़सठवाँ अध्याय समाप्त हुआ ॥ ६७ ॥

[अथाष्टषष्टितमोऽध्यायः]

पुलस्त्य उवाच

एतस्मिन्नन्तरे प्राप्तः समं दैत्यैस्तथाऽन्धकः । मन्दरं पर्वतश्रेष्ठं प्रमथाधितकन्दरम् ॥ १ ॥
प्रमथा दानवान् दृष्ट्वा चक्रुः किलकिलाध्वनिम् । प्रमथाश्चापि संरब्धा जघ्नुस्तूर्याण्यनेकशः ॥ २ ॥
स चातूर्णोन्महानादो रोदसी प्रलयोपमः । शुश्राव वायुमार्गस्थो विघ्नराजो विनायकः ॥ ३ ॥
समभ्ययात् सुसंक्रुद्धः प्रमथैरभिसंवृतः । मन्दरं पर्वतश्रेष्ठं ददृशे पितरं तथा ॥ ४ ॥

अड़सठवाँ अध्याय प्रारम्भ

(भगवान् शंकरका अन्धकसे युद्धके लिये प्रस्थान, रुद्रगणोंका दानववर्गसे युद्ध और तुहुण्ड आदि दैत्योंका विनाश)

पुलस्त्यजी बोले—(नारदजी !) इसी बीच दैत्योंके साथ वह अन्धक प्रमथोंसे सेवित गुफाओंवाले पर्वतश्रेष्ठ मन्दरगिरिपर आ गया । प्रमथोंने दानवोंको देखकर हर्षसूचक 'किलकिला'-ध्वनि की और फिर उन्होंने बहुत-सी तुरहियाँ बजायीं । प्रलय-(कालीन ध्वनि)-के समान वह भयङ्कर ध्वनि आकाश और पृथ्वीके बीच भर गयी । आकाशमें स्थित विघ्नराज गणेशने उस ध्वनिको सुना । प्रमथोंसे घिरे हुए वे अत्यन्त क्रुद्ध होकर पर्वतश्रेष्ठ मन्दरपर गये और उन्होंने अपने पिताको देखा ॥ १–४ ॥

प्रणिपत्य तथा भक्त्या वाक्यमाह महेश्वरम् । किं तिष्ठसि जगन्नाथ समुत्तिष्ठ रणोत्सुकः ॥ ५ ॥
ततो विघ्नेशवचनाज्जगन्नाथोऽम्बिकां वचः । प्राह यास्येऽन्धकं हन्तुं स्थेयमेवाप्रमत्तया ॥ ६ ॥
ततो गिरिसुता देवं समालिङ्ग्य पुनः पुनः । समीक्ष्य सस्नेहतरं प्राह गच्छ जयान्धकम् ॥ ७ ॥
ततोऽमरगुरोर्गौरी चन्दनं रोचनाञ्जनम् । प्रतिवन्द्य सुसम्प्रीता पादावेवाभ्यवन्दत ॥ ८ ॥

(फिर) श्रद्धापूर्वक प्रणामकर महेश्वरसे (यह) वाक्य कहा—हे जगन्नाथ ! आप बैठे क्यों हैं ? युद्ध करनेके लिये प्रबल इच्छा रखकर आप उठें । विघ्नेश्वर गणेशके कहनेपर जगत्पति महादेवने अम्बिकासे कहा—मैं अन्धकको मारनेके लिये जाऊँगा, तुम सावधानीसे रहना । उसके बाद पर्वतनन्दिनीने महादेवको बार-बार गले लगाकर एवं प्रेमपूर्ण दृष्टिसे उन्हें देखकर (मङ्गल वचन) कहा—जाइये और अन्धकपर विजय प्राप्त कीजिये । उसके बाद गौरीने देवश्रेष्ठ शंकरको चन्दन, रोचना एवं अञ्जन लगाया तथा अत्यन्त प्रसन्नतापूर्वक उनके चरणोंकी वन्दना की ॥ ५–८ ॥

ततो हरः प्राह वचो यशस्यं मालिनीमपि । जयां च विजयां चैव जयन्तीं चापराजिताम् ॥ ९ ॥
युष्माभिरप्रमत्ताभिः स्थेयं गेहे सुरक्षिते । रक्षणीया प्रयत्नेन गिरिपुत्री प्रमादतः ॥ १० ॥
इति संदिश्य ताः सर्वाः समारुह्य वृषं विभुः । निर्जगाम गृहात् तुष्टो जयेप्सुः शूलधृग् बली ॥ ११ ॥
निर्गच्छतस्तु भवनादीश्वरस्य गणाधिपाः । समन्तात् परिवार्यैव जयशब्दांश्च चक्रिरे ॥ १२ ॥

उसके बाद महादेवने मालिनी, जया, विजया, जयन्ती और अपराजितासे कीर्ति बढ़ानेवाला यह वचन कहा—तुमलोग सुरक्षित घरमें सतर्कतासे रहना और प्रयत्नपूर्वक पार्वतीको असावधानीसे बचाना । उन सभीको इस प्रकार समझाने-बुझानेके बाद वृषभपर सवार होकर शूल धारण करनेवाले विजयाभिलाषी बलशाली भगवान् शंकर (आत्मविश्वासके साथ) संतुष्ट होकर घरसे चल पड़े । घरसे निकलते समय गणाधिपोंने शंकरको चारों ओरसे घेरकर 'जय-जयकार' किया ॥ ९–१२ ॥

कुण्डोदरं भग्नकटिं चकार महोदरं शीर्णशिरःकपालम् ।
कुम्भध्वजं चूर्णितसंधिबन्धं घटोदरं चोरुविभिन्नसंधिम् ॥ ३९ ॥
गणाधिपांस्तान् विमुखान् स कृत्वा बलान्वितो वीरतरोऽसुरेन्द्रः ।
समभ्यधावत् त्वरितो निहन्तुं गणेश्वरान् स्कन्दविशाखमुख्यान् ॥ ४० ॥

तुहुण्डके मारे जाने और गदके पीठ दिखा देनेपर क्रोधरूपी विषको छोड़नेकी कामनावाले प्रलयकालकी अग्निके समान पाँचों गणेश्वर एक साथ दानवश्रेष्ठोंकी सेनामें पैठ गये । अपनी उस सेनाको मारी जाती हुई देखकर वायुके समान तीव्र गतिवाले बलशाली बलिने गदा लेकर विनायकके कुम्भस्थल, मस्तक एवं सूँड़पर वार किया । कुण्डोदरकी कमर तोड़ दी, महोदरके सिरकी खोपड़ीको विधुन दिया, कुम्भध्वजके जोड़ोंको चूर-चूर कर डाला एवं घटोदरकी जाँघोंको तोड़ दिया । उन गणाधिपोंको पीछे भगाकर वीरश्रेष्ठ वह बलशाली असुरेन्द्र तुरन्त स्कन्द, विशाख आदि मुख्य-मुख्य गणेश्वरोंको मारनेके लिये दौड़ पड़ा ॥ ३७–४० ॥

तमापतन्तं भगवान् समीक्ष्य महेश्वरः श्रेष्ठतमं गणानाम् ।
शैलादिमामन्त्र्य वचो बभाषे गच्छस्व दैत्यान् जहि वीर युद्धे ॥ ४१ ॥
इत्येवमुक्तो वृषभध्वजेन वज्रं समादाय शिलादसूनुः ।
बलिं समभ्येत्य जघान मूर्ध्नि सम्मोहितः सोऽवनिमाससाद ॥ ४२ ॥
सम्मोहितं भ्रातृसुतं विदित्वा बली कुजम्भो मुसलं प्रगृह्य ।
सम्भ्रामयंस्तूर्णतरं स वेगात् ससर्ज नन्दिं प्रति जातकोपः ॥ ४३ ॥
तमापतन्तं मुसलं प्रगृह्य करेण तूर्णं भगवान् स नन्दी ।
जघान तेनैव कुजम्भमाहवे स प्राणहीनो निपपात भूमौ ॥ ४४ ॥

भगवान् महेश्वरने उसे आते हुए देखकर गणोंमें सर्वश्रेष्ठ शैलादिको बुलाकर कहा—वीर ! जाओ और संग्राममें दैत्योंको मारो । वृषभध्वजके ऐसा कहनेपर शिलादके पुत्र नन्दीने वज्र ले करके बलिके पास जाकर उसके सिरपर वार किया, जिससे वह अचेत होकर धरतीपर गिर पड़ा । अपने भतीजेको बेहोश जानकर बलवान् कुजम्भने क्रुद्ध हो मुसल लेकर उसे घुमाते हुए नन्दीकी ओर तेजीसे फेंका । भगवान् नन्दीने आते हुए उस मुसलको तुरन्त हाथसे पकड़ लिया और उसीसे युद्धमें कुजम्भको मार दिया । वह प्राणहीन होकर भूमिपर गिर पड़ा ॥ ४१–४४ ॥

हत्वा कुजम्भं मुसलेन नन्दी वज्रेण वीरः शतशो जघान ।
ते वध्यमाना गणनायकेन दुर्योधनं वै शरणं प्रपन्नाः ॥ ४५ ॥
दुर्योधनः प्रेक्ष्य गणाधिपेन वज्रप्रहारैर्निहतान् दितीशान् ।
प्रासं समाविध्य तडित्प्रकाशं नन्दिं प्रचिक्षेप हतोऽसि वै ब्रुवन् ॥ ४६ ॥
तमापतन्तं कुलिशेन नन्दी बिभेद गुह्यं पिशुनो यथा नरः ।
तत्प्रासमालक्ष्य तदा निकृत्तं संवर्त्य मुष्टिं गणमाससाद ॥ ४७ ॥
ततोऽस्य नन्दी कुलिशेन तूर्णं शिरोऽच्छिनत् तालफलप्रकाशम् ।
हतोऽथ भूमौ निपपात वेगाद् दैत्याश्च भीता विगता दिशो दश ॥ ४८ ॥

वीर नन्दीने कुजम्भको मुसलसे मारकर वज्रद्वारा सैकड़ों दानवोंको भी मार डाला । गणनायकद्वारा मारे जा रहे वे सभी दानव दुर्योधनकी शरणमें गये । दुर्योधनने गणाधिपद्वारा वज्रके आघातसे दैत्योंको मारा हुआ देखकर

बिजलीके सदृश प्रकाशसे युक्त प्रास ले लिया तथा 'तुम मारे गये' ऐसा कहते हुए उसे नन्दीकी ओर फेंका। नन्दीने आ रहे उस (प्रास) को वज्रसे इस प्रकार टुकड़े-टुकड़े काट दिया, जैसे चुगलखोर व्यक्ति गुप्त विषयका भेदन कर देता है। उसके बाद उस प्रासको विदीर्ण हुआ देख (दुर्योधन) मुट्ठी बाँधकर गण (नन्दी) के पास पहुँचा। उसके बाद ही नन्दीने शीघ्रतासे तालके समान उसके मस्तकको कुलिशसे काट डाला। मारे जानेपर वह पृथ्वीपर गिर पड़ा और भयभीत हुए सभी दैत्य तेजीसे दसों दिशाओंमें भाग गये ॥ ४५-४८ ॥

ततो हतं स्वं तनयं निरीक्ष्य हस्ती तदा नन्दिनमाजगाम।
प्रगृह्य बाणासनमुग्रवेगं बिभेद बाणैर्यमदण्डकल्पैः ॥ ४९ ॥
गणान् सनन्दीन् वृषभध्वजांस्तान् धाराभिरेवाम्बुधरास्तु शैलान्।
ते च्छाद्यमानासुरबाणजालैर्विनायकाद्या बलिनोऽपि वीराः।
सिंहप्रयुक्ता वृषभा यथैव भयातुरा दुद्रुविरे समन्तात् ॥ ५० ॥
पराङ्मुखान् वीक्ष्य गणान् कुमारः शक्त्या पृषत्कानथ वारयित्वा।
तूर्णं समभ्येत्य रिपुं समीक्ष्य प्रगृह्य शक्त्या हृदये बिभेद ॥ ५१ ॥

शक्तिनिर्भिन्नहृदयो हस्ती भूम्यां पपात ह। ममार चारिपृतना जाता भूयः पराङ्मुखी ॥ ५२ ॥
अमरारिबलं दृष्ट्वा भग्नं क्रुद्धा गणेश्वराः। पुरतो नन्दिनं कृत्वा जिघांसन्ति स्म दानवान् ॥ ५३ ॥
ते वध्यमानाः प्रमथैर्न्याद्यापि पराङ्मुखाः। भूयो निवृत्ता बलिनः कार्त्तस्वरपुरोगमाः ॥ ५४ ॥

हस्ती (नामक असुर) अपने पुत्रको मारा गया देखकर नन्दीके समीप आ गया। उसने धनुष लेकर तीव्र वेगसे यमदण्डके समान बाणोंसे वार किया। बादल जिस प्रकार जलकी धाराओंसे पर्वतोंको ढँक देता है, उसी प्रकार उसने नन्दीके साथ वृषभध्वजके उन गणोंको ढँक दिया। असुरके बाणसमूहसे घिरे वे विनायक आदि बलशाली वीर सिंहके द्वारा आक्रमण किये जानेपर वृषभोंकी भाँति भयसे व्याकुल होकर चारों ओर भागने लगे। कुमारने गणोंको विमुख होते देख शक्तिद्वारा बाणोंको रोक दिया और तुरन्त ही शत्रुके पास पहुँचकर शक्तिसे उसके हृदयको वेध डाला। शक्तिसे हृदयके बिंध जानेपर हस्ती भूमिपर गिर पड़ा तथा मर गया और शत्रुसेना फिर पीठ दिखाकर विमुख हो गयी। दैत्यसेनाको छिन्न-भिन्न हुई देखकर कुपित हुए गणेश्वर नन्दीको आगे कर दानवोंको और मारने लगे, किंतु प्रमथोंद्वारा मारे जा रहे वे सभी विमुख बलशाली कार्त्तस्वरादि दैत्य फिर लौट पड़े ॥ ४९-५४ ॥

तान् निवृत्तान् समीक्ष्यैव क्रोधदीप्तेक्षणः श्वसन्। नन्दिषेणो व्याघ्रमुखो निवृत्तश्चापि वेगवान् ॥ ५५ ॥
तस्मिन् निवृत्ते गणपे पट्टिशाग्रकरे तदा। कार्त्तस्वरो निववृते गदामादाय नारद ॥ ५६ ॥

तमापतन्तं ज्वलनप्रकाशं गणः समीक्ष्यैव महासुरेन्द्रम्।
तं पट्टिशं भ्राम्य जघान मूर्ध्नि कार्त्तस्वरं विस्वरमुन्नदन्तम् ॥ ५७ ॥
तस्मिन् हते भ्रातरि मातुलेये पाशं समाविध्य तुरङ्गकन्धरः।
बबन्ध वीरः सह पट्टिशेन गणेश्वरं व्याघ्रमुखं नन्दिषेणम् ॥ ५८ ॥

नन्दिषेणं तथा बद्धं समीक्ष्य बलिना वरः। विशाखः कुपितोऽभ्येत्य शक्तिपाणिरयस्थितः ॥ ५९ ॥
तं दृष्ट्वा बलिनां श्रेष्ठः पाशपाणिरयःशिराः। संयोधयामास बली विशाखं कुक्कुटध्वजम् ॥ ६० ॥

उन्हें लौटकर आते देख वेगशाली व्याघ्रमुख नन्दिषेण भी क्रोधसे आँखें लाल कर हाँफता हुआ लौट पड़ा। नारदजी! उसके बाद हाथके अग्रभागमें पट्टिश लिये हुए उस गणाधिपके लौटनेपर कार्त्तस्वर भी

ततः कुजम्भो जम्भश्च बलो वृत्रस्त्वयःशिराः । पञ्च दानवशार्दूला नन्दिनं समुपाद्रवन् ॥ १८ ॥
तथाऽन्ये दानवश्रेष्ठा मयह्लादपुरोगमाः । नानाप्रहरणा युद्धे गणनाथमभिद्रवन् ॥ १९ ॥
ततो गणानामधिपं कुट्यमानं महाबलैः । समपश्यन्त देवास्तं पितामहपुरोगमाः ॥ २० ॥
तं दृष्ट्वा भगवान् ब्रह्मा प्राह शक्रपुरोगमान् । साहाय्यं क्रियतां शम्भोरेतदन्तरमुत्तमम् ॥ २१ ॥

उसके बाद कुजम्भ, जम्भ, बल, वृत्र और अयःशिरा नामके पाँच श्रेष्ठ दानव नन्दीकी ओर दौड़े । इसी प्रकार युद्धमें भाँति-भाँतिके अस्त्र-शस्त्रोंको धारण करनेवाले मय एवं ह्लाद आदि दानवश्रेष्ठोंने भी नन्दीका पीछा किया । फिर पितामहादि देवोंने महाबली दानवोंके द्वारा कूटे जा रहे गणाधिपको देखा । भगवान् ब्रह्माने उसे देखकर इन्द्र आदि देवताओंसे कहा—आप लोग इस उत्तम (उपयुक्त) अवसरपर शम्भुकी सहायता करें ॥ १८–२१ ॥

पितामहोक्तं वचनं श्रुत्वा देवाः सवासवाः । समापतन्त वेगेन शिवसैन्यमथाम्बरात् ॥ २२ ॥
तेषामापततां वेगः प्रमथानां बले बभौ । आपगानां महावेगं पतन्तीनां महार्णवे ॥ २३ ॥
ततो हलहलाशब्दः समजायत चोभयोः । बलयोर्घोरसंकाशो सुरप्रमथयोरथ ॥ २४ ॥
तमन्तरमुपागम्य नन्दी संगृह्य वेगवान् । रथाद् भार्गवमाक्रामत् सिंहः क्षुद्रमृगं यथा ॥ २५ ॥
तमादाय हराभ्याशमागमद् गणनायकः । निपात्य रक्षिणः सर्वानथ शुक्रं न्यवेदयत् ॥ २६ ॥
तमानीतं कविं शर्वः प्राक्षिपद् वदने प्रभुः । भार्गवं त्वचावृततनुं जठरे स न्यवेशयत् ॥ २७ ॥
स शम्भुना कविश्रेष्ठो ग्रस्तो जठरमास्थितः । तुष्टाव भगवन्तं तं मुनिर्वाग्भिरथादरात् ॥ २८ ॥

पितामहके कहे हुए वचनको सुनकर इन्द्र आदि देवता आकाशमार्गसे जल्दी ही शिवकी सेनामें आ गये । समुद्रमें जाती हुई नदियोंके महावेगके सदृश प्रमथोंकी सेनामें (आकाशसे) आते हुए देवताओंका वेग सुशोभित हुआ । उसके बाद प्रमथों और असुरों—दोनों पक्षोंकी सेनाओंमें भीषण 'हलहला' शब्द उत्पन्न हुआ । उसी समय अवसर पाकर तीव्र गतिवाले नन्दी, जिस प्रकार सिंह क्षुद्र मृगको दबोच लेता है, उसी प्रकार भार्गवको लेकर रथसे भाग चले । गणनायक उन्हें लेकर सभी रक्षा करनेवालोंको मारते हुए शंकरके पास पहुँच गये । शुक्राचार्यको उन्होंने उनके निकट निवेदित कर दिया । समर्थ शंकरने लाये गये उन शुक्रको अपने मुखमें फेंका और अक्षुण्ण शरीरवाले भार्गवको अपने उदरमें (ज्यों-का-त्यों) रख लिया । शम्भुसे ग्रस्त होकर उनके उदरमें स्थित हुए वे मुनिश्रेष्ठ शुक्र प्रेमपूर्वक उन भगवान्की स्तुति करने लगे ॥ २२–२८ ॥

शुक्र उवाच

वरदाय नमस्तुभ्यं हराय गुणशालिने । शङ्कराय महेशाय त्र्यम्बकाय नमो [illegible] ॥ २९ ॥
जीवनाय नमस्तुभ्यं लोकनाथ वृषाकपे । मदनाग्ने कालशत्रो वामदेवाय ते [illegible] ॥ ३० ॥
स्थाणवे विश्वरूपाय वामनाय सदागते । महादेवाय शर्वाय ईश्वराय नमो [illegible] ॥ ३१ ॥

त्रिनयन हर भव शङ्कर उमापते जीमूतकेतो गुहागृह श्मशाननिरत भूतिविलेपन शूलपाणे पशुपते गोपते तत्पुरुषसत्तम नमो नमस्ते ।

इत्थं स्तुतः कविवरेण हरोऽथ भक्त्या प्रीतो वरं वरय दद्मि तवेत्युवाच ।
स प्राह देववर देहि वरं [illegible] जठरात् प्रतिनिर्गमोऽस्तु ॥ ३२ ॥
ततो हरोऽक्षीणि तदा [illegible] विनिर्गमस्व ।
इत्युक्तमात्रो विभुना [illegible] ॥ ३३ ॥

शुक्रने कहा—प्रभो! गुणसे सम्पन्न आप वरदानी हरको नमस्कार है। शंकर महेश, त्रिनेत्रको बार-बार नमस्कार है। लोकेश स्वामिन्! कृपारूपे! आप जीवनस्वरूपको नमस्कार है। हे कामनाशक! हे अग्निस्वरूप! कालशत्रो! आप वामदेवको नमस्कार है। स्थाणु, विश्वरूप, वामन, सदागति, महादेव, शर्व और ईश्वर! आपको बार-बार नमस्कार है। हे त्रिनयन! हे हर! हे भव! हे शंकर! हे उमापते! हे जीमूतकेतो! हे गुहागृह! हे श्मशाननिरत! हे भूतिविलेपन! हे त्रिशूलधारिन्! हे पशुपते! हे गोपते! हे अव्य परमपुरुष! आपको बार-बार नमस्कार है। इस प्रकार कविवर (शुक्राचार्य)के भक्तिपूर्वक स्तुति करनेपर शंकरने कहा—मैं तुमसे प्रसन्न हूँ। तुम वर माँगो, मैं तुम्हें वर दूँगा। उन्होंने कहा—हे शंकर! इस समय मुझे यही वर दीजिये कि मैं पुनः आपके उदरसे बाहर निकलूँ। उसके बाद शंकरने नेत्रोंको बंदकर कहा—हे द्विजेन्द्र! अब तुम बाहर निकल आओ! (परंतु) शंकरके इस प्रकार कहनेपर भी वे भार्गवश्रेष्ठ शुक्राचार्य उनके उदरमें विचरण करने लगे॥ २०–३३॥

परिभ्रमन् ददर्शाथ शम्भोरेवोदरे कविः। भुवनार्णवपातालान् भूतान् स्थावरजङ्गमे॥ ३४॥
आदित्यान् वसवो रुद्रान् विश्वेदेवान् गणांस्तथा। यक्षान् किम्पुरुषादींश्च गन्धर्वाप्सरसां गणान्॥ ३५॥
मुनीन् मनुजसाध्यांश्च पशुकीटपिपीलिकान्। वृक्षगुल्मान् गिरीन् वल्ल्यः फलमूलौषधानि च॥ ३६॥
स्थलस्थांश्च जलस्थांश्चानिमिषान्निमिषानपि। चतुष्पदान् सद्विपदान् स्थावरान् जङ्गमानपि॥ ३७॥
अव्यक्तांश्चैव व्यक्तांश्च सगुणान्निर्गुणानपि।
स दृष्ट्वा कौतुकाविष्टः परिबभ्राम भार्गवः। तत्रासतो भार्गवस्य दिव्यः संवत्सरो गतः॥ ३८॥
न चान्तमलभद् ब्रह्मंस्ततः श्रान्तोऽभवत् कविः।
स श्रान्तं वीक्ष्य चात्मानं नाऽलभन्निर्गमं यदा। भक्तिनम्रो महादेवं शरणं समुपागमत्॥ ३९॥

(भगवान् शंकरके उदरमें) विचरण करते हुए शुक्राचार्यने शंकरके ही उदरमें चराचर प्राणियोंसे व्याप्त सारा जगत्, समुद्र एवं पातालोंको देखा। आदित्यों, वसुओं, रुद्रों, विश्वेदेवों, गणों, यक्षों, किम्पुरुषों, गन्धर्वों, अप्सराओं, मुनियों, मनुष्यों, साध्यों, पशुओं, कीटों, पिपीलिकाओं, वृक्षों, गुल्मों, पर्वतों, लताओं, फलों, मूलों, ओषधियों, स्थलपर रहनेवाले, जलमें रहनेवालों, अनिमिषों, निमिषों, चतुष्पदों, द्विपदों, स्थावरों, जङ्गमों, अव्यक्तों, व्यक्तों, सगुणों एवं निर्गुणोंको देखते हुए कुतूहलवश (उसी उदरमें ही) भार्गव चारों ओर घूमने लगे। भृगुवंशी शुक्राचार्यको वहाँ इस प्रकार रहते हुए एक दिव्य वर्ष बीत गया। परंतु ब्रह्मन्! शुक्रको अन्त नहीं मिला और वे थक गये। स्वयंको थका हुआ देखकर और बाहर निकलनेका मार्ग न पाकर आत्मासे ध्यान करनेवाले वे भक्तिसे नम्र होकर महादेवकी शरणमें आ गये॥ ३४–३९॥

शुक्र उवाच

विश्वरूप महारूप विश्वरूपाक्षसूत्रधृक्। सहस्राक्ष महादेव त्वामहं शरणं गतः॥ ४०॥
नमोऽस्तु ते शङ्कर शर्व शम्भो सहस्रनेत्राङ्घ्रिभुजङ्गभूषण।
दृष्ट्वैव सर्वान् भुवनांस्तवोदरे श्रान्तो भवन्तं शरणं प्रपन्नः॥ ४१॥
इत्येवमुक्ते वचने महात्मा शम्भुर्वचः प्राह ततो विहस्य।
निर्गच्छ पुत्रोऽसि ममाधुना त्वं शिश्नेन भो भार्गववंशचन्द्र॥ ४२॥
नाम्ना तु शुक्रेति चराचरास्त्वां स्तोष्यन्ति नैवात्र विचारमन्यत्।
इत्येवमुक्त्वा भगवान् मुमोच शिश्नेन शुक्रं स च निर्जगाम॥ ४३॥
विनिर्गतो भार्गववंशचन्द्रः शुक्रत्वमापद्य महानुभावः।
प्रणम्य शम्भुं स जगाम तूर्णं महासुराणां बलमुग्रवीर्यम्॥ ४४॥

शुक्रने कहा—हे विश्वरूप ! हे महारूप ! हे विश्वरूपाक्ष ! हे सूत्रधारिन् ! हे सहस्राक्ष ! हे महादेव ! मैं आपकी शरणमें आया हूँ। हे शंकर ! हे शर्व ! हे शम्भो ! हे सहस्रनेत्राङ्घ्रि ! हे सर्पभूषण ! आपके उदरमें सभी भुवनोंको देखते-देखते थककर मैं आपकी शरणमें आया हूँ। इस प्रकारके वचन कहनेपर महात्मा शम्भुने हँसकर यह वचन कहा—अब तुम मेरे पुत्र हो गये हो। इसलिये हे भार्गववंशके चन्द्र ! मेरे शिश्नसे बाहर निकलो। अब समस्त चराचर जगत् तुम्हारी स्तुति शुक्रके नामसे करेगा। इसमें किसी अन्य प्रकारके विचारका स्थान नहीं है। ऐसा कहकर भगवान्‌ने शिश्न-मार्गसे शुक्रको मुक्त कर दिया और वे बाहर निकल आये। शुक्रत्व प्राप्तकर बाहर निकले ओजस्वी महानुभाव भार्गववंशचन्द्र शम्भुको प्रणामकर शीघ्र महासुरोंकी सेनामें चले गये ॥ ४०—४४ ॥

भार्गवे पुनरायाते दानवा मुदिताभवन्। पुनर्युद्धाय विदधुर्मतिं सह गणेश्वरैः ॥ ४५ ॥
गणेश्वरास्तानसुरान् सहामरगणैरथ। युयुधुः संकुलं युद्धं सर्व एव जयेप्सवः ॥ ४६ ॥
ततोऽसुरगणानां च देवतानां च युध्यताम्। द्वन्द्वयुद्धं समभवद् घोररूपं तपोधन ॥ ४७ ॥
अन्धको नन्दिनं युद्धे शङ्कुकर्णं त्वयःशिराः। कुम्भध्वजं बलिर्धीमान् नन्दिषेणं विरोचनः ॥ ४८ ॥

शुक्राचार्यके वापस आ जानेपर दानव प्रसन्न हो गये। उन्होंने गणेश्वरोंके साथ फिर युद्ध करनेका विचार किया। उसके बाद देवताओंसहित विजयकी कामनावाले सभी गणेश्वरोंने उन असुरोंसे भयंकर युद्ध किया। हे तपोधन ! उसके बाद युद्ध करनेमें लगे हुए असुरगणों एवं देवताओंमें भयानक द्वन्द्वयुद्ध हुआ। अन्धक नन्दीके साथ, अयःशिरा शंकुकर्णके साथ, बुद्धिमान् बलि कुम्भध्वजके साथ एवं विरोचन नन्दिषेणके साथ भिड़ गये ॥ ४५—४८ ॥

अश्वग्रीवो विशाखं च शाखो वृत्रमयोधयत्। वाणस्तथा नैगमेयं वलं राक्षसपुङ्गवः ॥ ४९ ॥
विनायको महावीर्यः परश्वधधरो रणे।
संक्रुद्धो राक्षसश्रेष्ठं तुहुण्डं समयोधयत्। दुर्योधनश्च वलिनं घण्टाकर्णमयोधयत् ॥ ५० ॥
हस्ती च कुण्डजठरं ह्रादो वीरं घटोदरम्।
एते हि वलिनां श्रेष्ठा दानवाः प्रमथास्तथा। संयोधयन्ति देवर्षे दिव्याब्दानां शतानि षट् ॥ ५१ ॥
शतक्रतुमथायान्तं वज्रपाणिमभिस्थितम्। वारयामास वलवाञ् जम्भो नाम महासुरः ॥ ५२ ॥

अश्वग्रीव विशाखके साथ और शाख वृत्रके साथ, बाण नैगमेयके साथ और राक्षसपुंगव बलके साथ लड़ने लगा। युद्धमें कुपित होकर परशु धारण करनेवाले महापराक्रमी विनायक राक्षसश्रेष्ठ तुहुण्डके साथ भिड़ गये और दुर्योधन बलशाली घण्टाकर्णके साथ युद्ध करने लगा। हस्ती कुण्डजठरके साथ और ह्राद वीर घटोदरसे लड़ने लगा। देवर्षे ! बलवानोंमें श्रेष्ठ ये सभी दानव एवं प्रमथगण आपसमें छः सौ दिव्य वर्षोंतक संग्राम करते रहे। जम्भ नामके बलशाली असुरने सामने आ रहे वज्रपाणि इन्द्रको रोक लिया ॥ ४९—५२ ॥

शम्भुनामाऽसुरपतिः स ब्रह्माणमयोधयत्। महौजसं कुजम्भश्च विष्णुं दैत्यान्तकारिणम् ॥ ५३ ॥
विवस्वन्तं रणे शाल्वो वरुणं त्रिशिरास्तथा। द्विमूर्धा पवनं सोमं राहुर्मित्रं विरूपधृक् ॥ ५४ ॥
अष्टौ ये वसवः ख्याता धरायास्ते महासुरान्। अष्टावेव महेष्वासान् वारयामासुराहवे ॥ ५५ ॥
शरभः शलभः पाकः पुरोऽथ विपृथुः पृथुः। वातापी चेल्वलश्चैव नानाशस्त्रास्त्रयोधिनः ॥ ५६ ॥
विश्वेदेवगणान् सर्वान् विष्वक्सेनपुरोगमान्। एक एव रणे रौद्रः कालनेमिर्महासुरः ॥ ५७ ॥

*

शम्बु नामका असुरराज ब्रह्मासे लड़ने लगा और कुजम्भ दैत्योंका अन्त करनेवाले महान् ओजस्वी विष्णुसे युद्ध करने लगा। शाल्व सूर्यसे, त्रिशिरा वरुणसे, द्विमूर्धा पवनसे, राहु सोमसे और विरूपाक्ष मित्रसे लड़ने लगा। धरादि नामसे विख्यात आठ वसुओंने सरभ, शलभ, पाक, पुर, विवृत्त, पृथु, वातापी और इल्वल—इन आठ महान् धनुर्धारी असुरोंको युद्धमें लड़कर (पीछे) हटा दिया। ये असुर भाँति-भाँतिके शस्त्र और अस्त्र लेकर लड़ने लगे। कालनेमि नामका भयंकर महासुर युद्धमें अकेला ही विष्वक्सेन आदि विश्वेदेव गणोंसे युद्ध करने लगा॥ ५३—५७॥

एकादशैव ये रुद्रास्तानेकोऽपि रणोत्कटः। योधयामास तेजस्वी विद्युन्माली महासुरः॥ ५८॥
द्वावश्विनौ च नरको भास्करान्वै शम्बरः। साध्यान् मरुद्गणांश्चैव निवातकवचादयः॥ ५९॥
एवं द्वन्द्वसहस्राणि प्रमथामरदानवैः। कृतानि च सुपाश्चानां द्वारातीः षण्महामुने॥ ६०॥
यदा न शकिता योद्धुं दैवतैरमरारयः। तदा मायां समाश्रित्य प्रसन्तः क्रमशोऽव्ययान्॥ ६१॥

रणमें उत्कट तेजवाले विद्युन्माली नामके महासुरने अकेले ही एकादश रुद्रोंका (डटकर) सामना किया। नरकने दोनों अश्विनीकुमारोंसे, शम्बरने (द्वादश) भास्करोंसे एवं निवातकवचादिने साध्यों तथा मरुद्गणोंसे युद्ध किया। महामुने! इस प्रकार आठ दिव्य वर्षोतक प्रमथों एवं दानवोंके हजारोंकी संख्यामें दो-दो जोड़ोंके वीर आपसमें द्वन्द्वयुद्ध करते रहे। जब असुरगण इस प्रकार देवोंसे युद्ध करनेमें सामर्थ्यहीन हो गये, तब उन लोगोंने मायाका सहारा लेकर देवोंको क्रमशः निगलना प्रारम्भ कर दिया॥ ५८—६१॥

ततोऽभवच्छैलपृष्ठं प्रावृडभ्रसमप्रभैः। आवृतं वर्जितं सर्वैः प्रमथैरमरैरपि॥ ६२॥
दृष्ट्वा शून्यं गिरिप्रस्थं ग्रस्तांश्च प्रमथामरान्। क्रोधादुत्पादयामास रुद्रो जृम्भायिकां वशी॥ ६३॥
तया स्पृष्टा दनुसुता अलसा मन्दभाषिणः। वदनं विवृतं कृत्वा मुक्तशस्त्रं विजृम्भिरे॥ ६४॥
जृम्भमाणेषु च तदा दानवेषु गणेश्वराः। सुराश्च निर्ययुस्तूर्णं दैत्यदेहेभ्य आकुलाः॥ ६५॥

उसके बाद सारे प्रमथों और देवोंसे रहित पर्वत वर्षाकालीन मेघके समान दानवोंसे ढक गया। पर्वत-प्रान्तको शून्य और प्रमथों तथा देवोंको ग्रसित हुआ देखकर जितेन्द्रिय रुद्रने क्रोधसे जृम्भायिकाको उत्पन्न किया। उसके स्पर्श करनेपर अस्त्रोंको छोड़कर धीरे-धीरे बोलते हुए आलस्यसे पूर्ण दानव मुखको विवर्ण बनाकर जँभाई लेने लगे। दानवोंके जँभाई लेते समय आकुल होकर गणेश्वर एवं देवतालोग दैत्योंकी देहसे अविलम्ब बाहर निकल गये॥ ६२—६५॥

मेघप्रभेभ्यो दैत्येभ्यो निर्गच्छन्तोऽमरोत्तमाः। शोभन्ते पद्मपत्राक्षा मेघेभ्य इव विद्युतः॥ ६६॥
गणामरेषु च समं निर्गतेषु तपोधन। अयुध्यन्त महात्मानो भूय एवातिकोपिताः॥ ६७॥
ततस्तु देवैः सगणैः दानवाः शर्वपालितैः। पराजीयन्त संग्रामे भूयो भूयस्त्वहर्निशम्॥ ६८॥
ततस्त्रिनेत्रः स्वां संध्यां सप्तान्दशतिके गते। कालेऽभ्युपासत तदा सोऽष्टादशभुजोऽव्ययः॥ ६९॥

मेघके समान दैत्योंके शरीरसे बाहर निकल रहे कमलके सदृश आँखोंवाले श्रेष्ठ देवगण बादलसे निकलनेवाली बिजलीकी भाँति शोभित हो रहे थे। तपोधन! गणों और देवोंके बाहर आ जानेपर वे महान् (देव) अत्यन्त कुपित होकर युद्ध करने लगे। उसके बाद शम्भुसे पालित गणों एवं देवोंने युद्धमें दानवोंको दिन-रात बारम्बार हराया। उसके बाद सात सौ वर्षोंका समय बीत जानेपर अठारह भुजाओंवाले अविनाशी त्र्यम्बक शंकर अपनी नित्यक्रियासे सन्ध्या करने लगे॥ ६६—६९॥

संस्पृश्यापः सरस्वत्यां स्नात्वा च विधिना हरः। कृतार्थो भक्तिमान् मूर्ध्ना पुष्पाञ्जलिमुपाक्षिपत् ॥ ७० ॥
ततो ननाम शिरसा ततश्चक्रे प्रदक्षिणम्। हिरण्यगर्भेत्यादित्यमुपतस्थे जजाप ह ॥ ७१ ॥
त्वष्ट्रे नमो नमस्तेऽस्तु सम्यगुच्चार्य शूलधृक्। ननर्त भावगम्भीरं दोर्दण्डं भ्रामयन् बलात् ॥ ७२ ॥
परिनृत्यति देवेशे गणाश्चैवामरास्तथा। नृत्यन्ते भावसंयुक्ता हरस्यानुविलासिनः ॥ ७३ ॥

उन भक्तिमान् शंकरने जलका स्पर्शकर (आचमनकर) विधिपूर्वक सरस्वतीमें स्नान किया। वे कृतार्थ हो गये। उन्होंने पुष्पाञ्जलि सिरसे लगाकर समर्पित की। उसके बाद उन्होंने सिर झुकाकर प्रणाम एवं उसके पश्चात् प्रदक्षिणा कर 'हिरण्यगर्भ' इत्यादि मन्त्रसे सूर्यकी वन्दना की और जप किया। उसके बाद **'त्वष्ट्रे नमो नमस्तेऽस्तु'** इसका स्पष्टरूपसे उच्चारण कर शूलपाणि शंकर बलपूर्वक अपना बाहुदण्ड घुमाते हुए भाव-गम्भीर होकर नाचने लगे। देवेश्वरके नाचनेपर उनके अनुगामी गण और देवता भी (वैसे ही) भाव-विभोर होकर नाचने लगे ॥ ७०–७३ ॥

सन्ध्यामुपास्य देवेशः परिनृत्य यथेच्छया। युद्धाय दानवैः सार्द्धं मतिं भूयः समादधे ॥ ७४ ॥
ततोऽमरगणैः सर्वैस्त्रिनेत्रभुजपालितैः। दानवा निर्जिताः सर्वे बलिभिर्भयवर्जितैः ॥ ७५ ॥
स्वबलं निर्जितं दृष्ट्वा मत्वाऽजेयं च शङ्करम्। अन्धकः सुन्दमाहूय इदं वचनमब्रवीत् ॥ ७६ ॥
सुन्द भ्राताऽसि मे वीर विश्वास्यः सर्ववस्तुषु। तद्वदाम्यद्य यद्वाक्यं तच्छ्रुत्वा यत्क्षमं कुरु ॥ ७७ ॥

सन्ध्योपासन करके इच्छानुकूल नृत्य करनेके बाद शंकरने फिर दानवोंसे संग्राम करनेका विचार किया। फिर तो शंकरकी भुजाओंसे रक्षित बलशाली और निर्भय सम्पूर्ण देवताओंने सारे दानवोंको जीत लिया। अपनी सेनाको पराजित देखकर तथा महादेवको पराजित करनेमें कठिनाई जान करके अन्धकने सुन्दको बुलाकर यह वचन कहा—वीर सुन्द! तुम मेरे भाई हो और सभी विषयोंमें तुम मेरे विश्वासी हो। इसलिये आज मैं तुमसे जो कहता हूँ, उसे सुनकर यथाशक्ति उसे पूर्ण करो ॥ ७४–७७ ॥

दुर्जयोऽसौ रणपटुर्धर्मात्मा कारणान्तरैः। समास्ते हि हृदये पद्माक्षी शैलनन्दिनी ॥ ७८ ॥
तदुत्तिष्ठ गच्छामो यत्रास्ते चारुहासिनी। तत्रैनां मोहयिष्यामि हररूपेण दानव ॥ ७९ ॥
भवान् भवस्यानुचरो भव नन्दी गणेश्वरः। ततो गत्वाऽथ भुक्त्वा तां जेष्यामि प्रमथान् सुरान् ॥ ८० ॥
इत्येवमुक्ते वचने बाढं सुन्दोऽभ्यभाषत। समजायत शैलादिरन्धकः शङ्करोऽप्यभूत् ॥ ८१ ॥

किन्हीं मुख्य कारणोंसे युद्ध करनेमें परम चतुर ये धर्मात्मा दुर्जेय हैं। मेरे हृदयमें कमलनयनी पार्वती बसी हुई हैं। अतः उठो; हम वहाँ चलें, जहाँ वह मधुर मुसकानवाली स्थित है। दानव! वहाँ मैं शंकरका रूप धारण करके उसे मुग्ध कर दूँगा (भुलावेमें डाल दूँगा)। तुम शंकरका अनुचर गणेश्वर नन्दी बनो। तब वहाँ पहुँचकर और उसका सुख भोगकर प्रमथों एवं देवोंको जीतूँगा। ऐसा कहनेपर सुन्दने कहा—ठीक है। उसके बाद वह शैलादि (नन्दी) बन गया और अन्धक शिव बन गया ॥ ७८–८१ ॥

नन्दिरुद्रौ ततो भूत्वा महासुरचमूपती। सम्प्राप्तौ मन्दरगिरिं प्रहारैः क्षतविग्रहौ ॥ ८२ ॥
हस्तमालम्ब्य सुन्दस्य अन्धको हरमन्दिरम्। विवेश निर्विशङ्केन चित्तेनासुरसत्तमः ॥ ८३ ॥
ततो गिरिसुता दूरादायान्तं वीक्ष्य चान्धकम्। महेश्वरवपुश्छन्नं प्रहारैर्जर्जरच्छविम् ॥ ८४ ॥
सुन्दं शैलादिरूपस्थमपश्यच्चाविरात् ततः। तं दृष्ट्वा मालिनीं प्राह सुयशां विजयां जयाम् ॥ ८५ ॥

उसके बाद महासुर (अन्धक) और सेनापति (सुन्द) शत्रुओंकी मारसे अधिक घायल हुए शरीरवाले रुद्र और नन्दीका रूप धारण कर मन्दरगिरिपर पहुँचे। असुरश्रेष्ठ अन्धक सुन्दका हाथ पकड़कर निडर होकर महादेवके मन्दिरमें घुस गया। उसके बाद शैलादि नन्दीके रूपमें स्थित सुन्दको पकड़कर मारोंसे जर्जर महादेवके शरीरमें छिपे अन्धकको दूरसे आते देखकर पार्वतीने यशस्विनी मालिनी, विजया तथा जयासे कहा—॥८२–८५॥

जये पश्यस्व देवस्य मदर्थे विग्रहं कृतम्। शत्रुभिर्दानववरैस्तदुत्तिष्ठस्व सत्वरम्॥८६॥
घृतमानय पौराणं धीजिकां लवणं दधि। व्रणभङ्गं करिष्यामि स्वयमेव पिनाकिनः॥८७॥
कुरुष्व शीघ्रं सुयशो स्वभर्तुर्व्रणनाशनम्। इत्येवमुक्त्वा वचनं समुत्थाय वरासनात्॥८८॥
अभ्युद्ययौ तदा भक्त्या मन्यमाना वृषध्वजम्। शूलपाणेस्ततः स्थिता रूपं चिह्नानि यत्नतः॥८९॥
मन्वियेव ततो ब्रह्मन्नोभौ पार्श्वस्थितौ कुचौ। सा ज्ञात्वा दानवं रौद्रं मायाच्छादितविग्रहम्॥९०॥

जये! देखो, मेरे स्वामीके शरीरको मेरे लिये दानव-शत्रुओंने किस प्रकार जर्जरित कर डाला है। इसलिये अविलम्ब उठो। पुराना घी, बीजिका, लवण और दही ले आओ। पिनाक धारण करनेवाले शंकरके घावोंको मैं स्वयं ही भरूँगी। यशस्विनि! शीघ्र अपने स्वामीके घावोंको भरो—ऐसा कहते हुए आसनसे उतरकर उसे वृषध्वज शंकर समझती हुई वे भक्तिपूर्वक उसके पास गयीं। उसके बाद खड़ी होकर वे शंकरके रूप एवं चिह्नोंको भलीभाँति देखने लगीं। ब्रह्मन्! उन्होंने देखा कि उसकी बगलमें स्थित दोनों कुच नहीं हैं। इसलिये उन्हें यह मालूम हो गया कि यह मायासे छिपे शरीरवाला भयानक दानव है॥८६–९०॥

अपयानं तदा चक्रे गिरिराजसुता मुने। देव्याश्चिन्तितमाज्ञाय सुन्दं त्यक्त्वान्धकोऽसुरः॥९१॥
समाद्रवत वेगेन हरकान्तां विभावरीम्। समाद्रवत दैतेयो येन मार्गेण साऽगमत्॥९२॥
अपस्कारान्तरं भञ्जन् पादप्लुतिभिरातुलः। तमापतन्तं दृष्ट्वैव गिरिजा प्राद्रवद् भयात्॥९३॥
गृहं त्यक्त्वा ह्युपवनं सखीभिः सहिता तदा। तत्राप्यनुजगामासौ मदान्धो मुनिपुङ्गव॥९४॥
तथापि न शशापैनं तपसो गोपनाय तु। तद्भयादाविशद् गौरी श्वेतार्ककुसुमं शुचि॥९५॥

मुने! उसके बाद गिरिराजकी कन्या भाग चलीं। देवीके विचारको समझकर अन्धकासुर सुन्दको छोड़कर शीघ्रतापूर्वक शंकरप्रिया विभावरीके पीछे उसी रास्तेसे दौड़ा, जिससे वे गयी थीं। चरणके चपेटोंसे राहकी रुकावटोंको चूर-चूर करते हुए वह अधीरतापूर्वक दौड़ पड़ा। उसे आते देखकर गिरितनया भयसे (और) भाग चलीं। मुनिवर! उसके बाद देवी सखियोंके साथ घर छोड़कर उपवनमें चली गयीं। वहाँ भी मदान्ध-(अन्धक-) ने उनका पीछा किया। इतनेपर भी अपने तपकी रक्षाके लिये उन्होंने उसे शाप नहीं दिया। किंतु गौरी स्वयं उसके डरसे पवित्र सफेद अर्कके फूलमें छिप गयीं॥९१–९५॥

विजयाद्या महागुल्मे सम्प्रयाता लयं मुने। नष्टायामथ पार्वत्यां भूयो हैरण्यलोचनिः॥९६॥
सुन्दं हस्ते समादाय ससैन्यं पुनरागमत्। अन्धके पुनरायाते सबलं मुनिसत्तम॥९७॥
प्रावर्तत महायुद्धं प्रमथासुरयोरथ। ततोऽमरगणश्रेष्ठो विष्णुश्चक्रगदाधरः॥९८॥
निजघानासुरबलं शङ्करप्रियकाम्यया। शार्ङ्गचापच्युतैर्बाणैः संस्यूता दानवर्षभाः॥९९॥
पञ्च षट् सप्त चाष्टौ वा प्रभ्रपादैर्घना इव। गदया कांश्चिदवधीच्चक्रेणान्यान् जनार्दनः॥१००॥
खड्गेन च चकर्तान्यान् दृष्ट्वान्यान् भस्मसाद् व्यधात्। हलेनाकृष्य चैवान्यान् मुसलेन व्यचूर्णयत्॥१०१॥

मुने ! विजया आदि भी वहीं झाड़ियोंमें छिप गयीं। उसके बाद पार्वतीके अदृश्य हो जानेपर हिरण्याक्षका पुत्र (अन्धक) सुन्दका हाथ पकड़कर पुनः अपनी सेनामें वापस आ गया। मुनिसत्तम ! अन्धकके अपनी सेनामें पुनः लौट आनेपर प्रमथों और असुरोंमें घमासान लड़ाई होने लगी। उसके बाद अनङ्गोंमें श्रेष्ठ चक्र एवं गदा धारण करनेवाले विष्णुभगवान् शंकरका प्रिय करनेकी इच्छासे असुर-सेनाका संहार करने लगे। शार्ङ्गनामक धनुससे निकले हुए बाणोंसे पाँच-पाँच, छः-छः, सात-सात, आठ-आठ श्रेष्ठ दानव उसी प्रकार विदीर्ण होने लगे जैसे सूर्यकी किरणोंसे 'घन' (अन्धकार) विदीर्ण हो जाते हैं। जनार्दनने कुछको गदासे तथा कुछको चक्रसे मार डाला। किन्हींको तलवारसे काट डाला और किन्हींको देखकर ही भस्म कर दिया तथा कुछ असुरोंको हलद्वारा खींचकर मूसलसे चूर्ण-विचूर्ण कर दिया ॥ ९६–१०१ ॥

गरुडः पक्षपाताभ्यां तुण्डेनाप्युरसाऽहनत्। स चादिपुरुषो धाता पुराणः प्रपितामहः ॥१०२॥
भ्रामयन् विपुलं पद्ममभ्यषिञ्चत वारिणा। संस्पृष्टा ब्रह्मतोयेन सर्वतीर्थमयेन हि ॥१०३॥
गणामरगणाश्चासन् नवनागशताधिकाः। दानवास्तेन तोयेन संस्पृष्टाश्चाघहारिणा ॥१०४॥
सवाहनाः क्षयं जग्मुः कुलिशेनेव पर्वताः। दृष्ट्वा ब्रह्महरी युद्धे घातयन्तौ महासुरान् ॥१०५॥
शतक्रतुश्च दुद्राव प्रगृह्य कुलिशं बली। तमापतन्तं सम्प्रेक्ष्य बलो दानवसत्तमः ॥१०६॥
मुक्त्वा देवं गदापाणिं विमानस्थं च पद्मजम्।
शक्रमेवाद्रवद् योद्धुं मुष्टिमुद्यम्य नारद। बलवान् दानवपतिरजेयो देवदानवैः ॥१०७॥

गरुड़ने अपने दोनों डैनोंकी मारसे चोंच तथा छातीके बलसे अनेक दैत्योंको मौतके घाट उतार दिया। पुरातन आदिपुरुष धाता प्रपितामहने विशाल कमलको घुमाते हुए सभी (देवगणों) को जलसे अभिषिञ्चित किया। सर्वतीर्थरूप ब्रह्म जलका स्पर्श होनेसे गण तथा देवतालोग नौजवान हाथियोंसे भी अधिक पराक्रमवाले हो गये। और सौ, पाप दूर करनेवाले उस जलके स्पर्शके प्रभावसे सवारीके साथ दानव ऐसे नष्ट होने लगे जैसे वज्रसे पर्वत नष्ट हो जाते हैं। ब्रह्मा और विष्णुको संग्राममें महासुरोंको मारते देखकर (उत्साहमें आकर) बलशाली इन्द्र भी अपना वज्र लेकर दौड़ पड़े। [पुलस्त्यजी कहते हैं—] नारदजी ! उन्हें आते देखकर देवों तथा दानवोंसे अजेय शक्तिशाली श्रेष्ठ दानवपति बल, गदाधर विष्णु और विमानारूढ ब्रह्मासे लड़ना छोड़कर मुट्ठी तानकर इन्द्रसे ही युद्ध करनेके लिये दौड़ पड़ा ॥ १०२–१०७ ॥

तमापतन्तं त्रिदशेश्वरस्तु दोष्णां सहस्रेण यथाबलेन।
वज्रं परिभ्राम्य बलस्य मूर्ध्नि चिक्षेप हे मूढ हतोऽस्युदीर्य ॥ १०८ ॥
स तस्य मूर्ध्नि प्रवरोऽपि वज्रो जगाम तूर्णं हि सहस्रधा मुने।
बलोऽद्रवद् देवपतिश्च भीतः पराङ्मुखोऽभूत् समरान्महर्षे ॥ १०९ ॥
तं चापि जम्भो विमुखं निरीक्ष्य भूत्वाऽग्रतः प्राह न युक्तमेतत्।
निःस्वस्य राजाऽसि चराचरस्य न राजधर्मे गदितं पलायनम् ॥ ११० ॥
सहस्राक्षो जम्भवाक्यं निशम्य भीतस्तूर्णं विष्णुमागान्महर्षे।
उपेत्याह श्रूयतां वाक्यमीश त्वं मे नाथो भूतभव्येश विष्णो ॥ १११ ॥

उसे आते देखकर देवताओंके स्वामी इन्द्रने हजारों भुजाओंसे अपनी शक्तिभर वज्रको घुमाते हुए उसे बलके सिरपर 'हे मूढ ! अब तुम मारे गये'—कहकर फेंक दिया। मुने ! वह श्रेष्ठ वज्र भी उसके सिरपर शीघ्र ही हजारों टुकड़ोंमें टूक-टूक हो गया। (फिर) बल (इन्द्रकी ओर) दौड़ा। महर्षे ! देवराज

भयभीत होकर युद्धसे विमुख हो गये—भाग गये। उन्हें विमुख होकर भागते देख जम्भने आगे आकर कहा कि यह उचित नहीं है। रुकिये; आप समस्त स्थावर-जङ्गमके राजा हैं। राजधर्ममें लड़ाईके मैदानसे भागनेका नियम नहीं है। महर्षे! जम्भका वचन सुनकर भयभीत होकर इन्द्र जल्दीसे विष्णुके समीप चले गये। वहाँ जाकर उन्होंने कहा—हे ईश! आप मेरी बात सुनें। हे भूत तथा भव्यके स्वामी विष्णो! आप मेरे स्वामी हैं॥ १०८—१११॥

जम्भस्तर्जयतेऽत्यर्थं मां निरायुधमीक्ष्य हि। आयुधं देहि भगवन् त्वामहं शरणं गतः॥ ११२॥
तमुवाच हरिः शक्रं त्यक्त्वा दर्पं भजाधुना। प्रार्थयस्वायुधं वह्निं स ते दास्यत्यसंशयम्॥ ११३॥
जनार्दनवचः श्रुत्वा शक्रस्त्वरितविक्रमः। शरणं पावकमगादिदं चोवाच नारद॥ ११४॥

जम्भ मुझे शस्त्रास्त्रसे रहित देखकर बहुत अधिक ललकार रहा है। भगवन्! आप मुझे आयुध दें। मैं आपकी शरणमें आया हूँ। विष्णुने इन्द्रसे कहा—इस समय (अपने पदके) अहंकारको छोड़कर तुम अग्निदेवके पास जाओ और उनसे आयुधके लिये प्रार्थना करो। वे निस्सन्देह तुम्हें आयुध प्रदान करेंगे। नारदजी! जनार्दनकी बात सुनकर तीव्र गतिवाले इन्द्र अग्निकी शरणमें चले गये और उनसे उन्होंने कहा—॥ ११२—११४॥

शक्र उवाच

निघ्नतो मे बलं वज्रं कृशानो शतधा गतम्। एष आहूयते जम्भस्तस्माद्देह्यायुधं मम॥ ११५॥

इन्द्रने कहा—अग्निदेव! बलको मारनेमें मेरा वज्र सैकड़ों टुकड़े हो गया; यह जम्भ मुझे ललकार रहा है। अतः आप मुझे आयुध प्रदान करें॥ ११५॥

पुलस्त्य उवाच

तमाह भगवान् वह्निः प्रीतोऽस्मि तव वासव। यत्त्वं दर्पं परित्यज्य मामेव शरणं गतः॥ ११६॥
इत्युच्चार्य स्वशक्त्यास्तु शक्तिं निष्क्राम्य भावनः। प्रादादिन्द्राय भगवान् रोचमानो दिवं गतः॥ ११७॥
तामादाय तदा शक्तिं शतघण्टां सुदारुणाम्। प्रत्युद्ययौ तदा जम्भं हन्तुकामोऽरिमर्दनः॥ ११८॥
तेनातियशसा दैत्यः सहसैवाभिसंद्रुतः। क्रोधं चक्रे तदा जम्भो निजघान गजाधिपम्॥ ११९॥

पुलस्त्यजी बोले—भगवान्! अग्निदेवने उनसे कहा—वासव! मैं आपके ऊपर प्रसन्न हूँ; क्योंकि आप अहंकार छोड़कर मेरी शरणमें आये हैं। ऐसा कहनेके बाद प्रकाशयुक्त भगवान् अग्निदेवने भावपूर्वक अपनी शक्तिसे एक दूसरी शक्ति निकालकर उसे इन्द्रको दे दिया और वे स्वर्ग चले गये। शत्रुका मर्दन करनेवाले इन्द्र सैकड़ों घण्टाओंसे युक्त उस भीषण शक्तिको लेकर जम्भको मारनेके लिये चले गये। उन अत्यन्त यशस्वीके सहसा पीछा करनेपर जम्भने क्रोधपूर्वक गजाधिप (ऐरावत) पर वार कर दिया॥ ११६—११९॥

जम्भमुष्टिनिपातेन भग्नकुम्भकटो गजः। निपपात यथा शैलः शक्रवज्रहतः पुरा॥१२०॥
पतमानाद् द्विपेन्द्रात्तु शक्रश्चाप्लुत्य वेगवान्। त्यक्त्वैव मन्दरगिरिं पपात वसुधातले॥१२१॥
पतमानं हरिं सिद्धाश्चारणाश्च तदाऽब्रुवन्। मा मा शक्र पतस्वाद्य भूतले तिष्ठ वासव॥१२२॥
स तेषां वचनं श्रुत्वा योगी तस्थौ क्षणं तदा। प्राह चैतान् कथं योत्स्ये अशस्त्रः शत्रुभिः सह॥१२३॥

जम्भकी मुट्ठीके आघातसे हाथीका कुम्भस्थल विदीर्ण हो गया। उसके बाद वह इस प्रकार जैसे पूर्वकालमें इन्द्रके वज्रसे आहत होकर पर्वत गिरता था। इन्द्र गिरते हुए गजेन्द्रसे वेगपूर्वक

पर्जन्यको भी छोड़कर पृथ्वीकी ओर नीचे गिर पड़े। उसके बाद गिरते हुए इन्द्रसे सिद्धों एवं चारणोंने कहा—इन्द्र! आप पृथ्वीपर न गिरें। ठहर जायँ। उनकी बात सुनकर योगी इन्द्र उस समय आकाशमें ठहर गये और बोले—मैं बिना वाहनके इन शत्रुओंसे कैसे लड़ूँगा? ॥ १२०–१२३ ॥

तमूचुर्देवगन्धर्वा मा विषादं शचीश्वर। युध्यस्व त्वं समारुह्य प्रेषयिष्याम यद् रथम् ॥१२४॥
इत्येवमुक्त्वा विपुलं रथं स्वस्तिकलक्षणम्। वानरध्वजसंयुक्तं हरिभिर्हरिभिर्युतम् ॥१२५॥
शुद्धजाम्बूनदमयं किङ्किणीजालमण्डितम्। शक्राय प्रेषयामासुर्विश्वावसुपुरोगमाः ॥१२६॥
समागतमुदीक्ष्याथ हीनं सारथिना हरिः। प्राह योत्स्ये कथं युद्धे संयमिष्ये कथं हयान् ॥१२७॥

देवताओं और गन्धर्वोंने उत्तर दिया—हे शचीश्वर (इन्द्र)! आप चिन्तित न हों। हमलोग जो रथ भेज रहे हैं उसपर चढ़कर आप युद्ध करें। ऐसा कहकर विश्वावसु आदिने स्वस्तिकके आकारवाले कपिध्वजसे युक्त हरितवर्णके अश्वोंसे जुते शुद्ध स्वर्णसे बनाये गये तथा किंकिणीजालसे मण्डित विशाल रथ इन्द्रके लिये भेज दिया। इन्द्र सारथिसे रहित उस रथको देखकर बोले—मैं युद्धमें कैसे लड़ूँगा और कैसे घोड़ोंको संयत करूँगा—दोनों काम एक साथ कैसे होंगे? ॥ १२४–१२७ ॥

यदि कश्चिद्धि सारथ्यं करिष्यति ममाधुना। ततोऽहं घातये शत्रून् नान्यथेति कथंचन ॥१२८॥
ततोऽब्रुवंस्ते गन्धर्वा नास्माकं सारथिर्विभो। विद्यते स्वयमेवाश्वांस्त्वं संयन्तुमिहार्हसि ॥१२९॥
इत्येवमुक्ते भगवांस्त्यक्त्वा स्यन्दनमुत्तमम्। क्ष्मातले निपपातैव परिभ्रष्टवराम्बरः ॥१३०॥
चलन्मौलिर्विघूर्णितकचः परिभ्रष्टायुधाङ्कुशः। पतमानं सहस्राक्षं दृष्ट्वा भूः समकम्पत ॥१३१॥

इस समय मेरे सारथिका काम यदि कोई करे तो मैं शत्रुओंका नाश कर सकता हूँ; अन्य किसी प्रकार नहीं। उसके बाद गन्धर्वोंने कहा—विभो! हमारे पास कोई सारथि नहीं है। आप स्वयं घोड़ोंको नियन्त्रित कर सकते हैं। ऐसा कहनेपर भगवान् इन्द्र उत्तम रथको छोड़कर अस्त-व्यस्त हुए माल्य और वस्त्रोंके साथ पृथ्वीपर गिर गये। (पृथ्वीपर गिरते समय इन्द्रका) सिर काँप रहा था, उनके बाल बिखर गये थे और उनके आयुध तथा अङ्कुश नीचे गिर पड़े थे। इन्द्रको गिरते देख पृथ्वी काँपने लगी ॥ १२८–१३१ ॥

पृथिव्यां कम्पमानायां [illegible]। भार्याऽब्रवीत् प्रभो बालं बहिः कुरु यथासुखम् ॥१३२॥
स तु तल्लपितं श्रुत्वा किमर्थमिति चाब्रवीत्। सा चाह श्रूयतां नाथ दैवज्ञपरिभाषितम् ॥ १३३ ॥
[illegible] कम्पते भूमिस्तदा प्रक्षिप्यते बहिः। यदागतो मुनिश्रेष्ठ तद् भवेद् द्विगुणं मुने ॥ १३४ ॥
तत्कान्ताया वचः श्रुत्वा बालमादाय पुत्रकम्। निरगाद् बहिः शीघ्रं प्राक्षिपन् क्ष्मातले द्विजः ॥१३५॥

पृथ्वीके काँपनेपर [illegible] ऋषिकी [illegible] पत्नीने कहा—प्रभो! बालकको सँभालकर बाहर ले जाइये। ऋषिने [illegible] बात सुनकर कहा—क्यों? उसने कहा—हे नाथ! मुनियों, ज्योतिषियोंका कहना है कि इस भूमिके काँपनेपर घरमें रखी वस्तु बाहर निकाल दी जाती है; क्योंकि मुनिश्रेष्ठ! उस समय बाहरमें रखी हुई वस्तु दुगुनी हो जाती है। पत्नीकी बात सुनकर उस समय ब्राह्मणने अपने बालक पुत्रको लेकर निःशंक हो पृथ्वीपर बाहर रख दिया ॥ १३२–१३५ ॥

सूनुं तं मुसलस्योपरि प्रविष्टो भार्यया द्विजः। नियन्त्रितो गतो वेश्म [illegible] ॥ १३६ ॥
इत्येवमुक्ते [illegible] वेगवान्। ददर्श बालद्वितयं समरूपमवस्थितम् ॥ १३७ ॥
तं दृष्ट्वा विस्मितः पुत्रं भार्यां [illegible]। प्राह तत्त्वं न विन्दामि यत् पृच्छामि वदस्व तत् ॥१३८॥
[illegible] द्वितीयस्तु के [illegible] सह। आख्याहि चास्य यथोक्तं कर्म तत् कथयाधुना ॥१३९॥

फिर दो गायोंके लिये भीतर प्रविष्ट होनेपर पत्नीने ब्राह्मणको निवारित करते हुए कहा—... चुका है; अब इस समय आधे भागकी हानि हो जायगी। [पुलस्त्यजी कहते हैं—] देवर्षे! ऐसा कहनेपर (ब्रा...) शीघ्रतासे बाहर निकलकर देखा कि समान आकारके दो बालक पड़े हुए हैं। उन्हें देखकर उसने देवताओंके... करनेके बाद अपनी अद्भुत ज्ञानमयी पत्नीसे कहा—मैं इसका रहस्य नहीं समझता। अतः मैं जो पूछता हूँ... बतलाओ। यह बतलाओ कि इस दूसरे बालकमें कौन-से गुण होंगे? उसके भाग्यों एवं कर्मोंको... तुम अभी बतलाओ ॥ १३६—१३९ ॥

साऽब्रवीन्नाथ ते वक्ष्ये वदिष्यामि पुनः प्रभो । सोऽब्रवीद् यद् मेऽद्यैव नोचेन्नाश्नामि भोजनम् ॥१४०॥
सा प्राह श्रूयतां ब्रह्मन् वदिष्ये वचनं हितम् । कातरेणाद्य यत्पृष्टं भाव्यः कारुरयं किल ॥१४१॥
इत्युक्तवति वाक्ये तु बाल एव स्वचेतनः । जगाम सार्धं शक्रस्य कर्तुं सौत्यविशारदः ॥१४२॥
तं व्रजन्तं हि गन्धर्वा विश्वावसुपुरोगमाः । ज्ञात्वेन्द्रस्यैव साहाय्ये तेजसा समवर्धयन् ॥१४३॥

पत्नीने कहा—स्वामिन्! मैं तुम्हें आज नहीं बतलाऊँगी। फिर कभी दूसरे समय बतलाऊँगी। उन्होंने पूछा—... आज ही मुझे बताओ; अन्यथा मैं भोजन नहीं करूँगा। उसने कहा—ब्रह्मन्! आप सुनिये, आपने आर्ततासे जो पूछा है उस हितकर बातको मैं कहती हूँ। यह (बालक) निश्चय ही कारु (शिल्पी) होगा। ऐसा कहनेपर अज्ञान (अवस्थामें) होते हुए भी वह सूत-कर्ममें कुशल बालक इन्द्रकी सहायताके लिये गया। विश्वावसु आदि गन्धर्वोंने उस बालकको इन्द्रकी सहायताके लिये जाते हुए जानकर उसके तेजको बढ़ा दिया ॥ १४०—१४३ ॥

गन्धर्वतेजसा युक्तः शिशुः शक्रं समेत्य हि । प्रोवाचेहोहि देवेश प्रियो यन्ता भवामि ते ॥ १४४ ॥
तच्छ्रुत्वास्य हरिः प्राह कस्य पुत्रोऽसि बालक । संयन्ताऽसि कथं वाश्वान् संशयः प्रतिभाति मे ॥ १४५ ॥
सोऽब्रवीद्दयितेजोत्थं क्ष्माभवं विद्धि वासव । गन्धर्वतेजसा युक्तं वाजियानविशारदम् ॥१४६॥
तच्छ्रुत्वा भगवाञ्छक्रः स्वं भेजे योगिनां वरः । स चापि विप्रतनयो मातलिर्नामविश्रुतः ॥१४७॥
ततोऽधिरूढस्तु रथं शक्रस्त्रिदशपुङ्गवः । रश्मीन् शमीकतनयो मातलिः प्रगृहीतवान् ॥१४८॥

गन्धर्वोंके तेजसे परिपूर्ण होकर बालकने इन्द्रके निकट जाकर कहा—देवेश! आइये, आइये! मैं आपका प्रिय सारथि बनूँगा। उसे सुनकर इन्द्रने कहा—हे बालक! तुम किसके पुत्र हो? तुम घोड़ोंको कैसे संयमित करोगे? इस विषयमें मुझे संदेह हो रहा है। उसने कहा—वासव! मुझे ऋषिके तेजसे उत्पन्न (और) भूमिसे उत्पन्न एवं गन्धर्वोंके तेजसे युक्त अश्वयानमें पारंगत समझो। यह सुनकर योगिश्रेष्ठ भगवान् इन्द्र आकाशमें चले गये। मातलि नामसे विख्यात वह ब्राह्मणपुत्र भी आकाशमें चला गया। उसके बाद देवश्रेष्ठ इन्द्र रथपर चढ़ गये और शमीकपुत्र मातलिने प्रग्रह (लगाम) पकड़ लिया ॥ १४४—१४८ ॥

ततो मन्दरमागम्य विवेश रिपुवाहिनीम् । प्रविशन् ददृशे श्रीमान् पतितं कार्मुकं महत् ॥१४९॥
सशरं पञ्चवर्णाभं सितरक्तासितारुणम् । पाण्डुच्छायं सुरश्रेष्ठस्तं जग्राह समार्गणम् ॥१५०॥
ततस्तु मनसा देवान् रजःसत्त्वतमोमयान् । नमस्कृत्य शरं चापे साधिज्ये विनियोजयत् ॥१५१॥
ततो निश्चेरुरत्युग्राः शरा बर्हिणवाससः । ब्रह्मेशविष्णुनामाङ्काः सूदयन्तोऽसुरान् रणे ॥१५२॥

उसके बाद मन्दरगिरिपर पहुँचकर वे (इन्द्र) शत्रुसेनामें प्रविष्ट हो गये। प्रवेश करते समय ...श्रीमान्-(इन्द्र-) ने बाणयुक्त, सफेद, लाल, काला, उगतालीन लालिमावाले एवं मटमैले रंगसे ...

पीले रंगवाले—पँचरंगे—एक महान् धनुषको पड़ा हुआ देखा और बाणके साथ ही उसे उठा लिया । उसके बाद रजःसत्त्वतमोमय—त्रिगुणमय—(ब्रह्मा, विष्णु और महेश) देवोंको मनसे नमस्कार करके उन्होंने प्रत्यञ्चा चढ़ाकर बाण संधान किया । उससे ब्रह्मा, विष्णु, महेश्वरके नामोंसे अंकित मोरके पंख लगे हुए अत्यन्त भयंकर बाण निकले और असुरोंका संहार करने लगे ॥ १४९–१५२ ॥

आकाशं विदिशः पृथ्वीं दिशश्च स शरोत्करैः । सहस्राक्षोऽतिपटुभिश्छादयामास नारद ॥१५३॥
गजो विद्धो हयो भिन्नः पृथिव्यां पतितो रथः । महामात्रो धरां प्राप्तः सद्यः सीदञ्छरातुरः ॥१५४॥
पदातिः पतितो भूम्यां शक्रमार्गणताडितः । हतप्रधानभूयिष्ठं बलं तदभवद् रिपोः ॥१५५॥
तं शक्रबाणाभिहतं दुरासदं सैन्यं समालक्ष्य तदा कुजम्भः ।
जम्भासुरश्चापि सुरेशमव्ययं प्रजग्मतुर्गृह्य गदे सुघोरे ॥१५६॥

[पुलस्त्यजी कहते हैं—] नारदजी ! उन इन्द्रने बड़ी चतुराईसे बाणोंकी बौछारसे आकाश, पृथ्वी, दिशाओं एवं विदिशाओंको छा (भर) दिया । हाथी बुरी तरह बिंध गये, घोड़े विदीर्ण हो गये, रथ पृथ्वीपर गिर पड़े एवं हाथीका संचालक (महावत) बाणोंसे व्याकुल होकर कराहता हुआ धरतीपर गिर गया । इन्द्रके बाणोंसे घायल हुए पैदल युद्ध करनेवाले वीर भूमिपर गिर पड़े । (इस प्रकार) शत्रुकी उस सेनाके बहुतेरे प्रधान (वीर) मारे गये । उस दुर्धर्ष (अपराजेय) सेनाको इन्द्रके बाणोंसे मारी जाती हुई देखकर असुर कुजम्भ और जम्भ भयानक गदाओंको लेकर अविनाशी सुरेन्द्रकी ओर तेजीसे बढ़ चले ॥ १५३–१५६ ॥

तावापतन्तौ भगवान् निरीक्ष्य सुदर्शनेनारिविनाशनेन ।
विष्णुः कुजम्भं निजघान वेगात् स स्यन्दनाद् गामगमद् गतासुः ॥१५७॥
तस्मिन् हते भ्रातरि माधवेन जम्भस्ततः क्रोधवशं जगाम ।
क्रोधान्वितः शक्रमुपाद्रवद् रणे सिंहं यथैणोऽतिविपन्नबुद्धिः ॥१५८॥
तमापतन्तं प्रसमीक्ष्य शक्रस्त्यक्त्वैव चापं सशरं महात्मा ।
जग्राह शक्तिं यमदण्डकल्पां तामग्निदत्तां रिपवे ससर्ज ॥ १५९ ॥
शक्तिं सघण्टां कलनिस्वनां वै दृष्ट्वा पतन्तीं गदया जघान ।
गदां च कृत्वा सहसैव भस्मसाद् बिभेद जम्भं हृदये च तूर्णम् ॥ १६० ॥
शक्त्या स भिन्नो हृदये सुरारिः पपात भूम्यां विगतासुरेव ।
तं वीक्ष्य भूमौ पतितं विसंज्ञं दैत्यास्तु भीता विमुखा बभूवुः ॥ १६१ ॥
जम्भे हते दैत्यबले च भग्ने गणास्तु हृष्टा हरिमर्चयन्तः ।
वीर्यं प्रशंसन्ति शतक्रतोश्च स गोत्रभिच्छर्वमुपेत्य तस्थौ ॥ १६२ ॥

इति श्रीवामनपुराणे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

भगवान् विष्णुने उन दोनों-(कुजम्भ और जम्भ-)को शीघ्रतासे सामने आते देखकर शत्रु-संहारक सुदर्शनचक्रसे कुजम्भको मारा । वह प्राणहीन होकर रथसे पृथ्वीपर गिर पड़ा । लक्ष्मीपति श्रीविष्णुके द्वारा भाईके मारे जानेपर जम्भ क्रुद्ध हो गया । कुपित होकर वह युद्धमें इन्द्रकी ओर ऐसे दौड़ा, जैसे विचारशक्ति नष्ट हो जानेपर मृग सिंहकी ओर दौड़ता है । उसे आते देखकर महात्मा इन्द्रने धनुष-बाणको छोड़ अग्निद्वारा प्रदत्त यमदण्डके समान शक्तिको लेकर उसे शत्रुकी ओर फेंका । घण्टासे घनघनाती हुई उस शक्तिको देखकर (जम्भने) उसपर [illegible] गदासे वार किया । (उस शक्तिने) गदाको एकाएक भस्मकर शीघ्र ही जम्भका

हृदय (भी) विदीर्ण कर दिया। शक्तिसे हृदयके विदीर्ण हो जानेपर वह देवशत्रु असुर जम्भ प्राणहीन होकर पृथ्वीपर गिर पड़ा। उसे मरा और भूमिपर गिरा देख करके दैत्यगण डरकर पीठ दिखाकर भाग गये। जम्भके मारे जाने एवं दैत्यसेनाके हार जानेपर सभी गण हर्षित अर्चन एवं इन्द्रके पराक्रमका गुणगान करने लगे। (फिर) वे इन्द्र शंकरके निकट जाकर खड़े हो गये ॥ १५७—१६२ ॥

इस प्रकार श्रीवामनपुराणमें उनहत्तरवाँ अध्याय समाप्त हुआ ॥ ६९ ॥

[अथ सप्ततितमोऽध्यायः]

पुलस्त्य उवाच

तस्मिंस्तदा दैत्यबले च भग्ने गुरोऽब्रवीदन्धकमासुरेन्द्रम्।
एह्येहि वीराद्य गृहं महासुर योत्स्याम भूयो हरमेत्य शैलम् ॥ १ ॥
तमुवाचान्धको ब्रह्मन् न सम्यग्भवतोदितम्। रणान्नैवापयास्यामि कुलं व्यपदिशन् स्वयम् ॥ २ ॥
पश्य त्वं द्विजशार्दूल मम वीर्यं सुदुर्धरम्। देवदानवगन्धर्वान् जेष्ये सेन्द्रमहेश्वरम् ॥ ३ ॥
इत्येवमुक्त्वा वचनं हिरण्याक्षसुतोऽन्धकः। समाश्वास्याब्रवीच्छम्भुं सारथिं मधुराक्षरम् ॥ ४ ॥

सत्तरवाँ अध्याय प्रारम्भ

(अन्धकका शिव-शूलसे भेदन, भैरवादिकी उत्पत्ति, अन्धककृत शिवस्तुति, अन्धकका भृङ्गित्व, देवादिको घर भेजना, अर्द्धकुसुमसे पार्वतीका प्राकट्य और अन्धकद्वारा उनकी स्तुति)

पुलस्त्यजी बोले—उस समय दैत्यसेनाके हार जानेपर शुक्रने असुरोंके स्वामी अन्धकसे कहा—वीर महासुर! इस समय घर चलो। फिर पर्वतपर आकर शंकरसे युद्ध करेंगे। अन्धकने उनसे कहा—ब्रह्मन्! आपने उचित बात नहीं कही। अपने कुलको कलङ्कित करते हुए मैं युद्धसे नहीं भागूँगा। द्विजश्रेष्ठ! मेरा अत्यन्त प्रबल पराक्रम तो देखिये। मैं (उस पराक्रमसे) इन्द्र और महेश्वरके सहित सभी देवों और दानवों तथा गन्धर्वोंको जीत लूँगा। ऐसा वचन कहकर हिरण्याक्ष-पुत्र अन्धकने शम्भु (नामक) सारथिसे मीठी वाणीमें अच्छी तरह आश्वस्त करते हुए कहा—॥ १—४ ॥

सारथे वाहय रथं हराभ्याशं महाबल। यावन्निहन्मि बाणौघैः प्रमथामरवाहिनीम् ॥ ५ ॥
इत्यन्धकवचः श्रुत्वा सारथिस्तुरगांस्तदा। कृष्णवर्णान् महावेगान् कशयाऽभ्यादयन्मुने ॥ ६ ॥
ते यत्नतोऽपि तुरगाः प्रेर्यमाणा हरं प्रति। जघनेष्वबसीदन्तः कृच्छ्रेणोहुश्च तं रथम् ॥ ७ ॥
वहन्तस्तुरगा दैत्यं प्राप्ताः प्रमथवाहिनीम्। संवत्सरेण साग्रेण वायुवेगसमा अपि ॥ ८ ॥

महाबलशाली सारथे! तुम रथको महादेवके (आमने) सामने ले चलो। मैं बाणोंकी वर्षासे प्रमथों एवं देवोंकी सेनाको मार भगाऊँगा। मुने! अन्धकके वचनको सुनकर सारथिने (अपने रथके) काले रंगके तीव्रगामी घोड़ोंको कोड़ेसे मारा। शंकरकी ओर चेष्टापूर्वक चलाये जाते हुए भी वे घोड़े जाँघोंमें कष्टका अनुभव करते हुए कठिनाईसे उस रथको खींच रहे थे। दैत्यको ढोनेवाले वे घोड़े वायुके वेगके समान होनेपर भी एक वर्षसे भी अधिक समयमें प्रमथोंकी सेनामें पहुँच सके ॥ ५—८ ॥

ततः कार्मुकमानम्य बाणजालैर्गणेश्वरान्। सुरान् संछादयामास सेन्द्रोपेन्द्रमहेश्वरान् ॥ ९ ॥
बाणैदृष्टादितमीस्यैव बलं त्रैलोक्यरक्षिता। सुरान् प्रोवाच भगवांश्चक्रपाणिर्जनार्दनः ॥ १० ॥

उत्तर दिशाकी धारासे चक्रमालासे सुशोभित (एवं) शूल लिये 'सोमराज' नामसे प्रसिद्ध अन्य भैरव उत्पन्न हुए। वायवे रक्तसे इन्द्रधनुषके समान चमकवाले (एवं) शूल लिये 'स्वच्छन्दराज' नामसे विख्यात भैरव उत्पन्न हुए। पृथ्वीपर गिरे हुए रक्तसे सौभाञ्जन (सहिजन) के समान (एवं) शूल लिये शोभायुक्त 'ललितराज' नामसे विख्यात भैरव उत्पन्न हुए। मुने ! इस प्रकार इन भैरवका सात रूप कहा जाता है। 'विघ्नराज' आठवें भैरव हैं। इन्हें भैरवाष्टक (आठों भैरव) कहा जाता है ॥ ३५–३८ ॥

एवं महात्मना दैत्यः शूलप्रोतो महासुरः। छत्रवद् धारितो ब्रह्मन् भैरवेण त्रिशूलिना ॥ ३९ ॥
तस्यासृगुल्वणं ब्रह्मञ्छूलभेदादथापतत्। येनाकण्ठं महादेवो निमग्नः सप्तमूर्तिमान् ॥ ४० ॥
ततः स्वेदोऽभवद् भूरि श्रमजः शङ्करस्य तु। ललाटफलके तस्माज्जाता कन्याऽसृगाप्लुता ॥ ४१ ॥
यद्भूम्यां न्यपतद् विप्र स्वेदबिन्दुः शिवाननात्। तस्मादङ्गारपुञ्जाभो बालकः समजायत ॥ ४२ ॥

[पुलस्त्यजी कहते हैं—] ब्रह्मन् ! इस प्रकार त्रिशूल धारण करनेवाले महात्मा भैरवने शूलसे विद्ध हुए महासुर दैत्यको छातेकी भाँति ऊपर उठा लिया। ब्रह्मन् ! शूलसे विद्ध होनेके कारण उसका बहुत अधिक रक्त गिरा। उससे सात मूर्तिवाले महादेव गलेतक लहू-लुहान हो गये। परिश्रम करनेके कारण शंकरके पूरे ललाटपर बहुत अधिक पसीना आ गया। उससे लहूसे लथपथ एक कन्या उत्पन्न हुई। विप्र ! शिवके मुखसे भूमिपर गिरे पसीनोंकी बूँदोंसे अंगारे-जैसी कान्तिवाला एक बालक उत्पन्न हुआ ॥ ३९–४२ ॥

स बालस्तृषितोऽत्यर्थं पपौ रुधिरमान्धकम्। कन्या चोत्कृत्य संजातमसृग्विलिलिहेऽद्भुता ॥ ४३ ॥
ततस्तामाह बालार्कप्रभां भैरवमूर्तिमान्। शङ्करो वरदो लोके श्रेयोऽर्थाय वचो महत् ॥ ४४ ॥
त्वां पूजयिष्यन्ति सुरा ऋषयः पितरोरगाः। यक्षविद्याधराश्चैव मानवाश्च शुभङ्करि ॥ ४५ ॥
त्वां स्तोष्यन्ति सदा देवि बलिपुष्पोत्करैः करैः। चर्चिकेति शुभं नाम यस्माद् रुधिरचर्चिता ॥ ४६ ॥

अत्यन्त प्यासा वह बालक अन्धकका रक्त पीने लगा और अद्भुत कन्या भी काटकर उत्पन्न हुए रक्तको चाटने लगी। उसके बाद भैरवका रूप धारण करनेवाले वरदानी शंकरने प्रातःकालके सूर्यके समान कान्तिवाली उस कन्यासे जगत्-कल्याणकारी महान् वचन कहा—शुभकारिणि ! देवता, ऋषि, पितर, सर्पादि, यक्ष, विद्याधर एवं मानव तुम्हारी पूजा करेंगे। देवि ! (वे लोग) बलि एवं पुष्पाञ्जलिसे तुम्हारी स्तुति करेंगे। चूँकि तुम रक्तसे चर्चित (लथपथ) हो, अतः तुम्हारा शुभ नाम 'चर्चिका' होगा ॥ ४३–४६ ॥

इत्येवमुक्ता वरदेन चर्चिका भूतानुजाता हरिचर्मवासिनी।
महीं समन्ताद् विचचार सुन्दरी स्थानं गता हैङ्गुलताद्रिमुत्तमम् ॥ ४७ ॥
तस्यां गतायां वरदः कुजस्य प्रादाद् वरं सर्ववरोत्तमं यत्।
ग्रहाधिपत्यं जगतां शुभाशुभं भविष्यति त्वद्वशगं महात्मन् ॥ ४८ ॥
हरोऽन्धकं वर्षसहस्रमात्रं दिव्यं स्वनेत्रार्कहुताशनेन।
चकार संशुष्कतनुं त्वशोणितं त्वगस्थिशेषं भगवान् स भैरवः ॥ ४९ ॥
तस्याग्निना नेत्रभवेन शुद्धः स मुक्तपापोऽसुरराड् बभूव।
ततः प्रजानां बहुरूपमीशं नाथं हि सर्वस्य चराचरस्य ॥ ५० ॥
ज्ञात्वा स सर्वेश्वरमीशमव्ययं त्रैलोक्यनाथं वरदं वरेण्यम्।
सर्वैः सुरार्द्यैर्नतमाद्यमाद्यं ततोऽन्धकः स्तोत्रमिदं चकार ॥ ५१ ॥

वरदानी शंकरके ऐसा कहनेपर व्याघ्रचर्मको वस्त्ररूपमें धारण करनेवाली और सब भूतोंके बाद उत्पन्न हुई सुन्दरी चर्चिका पृथ्वीपर चारों ओर विचरती हुई हिंगुलके रंगवाले उत्तम पर्वतपर चली गयी। उसके (वहाँ) चले जानेपर वरदानी शंकरने कुज-(मंगल-) को सर्वश्रेष्ठ वर दिया। (उन्होंने कहा—) महात्मन्! तुम ग्रहोंके स्वामी बनोगे तथा संसारका शुभ और अशुभ तुम्हारे अधीन होगा। उन भैरव-रूपधारी भगवान् शिवने अपने अग्नि और सूर्यरूपी नेत्रोंसे एक हजार दिव्य वर्षोंतक अन्धकके शरीरको सुखाकर रक्तहीन कर दिया तथा चाम शेष रखकर कंकाल बना दिया। शंकरके नेत्रसे उत्पन्न अग्निद्वारा शुद्ध होनेके कारण वह असुरराज पापसे छूट गया। उसके बाद अनेक रूप धारण करके प्रजाओंका निर्माण करनेवाले, स्थावर और जंगमके स्वामी, सर्वेश्वर, अविनाशी ईश, त्रैलोक्यपति, वरदानी, वरेण्य, सभी सुरादिकोंद्वारा विनयपूर्वक स्तुति करनेयोग्य एवं सबके आदिमें रहनेवाले शंकरको वास्तवरूपमें जानकर अन्धकने यह स्तुति की—॥ ४७–५१ ॥

अन्धक उवाच

नमोऽस्तु ते भैरव भीममूर्ते त्रिलोकगोप्त्रे शितशूलधारिणे।
विंशार्धबाहो भुजगेशहार त्रिनेत्र मां पाहि विपन्नबुद्धिम्॥ ५२॥
जयस्व सर्वेश्वर विश्वमूर्ते सुरासुरैर्वन्दितपादपीठ।
त्रैलोक्यमातुर्गुरवे वृषाङ्क भीतः शरण्यं शरणागतोऽस्मि॥ ५३॥
त्वां नाथ देवाः शिवमीरयन्ति सिद्धा हरं स्थाणुं महर्षयश्च।
भीमं च यक्षा मनुजा महेश्वरं भूताश्च भूताधिपमामनन्ति॥ ५४॥
निशाचरा उग्रमुपार्चयन्ति भवेति पुण्याः पितरो नमन्ति।
दासोऽस्मि तुभ्यं हर पाहि मह्यं पापक्षयं मे कुरु लोकनाथ॥ ५५॥

हे विशालकाय भैरव! हे त्रिलोककी रक्षा करनेवाले! हे तीक्ष्ण शूल धारण करनेवाले! आपको नमस्कार है। हे दस भुजाओंवाले तथा नागेशका हार धारण करनेवाले त्रिनेत्र! आप मुझ नष्टमतिकी रक्षा करें। हे देवों तथा असुरोंसे वन्दित पादपीठवाले विश्वमूर्ति सर्वेश्वर! आपकी जय हो। हे त्रिलोक-जननीके स्वामी वृषाङ्क! मैं भयभीत होकर आप शरणागतकी रक्षा करनेवालेकी शरणमें आया हूँ। हे नाथ! देवता आपको शिव (मङ्गलमय) कहते हैं। सिद्धलोग आपको हर (पापहारी), महर्षिलोग स्थाणु (अचल), यक्षलोग भीम, मनुष्य महेश्वर और भूत भूताधिपति मानते हैं। निशाचर उग्र नामसे आपकी अर्चना करते हैं तथा पुण्यात्मा पितृगण भव नामसे आपको नमस्कार करते हैं। हे हर! मैं आपका दास हूँ, आप मेरी रक्षा करें। हे लोकनाथ! मेरे पापोंका आप विनाश कीजिये॥ ५२–५५॥

भवांस्त्रिदेवस्त्रियुगस्त्रिधर्मा त्रिपुष्करश्चासि विभो त्रिनेत्र।
त्रय्यारुणिस्त्रिश्रुतिरव्ययात्मन् पुनीहि मां त्वां शरणं गतोऽस्मि॥ ५६॥
त्रिणाचिकेतस्त्रिपदप्रतिष्ठः षडङ्गवित् त्वं विषयेष्वलुब्धः।
त्रैलोक्यनाथोऽसि पुनीहि शम्भो दासोऽस्मि भीतः शरणागतस्ते॥ ५७॥
कृतं महच्छङ्कर तेऽपराधं मया महाभूतपते गिरीश।
कामारिणा निर्जितमानसेन प्रसादये त्वां शिरसा नतोऽस्मि॥ ५८॥
पापोऽहं पापकर्माऽहं पापात्मा पापसम्भव। त्राहि मां देव ईशान सर्वपापहरो भव॥ ५९॥

हे सर्वसमर्थ त्रिनेत्र! आप त्रिदेव, त्रियुग, त्रिधर्मा तथा त्रिपुष्कर हैं। हे अव्ययात्मन्! आप त्रय्यारुणि तथा त्रिश्रुति हैं। आप मुझे पवित्र करें। मैं आपकी शरणमें आया हूँ। आप त्रिणाचिकेत, [illegible], षड्

पातालरूप तीनों पदोंपर प्रतिष्ठित) षडङ्गवित् (वेदके शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द और ज्योतिष—इन छः अङ्गोंके जाननेवाले), विषयोंके प्रति अनासक्त तथा तीनों लोकोंके स्वामी हैं। हे शम्भो! आप मुझे पवित्र करें। मैं आपका दास हूँ। भयभीत होकर मैं आपकी शरणमें आया हूँ। हे शंकर! हे महाभूतपते! हे गिरीश! कामरूपी शत्रुने मेरे मनको जीत लिया था, इसलिये मैंने आपका महान् अपराध किया है। मैं आपको सिर झुकाकर प्रणाम करता हूँ। मैं पापी, पापकर्मा, पापात्मा तथा पापसे उत्पन्न हूँ। हे देव ईशान! हे समस्त पापोंको हरण करनेवाले महादेव! आप मेरी रक्षा कीजिये ॥ ५६—५९ ॥

मा मे कुप्यस्व देवेश त्वया चैतादृशोऽस्म्यहम्। सृष्टः पापसमाचारो मे प्रसन्नो भवेश्वर ॥ ६० ॥
त्वं कर्ता चैव धाता च त्वं जयस्त्वं महाजयः। त्वं मङ्गल्यस्त्वमोंकारस्त्वमीशानो ध्रुवोऽव्ययः ॥ ६१ ॥
त्वं ब्रह्मा सृष्टिकृन्नाथस्त्वं विष्णुस्त्वं महेश्वरः। त्वमिन्द्रस्त्वं वषट्कारो धर्मस्त्वं च सुरोत्तमः ॥ ६२ ॥
सूक्ष्मस्त्वं व्यक्तरूपस्त्वं त्वमव्यक्तस्त्वमीश्वरः। त्वया सर्वमिदं व्याप्तं जगत् स्थावरजङ्गमम् ॥ ६३ ॥
त्वमादिरन्तो मध्यश्च त्वमनादिः सहस्रपात्। विजयस्त्वं सहस्राक्षो विरूपाक्षो महाभुजः ॥ ६४ ॥
अनन्तः सर्वगो व्यापी हंसः प्राणाधिपोऽच्युतः। गीर्वाणपतिरव्यग्रो रुद्रः पशुपतिः शिवः ॥ ६५ ॥
त्रैविद्यस्त्वं जितक्रोधो जितारिर्विजितेन्द्रियः। जयश्च शूलपाणिस्त्वं त्राहि मां शरणागतम् ॥ ६६ ॥

देवेश! आप मेरे ऊपर कुपित न हों। आपने ही मुझे इस प्रकारके पापका आचरण करनेवाला बनाया है। ईश्वर! मेरे ऊपर प्रसन्न होइये। आप सृष्टि तथा पालन-पोषण करनेवाले हैं। आप ही जय और आप ही महाजय हैं। आप मङ्गलमय हैं। आप ओंकार हैं। आप ही ईशान, अव्यय तथा ध्रुव हैं। आप सृष्टि करनेवाले ब्रह्मा तथा (सब कुछ करनेमें) समर्थ हैं। आप विष्णु और महेश्वर हैं। आप इन्द्र हैं, आप वषट्कार हैं, आप धर्म तथा देवोंमें सर्वश्रेष्ठ हैं। आप (कठिनतासे देखे जाने योग्य) सूक्ष्म हैं, आप (प्रतीतिका विषय होनेसे) व्यक्तरूप हैं, आप अप्रकटस्वरूप—अव्यक्त हैं, आप ईश्वर हैं, आपसे ही यह चर-अचर जगत् व्याप्त (ओतप्रोत या ढका) है। आप आदि, मध्य एवं अन्त हैं, (साथ ही) आप आदि-रहित एवं हजारों पैरोंवाले सहस्रपात् हैं। आप विजय हैं। आप हजारों आँखोंवाले, विरूप आँखवाले एवं बड़ी भुजावाले हैं। आप अन्तसे रहित, सर्वगत, व्यापी, हंस, प्राणोंके स्वामी (सदा स्वस्वरूपमें स्थित) अच्युत, देवाधिदेव, शान्त, रुद्र, पशुपति एवं शिव हैं। आप तीनों वेदोंके जाननेवाले, क्रोधको जीत लेनेवाले, शत्रुओंको विजित करनेवाले, इन्द्रियजयी, जय एवं शूलपाणि हैं। आप मुझ शरणागतकी रक्षा करें ॥ ६०—६६ ॥

पुलस्त्य उवाच

इत्थं महेश्वरो ब्रह्मन् स्तुतो दैत्याधिपेन तु। प्रीतियुक्तः पिङ्गलाक्षो हैरण्याक्षिमुवाच ह ॥ ६७ ॥
सिद्धोऽसि दानवपते परितुष्टोऽस्मि तेऽन्धक। वरं वरय भद्रं ते यमिच्छसि विनाऽम्बिकाम् ॥ ६८ ॥

पुलस्त्यजी बोले—ब्रह्मन्! दैत्योंके स्वामी अन्धकके इस प्रकार स्तुति करनेपर लालिमा लिये भूरे रंगकी आँखोंवाले महेश्वरने प्रसन्न होकर हिरण्याक्षके पुत्र अन्धकसे कहा—दानवपते अन्धक! तुम सिद्ध हो गये हो; मैं तुम्हारे ऊपर प्रसन्न हूँ। अम्बिकाके सिवाय तुम जो चाहो, वह वर माँगो। तुम्हारा कल्याण हो ॥ ६७-६८ ॥

अन्धक उवाच

अम्बिका जननी मह्यं भगवांस्त्र्यम्बकः पिता। वन्दामि चरणौ मातुर्वन्दनीया ममाम्बिका ॥ ६९ ॥
परदारोत्थं [illegible] नष्टं यातु विलयं मम। शारीरं मानसं वाग्जं दुष्कृतं दुर्विचिन्तितम् ॥ ७० ॥
तथा मे शात्रवो भावो व्यपयातु महेश्वर। स्थिराऽस्तु त्वयि भक्तिस्तु वरमेतत् प्रयच्छ मे ॥ ७१ ॥

अन्धकने (विनीत भावसे) कहा—अम्बिका मेरी माता और आप त्र्यम्बक मेरे पिता हैं। अम्बिका मेरी वन्दनीया हैं। मैं उन माताके चरणोंकी वन्दना करता हूँ। ईशान ! यदि आप मुझे वर देना चाहते हैं तो मेरे शरीरसम्बन्धी, मनसम्बन्धी एवं वचनसम्बन्धी पाप तथा नीच विचार नष्ट हो जायँ। महेश्वर ! मेरा दानवीय विचार भी दूर हो जाय एवं आपमें मेरी अटल भक्ति हो जाय—मुझे यही वर दीजिये ॥ ६०–७१ ॥

महादेव उवाच

एवं भवतु दैत्येन्द्र पापं ते यातु संक्षयम्। मुक्तोऽसि दैत्यभावाच्च भृङ्गी गणपतिर्भव ॥ ७२ ॥
इत्येवमुक्त्वा वरदः शूलाग्रादवतार्य तम्। निर्माज्य निजहस्तेन चक्रे निर्व्रणमन्धकम् ॥ ७३ ॥
ततः स्वदेहगान् देवान् ब्रह्मादीनाजुहाव सः। ते निश्चेरुर्महात्मानो नमस्यन्तस्त्रिलोचनम् ॥ ७४ ॥
गणान् सनन्दीनाहूय सन्निवेश्य तदाग्रतः। भृङ्गिनं दर्शयामास ध्रुवं नैषोऽन्धकोऽस्ति हि ॥ ७५ ॥

भगवान् महादेवने कहा—दैत्येन्द्र ! ऐसा ही हो। तुम्हारे पाप नष्ट हो जायँ। तुम दानवीय विचारसे मुक्त हो गये। अब तुम भृङ्गी नामक गणपति हो गये। इस प्रकार कहकर वरदानी महादेवने उस अन्धकको शूलकी नोकसे उतारा और अपने हाथसे सहलाकर बिना घावका कर दिया। उसके बाद उन्होंने अपने शरीरमें स्थित ब्रह्मादि देवोंका आह्वान किया। वे सभी महान् देवगण त्र्यम्बक शिवको नमस्कार करते हुए बाहर निकले। नन्दीके साथ गणोंको बुलाकर और सामने बैठाकर भृङ्गीको दिखलाते हुए उन्होंने कहा—निश्चय ही यह अन्धक (पहले-जैसा) नहीं रह गया है ॥ ७२–७५ ॥

तं दृष्ट्वा दानवपतिं संशुष्कपिशितं रिपुम्। गणाधिपत्यमापन्नं प्रशशंसुर्वृषध्वजम् ॥ ७६ ॥
ततस्तान् प्राह भगवान् सम्परिष्वज्य देवताः। गच्छध्वं स्वानि धिष्ण्यानि भुञ्जध्वं त्रिदिवं सुखम् ॥ ७७ ॥
सहस्राक्षोऽपि संयातु पर्वतं मलयं शुभम्। तत्र स्वकार्यं कृत्वैव पश्चाद् यातु त्रिविष्टपम् ॥ ७८ ॥
इत्येवमुक्त्वा त्रिदशान् समाभाष्य व्यसर्जयत्।
पितामहं नमस्कृत्य परिष्वज्य जनार्दनम्। ते विसृष्टा महेशेन सुरा जग्मुस्त्रिविष्टपम् ॥ ७९ ॥

उस सूखे हुए मांसवाले शत्रु दानवपतिको गणाधिप हुआ देखकर वे सभी वृषध्वज (शङ्कर)की प्रशंसा करने लगे। उसके बाद भगवान् शङ्करने उन देवोंको गले लगाकर कहा—देवताओ ! आपलोग अपने-अपने स्थानको जाइये और स्वर्ग-सुखका उपभोग कीजिये। इन्द्र भी सुन्दर मलयपर्वतपर जायँ तथा वहाँ अपना काम समाप्त करके ही स्वर्ग चले जायँ। ऐसा कहकर देवोंसे वार्तालाप कर उनको विदा कर दिया। महेशने पितामहको नमस्कार तथा जनार्दनको गले लगाकर उन सभीको विदा कर दिया। (महेशसे विदा किये गये) वे देवगण स्वर्गको चले गये ॥ ७६–७९ ॥

महेन्द्रो मलयं गत्वा कृत्वा कार्यं दिवं गतः। गतेषु शक्रमुख्येषु देवेषु भगवाञ्छिवः ॥ ८० ॥
विसर्जयामास गणाननुमान्य यथार्हतः। गणाश्च शङ्करं दृष्ट्वा स्वं स्वं वाहनमास्थिताः ॥ ८१ ॥
जग्मुस्ते शुभलोकानि महाभोगानि नारद। यत्र कामदुघा गावः सर्वकामफलद्रुमाः ॥ ८२ ॥
नद्यस्त्वमृतवाहिन्यो ह्रदाः पायसकर्दमाः। स्वां स्वां गतिं प्रयातेषु प्रमथेषु महेश्वरः ॥ ८३ ॥
समादायान्धकं हस्ते सनन्दिः शैलमभ्यगात्। द्वाभ्यां वर्षसहस्राभ्यां पुनरागाद्धरो गृहम् ॥ ८४ ॥
ददृशे च गिरेः पुत्रीं देवतार्चनमास्थिताम्। समायान्तं निरीक्ष्यैव सर्वरक्षासंयुतम् ॥ ८५ ॥
स्वकराऽर्कपुष्पं निर्गत्य सखीस्ता समुपाह्वयत्। समाहूताश्च देव्या ता जयाद्यास्तूर्णमागमन् ॥ ८६ ॥

महेन्द्र भी मलयाचलपर जा करके (अपना) कार्य समाप्त कर स्वर्ग चले गये। शिवने इन्द्र आदि देवोंके चले जानेपर गणोंको यथायोग्य सम्मानित कर विदा कर दिया। [पुलस्त्यजी कहते हैं कि—] नारदजी !

भी शंकरका दर्शन कर अपने वाहनोंपर आरूढ़ हो विशाल भोगसे सम्पन्न उन सुखद लोकोंको चले गये, जहाँकी गौएँ इच्छित वस्तु प्रदान करनेवाली थीं, वृक्ष समस्त कर्मरूपी फलोंके दाता थे, नदियाँ अमृतकी धारा बहानेवाली थीं और सरोवर दूधके पङ्कसे भरे थे। महेश्वर प्रमथोंके अपने-अपने स्थानपर चले जानेपर अन्धकका हाथ पकड़कर (उसे साथ लिये हुए) नन्दीसहित पर्वतपर चले गये। (वे) शंकर दो हजार वर्षोंके बाद फिर अपने घर लौटे। उन्होंने सफेद अर्क-(आक या मन्दार-)के फूलमें स्थित गिरिजाको देखा। पार्वती समस्त चिह्नोंसे युक्त शंकरको आया हुआ देखते ही अर्कके फूलको छोड़कर बाहर निकल आयीं और उन्होंने (अपनी जयादि) सखियोंको पुकारा। पुकारी गयीं वे जया आदि सभी देवियाँ शीघ्र वहाँ चली आयीं ॥ ८०-८६ ॥

ताभिः परिवृता तस्थौ हरदर्शनलालसा। ततस्त्रिनेत्रो गिरिजां दृष्ट्वा प्रेक्ष्य च दानवम् ॥ ८७ ॥
नन्दिनं च तथा स्नेहादालिलिङ्गे गिरेः सुताम्। अथोवाचैष दासस्ते कृतो देवि मयाऽन्धकः ॥ ८८ ॥
पश्यस्व प्रणतिं यातं स्वसुतं चारुहासिनि। इत्युच्चार्यान्धकं चैव पुत्र एह्येहि सत्वरम् ॥ ८९ ॥
व्रजस्व शरणं मातुरेषा श्रेयस्करी तव। इत्युक्तो विभुना नन्दी अन्धकश्च गणेश्वरः ॥ ९० ॥
समागम्याम्बिकापादौ ववन्दतुरुभावपि।
अन्धकोऽपि तदा गौरीं भक्तिनम्रो महामुने। स्तुतिं चक्रे महापुण्यां पापघ्नीं श्रुतिसम्मिताम् ॥ ९१ ॥

उन-(अपनी सखी जयादि देवियों-)से घिरी हुई पार्वतीजी शिवके दर्शनकी अभिलाषासे (प्रतीक्षामें) खड़ी रहीं। त्रिनेत्रधारी शंकरने गिरिजाको देखकर दानव एवं नन्दीके ऊपर भी दृष्टिपात किया; फिर प्रसन्नतापूर्वक गिरिसुताको गले लगा लिया। उसके बाद उन्होंने कहा—देवि! मैंने अन्धकको तुम्हारा दास बना लिया है। चारुहासिनि! प्रणाम कर रहे अपने पुत्रको देखो। ऐसा कहनेके बाद उन्होंने कहा—पुत्र! शीघ्र यहाँ आओ। अपनी इस माताकी शरणमें जाओ! ये तुम्हारा कल्याण करेंगी। प्रभुके इस प्रकार कहनेपर गणेश्वर नन्दी एवं अन्धक दोनोंने जाकर अम्बिकाके चरणोंमें प्रणाम किया। महामुने! उसके बाद श्रद्धापूर्वक नम्र होकर अन्धकने गौरीकी पाप नाश करनेवाली एवं अत्यन्त पवित्र वेद-सम्मत स्तुति की ॥ ८७-९१ ॥

अन्धक उवाच

ॐ नमस्ये भवानीं भूतभव्यप्रियां लोकधात्रीं जनित्रीं स्कन्दमातरं महादेवप्रियां धारिणीं स्यन्दिनीं चेतनां त्रैलोक्यमातरं धरित्रीं देवमातरमथेज्यां श्रुतिं स्मृतिं दयां लज्जां कान्तिमग्र्यामसूयां मतिं सदापावनीं दैत्यसैन्यक्षयकरीं महामायां वैजयन्तीं सुशुभां कालरात्रिं गोविन्दभगिनीं शैलराजपुत्रीं सर्वदेवार्चितां सर्वभूतार्चितां विद्यां सरस्वतीं त्रिनयनमहिषीं नमस्यामि मृडानीं शरण्यां शरणमुपागतोऽहं नमो नमस्ते ॥
इत्थं स्तुता साऽन्धकेन परितुष्टा विभावरी। प्राह पुत्र प्रसन्नाऽस्मि वृणुष्व वरमुत्तमम् ॥ ९२ ॥

अन्धकने कहा—ॐ मैं भवानीको प्रणाम करता हूँ। मैं भूतभव्य–शङ्करकी प्रिया, लोकधात्री, जनित्री, कार्तिकेयकी माता, महादेवकी प्रिया, लोकोंको धारण करनेवाली, स्यन्दिनी, चेतना, त्रैलोक्यजननी, धरित्री, देवमाता, इज्या, श्रुति, स्मृति, दया, लज्जा, श्रेष्ठ कान्ति, अग्र्या, असूया, मति, सदापावनी, दैत्योंकी सेनाओंका विनाश करनेवाली, महामाया, वैजयन्ती, अत्यन्त शोभावाली, कालरात्रि, गोविन्द-भगिनी, शैलराजपुत्री, सर्वदेवोंसे पूजित, सर्वभूतोंसे अर्चित, विद्या, सरस्वती, शंकरकी महारानीको प्रणाम करता हूँ। मैं शरणागतोंकी रक्षा करनेवाली मृडानीकी शरणमें आया हूँ। (देवि!) आपको बार-बार प्रणाम है। अन्धकके इस प्रकार स्तुति करनेपर भवानीने प्रसन्न होकर कहा—पुत्र! मैं प्रसन्न हूँ। तुम उत्तम वर माँगो ॥ ९२ ॥

भृङ्गिरुवाच

पापं प्रशममायातु त्रिविधं मम पार्वति। तथेश्वरे च सततं भक्तिरस्तु ममाम्बिके ॥ ९३ ॥

भृङ्गिने कहा—पार्वति ! अम्बिके ! मेरे त्रिविध—मानसिक, कायिक, वाचिक पाप दूर हो जायँ एवं भगवान् शिवमें मेरी भक्ति सदा बनी रहे ॥ ९३ ॥

पुलस्त्य उवाच

बाढमित्यब्रवीद् गौरी हिरण्याक्षसुतं ततः। स चास्ते पूजयञ्शर्वं गणानामधिपोऽभवत् ॥ ९४ ॥

एवं पुरा दानवसत्तमं तं महेश्वरेणाथ विरूपदृष्ट्या।
कृत्वैव रूपं भयदं च भैरवं भृङ्गित्वमीशेन कृतं स्वभक्त्या ॥ ९५ ॥
एतत् तवोक्तं हरकीर्तिवर्धनं पुण्यं पवित्रं शुभदं महर्षे।
संकीर्तनीयं द्विजसत्तमेषु धर्मायुरारोग्यधनैषिणा सदा ॥ ९६ ॥

इति श्रीवामनपुराणे सप्ततितमोऽध्यायः ॥ ७० ॥

पुलस्त्यजी बोले—उसके बाद गौरीने हिरण्याक्षके पुत्र अन्धकसे कहा—ऐसा ही हो। वह वहीं रहकर शिवकी पूजा करते हुए गणाधिप हो गया। इस प्रकार पहले समयमें महेश्वरने उस दानवश्रेष्ठको अपनी विरूपदृष्टिसे भयदायक भैरव रूप प्रदानकर अपनी भक्तिसे 'भृङ्गी' बना दिया। महर्षे (नारदजी)! मैंने आपसे शिवकी कीर्तिको बढ़ानेवाला यह पुण्य पवित्र एवं शुभद आख्यान कहा। धर्म, आयु, आरोग्य एवं धनको चाहनेवालेको श्रेष्ठ द्विजातियोंमें इसका कीर्तन सदा करना चाहिये ॥ ९४—९६ ॥

इस प्रकार श्रीवामनपुराणमें सत्तरवाँ अध्याय समाप्त हुआ ॥ ७० ॥

[अथैकसप्ततितमोऽध्यायः]

नारद उवाच

मलयेऽपि महेन्द्रेण यत्कृतं ब्रह्मणस्पते। निष्पादितं स्वकं कार्यं तन्मे व्याख्यातुमर्हसि ॥ १ ॥

एकहत्तरवाँ अध्याय प्रारम्भ

(इन्द्रका मलयपर असुरोंसे युद्ध, उनका 'पाकशासन' और 'गोत्रभिद्' होनेका हेतु, मरुतोंकी उत्पत्तिकी कथा)

नारदने कहा—द्विजश्रेष्ठ! महेन्द्रने मलयपर्वतपर भी अपना जो कार्य पूरा किया उसे आप मुझसे कहिये ॥ १ ॥

पुलस्त्य उवाच

श्रूयतां यन्महेन्द्रेण मलये पर्वतोत्तमे। कृतं लोकहितं ब्रह्मन्नात्मनश्च तथा हितम् ॥ २ ॥
अन्धकासुरस्यानुचरा मयतारपुरोगमाः। ते निर्जिताः सुरगणैः पातालगमनोत्सुकाः ॥ ३ ॥
ददृशुर्मलयं शैलं सिद्धाध्युषितकन्दरम्। लतावितानसंछन्नं मत्तसत्त्वसमाकुलम् ॥ ४ ॥
चन्दनैरुरगाक्रान्तैः सुशीतैरभिसेवितम्। माधवीकुसुमामोदं ऋष्यर्चितहरं गिरिम् ॥ ५ ॥

पुलस्त्यजी बोले—ब्रह्मन्! महेन्द्रने श्रेष्ठ मलयपर्वतपर जगत्के हित तथा अपने कल्याणके लिये जो कार्य किया था, उसे सुनिये। मय, तार आदि अन्धकासुरके अनुचर दैत्य देवताओंसे पराजित होकर पातालमें जानेके लिये अत्यन्त उत्सुक होने लगे। उन लोगोंने सिद्धोंसे भरे कन्दराओंवाले तथा लतासमूहसे ढके, आनन्दभरे प्राणियोंसे व्याप्त, साँपोंसे घिरे सुशीतल चन्दनसे युक्त तथा सुगन्धित माधवी लताके फूलोंकी सुगन्धिसे पूर्ण ऋषियों-द्वारा पूजित शंकरके मलयगिरिको देखा ॥ २—५ ॥

तं दृष्ट्वा शीतलच्छायं श्रान्ता व्यायामकर्शिताः। मयतारपुरोगास्ते निवासं समरोचयन्॥ ६ ॥
तेषु तत्रोपविष्टेषु प्राणतृप्तिप्रदोऽनिलः। विवाति शीतः शनकैर्दक्षिणो गन्धसंयुतः॥ ७ ॥
तत्रैव च रतिं चक्रुः सर्व एव महासुराः। कुर्वन्तो लोकसम्पूज्ये विद्वेषं देवतागणे॥ ८ ॥
ताञ्ज्ञात्वा शङ्करः शक्रं प्रेषयन्मलयेऽसुरान्। स चापि ददृशे गच्छन् पथि गोमातरं हरिः॥ ९ ॥

परिश्रमसे थके-माँदे तथा शक्तिहीन मय, तार आदि दानवोंने शीतल छायावाले उस पर्वतको देखकर वहाँ निवास करनेकी इच्छा की। उन लोगोंके वहाँ ठहर जानेपर प्राणोंको संतुष्टि प्रदान करनेवाली सुगन्धसे पूर्ण तथा शीतल दक्षिणी हवा मंद-मंद बहने लगी। जगत्-पूज्य देवताओंसे शत्रुता करते हुए सभी श्रेष्ठ दैत्य सुखसे वहीं रहने लगे। शंकरने उन असुरोंको मलय पर्वतपर रहते हुए जानकर इन्द्रको वहाँ भेजा। मार्गमें जाते हुए इन्द्रने गोमाताको देखा॥ ६–९॥

तस्याः प्रदक्षिणां कृत्वा दृष्ट्वा शैलं च सुप्रभम्। ददृशे दानवान् सर्वान् संहृष्टान् भोगसंयुतान्॥ १०॥
अथाजुहाव बलहा सर्वानेव महासुरान्। ते चाप्याययुरव्यग्रा विकिरन्तः शरोत्करान्॥ ११॥
तानागतान् बाणजालैः रथस्थोऽद्भुतदर्शनः। छादयामास विप्रर्षे गिरीन् वृष्ट्या यथा घनः॥ १२॥
ततो बाणैश्छादय मयादीन् दानवान् हरिः। पाकं जघान तीक्ष्णाग्रैर्मार्गणैः कङ्कवाससैः॥ १३॥

उसकी प्रदक्षिणा करनेके बाद उन्होंने सुकान्तिसे सम्पन्न पर्वतपर भोगसे संयुत तथा हर्षित सभी दानवोंको देखा। उसके बाद इन्द्रने सभी महासुरोंको ललकारा। वे भी बिना किसी हिचकके बाणोंकी वर्षा करते हुए आ गये। विप्रर्षे! रथपर बैठे हुए अद्भुत दिखायी पड़नेवाले इन्द्रने आये हुए उन दानवोंको बाणोंके समूहोंसे इस प्रकार ढक दिया जिस प्रकार बादल जलकी वर्षासे पर्वतोंको ढक देता है। उसके बाद इन्द्रने मय आदि दानवोंको बाणोंसे ढककर कङ्क पक्षीके पंखसे लगे तेज—नुकीली धारवाले बाणोंसे पाक नामके दानवका वध कर दिया॥ १०–१३॥

तस्य नाम विभुर्लेभे शासनत्वात् शरैर्दृढैः। पाकशासनतां शक्रः सर्वामरपतिर्विभुः॥ १४॥
तथाऽन्यं पुरनामानं बाणासुरसुतं शरैः। सुपुङ्खैर्दारयामास ततोऽभूत् स पुरन्दरः॥ १५॥
हत्वैवं तान् महासैन्यं गोत्रभिद् दानवं बलम्। तच्चापि विजितं ब्रह्मन् रसातलमुपागमत्॥ १६॥
एतदर्थं सहस्राक्षः प्रोक्तो मलयाचलम्। त्र्यम्बकेन मुनिश्रेष्ठ किमन्यच्छ्रोतुमिच्छसि॥ १७॥

मजबूत बाणोंसे पाकको दण्डित (शासित) करनेके कारण सभी अमरोंके पति विभु इन्द्रको पाकशासनकी उपाधि मिली। इसी प्रकार उन्होंने सुन्दर पुंख लगे बाणोंसे दूसरे पुर नामक बाणासुरके पुत्रका (भी) वध कर दिया। इसीसे वे पुरन्दर हुए। ब्रह्मन्! इस प्रकार उन दानवोंका नाश कर इन्द्रने युद्धमें दानव-सेनाको जीत लिया। तब हारा हुआ दानवोंका सेना-समूह रसातलमें चला गया। मुनिश्रेष्ठ! इसीलिये शंकरने इन्द्रको मलय पर्वतपर भेजा था। अब आप और क्या सुनना चाहते हैं? ॥ १४–१७॥

नारद उवाच

किमर्थं देवराजोऽसौ गोत्रभिन् कथ्यते हरिः। एष मे संशयो ब्रह्मन् हृदि सम्परिवर्तते॥ १८॥

नारदने कहा (पूछा)—ब्रह्मन्! मेरे हृदयमें यह संदेह है कि देवपति-(इन्द्र-) को गोत्रभिद् क्यों कहा जाता है॥ १८॥

पुलस्त्य उवाच

श्रूयतां गोत्रभिच्छक्रः कीर्तितो हि यथा मया। हते हिरण्यकशिपौ यच्चकारारिमर्दनः ॥ १९ ॥
दितिर्विनष्टपुत्रा वै कश्यपं प्राह नारद। विभो नाथोऽसि मे देहि शक्रहन्तारमात्मजम् ॥ २० ॥
कश्यपस्तामुवाचाथ यदि त्वमसितेक्षणे। शौचाचारसमायुक्ता स्थास्यसे दशतार्दश ॥ २१ ॥
संवत्सराणां दिव्यानां ततस्त्रैलोक्यनायकम्। जनयिष्यसि पुत्रं त्वं शत्रुघ्नं नान्यथा प्रिये ॥ २२ ॥

पुलस्त्यजी बोले—मैंने इन्द्रको गोत्रभिद् जैसे कहा तथा हिरण्यकशिपुके मार दिये जानेपर शत्रुमर्दन इन्द्रने जो किया, आप (सब) सुनें। नारदजी! पुत्रकी मृत्यु हो जानेपर दितिने कश्यपसे कहा—प्रभो! आप मेरे पति हैं, मुझे इन्द्रका वध करनेवाला पुत्र दीजिये। कश्यपने उनसे कहा—असितनयने! यदि तुम सौ दिव्य वर्षोंतक पवित्र आचरण करोगी तो तुम तीनों लोकोंका मार्गदर्शक एवं शत्रुनाशकारी पुत्र उत्पन्न करोगी। प्रिये! इसके सिवा दूसरा कोई उपाय नहीं है ॥ १९–२२ ॥

इत्येवमुक्ता सा भर्त्रा दितिर्नियममास्थिता। गर्भाधानमृषिः कृत्वा जगामोदयपर्वतम् ॥ २३ ॥
गते तस्मिन् मुनिश्रेष्ठे सहस्राक्षोऽपि सत्वरम्। तमाश्रममुपागम्य दितिं वचनमब्रवीत् ॥ २४ ॥
करिष्याम्यनुशुश्रूषां भवत्या यदि मन्यसे। बाढमित्यब्रवीद् देवी भाविकर्मप्रचोदिता ॥ २५ ॥
समिदाहरणादीनि तस्याश्चक्रे पुरन्दरः। विनीतात्मा च कार्यार्थी छिद्रान्वेषी भुजङ्गवत् ॥ २६ ॥

पतिके ऐसा कहनेपर दितिने नियमका निर्वाह करना प्रारम्भ कर दिया। कश्यप ऋषि गर्भाधान करके उदयगिरिपर चले गये। उन मुनिश्रेष्ठके उदयगिरिपर चले जानेके पश्चात् इन्द्रने शीघ्रतासे उस आश्रममें जाकर दितिसे यह वचन कहा—यदि आप अनुमति प्रदान करें तो मैं आपकी सेवा करूँ। भवितव्यतासे प्रेरित होकर देवीने कहा—ठीक है। विनीत बना हुआ इन्द्र अपने कार्यकी सिद्धिके लिये बिल खोजनेवाले सर्पकी भाँति अवसरकी प्रतीक्षा करते हुए उस (दिति) के लिये लकड़ी आदि लानेका कार्य करने लगे ॥ २३–२६ ॥

एकदा सा तपोयुक्ता शौचे महति संस्थिता। दशवर्षशतान्ते शिरःस्नाता तपस्विनी ॥ २७ ॥
जानुभ्यामुपरि स्थाप्य मुक्तकेशा निजं शिरः। सुष्वाप केशप्रान्तैस्तु सदिव्यचरणाऽभवत् ॥ २८ ॥
तमन्तरमशौचस्य ज्ञात्वा देवः सहस्रदृक्। विवेश मातुरुदरं नासारन्ध्रेण नारद ॥ २९ ॥
प्रविश्य जठरं शक्रो दैत्यमातुः पुरन्दरः। ददर्शोर्ध्वमुखं बालं कटिन्यस्तकरं महत् ॥ ३० ॥

एक हजार वर्ष बीत जानेपर मनोयोगसे पतिव्रताका पालन करनेमें लगी हुई वह तपस्विनी एक दिन सिरसे स्नान करनेके बाद बालोंको खोले हुए अपने घुटनोंपर सिर रखकर सो गयी। उसके बालोंके आगेके भाग (लटककर) पैरोंसे लग गये। नारदजी! सहस्राक्ष इन्द्रदेव अपवित्रताके लिये उस अवसरको (उपयुक्त) जानकर नासिकाके छिद्रसे माताके उदरमें प्रवेश कर गये। इन्द्रने दैत्यमाताकी विशाल कोखमें प्रवेश कर कमरपर हाथ रखे ऊपरको मुख किये हुए एक बालकको देखा ॥ २७–३० ॥

तस्यैवास्येऽथ ददृशे पेशीं मांसस्य वासवः। शुद्धस्फटिकसंकाशां कराभ्यां जगृहेऽथ ताम् ॥ ३१ ॥
ततः कोपसमाध्मातो मांसपेशीं शतक्रतुः। कराभ्यां मर्दयामास ततः सा कठिनाऽभवत् ॥ ३२ ॥
ऊर्ध्वेनार्धं च ववृधे त्वधोऽर्धं ववृधे तथा। शतपर्वाऽथ कुलिशः संजातो मांसपेशितः ॥ ३३ ॥
तेनैव गर्भं दितिजं वज्रेण शतपर्वणा। चिच्छेद सप्तधा मघवान् स रुरोद च विस्वरम् ॥ ३४ ॥

इन्द्रने उस बालकके मुँहमें एक शुद्ध स्फटिकके समान मांसपेशी देखी। इन्होंने उस मांसपेशीको दोनों हाथोंसे पकड़ लिया। उसके बाद क्रोधकी आगसे संतप्त हुए शतक्रतुने अपने दोनों हाथोंसे उस मांसपेशीको मसल दिया जिससे वह कठोर हो गयी (अब वह पिण्डके रूपमें हो गयी)। उस पिण्डका आधा भाग ऊपरकी ओर और आधा भाग नीचेकी ओर बढ़ गया। इस प्रकार उस मांसपेशीसे सौ पोरोंवाला वज्र बन गया। महान्! (इन्द्रने) उन्हीं पोरोंवाले वज्रसे दितिके द्वारा धारण किये हुए गर्भको सात भागोंमें काट डाला। फिर वह गर्भमें रहनेवाला बालक विकल्पने स्वरमें रोने लगा ॥ ३१–३४ ॥

ततोऽप्यबुध्यत दितिरज्ञानाच्छक्रचेष्टितम्। शुश्राव वाचं पुत्रस्य रुदमानस्य नारद ॥ ३५ ॥
शक्रोऽपि प्राह मा मूढ रुदस्वेति सुघर्घरम्। इत्येवमुक्त्वा चैकैकं भूयश्चिच्छेद सप्तधा ॥ ३६ ॥
ते जाता मरुतो नाम देवभृत्याः शतक्रतोः। मातुरेवापचारेण चलन्ते ते पुरस्कृताः ॥ ३७ ॥
ततः सकुलिशः शक्रो निर्गम्य जठरात् तदा। दितिं कृताञ्जलिपुटः प्राह भीतस्तु शापतः ॥ ३८ ॥
ममास्ति नापराधोऽयं यच्छस्तस्तनयस्तव। तवैवापनयाच्छस्तस्तन्मे न क्रोद्धुमर्हसि ॥ ३९ ॥

[पुलस्त्यजी कहते हैं—] नारदजी! उसके बाद दिति जग गयी और उसने इन्द्रकी की हुई चेष्टाको जान लिया। उसने रोते हुए पुत्रकी वाणी सुनी। इन्द्रने भी कहा—मूर्ख! घर्घर शब्दसे मत रोओ। ऐसा कहकर उन्होंने प्रत्येक टुकड़ेको पुनः सात-सात टुकड़ोंमें काट डाला। वे (कटे हुए टुकड़े) इन्द्रके मरुत् नामके देवभृत्य हो गये। माताके ही अनुचित कार्य करनेके कारण वे आगे चलते हैं। उसके बाद वज्र लिये हुए इन्द्रने जठरसे बाहर आकर एवं शापसे भयभीत होकर हाथ जोड़कर दितिसे कहा—आपके पुत्रको जो मैंने काटा है इसमें मेरा अपराध नहीं है। आपके ही अपचार-(पवित्रताका पालन न करने-) से वह काटा गया। अतः मेरे ऊपर आपको कुपित नहीं होना चाहिये ॥ ३५–३९ ॥

दितिरुवाच

न तवात्रापराधोऽस्ति मन्ये दिष्टमिदं पुरा। सम्पूर्णे त्वपि काले वै याऽशौचत्वमुपागता ॥ ४० ॥

दितिने कहा—इसमें तुम्हारा कोई दोष नहीं है। मैं इसे पूर्वनियोजित मानती हूँ। इसीसे समय पूरा होनेपर भी मैंने अपवित्रताका आचरण कर दिया ॥ ४० ॥

पुलस्त्य उवाच

इत्येवमुक्त्वा तान् बालान् परिसान्त्व्य दितिः स्वयम्। देवराज्ञा सहैतांस्तु प्रेषयामास भामिनी ॥ ४१ ॥
एवं पुरा स्वानपि सोदरान् स गर्भस्थितानुज्झरितुं भयार्तः।
बिभेद वज्रेण ततः स गोत्रभित् ख्यातो महर्षे भगवान् महेन्द्रः ॥ ४२ ॥

इति श्रीवामनपुराणे एकसप्ततितमोऽध्यायः ॥ ७१ ॥

पुलस्त्यजी बोले—भामिनी दितिने ऐसा कहनेके बाद उन बालकोंको सान्त्वना देकर उन्हें देवराजके साथ ही भेज दिया। महर्षे! इस प्रकार पूर्वकालमें भयार्त होकर महेन्द्रने गर्भस्थित अपने ही सहोदरोंके विनाशके लिये उन्हें वज्रद्वारा काट दिया। इसीसे वे 'गोत्रभित्' नामसे प्रसिद्ध हो गये ॥ ४१-४२ ॥

इस प्रकार श्रीवामनपुराणमें एकहत्तरवाँ अध्याय पूरा हुआ ॥ ७१ ॥

[अथ द्विसप्ततितमोऽध्यायः]

नारद उवाच

यदमी भवता प्रोक्ता मरुतो दितिजोत्तमाः । तत् केन पूर्वमासन् वै मरुन्मार्गेण कथ्यताम् ॥ १ ॥
पूर्वमन्वन्तरेष्वेव समतीतेषु सत्तम । के त्वासन् वायुमार्गस्थास्तन्मे व्याख्यातुमर्हसि ॥ २ ॥

बहत्तरवाँ अध्याय प्रारम्भ

(स्वायम्भुव, स्वारोचिष, उत्तम, तामस, रैवत चाक्षुष-मन्वन्तरोंके मरुद्गणकी उत्पत्तिका वर्णन)

नारदजीने कहा—(पुलस्त्यजी !) आपने दितिसे उत्पन्न उत्तम मरुद्गणोंका जो वर्णन किया उसके विषयमें यह कहिये कि पहले वे मरुत् किस मार्गमें अवस्थित थे; सत्तम ! आप मुझे विशेषरूपसे यह बतलाये कि पूर्व मन्वन्तरके बीत जानेपर कौन (मरुत्) वायुमार्गमें स्थित थे ? ॥ १-२ ॥

पुलस्त्य उवाच

श्रूयतां पूर्वमरुतामुत्पत्तिं कथयामि ते । स्वायम्भुवं समारभ्य यावन्मन्वन्तरं त्विदम् ॥ ३ ॥
स्वायम्भुवस्य पुत्रोऽभून्मनोर्नाम प्रियव्रतः । तस्याभवत् सवनो नाम पुत्रस्त्रैलोक्यपूजितः ॥ ४ ॥
स चानपत्यो देवर्षे नृपः प्रेतगतिं गतः । ततोऽरुदत् तस्य पत्नी सुदेवा शोकविह्वला ॥ ५ ॥
न ददाति तदा दग्धुं समालिङ्ग्य स्थिता पतिम् । नाथ नाथेति बहुशो विलपन्ती ह्यनाथवत् ॥ ६ ॥

पुलस्त्यजी बोले—(नारदजी !) स्वायम्भुव मन्वन्तरसे लेकर इस मन्वन्तरतकके पहलेतकके मरुद्गणोंकी उत्पत्ति आपसे कहता हूँ, उसे सुनिये । स्वायम्भुव मनुके पुत्रका नाम प्रियव्रत था । तीनों लोकोंमें सत्कार प्राप्त सवन उन प्रियव्रतके पुत्र थे । देवर्षे ! वे राजा पुत्रहीन ही मृत्युको प्राप्त हो गये । उसके बाद उनकी सुदेवा नामकी पत्नी शोकसे विह्वल होकर रोने लगी । उसने उस मृत-शरीरको दाह-संस्कार करनेके लिये नहीं दिया । पतिके गलेसे लिपटी हुई वह 'हा नाथ, हा नाथ' कहती हुई असहायकी भाँति अपरिरत विलाप करने लगी ॥ ३-६ ॥

तामन्तरिक्षादशरीरिणी वाक् प्रोवाच मा राजपत्नीह रोदीः ।
यद्यस्ति ते सत्यमनुत्तमं तदा भवत्वयं ते पतिना सहाग्निः ॥ ७ ॥
सा तां वाणीमन्तरिक्षान्निशम्य प्रोवाचेदं राजपुत्री सुदेवा ।
शोचाम्येनं पार्थिवं पुत्रहीनं नैवात्मानं मन्दभाग्यं विहङ्ग ॥ ८ ॥
सोऽप्यब्रवीन्मा रुदस्वायताक्षि पुत्रास्तवत्तो भूमिपालस्य सप्त ।
भविष्यन्ति वह्निमारोह शीघ्रं सत्यं प्रोक्तं श्रद्दधस्व त्वमद्य ॥ ९ ॥
इत्येवमुक्ता खचरेण बाला चितौ समारोप्य पतिं वरार्हम् ।
हुताशमासाद्य पतिव्रता तं संचिन्तयन्ती ज्वलनं प्रपन्ना ॥ १० ॥

उस समय आकाशसे अशरीरिणीवाणीने उससे कहा—राजपत्नि ! तुम रोओ मत । यदि तुम्हारा सत्य (पति-सेवा-) का श्रेष्ठ है तो यह अग्नि पतिके साथ तुम्हारे हितके लिये हो । आकाशमें हुई उस वाणीको सुनकर राजपुत्री सुदेवाने कहा—आकाशचारिन् ! मैं इस पुत्र-हीन राजाके लिये सोच कर रही हूँ; न कि अपने दुर्भाग्यके लिये । उस आकाशवाणीने फिर कहा—विशालनयने ! तुम रोओ मत । तुम्हारे गर्भसे तो राजाके सात पुत्र होंगे । तुम शीघ्र चितापर चढ़ जाओ । मैं सच कहता हूँ । इसपर तुम आज विश्वास करो । आकाशचारीके

ऐसा कहनेपर उस बालकने श्रेष्ठ पतिको चितापर रखा और पतिका ध्यान करती हुई जलती चितामें प्रवेश कर वह पतिव्रता अग्निकी ज्वालामें चली गयी (जल गयी) ॥ ७-१० ॥

ततो मुहूर्तान्नृपतिः श्रिया युतः समुत्तस्थौ सहितो भार्ययाऽसौ।
समुत्पपाताथ स कामचारी समं महिष्या च सुनाभपुत्र्या ॥ ११ ॥
तस्याम्बरे नारद पार्थिवस्य जाता रजोगा महिषी तु गच्छतः।
स दिव्ययोगात् प्रतिसंस्थितोऽम्बरे भार्यासहायो दिवसानि पञ्च ॥ १२ ॥
ततस्तु षष्ठेऽहनि पार्थिवेन ऋतुर्न वन्ध्योऽद्य भवेद् विचिन्त्य।
रराम तन्व्या सह कामचारी ततोऽम्बरात् प्राच्यवतास्य शुक्रम् ॥ १३ ॥
शुक्रोत्सर्गावसाने तु नृपतिर्भार्यया सह। जगाम दिव्यया गत्या ब्रह्मलोकं तपोधन ॥ १४ ॥

इसके बाद क्षणभरमें शोभासे सम्पन्न वह राजा पत्नीके साथ उठा और सुनाभकी पुत्री अपनी राजरानीके साथ आकाशमें जाकर स्वच्छन्दतासे भ्रमण करने लगा। नारदजी ! आकाशमें जाते हुए उस राजाकी रानी रजस्वला हो गयी। वह राजा दिव्ययोगसे आकाशमें भार्या- (सुदेवा-) के साथ पाँच दिनोंतक रहा। उसके बाद छठे दिन आज ऋतु व्यर्थ न हो जाय—ऐसा सोचकर कामचारी राजा भार्याके साथ विहार करने लगा। उसके बाद आकाशमें उसका शुक्र स्खलित हो गया। तपोधन ! शुक्र-त्याग करनेके पश्चात् राजा पत्नीके साथ दिव्यगतिसे ब्रह्मलोकको चला गया ॥ ११-१४ ॥

तदम्बरात् प्रच्युतमभ्रवर्णं शुक्रं समाना नलिनी वपुष्मती।
सिता विशाला हरिताऽलिनी च सप्तर्षिपत्न्यो ददृशुर्यथेच्छया ॥ १५ ॥
तद् दृष्ट्वा पुष्करे न्यस्तं प्रत्यैक्षन्त तपोधन। मन्यमानास्तदमृतं सदा यौवनलिप्सया ॥ १६ ॥
ततः स्नात्वा च विधिवत् सम्पूज्य तान् निजान् पतीन्। पतिभिः समनुज्ञाताः पपुः पुष्करसंस्थितम् ॥ १७ ॥
तच्छुक्रं पार्थिवश्रेष्ठ मन्यमानास्तदाऽमृतम्। पानमात्रेण शुक्रेण पार्थिवेन्द्रोद्भवेन ताः ॥ १८ ॥
ब्रह्मतेजोविहीनास्ता जाताः पत्न्यस्तपस्विनाम्। ततस्तु तत्यजुः सर्वे सदोषास्ताश्च पत्नयः ॥ १९ ॥

समाना, नलिनी, वपुष्मती, सिता, विशाला, हरिता एवं अलिनी—इन सात ऋषि-पत्नियोंने आकाशसे गिरते हुए अभ्रके समान वर्णवाले शुक्रको इच्छानुसार देखा। तपोधन ! उसे देखकर उसको अमृत समझती हुई उन [illegible] सदा युवती बने रहनेकी इच्छासे उसे कमलमें रख लिया। उसके बाद वे स्नान करके अपने-अपने पतियोंकी पूजा कर उन ऋषियोंकी अनुमतिसे कमलमें रखे राजाके उस शुक्रको अमृत मानती हुई पान कर गयीं। [illegible] ऋषियोंकी वे पत्नियाँ ब्रह्मतेजसे रहित हो गयीं। उसके बाद उन [illegible] उन दोषिणी पत्नियोंका त्याग कर दिया ॥ १५-१९ ॥

सुषुवुः सप्त तनयान् रुदतो भैरवं मुने। तेषां रुदितशब्देन सर्वमापूरितं जगत् ॥ २० ॥
अथाजगाम भगवान् ब्रह्मा लोकपितामहः। समभ्येत्याब्रवीद् बालान् मा रुदध्वं महाबलाः ॥ २१ ॥
मरुतो नाम यूयं वै भविष्यध्वं विहङ्गमाः। इत्येवमुक्त्वा देवेशो ब्रह्मा लोकपितामहः ॥ २२ ॥
[illegible] च। ते त्वासन् मरुतस्त्वाद्या मनोः स्वायम्भुवेऽन्तरे ॥ २३ ॥

मुने ! उन स्त्रियोंने भैरव रुदन करते हुए सात पुत्रोंको जन्म दिया। उनकी रुलाई सारे [illegible] इसके बाद भगवान् लोकपितामह ब्रह्मा आ गये। बालकोंके समीप जाकर उन्होंने कहा—हे

महाकल्याणो ! रोओ मत । तुम्हारा नाम मरुत् होगा । तुम आकाशमें विचरण करनेवाले होओगे । इतना कहकर लोक-पितामह देवेश ब्रह्मा उन मरुतोंको लेकर आकाशमें चले गये और उन्हें (आकाशमें रहनेका) आदेश दे दिया । वे ही स्वायम्भुव मनुके समयमें 'आद्य मरुत' हुए ॥ २०–२३ ॥

स्वारोचिषे तु मरुतो वक्ष्यामि शृणु नारद । स्वारोचिषस्य पुत्रस्तु श्रीमानासीत् क्रतुध्वजः ॥ २४ ॥
तस्य पुत्राभवन् सप्त सप्तार्चिः प्रतिमा मुने । तपोऽर्थं ते गताः शैलं महामेरुं नरेश्वराः ॥ २५ ॥
आराधयन्तो ब्रह्माणं पदमैन्द्रमभीप्सवः । ततो विग्नधियामास महस्राक्षो भयातुरः ॥ २६ ॥
पूतनामप्सरोमुख्यां प्राह नारद वाक्यवित् । गच्छस्व पूतने शैलं महामेरुं विशालिनम् ॥ २७ ॥

नारदजी ! अब मैं स्वारोचिष मन्वन्तरके मरुतोंका वर्णन करता हूँ, (उसे) सुनो । स्वारोचिषके पुत्र श्रीमान् क्रतुध्वज थे । मुने ! उनके अग्निके समान सात पुत्र थे । वे सभी नरेश्वर तपस्या करनेके लिये महामेरु पर्वतपर चले गये । वे इन्द्रपदको प्राप्त करनेकी इच्छासे ब्रह्माकी आराधना करने लगे । उसके बाद बुद्धिमान् इन्द्र भयभीत हो गये । नारदजी ! वक्ताके अभिप्रायको समझ सकनेवाले इन्द्रने अप्सराओंमें प्रधान पूतनासे कहा— पूतने ! तुम महान् विशाल मेरु पर्वतपर जाओ ॥२४–२७॥

तत्र तप्यन्ति हि तपः क्रतुध्वजसुता महत् । यथा हि तपसो विघ्नं तेषां भवति सुन्दरि ॥ २८ ॥
तथा कुरुष्व मा तेषां सिद्धिर्भवतु सुन्दरि । इत्येवमुक्ता शक्रेण पूतना रूपशालिनी ॥ २९ ॥
तत्राजगाम त्वरिता यत्रातप्यन्त ते तपः । आश्रमस्याविदूरे च नदी मन्दोदवाहिनी ॥ ३० ॥
तस्यां स्नातुं समायाताः सर्व एव सहोदराः । साऽपि स्नातुं सुचार्वङ्गी त्ववतीर्णा महानदीम् ॥ ३१ ॥

वहाँ क्रतुध्वजके पुत्र महान् तप कर रहे हैं । सुन्दरि ! उनके तपमें जिस प्रकार विघ्न हो तथा हे सुन्दरि ! उन्हें सिद्धिकी प्राप्ति जैसे न हो सके—ऐसा उपाय करो । इन्द्रके कहनेपर रूपवती पूतना शीघ्र वहाँ गयी, जहाँ वे तपस्या कर रहे थे । आश्रमके पास ही मन्द जल-प्रवाहवाली नदी थी । सभी सगे भाई उस नदीमें स्नान करनेके लिये आये । वह सुन्दरी भी स्नान करनेके लिये उस महानदीमें उतरी ॥ २८–३१ ॥

ददृशुस्ते नृपाः स्नान्तीं तत्रक्षुक्षुभिरे मुने । तेषां च प्राच्यवच्छुक्रं तत्पपौ जलचारिणी ॥ ३२ ॥
शङ्खिनी ग्राहमुख्यस्य महाशङ्खस्य वल्लभा । तेऽपि विभ्रष्टतपसो जग्मू राज्यं तु पैतृकम् ॥ ३३ ॥
सा चाप्सराः शक्रमेत्य याथातथ्यं न्यवेदयत् । ततो बहुतिथे काले सा ग्राही शङ्खरूपिणी ॥ ३४ ॥
समुद्धृता महाजालैर्मत्स्यबन्धेन मानिनी । स तां दृष्ट्वा महाशङ्खीं स्वगृहस्थां मत्स्यजीविकः ॥ ३५ ॥
निवेदयामास तदा क्रतुध्वजसुतेषु वै । तयाऽभ्येत्य महात्मानो योगिनो योगधारिणः ॥ ३६ ॥

मुने ! उन राजपुत्रोंने स्नान करती हुई उस पूतनाको देखा और वे क्षुभित हो गये; परिणामतः उनका शुक्रपात हो गया । मछलियोंमें प्रधान महाशङ्खकी प्रिया शङ्खिनीने उसे पी लिया । तपके भ्रष्ट हो जानेपर वे भी अपने पिताके राज्यमें चले गये । उस अप्सराने भी इन्द्रके पास जाकर उनसे सब तथ्यको बतला दिया । उसके बाद बहुत समयके पश्चात् किसी धीवरने महाजालद्वारा उस शङ्खरूपिणी मानिनी बड़ी मछलीको पकड़ लिया । मछलीसे जीवनका निर्वाह करनेवाले (धीवर-) ने भूमिपर पड़ी हुई उस महाशङ्खीको देखकर क्रतुध्वजके पुत्रोंसे निवेदित किया । योगको धारण करनेवाले वे महात्मा योगी उसके निकट गये ॥ ३२–३६ ॥

[अथ त्रिसप्ततितमोऽध्यायः]

पुलस्त्य उवाच

एतदर्थं बलिर्दैत्यः कृतो राजा कलिप्रिय। मन्त्रप्रदाता प्रह्लादः शुक्रश्चाभूत् पुरोहितः ॥ १ ॥
ज्ञात्वाऽभिषिक्तं दैतेयं विरोचनसुतं बलिम्। दिदृक्षवः समायाताः मयाद्याः सर्व एव हि ॥ २ ॥
तानागतान्निरीक्ष्यैव पूजयित्वा यथाक्रमम्। पप्रच्छ कुलजान् सर्वान् किन्नु श्रेयस्करं मम ॥ ३ ॥
तमूचुः सर्व एवैनं शृणुष्व सुरमर्दन। यत् ते श्रेयस्करं कर्म यदस्माकं हितं तथा ॥ ४ ॥

तिहत्तरवाँ अध्याय प्रारम्भ

(बलि, मय-प्रभृति दैत्योंका देवताओंके साथ युद्ध, कालनेमिके साथ विष्णुभगवान्‌का युद्ध और कालनेमिका वध)

पुलस्त्यजी बोले—कलिप्रिय (नारदजी) ! बलि दैत्यको इसीलिये राजा बनाया गया था। प्रह्लाद उसके परामर्श देनेवाले मन्त्री तथा शुक्राचार्य पुरोहित थे। विरोचनके पुत्र बलि दैत्यको राजपदपर अभिषिक्त हुआ जानकर मयके साथ सभी दैत्य उसे देखनेकी इच्छासे आये। उन (वहाँ) आये हुए अपने कुटुम्बियोंको देखकर (बलिने) यथाक्रम उनकी पूजा की एवं उनसे पूछा कि मेरे लिये क्या कल्याणकारी है ? उन सभीने उससे कहा—देवमर्दन ! तुम्हारे लिये जो कल्याणकारी और हमारे लिये हितकर कर्म है, उसे सुनो ॥ १–४ ॥

पितामहस्तव बली आसीद् दानवपालकः। हिरण्यकशिपुर्वीरः स शक्रोऽभूज्जगत्त्रये ॥ ५ ॥
तमागम्य सुरश्रेष्ठो विष्णुः सिंहवपुर्धरः। प्रत्यक्षं दानवेन्द्राणां नखैस्तं हि व्यदारयत् ॥ ६ ॥
अपकृष्टं तथा राज्यमन्धकस्य महात्मनः। तेनामर्षे महाबाहो शङ्करेण त्रिशूलिना ॥ ७ ॥
तथा तव पितृव्योऽपि जम्भः शक्रेण घातितः। कुजम्भो विष्णुना चापि प्रत्यक्षं पशुवत् तव ॥ ८ ॥

तुम्हारे पितामह हिरण्यकशिपु बलवान्, वीर और दानवकुलके पालन करनेवाले थे। तीनों लोकोंके वे इन्द्र हो गये थे। किंतु सिंहशरीर धारणकर देवोंमें श्रेष्ठ श्रीविष्णुने उनके पास आकर श्रेष्ठ दानवोंके सामने ही उन्हें अपने नखोंसे विदीर्ण कर डाला। महाबाहो ! त्रिशूल धारण करनेवाले शंकरने भी उन (देवों)के लिये महान् बलशाली अन्धकका राज्य छीन लिया था। और इन्द्रने तुम्हारे चाचा (पिताके भाई) जम्भको मार दिया एवं विष्णुने तुम्हारे सामने कुजम्भको पशुकी तरह मार डाला ॥ ५–८ ॥

शम्भुः पाको महेन्द्रेण भ्राता तव सुदर्शनः। विरोचनस्तव पिता निहतः कथयामि ते ॥ ९ ॥
श्रुत्वा गोत्रक्षयं महत् कृतं शक्रेण दानवः। उद्योगं कारयामास सह सर्वैर्महासुरैः ॥ १० ॥
रथैरन्ये गजैरन्ये वाजिभिश्चापरेऽसुराः। पदातयस्तथैवान्ये जग्मुर्युद्धाय दैवतैः ॥ ११ ॥
मयोऽग्रे याति बलवान् सेनानायो भयङ्करः। सैन्यस्य मध्ये च बलिः कालनेमिश्च पृष्ठतः ॥ १२ ॥
वामपार्श्वमवष्टभ्य शाल्वः प्रथितविक्रमः। प्रयाति दक्षिणं घोरं तारकाख्यो भयङ्करः ॥ १३ ॥

मैं तुमसे सत्य कह रहा हूँ कि महेन्द्रने शम्भु, पाक और तुम्हारे भाई सुदर्शन एवं तुम्हारे पिता विरोचनको मार डाला है। [पुलस्त्यजी कहते हैं कि—] ब्रह्मन् ! इन्द्रद्वारा किये गये अपने कुलके क्षयको सुनकर दानव बलिने समस्त महान् असुरोंको युद्ध करनेके लिये तैयारी करनेकी प्रेरणा दी। फिर तो कुछ रथोंपर, कुछ हाथियोंपर, कुछ घोड़ोंपर और कुछ पैदल ही देवताओंसे युद्ध करनेके लिये चल

तानित्थं प्रेक्ष्य दैत्यान् मयबलिपुरगान् कालनेमिप्रधानान्
बाणेराकृष्य शार्ङ्गं त्वनवरतमुरोभेदिभिर्वज्रकल्पैः ।
कोपादारक्तदृष्टिः सरथगजहयान् दृष्टिनिर्धूतवीर्यान्
नाराचाख्यैः सुपुङ्खैर्जलद इव गिरीन् छादयामास विष्णुः ॥ ४० ॥
तैर्बाणैश्छाद्यमाना हरिकरमुदितैः कालदण्डप्रकाशै-
र्नाराचैर्मर्त्यचन्द्रैर्बलिमयपुरगा भीतभीतास्त्वरन्तः ।
प्रारम्भे दानवेन्द्रं शतवदनमथो प्रेषयन् कालनेमिं
स प्रायाद् देवसैन्यप्रभुममितबलं केशवं लोकनाथम् ॥ ४१ ॥

वह दैत्येन्द्र कालनेमि बिना अस्त्रका था; फिर भी दानवोंके साथ मिलकर क्रोध करके हाथ, पैर और नखके प्रहारसे ही इन्द्र, सूर्य और चन्द्रमाके साथ देवसेनाको तेजीसे मारने लगा। वह आगके समान चक्रोंसे आकाश एवं पृथ्वीपर नीचे-ऊपर चारों ओर वार करने लगा। उस समय उसका रूप प्रलय-कालमें समस्त जगत्को दग्ध करनेवाली आग (प्रलयाग्नि) के समान था। उन बलिष्ठ शत्रुको बढ़ते देखकर देवता, गन्धर्व, सिद्ध, साध्य, अश्विनीकुमार आदि भयसे इधर-उधर (डरते हुए घबड़ाकर) चारों ओर भागने लगे। उछलते-कूदते हुए दैत्य अत्यन्त घमण्डके साथ देवोंसे पूजित सुन्दर मुकुटवाले विष्णुभगवान्के सामने जाकर अनेक प्रकारके शस्त्रोंके आघातसे उनके (अमितबलके) बलको समाप्त करने लगे—विष्णुकी पराजय मानने लगे। इस प्रकार प्रहार कर रहे मय, बलि एवं कालनेमि आदि दैत्योंको देखकर विष्णुके नेत्र क्रोधसे लाल हो गये। फिर तो उन्होंने अपनी दृष्टिसे ही रथ, हाथी और घोड़ोंको शक्ति और पराक्रमसे रहित कर दिया तथा उसी तरह सुन्दर पंखोंवाले लोहेके बने अशनिके समान 'नाराच' बाणोंसे पर्वतको ढक दिया, जैसे मेघ पर्वतको ढक देते हैं। विष्णुके हाथोंसे छोड़े गये कालदण्डके समान अतिभयंकर उन लोहेके बने 'नाराच' बाणोंसे ढके हुए बलि एवं मय आदि दैत्योंने [illegible] कालनेमिको प्रेरित किया। वह अति बलवान् देव सेनापति लोकनाथ केशवके सामने उपस्थित हुआ ॥ ३८-४१ ॥

तं दृष्ट्वा शतनेत्रमुद्यतगदं शैलेन्द्रतुल्याकृतिं विष्णुः शार्ङ्गमपास्य सत्वरमथो जग्राह चक्रं करे ।
सोऽप्येनं प्रसमीक्ष्य दैत्यविहगप्रत्यक्षमूतं मानिनं प्रोवाचाथ विहस्य तं च सुचिरं मेघस्वनो दानवः ॥४२॥
अयं स दनुपुत्रसैन्यविनाशकृद्रिपुः परमकोपितः स मघोर्विघातकृत् ।
हिरण्यनयनान्तकः कुसुमपूजाग्रजितः क्व यानि मम दृष्टिगोचरं निपतितः खलः ॥ ४३ ॥
यदेष संप्रति ममान्तकमभ्युपैति नूनं न याति निलयं निजमम्बुजाक्षः ।
मन्मुष्टिपिष्टशिरसं मुसलायुधाग्रं नैक्षद्ध्यन्त सुरजना भयकातराक्षः ॥ ४४ ॥
इत्येवमुक्त्वा मधुसूदनं वै स कालनेमिः स्फुरिताधरोष्ठः ।
गदां प्रगृह्योरुतरां ज्वलन्तीं मुमोच शैले कुलिशं यथेन्द्रः ॥ ४५ ॥
तामापतन्तीं प्रसमीक्ष्य विष्णुर्घोरां गदां दानवबाहुमुक्ताम् ।
बाणेन चिच्छेद सुरोत्तमस्य मनोरथं पूर्वकृतेव कर्म ॥ ४६ ॥

[illegible] पर्वतराजके समान कालनेमिको देखकर विष्णुने (अपने) शार्ङ्गधनुषको [illegible] उसको देखकर बहुत देरतक जोरसे हँसते हुए मेघके समान बोलनेवाले [illegible] मुख-दूसरेकी परवाह न करनेवाले मनस्वी हरिसे कहा—यही

दानव-सेनाको डरानेवाला शत्रु, अत्यन्त क्रोधी, मधुको मारनेवाला, हिरण्याक्षका वध करनेवाला और छन्दोंसे की गयी पूजासे प्रसन्न होनेवाला है। यह खल मेरी आँखोंके सामने आकर अब कहाँ जा सकता है। यह कमलनयन यदि इस समय मेरे साथ युद्ध करे तो अपने घर नहीं जा सकेगा और तब देवता लोग मेरी मुट्ठीमें पिसनेसे शिथिल अङ्गोंवाले इस (विष्णु)को भयसे कातर नेत्रोंसे धूलिधूसरित हुआ देखेंगे। मधुसूदन भगवान् विष्णुसे ऐसा कहकर क्रोधसे अधरोष्ठको फड़काते हुए कालनेमिने, गरुड़पर अपनी गदा इस प्रकार फेंकी जैसे इन्द्र पर्वतपर वज्र फेंकते हैं। भगवान् विष्णुने दानवके हाथसे छूटी हुई उस भयदायिनी गदाको आते देखकर चक्रसे उसे ऐसे नष्ट कर दिया जैसे पूर्वकृत कर्म भाग्यहीन मनुष्यके मनोरथको नष्ट कर देता है ॥ ४२–४६ ॥

गदां छित्त्वा दानवाभ्याशमेत्य भुजौ पीनौ सम्प्रचिच्छेद वेगात्।
भुजाभ्यां कृत्ताभ्यां दग्धशैलप्रकाशः संदृश्येताप्यपरः कालनेमिः ॥ ४७ ॥
ततोऽस्य माधवः कोपाच्छिरश्चक्रेण भूतले। छित्त्वा निपातयामास पक्वं तालफलं यथा ॥ ४८ ॥
तथा विबाहुर्विशिरा मुण्डतालो यथा वने। तस्थौ मेरुरिवाकम्प्यः कबन्धः क्ष्माधरेश्वरः ॥ ४९ ॥
तं वैनतेयोऽप्युरसा खगोत्तमो निपातयामास मुने धरण्याम्।
यथाम्बराद् बाहुशिरः प्रणष्टं महेन्द्रः कुलिशेन भूम्याम् ॥ ५० ॥
तस्मिन् हते दानवसैन्यपाले सम्पीड्यमानास्त्रिदशैस्तु दैत्याः।
विमुक्तशस्त्रालकचर्मवस्त्रा सम्प्राद्रवन् बाणमृतेऽसुरेन्द्राः ॥ ५१ ॥

इति श्रीवामनपुराणे त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

गदाको काटकर विष्णुभगवान् दानवके निकट चले गये और उन्होंने शीघ्रतासे उसकी मोटी-मोटी बाहुओंको काट डाला। भुजाओंके कट जानेपर कालनेमि दूसरे दग्ध पर्वतके समान दिखलायी पड़ने लगा। उसके बाद माधव (लक्ष्मीपति) ने क्रोधपूर्वक चक्रसे उसके सिरको काटकर पके हुए ताड़के फलके समान धरतीपर गिरा दिया। वनमें ठूँठे ताड़वृक्षके समान बाहुओं एवं सिरसे हीन कबन्ध अचल पर्वतराज मेरुके समान खड़ा रहा। मुने! जैसे महेन्द्रने वज्रसे बाँह और सिरहित बलको पृथिवीपर गिराया था, उसी प्रकार पक्षिश्रेष्ठ गरुड़ने अपनी छातीसे धक्का देकर उस (कबन्ध) को पृथ्वीपर गिरा दिया। उस दानव-सेनापति (कालनेमि) के मारे जानेपर बाणासुरके सिवा देवोंसे अत्यन्त पीड़ित सभी दैत्य शस्त्र, पट्टा, ढाल और वस्त्रको छोड़कर भाग गये ॥ ४७–५१ ॥

इस प्रकार श्रीवामनपुराणमें तिहत्तरवाँ अध्याय समाप्त हुआ ॥ ७३ ॥

[अथ चतुःसप्ततितमोऽध्यायः]

पुलस्त्य उवाच

संनिवृत्ते ततो बाणे दानवाः सत्वरं पुनः। निवृत्ता देवतानां च सक्रोधा युद्धलालसाः ॥ १ ॥
विष्णुरप्यमितौजास्तं ज्ञात्वाऽजेयं बलेः सुतम्। प्राहामन्त्र्य सुरान् सर्वान् युध्यध्वं विगतज्वराः ॥ २ ॥
विष्णुनाऽथ समादिष्टा देवाः शक्रपुरोगमाः। युयुधुर्दानवैः सार्धं विष्णुरप्यन्तरधीयत ॥ ३ ॥
माधवं गतमाज्ञाय शुक्रो बलिमुवाच ह। गोविन्देन सुरास्त्यक्तास्त्वं जयस्वाधुना बले ॥ ४ ॥

चौहत्तरवाँ अध्याय प्रारम्भ

(बलि-बाणका देवताओंसे युद्ध, बलिकी विजय, प्रह्लादका स्वर्गमें आना, बलिको प्रह्लादका उपदेश)

पुलस्त्यजी बोले—उसके बाद बाणासुरके लौट आनेपर फिर दानव तुरत शस्त्र लेकर देवताओंसे युद्ध करनेकी इच्छासे लौट पड़े। अत्यधिक तेजस्वी विष्णुने बलिके पुत्र बाणको अजेय जान करके देवताओंको ...र

कहा—आपलोग निर्भय होकर (सतर्कतासे) युद्ध कीजिये। विष्णुसे आदेश पाकर इन्द्र आदि देवता दानवोंके साथ युद्ध करने लगे। किंतु विष्णु अदृश्य हो गये। विष्णुको वहाँसे चला गया जानकर शुक्रने बलिसे कहा—बले! विष्णुने देवताओंको अकेले युद्धके लिये छोड़ दिया है। अब तुम जय प्राप्त करो॥ १-४॥

स पुरोहितवाक्येन प्रीतो याते जनार्दने। गदामादाय तेजस्वी देवसैन्यमभिद्रुतः॥ ५॥
बाणो बाहुसहस्रेण गृह्य प्रहरणान्यथ। देवसैन्यमभिद्रुत्य निजघान सहस्रशः॥ ६॥
मयोऽपि मायामास्थाय तैस्तै रूपान्तरैर्मुने। योधयामास बलवान् सुराणां च वरूथिनीम्॥ ७॥
विद्युज्जिह्वः पारिभद्रो वृषपर्वा शतेक्षणः। विपाको विक्षरः सैन्यं तेऽपि देवानुपाद्रवन्॥ ८॥

दुष्टजनोंको ताड़ना देनेवाले भगवान् विष्णुके चले जानेपर तेजस्वी बलि पुरोहित-(शुक्राचार्य-)के वाक्यसे हर्षित हो गदा लेकर देवसेनाकी ओर दौड़ा। बाणासुरने हजार हाथोंमें अस्त्र-शस्त्र लेकर देवसेनापर चढ़ाई कर दी और हजारोंका वध कर दिया। मुने! बलवान् मय दानव भी मायाके द्वारा विभिन्न रूपोंको धारणकर अमरोंकी सेनाके साथ युद्ध करने लगा। विद्युज्जिह्व, पारिभद्र, वृषपर्वा, शतेक्षण, विपाक तथा विक्षर भी देवताओंकी सेनापर टूट पड़े॥ ५-८॥

ते हन्यमाना दितिजैर्देवाः शक्रपुरोगमाः। गते जनार्दने देवे प्रायशो विमुखाऽभवन्॥ ९॥
तान् प्रभग्नान् सुरगणान् बलिबाणपुरोगमाः। पृष्ठतश्चाद्रवन् सर्वे त्रैलोक्यविजिगीषवः॥ १०॥
सम्बाध्यमाना दैतेयैर्देवाः सेन्द्रा भयातुराः। त्रिविष्टपं परित्यज्य ब्रह्मलोकमुपागताः॥ ११॥
ब्रह्मलोकं गतेष्वेवं सेन्द्रेष्वपि सुरेषु वै। स्वर्गभोक्ता बलिर्जातः सपुत्रभ्रातृबान्धवः॥ १२॥

भगवान् विष्णुके चले जानेपर इन्द्र आदि देवता दैत्योंके द्वारा मारे जानेपर युद्धसे पराङ्मुख हो गये। तीनों लोकोंपर विजय पानेकी इच्छावाले बलि एवं बाण आदि सभी (दैत्य) भागते हुए देवताओंके पीछे दौड़ पड़े। दैत्योंके द्वारा पीड़ित इन्द्र आदि देवता डरकर और स्वर्गको छोड़कर ब्रह्मलोक चले गये। फिर तो इन्द्रके साथ ही देवताओंके ब्रह्मलोक चले जानेपर बलि अपने पुत्र, भाई और बान्धवोंके साथ स्वर्गका भोक्ता हो गया॥ ९-१२॥

शक्रोऽभूद् भगवान् ब्रह्मन् बलिर्बाणो यमोऽभवत्। वरुणोऽभून्मयः सोमो राहुर्ह्रादो हुताशनः॥ १३॥
स्वर्भानुरभवत् सूर्यः शुक्रश्चासीद् बृहस्पतिः। येऽन्येऽप्यधिकृता देवास्तेषु जाताः सुरारयः॥ १४॥
पञ्चमस्य कलेरादौ द्वापरान्ते सुदारुणः। देवासुरोऽभूत् संग्रामो यत्र शक्रोऽप्यभूद् बलिः॥ १५॥
पातालाः सप्त तस्यासन् वशे लोकत्रयं तथा। भूर्भुवःस्वरिति ख्यातं दशलोकाधिपो बलिः॥ १६॥

ब्रह्मन्! भाग्यशाली बलि इन्द्र हुआ और बाण यम बना। मय दानव वरुण बन गया, राहु चन्द्र बना और ह्राद अग्नि बन गया। स्वर्भानु सूर्य बना और शुक्राचार्य बृहस्पति बन गये। इसी प्रकार अन्य विभिन्न अधिकार-प्राप्त देवोंके पदोंपर असुरोंने अधिकार जमा लिया। पाँचवें कलियुगके प्रारम्भ और द्वापरयुगके आखिरी भागमें देवताओं और दैत्योंका भयङ्कर युद्ध हुआ, जब कि बलि इन्द्र बन गया। सातों पाताल और भूः, भुवः, स्वः नामके प्रसिद्ध तीनों लोक उसके वशमें हो गये थे। इस प्रकार बलि दस लोकोंका शासक बन गया था॥ १३-१६॥

स्वर्गे स्वयं निवसति भुञ्जन् भोगान् सुदुर्लभान्। तत्रोपासन्त गन्धर्वा विश्वावसुपुरोगमाः॥ १७॥
तिलोत्तमाद्याप्सरसो नृत्यन्ति सुरनायक। वादयन्ति च वाद्यानि यक्षविद्याधरादयः॥ १८॥
विविधानि च भोगानि भुञ्जन् दैत्येश्वरो बलिः। सस्मार मनसा ब्रह्मन् प्रह्लादं स्वपितामहम्॥ १९॥
संस्मृतो नप्तृणा चासौ महाभागवतोऽसुरः। समभ्यागात् त्वरायुक्तः पातालात् स्वर्गमव्ययम्॥ २०॥

इन्द्र बना हुआ बलि अत्यन्त दुर्लभ भोगोंको स्वयं भोगता हुआ स्वर्गमें रहने लगा। वहाँ विश्वावसु आदि गन्धर्व उसकी सेवा करने लगे। देवर्षे! तिलोत्तमा आदि अप्सराएँ (उसे प्रसन्न करनेके लिये) नृत्य किया करती थीं और यक्ष तथा विद्याधर आदि बाजे बजाते थे। ब्रह्मन्! विविध भोगोंका भोग करते हुए दैत्येश्वर बलिने अपने पितामह प्रह्लादका मनसे स्मरण किया। पौत्र-(बलि-)के स्मरण करते ही वे महान् भागवत (विष्णुके परम भक्त) असुर प्रह्लादजी पातालसे अक्षय स्वर्गलोकमें चले आये ॥ १७-२० ॥

तमागतं समीक्ष्यैव त्यक्त्वा सिंहासनं बलिः। कृताञ्जलिपुटो भूत्वा ववन्दे चरणावुभौ ॥ २१ ॥
पादयोः पतितं वीरं प्रह्लादस्त्वरितो बलिम्। समुत्थाप्य परिष्वज्य विवेश परमासने ॥ २२ ॥
तं बलिः प्राह भोस्तात त्वत्प्रसादात् सुरा मया। निर्जिताः शक्रराज्यं च हृतं वीर्यबलान्मया ॥ २३ ॥
तदिदं तात मद्वीर्यविनिर्जितसुरोत्तमम्। त्रैलोक्यराज्यं भुङ्क्ष्व त्वं मयि भृत्ये पुरःस्थिते ॥ २४ ॥

उन्हें आया हुआ देखते ही बलिने सिंहासन छोड़कर और हाथ जोड़कर उनके चरणोंकी वन्दना की। प्रह्लाद चरणोंमें पड़े हुए वीर बलिको जल्दीसे उठाकर और गले लगाकर उचित सुन्दर आसनपर बैठ गये। बलिने उनसे कहा—अये तात! मैंने आपके पुण्य-प्रसादसे (प्राप्त) पराक्रम और बलसे देवताओंको जीत लिया और इन्द्रके राज्यको छीन लिया है। तात! आप मेरे पराक्रमसे जीते गये देवोंवाले इन उत्तम तीनों लोकोंके राज्यका भोग करें और मैं आपके सामने नौकर बनकर रहूँ ॥ २१-२४ ॥

एतावता पुण्ययुतः स्यामहं तात यत् स्वयम्। त्वदङ्घ्रिपूजाभिरतस्त्वदुच्छिष्टान्नभोजनः ॥ २५ ॥
न सा पालयतो राज्यं धृतिर्भवति सत्तम। या धृतिर्गुरुशुश्रूषां कुर्वतो जायते विभो ॥ २६ ॥
ततस्तदुक्तं बलिना वाक्यं श्रुत्वा द्विजोत्तम। प्रह्लादः प्राह वचनं धर्मकामार्थसाधनम् ॥ २७ ॥
मया कृतं राज्यमकण्टकं पुरा प्रशासिता भूः सुहृदोऽनुपूजिताः।
दत्तं यथेष्टं जनितास्तथात्मजाः स्थितो बले सम्प्रति योगसाधकः ॥ २८ ॥

तात! इस प्रकार आपके चरणोंकी पूजासे और आपके जूठे अन्नका भोजन करनेसे मैं पुण्यवान् हो जाऊँगा। सत्तम! विभो! राज्यका पालन करनेवाले शासकमें वह धीरता नहीं होती, जो धीरता गुरुकी सेवा करनेवालोंमें होती है। द्विजसत्तम! उसके बाद प्रह्लादने बलिके कहे वचनको सुनकर धर्म, अर्थ और कामका साधक वचन कहा। बलिराज! मैंने पहले शत्रुओंकी विघ्न-बाधासे रहित राज्य किया है। (मैं) पृथ्वीका शासन और मित्रोंका सत्कार कर चुका हूँ, इच्छानुसार दान दे चुका हूँ। (गृहस्थ-धर्मके नाते) मैंने पुत्रोंको भी उत्पन्न किया है। किंतु (इन सबसे शान्ति न पाकर) इस समय मैं योगसाधक बन गया हूँ ॥ २५-२८ ॥

गृहीतं पुत्र विधिवन्मया भूयोऽर्पितं तव। एवं भव गुरूणां त्वं सदा शुश्रूषणे रतः ॥ २९ ॥
इत्येवमुक्त्वा वचनं करे त्वादाय दक्षिणे। शाक्रे सिंहासने ब्रह्मन् बलिं तूर्णं न्यवेशयत् ॥ ३० ॥
सोपविष्टो महेन्द्रस्य सर्वरत्नमये शुभे। सिंहासने दैत्यपतिः शुशुभे मघवानिव ॥ ३१ ॥
तत्रोपविष्टश्चैवासौ कृताञ्जलिपुटो नतः। प्रह्लादं प्राह वचनं मेघगम्भीरया गिरा ॥ ३२ ॥

पुत्र! मैंने तुम्हारे दिये (राज्य-)को विधिपूर्वक ग्रहणकर पुनः तुमको दे दिया। तुम गुरुओंकी सेवामें इसी प्रकार सदा लगे रहो। (पुलस्त्यजी कहते हैं—) ब्रह्मन्! ऐसा वचन कहकर (प्रह्लादने बलिका) दाहिना हाथ पकड़कर उसे तुरत इन्द्रके सिंहासनपर आसीन करा दिया। महेन्द्रके सभी रत्नोंसे बने शुभ सिंहासनपर बैठा हुआ वह दैत्यपति बलि इन्द्रके समान शोभित हुआ। उसपर बैठनेके बाद उसने विनयपूर्वक हाथ जोड़कर मेघके गर्जनके समान गम्भीर वाणीमें प्रह्लादसे कहा ॥ २९-३२ ॥

यन्मया तात कर्तव्यं त्रैलोक्यं परिरक्षता। धर्मार्थकाममोक्षेभ्यस्तदादिशतु मे भवान्॥ ३३॥
तद्वाक्यसमकालं च शुक्रः प्रह्लादमब्रवीत्। यद्युक्तं तन्महाबाहो वदस्वाद्योत्तरं वचः॥ ३४॥
वचनं बलिशुक्राभ्यां श्रुत्वा भागवतोऽसुरः। प्राह धर्मार्थसंयुक्तं प्रह्लादो वाक्यमुत्तमम्॥ ३५॥
यदायत्यां क्षमं राजन् यद्धितं भुवनस्य च। अविरोधेन धर्मस्य अर्थस्योपार्जनं च यत्॥ ३६॥
सर्वसत्त्वानुगमनं कामवर्गफलं च यत्। परत्रेह च यच्छ्रेयः पुत्र तत्कर्म आचर॥ ३७॥
यथा श्लाघ्यं प्रयास्यस्य यथा कीर्तिर्भवेत्तव। यथा नायशसो योगस्तथा कुरु महामते॥ ३८॥

तात! तीनों लोकोंकी रक्षा करते हुए जो मेरे धर्म, अर्थ, काम और मोक्ष-(इन चारों पुरुषार्थों-) के लिये करणीय कार्य है, उसके लिये आप मुझे आदेश दें। उस-(बलि-)के वाक्यके साथ ही शुक्रने (भी) प्रह्लादसे कहा—महाबाहो! जो उचित हो वह उत्तर दीजिये। विष्णुके भक्त प्रह्लादने बलि और शुक्रकी बात सुनकर धर्म और अर्थसे युक्त श्रेष्ठ वचन कहा—पुत्र! भविष्यके लिये जो उपयुक्त हो, संसारके लिये जो हितकारी हो और धर्मके अनुकूल जो अर्थका उपार्जन और सभी प्राणियोंके अनुकूल जो कामवर्गका फल है एवं इस लोक और परलोकमें जो कल्याणकारी कर्म हो उसका आचरण करो। महामते! तुम जैसे प्रशंसनीय बन सको तथा जैसे तुम्हें यश प्राप्त हो एवं अकीर्ति न हो वैसे ही कर्तव्यको किया करो॥ ३३—३८॥

एतदर्थं श्रियं दीप्तां काङ्क्षन्ते पुरुषोत्तमाः। येनैतानि गृहेऽस्माकं निवसन्ति सुनिर्वृताः॥ ३९॥
कुलजो व्यसने मग्नः सखा चार्थबहिः कृतः। वृद्धो ज्ञातिर्गुणी विप्रः कीर्तिश्च यशसा सह॥ ४०॥

तस्माद् यथैते निवसन्ति पुत्र राज्यस्थितस्येह कुलोद्गताद्याः।
तथा यतस्वामलसत्त्वचेष्ट यथा यशस्वी भविताऽसि लोके॥ ४१॥
भूम्यां सदा ब्राह्मणभूषितायां क्षत्रान्वितायां दृढवापितायाम्।
शुश्रूषणासक्तसमुद्भवायामृद्धिं प्रयान्तीह नराधिपेन्द्राः॥ ४२॥

उत्तम पुरुष उत्कृष्ट लक्ष्मीकी अभिलाषा इसीलिये करते हैं कि विपत्तिमें पड़ा हुआ अच्छे कुलका व्यक्ति, धनहीन मित्र, वृद्ध, ज्ञाति, गुणी ब्राह्मण एवं यशोदायिनी कीर्ति उनके गृहमें शान्तिपूर्वक निवास कर सकें। अतः हे पवित्र विचार एवं चेष्टावाले पुत्र! राज्यके स्थिर हो जानेपर जैसे (उपर्युक्त) कुलोत्पन्नादि (तुम्हारे गृहमें) रह सकें एवं जैसे तुम लोकमें यशस्वी हो सको वैसा ही प्रयत्न करो। पृथ्वीके सदा ब्राह्मणोंसे सुशोभित होने, क्षत्रियोंसे सनाथ होने, (वैश्योंद्वारा) भलीभाँति (जोते-) बोये जाने तथा सेवारत (शूद्रों) से सम्पन्न होनेपर अच्छे राजाओंको समृद्धि प्राप्त होती है॥ ३९—४२॥

तस्माद् द्विजाग्र्याः श्रुतिशास्त्रयुक्ता नराधिपांस्ते प्रतियाजयन्तु।
द्विजैर्यजन्तु क्रतुभिर्द्विजेन्द्रा यज्ञाग्निधूमेन नृपस्य शान्तिः॥ ४३॥

तपोऽध्ययनसम्पन्ना याजनाध्यापने रताः। सन्तु विप्रा बले पूज्यास्त्वत्तोऽनुज्ञामवाप्य हि॥ ४४॥
स्वाध्याययज्ञनिरता दातारः शस्त्रजीविनः। क्षत्रियाः सन्तु दैत्येन्द्र प्रजापालनधर्मिणः॥ ४५॥
यज्ञाध्ययनसम्पन्ना दातारः कृषिकारिणः। पाशुपाल्यं प्रकुर्वन्तु वैश्या विपणिजीविनः॥ ४६॥

इसलिये (तुम्हारे शासनमें) वेद-शास्त्रसे सम्पन्न उत्तम ब्राह्मण राजाओंसे यज्ञ करवावें एवं श्रेष्ठ द्विजगण नित्य यज्ञ किया करें। यज्ञकी अग्निके धूएँसे राजाको शान्ति मिलती है। बले! तपस्या और वेदाध्ययनसे संयुक्त याजन और अध्यापनमें रत रहनेवाले ब्राह्मण तुम्हारी अनुमति पाकर पूजित हों। दैत्येन्द्र! क्षत्रिय स्वाध्याय एवं यज्ञमें निरत, दान देनेवाले, शस्त्र-जीवी तथा प्रजा-पालन करनेवाले हों। वैश्यगण यज्ञाध्ययनसे सम्पन्न, दाता, कृषिकर्ता एवं वाणिज्यजीवी हों तथा पशुपालनका कार्य करें॥ ४३—४६॥

ब्राह्मणक्षत्रियविशां सदा शुश्रूषणे रताः। शूद्राः सन्तु सुरश्रेष्ठ तवाज्ञाकारिणः सदा ॥ ४७ ॥
यदा वर्णाः स्वधर्मस्था भवन्ति दितिजेश्वर। धर्मवृद्धिस्तदा स्याद्वै धर्मवृद्धौ नृपोदयः ॥ ४८ ॥
तस्माद् वर्णाः स्वधर्मस्थास्त्वया कार्याः सदा बले। तद्वृद्धौ भवतो वृद्धिस्तद्धानौ हानिरुच्यते ॥ ४९ ॥
इत्थं वचः श्राव्य महासुरेन्द्रो बलिं महात्मा स बभूव तूष्णीम्।
ततो यथाज्ञापयसे करिष्ये इत्थं बलिः प्राह वचो महर्षे ॥ ५० ॥

इति श्रीवामनपुराणे चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

असुरश्रेष्ठ ! शूद्रगण ब्राह्मण, क्षत्रिय और वैश्योंकी सेवामें सदा लगे रहें और तुम्हारे आदेशका सदा पालन करें। दितिजेश्वर ! जब सभी वर्णके लोग अपने-अपने धर्ममें स्थित रहते हैं तब निश्चय ही धर्मकी वृद्धि होती है और धर्मकी वृद्धि होनेपर राजाकी उन्नति होती है। इसलिये बले ! तुम सभी वर्णोंको उनके धर्ममें सदा लगाये रहो। उसकी (स्वधर्मकी) वृद्धिसे राजाकी वृद्धि होती है। उसकी हानिसे हानि कही गयी है। महासुरेन्द्र महात्मा प्रह्लाद बलिसे ऐसा कहकर मौन हो गये। (पुलस्त्यजी कहते हैं—) महर्षे ! उसके बाद बलिने इस प्रकार कहा—आपने जो आदेश दिया, उसीके अनुसार मैं कार्य करूँगा ॥ ४७–५० ॥

इस प्रकार श्रीवामनपुराणमें चौहत्तरवाँ अध्याय समाप्त हुआ ॥ ७४ ॥

[अथ पञ्चसप्ततितमोऽध्यायः]

पुलस्त्य उवाच

ततो गतेषु देवेषु ब्रह्मलोकं प्रति द्विज। त्रैलोक्यं पालयामास बलिर्धर्मान्वितः सदा ॥ १ ॥
कलिस्तदा धर्मयुतं जगद् दृष्ट्वा कृते यथा। ब्रह्माणं शरणं भेजे स्वभावस्य निवेदनात् ॥ २ ॥
गत्वा स ददृशे देवं सेन्द्रैर्देवैः समन्वितम्। स्वदीप्त्या द्योतयन्तं च सदेवं ससुरासुरम् ॥ ३ ॥
प्रणिपत्य तमाहाथ तिष्यो ब्रह्माणमीश्वरम्। मम स्वभावो बलिना नाशितो देवसत्तम ॥ ४ ॥

पचहत्तरवाँ अध्याय प्रारम्भ

(त्रैलोक्य-लक्ष्मीका बलिके यहाँ आना, श्वेत लक्ष्मी आदिकी उत्पत्ति, तिथियोंका वर्णन, त्रयीका बलिमें मिलना और बलिकी समृद्धिका वर्णन)

पुलस्त्यजी बोले—द्विज ! देवोंके ब्रह्मलोक चले जानेपर बलि सदा धर्मसे युक्त (धार्मिक) रहते हुए तीनों लोकोंका पालन करने लगा। उस समय संसारको सत्ययुगकी भाँति धर्मसे सम्पन्न हुआ देखकर कलियुग अपने कर्तव्यका सेवन करनेके हेतु ब्रह्माकी शरणमें गया। वहाँ जाकर उसने ब्रह्माको इन्द्र आदि देवोंके साथ देखा। वे अपनी प्रभासे सुरों और असुरोंसे युक्त अपने लोकको प्रदीप्त कर रहे थे। उन ईश ब्रह्माको प्रणाम करके कलिने उनसे कहा—देवश्रेष्ठ ! बलिने मेरे स्वाभाविक कर्मको नष्ट कर दिया है ॥ १–४ ॥

तं प्राह भगवान् योगी स्वभावं जगतोऽपि हि। न केवलं हि भवतो हृतं तेन बलीयसा ॥ ५ ॥
पश्यस्व तिष्य देवेन्द्रं वरुणं च समारुतम्। भास्करोऽपि हि दीनत्वं प्रयातो हि बलाद् बलेः ॥ ६ ॥
न तस्य कश्चित् त्रैलोक्ये प्रतिषेद्धाऽस्ति कर्मणः। ऋते सहस्रशिरसं हरिं दानवमर्दिनम् ॥ ७ ॥
स भूमिं च तथा नाकं राज्यं लक्ष्मीं यशोऽव्ययः। समाहरिष्यति बलेः कर्तुः सद्धर्मगोचरम् ॥ ८ ॥

योगी भगवान् ब्रह्माने उससे कहा—केवल तुम्हारा ही नहीं, अपितु सम्पूर्ण लोकका स्वभाव उस बलशालीने ध्वस्त कर दिया है। कले! मरुतोंके साथ वरुण और देवेन्द्रको देखो। बलिके पराक्रमसे सूर्य भी निस्तेज-से हो गये हैं। सहस्रशीर्षा तथा सहस्रपाद्- (विष्णु-) के सिवा तीनों लोकोंमें उसके कर्मको बंद करनेवाला कोई नहीं दीखता है। वे अविनाशी बलिद्वारा किये गये सद्धर्मके हेतु मिली हुई उसकी भूमि, स्वर्ग, राज्य, लक्ष्मी एवं यशका अपहरण करेंगे॥ ५-८॥

इत्येवमुक्तो देवेन ब्रह्मणा कलिरव्ययः। दीनान् दृष्ट्वा स शक्रादीन् विभीतकवनं गतः॥ ९॥
कृतः प्रावर्तत तदा कलेर्नाशाज्जगत्त्रये। धर्मोऽभवच्चतुष्पादश्चातुर्वर्ण्येऽपि नारद॥ १०॥
तपोऽहिंसा च सत्यं च शौचमिन्द्रियनिग्रहः। दया दानं त्वानृशंस्यं शुश्रूषा यज्ञकर्म च॥ ११॥
एतानि सर्वजगतः परिव्याप्य स्थितानि हि। बलिना बलवान् ब्रह्मन् तिष्योऽपि हि कृतः कृतः॥ १२॥

भगवान् ब्रह्माके इस प्रकार कहनेपर अव्यय कलि, इन्द्र आदि देवताओंको चिन्तित हुआ देखकर विभीतक वनमें चला गया। नारदजी! कलिके अदृश्य हो जानेसे तीनों लोकोंमें सत्ययुग प्रवर्तित हो गया। चारों वर्णोंमें चारों चरणोंसे धर्म व्याप्त हो गया। तपस्या, अहिंसा, सत्य, पवित्रता, इन्द्रियनिग्रह, दया, दान, मृदुता, सेवा और यज्ञकार्य—ये सभी समस्त जगत्में छा गये। ब्रह्मन्! बलिने बलशाली कलिको भी सत्ययुग बना दिया॥ ९-१२॥

स्वधर्मस्थायिनो वर्णा ह्याश्रमांश्चाविशन् द्विजाः। प्रजापालनधर्मस्थाः सदैव मनुजर्षभाः॥ १३॥
धर्मोत्तरे वर्तमाने ब्रह्मंस्त्रिजगत्त्रये। त्रैलोक्यलक्ष्मीर्वरदा त्वायाता दानवेश्वरम्॥ १४॥
तामागतां निरीक्ष्यैव सहस्राक्षश्रियं बलिः। पप्रच्छ काऽसि मां ब्रूहि केनास्यर्थेन चागता॥ १५॥
सा तद्वचनमाकर्ण्य प्राह श्रीः पद्ममालिनी। बले शृणुष्व याऽस्मि त्वामायाता महिषी बलात्॥ १६॥

सभी वर्ण अपने-अपने धर्मोंमें स्थित हो गये। द्विजगण अपने-अपने आश्रमोंका पालन करने लगे तथा राजा प्रजापालनरूपी धर्मका आचरण करने लगे। ब्रह्मन्! इन तीनों लोकोंके धर्म-परायण होनेपर वरदायिनी त्रैलोक्य-लक्ष्मी दानवराज बलिके पास आयी। इन्द्रकी लक्ष्मीको उपस्थित हुई देखकर बलिने पूछा—मुझे यह बतलाओ कि तुम कौन हो और किस उद्देश्यसे आयी हो। कमलकी मालासे अलंकृत लक्ष्मीने उसकी बात सुनकर कहा—बले! मैं बलात् तुम्हारे पास आयी हूँ; मैं जो (श्री) हूँ उसे सुनो॥ १३-१६॥

अप्रमेयबलो देवो योऽसौ चक्रगदाधरः। तेन त्यक्तस्तु मघवा ततोऽहं त्वामिहागता॥ १७॥
सा निर्ममे युवतयश्चतस्रो रूपसंयुताः। श्वेताम्बरधरा चैव श्वेतस्रगनुलेपना॥ १८॥
श्वेतवृन्दारकारूढा सत्त्वाढ्या श्वेतविग्रहा। रक्ताम्बरधरा चान्या रक्तस्रगनुलेपना॥ १९॥
रक्ताश्वसमारूढा रक्ताङ्गी राजसी हि सा। पीताम्बरा पीतवर्णा पीतमाल्यानुलेपना॥ २०॥
सौवर्णस्यन्दनचरा तामसं गुणमाश्रिता। नीलाम्बरा नीलमाल्या नीलगन्धानुलेपना॥ २१॥
नीलवृषसमारूढा त्रिगुणा सा प्रकीर्तिता। या सा श्वेताम्बरा श्वेता सत्त्वाढ्या कुञ्जरस्थिता॥ २२॥
सा ब्रह्माणं समायाता चन्द्रं चन्द्रानुगानपि। या रक्ता रक्तवसना वाजिस्था रजसान्विता॥ २३॥
तां प्रादाद् देवराजाय मनवे मानवेषु च। पीताम्बरा या सुभगा रथस्था कनकप्रभा॥ २४॥
प्रजापतिकुलानां प्राप्ता कुमार च विशःसु च। नीलवस्त्राऽलिसदृशी या चतुर्थी वृषस्थिता॥ २५॥
सा दानवान् नैर्ऋतांश्च शूद्रान् विद्याधरानपि। विप्राद्याः श्वेतरूपां तां कथयन्ति सरस्वतीम्॥ २६॥

अमित शक्तिशाली चक्र और गदाको धारण करनेवाले देव विष्णुने इसको छेद दिया है। अतः मैं यहाँ तुम्हारे पास आयी हूँ। उन्होंने (विष्णुने) रूपसे सम्पन्न चार युवतियोंकी सृष्टि की। (पहली युवती) सत्त्वप्रधाना, श्वेतवर्णकी शरीरवाली, श्वेतवर्णका वस्त्र धारण करनेवाली, श्वेतमाल्य और अनुलेपनसे युक्त एवं श्वेत गजपर आरूढ़ थी। (दूसरी युवती) रजोगुणप्रधाना, रक्तवर्णकी शरीरवाली, रक्तवर्णके वस्त्रको धारण करनेवाली, रक्तवर्णके माल्य और अनुलेपनसे युक्त तथा रक्तवर्णके अश्वपर आरूढ़ थी। (तीसरी युवती) तमोगुणप्रधाना, पीतवर्णके शरीरवाली, पीतवर्णका वस्त्र धारण करनेवाली, पीतवर्णकी माला और अनुलेपनसे युक्त तथा सुवर्णके बने रथपर आरूढ़ थी। (चौथी युवती) त्रिगुणप्रधाना, नील शरीरवाली, नीलवर्णका वस्त्र धारण करनेवाली एवं नीले वर्णकी माला, चन्दन और अनुलेपनसे युक्त तथा नील वर्णके वृषपर आरूढ़ थी। सत्त्वप्रधाना, श्वेतवर्णकी शरीरवाली, श्वेतवस्त्र धारण करनेवाली हाथीपर आरूढ़ (युवती) ब्रह्मा, चन्द्रमा एवं ब्राह्मण अनुयायियोंके पास चली गयी। रजोगुणसे युक्त, रक्तवर्णकी शरीरवाली, रक्तवस्त्र धारण करनेवाली एवं घोड़ेपर आरूढ़ युवतीको (उन्होंने) इन्द्र, मनु तथा उनके समानवाले लोगोंको प्रदान किया। पीतवर्णकी शरीरवाली, पीतवर्णके वस्त्र धारण करनेवाली, सौभाग्यवती, रथपर आरूढ़ा युवतीको (उन्होंने) प्रजापतियों, शुक्र एवं वैश्योंको दिया। नीलवर्णके वस्त्रको धारण करनेवाली, भ्रमरके समान, वृषपर स्थित रहनेवाली (युवती) दानवों, नैर्ऋतों, शूद्रों एवं विद्याधरोंके पास चली गयी। उस श्वेतरूपाको विप्र आदि सरस्वती कहते हैं ॥ १७-२६ ॥

स्तुवन्ति ब्रह्मणा सार्धं मखे मन्त्रादिभिः सदा। क्षत्रिया रक्तवर्णां तां जयश्रीमिति शंसिरे ॥ २७ ॥
सा चेन्द्रेणासुरश्रेष्ठ मनुना च यशस्विनी। वैश्यास्तां पीतवसनां कनकाङ्गीं सदैव हि ॥ २८ ॥
स्तुवन्ति लक्ष्मीमित्येवं प्रजापालास्तथैव हि। शूद्रास्तां नीलवर्णाङ्गीं स्तुवन्ति च सुभक्तितः ॥ २९ ॥
श्रिया देवीति नाम्ना तां सह दैत्यैश्च राक्षसैः। एवं विभक्तास्ता नार्यस्तेन देवेन चक्रिणा ॥ ३० ॥

यज्ञमें वे ब्रह्माके सहित उसकी मन्त्रादिसे सदा स्तुति करते हैं। क्षत्रियगण उस रक्तवर्णाको जयश्री कहते हैं। असुरश्रेष्ठ! वह इन्द्र तथा मनुके साथ यशस्विनी हुई। वैश्य तथा प्रजापालगण उस पीतवस्त्रा कनकाङ्गीकी स्तुति सदा लक्ष्मीके नामसे करते हैं। दैत्यों एवं राक्षसोंके साथ शूद्रगण श्रीदेवीके नामसे भक्तिपूर्वक उस नील वर्णाङ्गीकी स्तुति करते हैं। इस प्रकार उन चक्र धारण करनेवाले देवने उन नारियोंका विभाजन किया ॥ २७-३० ॥

एतासां च स्वरूपस्थास्तिष्ठन्ति निधयोऽव्ययाः। इतिहासपुराणानि वेदाः साङ्गास्तथोक्तयः ॥ ३१ ॥
चतुःषष्टिकला दैत्य महापद्मो निधिः स्थितः। मुक्तासुवर्णरजत रथाश्वगजभूषणम् ॥ ३२ ॥
शस्त्रास्त्रादिकवस्त्राणि रक्ता पद्मो निधिः स्मृतः। गोमहिष्य खरोष्ट्रं च सुवर्णाम्बरभूमयः ॥ ३३ ॥
ओषध्यः पशवः पीता महानीलो निधिः स्थितः। सर्वासामपि जातीनां जातिरेका प्रतिष्ठिता ॥ ३४ ॥
अन्येषामपि सहर्त्री नीला शङ्खो निधिः स्थितः।
एतासु संस्थितानां च यानि रूपाणि दानव। भवन्ति पुरुषाणां वै तान् निबोध वदामि ते ॥ ३५ ॥

अक्षय निधियाँ इनके स्वरूपमें स्थित हैं। इतिहास, पुराण, साङ्ग वेद, स्मृतियाँ, चौंसठ कलाएँ तथा महापद्म निधि श्वेताङ्गीके अन्तर्गत हैं। मुक्ता, सुवर्ण, रजत, रथ, अश्व, गज, भूषण, शस्त्र, अस्त्र एवं वस्त्ररूप पद्मनिधि रक्ताङ्गीके अन्तर्गत हैं। गौ, भैंस, गर्दभ, उष्ट्र, सुवर्ण, वस्त्र, भूमि, ओषधियाँ एवं पशुरूप महानील निधि पीताङ्गीमें स्थित हैं। अन्य सभी जातियोंको अपनेमें समाविष्ट करनेवाली सभी जातियोंमें सर्वश्रेष्ठ जाति (एवं सामान्यात्मक) स्वरूप शङ्खनिधिकी नीलाङ्गी देवीमें स्थिति है। दानव! इन (निधियों) के समाश्रित रहनेवाले पुरुषोंके जो लक्षण होते हैं, मैं उनका वर्णन कर रही हूँ, उन्हें समझो—॥ ३१-३५ ॥

सत्यशौचाभिनिर्युक्ता मखदानोत्सवे रताः । भवन्ति दानवपते महापद्माश्रिता नराः ॥ ३६ ॥
यज्विनः सुभगा दृप्ता मानिनो बहुदक्षिणाः । सर्वसामान्यसुखिनो नराः पद्माश्रिताः स्मृताः ॥ ३७ ॥
सत्यानृतसमायुक्ता दानाहरणदक्षिणाः । न्यायान्यायव्ययोपेता महानीलाश्रिता नराः ॥ ३८ ॥
नास्तिकाः शौचरहिताः कृपणा भोगवर्जिताः । स्तेयानृतकथायुक्ता नराः शङ्खाश्रिता बले ॥ ३९ ॥
इत्येवं कथितस्तुभ्यं तेषां दानव निर्णयः ॥ ४० ॥

दानवपते! महापद्मके आश्रित रहनेवाले मनुष्य सत्य और शौचसे युक्त तथा यजन, दान और उत्सव करनेमें लीन रहते हैं। पद्मके आश्रित रहनेवाले मनुष्य यज्ञ करनेवाले, सौभाग्यशाली, अहङ्कारी, मानप्रिय, बहुत दक्षिणा देनेवाले तथा सर्वसाधारण लोगोंसे सुखी होते हैं। महानीलके आश्रित रहनेवाले व्यक्ति सत्य तथा असत्यसे युक्त, देने और लेनेमें चतुर तथा न्याय, अन्याय और व्यय करनेवाले होते हैं। बले! शङ्खके आश्रित रहनेवाले पुरुष नास्तिक, अपवित्र, कृपण, भोगहीन, चोरी करनेवाले एवं असत्य बोलनेवाले होते हैं। दानव! मैंने इस प्रकार आपसे उनके मत्त्वका वर्णन किया ॥ ३६–४० ॥

अहं सा रागिणी नाम जयश्रीस्त्वामुपागता । ममास्ति दानवपते प्रतिज्ञा साधुसम्मता ॥ ४१ ॥
समाश्रयामि शौण्डीर्यं न च क्लीबं कथंचन । न चास्ति भवतस्तुल्यो त्रैलोक्येऽपि बलाधिकः ॥ ४२ ॥
त्वया बलविभूत्या हि प्रीतिर्मे जनिता ध्रुवा । यत्त्वया युधि विक्रम्य देवराजो विनिर्जितः ॥ ४३ ॥
अतो मम परा प्रीतिर्जाता दानव शाश्वती । दृष्ट्वा ते परमं सत्त्वं सर्वेभ्योऽपि बलाधिकम् ॥ ४४ ॥

वही रागिणी नामकी जयश्री मैं आपके पास आयी हूँ। दानवपते! मेरी साधुजनोंसे अनुमोदित एक प्रतिज्ञा है। मैं वीर पुरुषका आश्रयण करती हूँ। नपुंसकके पास कभी नहीं जाती। तीनों लोकोंमें आपके सदृश बलवान् दूसरा कोई नहीं है। अपनी बल-सम्पत्तिसे तुमने मेरेमें दृढ़ प्रीति उत्पन्न की है, क्योंकि संग्राममें पराक्रम कर तुमने देवराजको जीता है। दानव! इसीसे आपके श्रेष्ठ सत्त्व एवं सभीसे अधिक बलको देखकर (आपके प्रति) मेरी स्थायी एवं उत्तम प्रीति उत्पन्न हो गयी है ॥ ४१–४४ ॥

शौण्डीर्यमानिनं वीरं ततोऽहं स्वयमागता । नाश्चर्यं दानवश्रेष्ठ हिरण्यकशिपोः कुले ॥ ४५ ॥
प्रसूतस्यासुरेन्द्रस्य तव कर्म यदीदृशम् । विशेषितस्त्वया राजन् दैतेयः प्रपितामहः ॥ ४६ ॥
विजितं विक्रमाद् येन त्रैलोक्यं वै परैर्हृतम् । इत्येवमुक्त्वा वचनं दानवेन्द्रं तदा बलिम् ॥ ४७ ॥
जयश्रीश्चन्द्रवदना प्रविष्टाऽथोनवल्लभा । तस्यां चाथ प्रविष्टायां विधवा इव योषितः ॥ ४८ ॥
समाश्रयन्ति बलिनं ह्रीश्रीधीधृतिकीर्तयः । प्रभा मतिः क्षमा भूतिर्विद्या नीतिर्दया तथा ॥ ४९ ॥
श्रुतिः स्मृतिर्धृतिः कीर्तिर्मूर्तिः शान्तिः क्रियान्विताः ।
पुष्टिस्तुष्टी रतिस्त्वन्या तथा सत्त्वाश्रिता गुणाः । ताः सर्वा बलिमाश्रित्य व्यश्राम्यन्त यथासुखम् ॥ ५० ॥
एवं गुणोऽभूद् दनुपुङ्गवोऽसौ बलिर्महात्मा शुभबुद्धिरात्मवान् ।
यज्वा तपस्वी मृदुरेव सत्यवाग् दाता विभर्ता स्वजनाभिगोप्ता ॥ ५१ ॥
त्रिविष्टपं शासति दानवेन्द्रे नासीत् क्षुधार्तो मलिनो न दीनः ।
सदोज्ज्वलो धर्मरतोऽथ दान्तः कामोपभोक्ता मनुजोऽपि जातः ॥ ५२ ॥

इति श्रीवामनपुराणे पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

अतः मैं अत्यन्त सदाचारी तथा मानी वीर आपके पास अपने-आप ही आयी हूँ। दानवश्रेष्ठ! हिरण्यकशिपुके वंशमें उत्पन्न आप असुरेन्द्रके लिये इस प्रकारके कर्मोंके करनेमें कोई आश्चर्य नहीं है। राजन्! शत्रुओंद्वारा अपहृत त्रैलोक्यको अपने पराक्रमसे जीतकर आपने दितिके पुत्र अपने प्रपितामहको और विशिष्ट कर

किया है। दानवेन्द्र बलिसे इस प्रकार कहकर चन्द्रवदना शुभा जयश्री (बलिमें) प्रवेश करके (उन्हें) प्रकाशित करने लगी। उनके प्रवेश कर जानेपर ह्री, श्री, बुद्धि, धृति, कीर्ति, प्रभा, मति, क्षमा, समृद्धि, विद्या, नीति, दया, श्रुति, स्मृति, धृति, कीर्ति, मूर्ति, शान्ति, क्रिया, पुष्टि, तुष्टि एवं अन्य सभी सत्त्वगुणयुक्त अखिल अन्य देवियाँ भी दिव्य स्त्रियोंकी भाँति बलिकी छत्रछायामें आनन्दपूर्वक रहने लगीं। अच्छी बुद्धिवाले, आत्मनिष्ठ, यज्ञ करनेवाले, तपस्वी, कोमल स्वभाववाले, सत्यवक्ता, दानी, अभावग्रस्तोंके अभावको दूरकर दस्युभीतिग्रस्त एवं सज्जनोंकी रक्षा करनेवाले दैत्यश्रेष्ठ महात्मा बलि इस प्रकारके गुणोंसे सम्पन्न थे। दानवेन्द्र बलिके स्वर्गका शासन करते समय कोई भूखसे दुःखी, मलिन एवं अभावग्रस्त नहीं था। मनुष्य भी सदा शुद्ध धर्मपरायण इन्द्रिय विजयी एवं इच्छानुकूल भोगसे सम्पन्न हो गये ॥ ४५–५२ ॥

इस प्रकार श्रीवामनपुराणमें पचहत्तरवाँ अध्याय समाप्त हुआ ॥ ७५ ॥

[अथ षट्सप्ततितमोऽध्यायः]

पुलस्त्य उवाच

गते त्रैलोक्यराज्ये तु दानवेषु पुरन्दरः। जगाम ब्रह्मसदनं सह देवैः शचीपतिः ॥ १ ॥
तत्रापश्यत् स देवेशं ब्रह्माणं कमलोद्भवम्। ऋषिभिः सार्धमासीनं पितरं स्वं च कश्यपम् ॥ २ ॥
ततो ननाम शिरसा शक्रः सुरगणैः सह। ब्रह्माणं कश्यपं चैव तांश्च सर्वांस्तपोधनान् ॥ ३ ॥
प्रोवाचेन्द्रः सुरैः सार्धं देवनाथं पितामहम्। पितामह हृतं राज्यं बलिना बलिना मम ॥ ४ ॥
ब्रह्मा प्रोवाच शक्रैतद् भुज्यते स्वकृतं फलम्। शक्रः पप्रच्छ भो ब्रूहि किं मया दुष्कृतं कृतम् ॥ ५ ॥
कश्यपोऽप्याह देवेशं भ्रूणहत्या कृता त्वया। दितिकुक्षिगतो गर्भः कृत्तो वै बहुधा बलात् ॥ ६ ॥

छिहत्तरवाँ अध्याय प्रारम्भ

(प्रायश्चित्त हेतु इन्द्रकी तपस्या, माताके आश्रममें आना, अदितिकी तपस्या और वासुदेवकी स्तुति, वासुदेवका अदितिके पुत्र बननेका आश्वासन और स्वतेजसे अदितिके गर्भमें प्रवेश)

पुलस्त्यजी बोले—(नारदजी !) तीनों लोकोंका राज्य दानवोंके अधीन हो जानेपर शचीपति इन्द्र देवोंके साथ ब्रह्मलोक गये। वहाँ उन्होंने ऋषियोंके साथ बैठे हुए कमलयोनि ब्रह्मा एवं अपने पिता कश्यपको देखा। उसके बाद इन्द्रने देवताओंके सहित ब्रह्मा, कश्यप एवं उन सभी तपोधनोंको सिर झुकाकर प्रणाम किया। देवोंके साथ इन्द्रने देवनाथ पितामहसे कहा—पितामह ! बलवान् बलिने मेरा राज्य छीन लिया है। ब्रह्माने कहा—इन्द्र ! यह तुम अपने किये हुए कर्मका फल भोग रहे हो। इन्द्रने पूछा—कृपया आप बतलाइये कि मैंने कौन-सा दुष्कर्म किया है। कश्यपने भी (उत्तरमें) इन्द्रसे कहा—तुमने भ्रूण (गर्भस्थित बालक) की हत्या की है। तुमने दितिके उदरमें स्थित गर्भको बलपूर्वक अनेक टुकड़ोंमें काट डाला है ॥ १–६ ॥

पितरं प्राह देवेन्द्रः स मातुर्दोषतो विभो। कृत्तस्तु शासनात् गर्भो यद्दान्तो हि साभवत् ॥ ७ ॥
ततोऽब्रवीत् कश्यपस्तु मातुर्दोषे स शासनात्। गतस्ततो विनिहतो दासोऽपि कुलिशेन भो ॥ ८ ॥
तच्छ्रुत्वा कश्यपवचः प्राह शक्रः पितामहम्। विनाशं पाप्मनो ब्रूहि प्रायश्चित्तं विभो ॥ ९ ॥
ब्रह्मा प्रोवाच देवेशं वसिष्ठः कश्यपस्तथा। हितं सर्वस्य जगतः शक्रस्यापि हितं

पूरा समाचार कह सुनाया । यह सुननेके बाद वे अपने उस पुत्रको दितिके पुत्रोंद्वारा पराजित जान शोकसे भर गयीं एवं दुःखसे दुःखी होकर (अदिति) वरेण्य एवं अनादि देव विष्णुकी शरणमें गयीं ॥ २७–२९ ॥

नारद उवाच

कस्मिन् जनित्री सुरसत्तमानां स्थाने हृषीकेशमनन्तमाद्यम् ।
चराचरस्य प्रभवं पुराणमाराधयामास शुभे वद त्वम् ॥ ३० ॥

नारदने कहा (पूछा)—(कृपया) आप यह बतलाइये कि देवोंकी माता अदितिने किस शुभ स्थानपर अनादि, अनन्त, चर और अचरके उत्पन्न करनेवाले एवं पुरातन हृषीकेशकी आराधना की ? ॥ ३० ॥

पुलस्त्य उवाच

सुरारणिः शक्रमवेक्ष्य दीनं पराजितं दानवनायकेन ।
सितेऽथ पक्षे मकरर्क्षगेऽर्के घृतार्चिषः स्यादथ सप्तमेऽह्नि ॥ ३१ ॥
दृष्ट्वैव देवं त्रिदशाधिपं तं महोदये शक्रदिशाधिरूढम् ।
निराशना संयतवाक् सुचित्ता तदोपतस्थे शरणं सुरेन्द्रम् ॥ ३२ ॥

पुलस्त्यजी बोले—दानव-नायकद्वारा पराजित हुए दीन बने इन्द्रको देखकर अदिति सूर्यके मकरराशिमें स्थित हो जानेपर शुक्लपक्षकी सूर्य-सप्तमीके दिन उन सुरोंके स्वामी सूर्यदेवको महान् उदयाचलपर पूर्व दिशामें उगनेपर देखकर उपवास करती हुई वाणी एवं मनको संयत करके उन सुरेन्द्र-(सूर्य-) की शरणमें गयीं ॥ ३१-३२ ॥

अदितिरुवाच

जयस्व दिव्याम्बुजकोशचौर जयस्व संसारतरोः कुठार ।
जयस्व पापेन्धनजातवेदस्तमौघसंरोध नमो नमस्ते ॥ ३३ ॥
नमोऽस्तु ते भास्कर दिव्यमूर्ते त्रैलोक्यलक्ष्मीतिलकाय ते नमः ।
त्वं कारणं सर्वचराचरस्य नाथोऽसि मां पालय विश्वमूर्ते ॥ ३४ ॥
त्वया जगन्नाथ जगन्मयेन नाथेन शक्रो निजराज्यहानिम् ।
अवाप्तवान् सासुरभयं च ततो भवन्तं शरणं प्रपन्ना ॥ ३५ ॥
इत्येवमुक्त्वा सुरपूजितं सा आलिख्य रक्तेन हि चन्दनेन ।
सम्पूजयित्वा करवीरपुष्पैः संधूप्य धूपैः कणमर्दभोज्यम् ॥ ३६ ॥
निवेद्य नैवेद्ययुतं महार्हमन्नं महेन्द्रस्य हिताय देवी ।
स्तवेन पुण्येन च संस्तुवन्ती स्थिता निराहारमथोपवासम् ॥ ३७ ॥

अदितिने कहा—हे दिव्य कमलकोशको अपनेमें छिपाकर रखनेवाले ! आपकी जय हो । हे संसाररूपी वृक्षके कुठार ! आपकी जय हो । हे पापरूपी इन्धनके लिये अग्नि ! आपकी जय हो । हे अन्धकार (अज्ञान)के समूहके विनाश करनेवाले ! आपको बारम्बार नमस्कार है । हे भास्कर ! हे दिव्यमूर्ते ! आपको नमस्कार है । हे त्रैलोक्यलक्ष्मीके तिलक ! आपको नमस्कार है । आप समस्त चर और अचर जगत्के कारण तथा स्वामी हैं । हे विश्वमूर्ते ! आप मेरी रक्षा कीजिये । हे जगन्नाथ ! जगन्मय आप स्वामीके ही कारण इन्द्रको अपने राज्यकी हानि एवं असुरोंसे पराजयकी भी प्राप्ति हुई है । अतः मैं आपकी शरणमें आयी हूँ । ऐसा कहनेके बाद रक्तचन्दनद्वारा देवोंसे पूजित सूर्यको लिखकर उन देवी (अदिति) ने कनेरके पुष्पोंसे उनका पूजन किया और धूपसे धूपित करके इन्द्रके कल्याणके लिये भक्ष्यके लिये धूपसे बने उत्तम अन्न अर्पित किया तथा निराहार रहकर पवित्र स्तोत्रोंसे स्तुति करती हुई (उपवासमें) बैठी रहीं ॥ ३३–३७ ॥

तनो द्वितीयेऽह्नि कृतप्रणामा स्नात्वा विधानेन च पूजयित्वा।
दत्त्वा द्विजेभ्यः कणकं तिलाज्यं ततोऽग्रतः सा प्रयता बभूव ॥ ३८ ॥
ततः प्रीतोऽभवद् भानुर्घृतार्चिः सूर्यमण्डलात्। विनिःसृत्याग्रतः स्थित्वा इदं वचनमब्रवीत् ॥ ३९ ॥
व्रतेनानेन सुप्रीतस्तवाहं दक्षनन्दिनि। प्राप्स्यसे दुर्लभं कामं मत्प्रसादान्न संशयः ॥ ४० ॥
राज्यं स्वतनयानां वै दास्ये देवि सुरारणि। दानवान् नाशयिष्यामि सम्भूयोदरे तव ॥ ४१ ॥

दूसरे दिन प्रणाम करनेके बाद विधिसे स्नान एवं पूजा करके उन्होंने ब्राह्मणोंको कनक, तिल एवं घृत प्रदान किया और उसके बाद वे और अधिक सयत रहने लगीं। इससे घृतार्चि भानु प्रसन्न हो गये। (वे) सूर्य-मण्डलसे निकले एवं अदितिके सामने खड़े होकर यह वचन बोले—दक्षनन्दिनि! तुम्हारे इस व्रतसे मैं बहुत प्रसन्न हूँ। अब मेरी कृपासे तुम निःसन्देह मनोवाञ्छित दुर्लभ वस्तु प्राप्त करोगी। देवि! देवजननि! मैं तुम्हारा पुत्र होकर देवपुत्रोंको राज्य दूँगा और दानवोंका नाश करूँगा ॥ ३८–४१ ॥

तद्वाक्यं वासुदेवस्य श्रुत्वा प्रलम्ब सुरारणिः। प्रोवाच जगतां योनिं वेपमाना पुनः पुनः ॥ ४२ ॥
कथं त्वामुदरेणाहं वोढुं शक्ष्यामि दुर्धरम्। यस्योदरे जगत्सर्वं वसते स्थाणुजङ्गमम् ॥ ४३ ॥
कस्त्वां धारयितुं नाथ शक्तस्त्रैलोक्यधार्यसि। यस्य सप्तार्णवाः कुक्षौ निवसन्ति महाद्रिभिः ॥ ४४ ॥
तस्माद् यथा सुरपतिः शक्रः स्यात् सुरवाहित। यथा च न मम क्लेशस्तथा कुरु जनार्दन ॥ ४५ ॥

[पुलस्त्यजी कहते हैं—] महान्! वासुदेवका यह वाक्य सुनकर बार-बार काँपती हुई देवोंकी माता अदितिने संसारको उत्पन्न करनेवाले विष्णुसे कहा—जिसके (विशाल) उदरमें स्थावर-जङ्गमात्मक समस्त संसार निवास करता है, ऐसे त्रिलोकीको धारण करनेवाले आपको मैं अपने उदरमें कैसे धारण कर सकूँगी! नाथ! आप तीनों लोकोंको धारण करनेवाले हैं। जिसकी कुक्षिमें पर्वतोंके साथ सातों समुद्र अवस्थित हैं ऐसे आपको कौन धारण कर सकता है? अतः हे जनार्दन! आप वैसा ही करें जिससे इन्द्र देवताओंके स्वामी बन जायँ और मुझे भी कष्ट न हो ॥ ४२–४५ ॥

विष्णुरुवाच

सत्यमेतन्महाभागे दुर्धरोऽस्मि सुरासुरैः। तथापि सम्भविष्यामि अहं देव्युदरे तव ॥ ४६ ॥
आत्मानं भुवनान् शैलांस्त्वाञ्च देवि सकश्यपाम्। धारयिष्यामि योगेन मा विषादं कृथाऽम्बिके ॥ ४७ ॥
तवोदरेऽहं शार्ङ्गिय सम्भविष्यामि वै यदा। तदा निस्तेजसो दैत्याः सम्भविष्यन्त्यसंशयम् ॥ ४८ ॥
इत्येवमुक्त्वा भगवान् विवेश तस्याश्च भूयोऽरिगणप्रमर्दी।
स्वतेजसोंऽशेन विवेश देव्याः तदोदरे शक्रहिताय विष्णुः ॥ ४९ ॥

इति श्रीवामनपुराणे षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

विष्णुने कहा—महाभागे! यह सच है कि मैं देवों और दैत्योंसे धृत नहीं हो सकता, फिर भी हे देवि! मैं आपके उदरसे उत्पन्न होऊँगा। देवि! स्वयको, (चौदहों) भुवनों, पर्वतों एवं कश्यपसहित आपको भी मैं योगद्वारा धारण करूँगा। माता! आप विषाद न करें। दक्षात्मजे! जब मैं आपके उदरमें रहूँगा तब दैत्य निस्सन्देह तेजोहीन हो जायँगे। [पुलस्त्यजी कहते हैं—] फिर ऐसा कहकर शत्रुओंके नाश करनेवाले भगवान् विष्णु इन्द्रकी भलाईके लिये अपने तेजके अंशमात्रसे उन देवीके उदरमें प्रविष्ट हो गये ॥ ४६–४९ ॥

इस प्रकार श्रीवामनपुराणमें छिहत्तरवाँ अध्याय समाप्त हुआ ॥ ७६ ॥

पुलस्त्य उवाच

पौत्रस्यैतद् वचः श्रुत्वा प्रह्लादः क्रोधमूर्च्छितः। धिग्धिगित्याह स बलिं वैकुण्ठाक्षेपवादिनम् ॥ २५ ॥
धिक् त्वां पापसमाचारं दुष्टबुद्धिं सुबालिशम्। हरिं निन्दयतो जिह्वा कथं न पतिता तव ॥ २६ ॥
शोच्यस्त्वमसि दुर्बुद्धे निन्दनीयश्च साधुभिः। यत् त्रैलोक्यगुरुं विष्णुमभिनिन्दसि दुर्मते ॥ २७ ॥
शोच्यश्चास्मि न संदेहो येन जातः पिता तव। यस्य त्वं कर्कशः पुत्रो जातो देवावमान्यकः ॥ २८ ॥

पुलस्त्यने कहा—पौत्रके इस वचनको सुनकर अत्यन्त कुपित हुए उन प्रह्लादने विष्णुकी निन्दा करनेवाले बलिसे कहा—पापकर्मा दुष्टबुद्धि तुम मूर्खको धिक्कार है। विष्णुकी निन्दा करते हुए तुम्हारी जीभ क्यों नहीं गिर गयी ? दुर्बुद्धे ! दुर्मते ! तुम शोक करने लायक और सज्जनोंद्वारा निन्दा किये जाने योग्य हो। क्योंकि तुम तीनों लोकोंके गुरु विष्णुकी निन्दा कर रहे हो। निस्सन्देह मैं भी शोक किये जाने लायक हूँ, जिसने तुम्हारे उस पिताको जन्म दिया, जिससे तुम देवताओंकी निन्दा करनेवाले तथा उग्र पुत्र हुए ॥ २५–२८ ॥

भवान् किल विजानाति तथा चामी महासुराः। यथा नान्यः प्रियः कश्चिन्मम तस्माज्जनार्दनात् ॥ २९ ॥
जानन्नपि प्रियतरं प्राणेभ्योऽपि हरिं मम। सर्वेश्वरेश्वरं देवं कथं निन्दितवानसि ॥ ३० ॥
गुरुः पूज्यस्तव पिता पूज्यस्तस्याप्यहं गुरुः। ममापि पूज्यो भगवान् गुरुर्लोकगुरुर्हरिः ॥ ३१ ॥
गुरोर्गुरुगुरुर्मूढ पूज्यः पूज्यतमस्तव। पूज्यं निन्दयसे पाप कथं न पतितोऽस्यधः ॥ ३२ ॥

निश्चय ही तुम और ये महासुर भी जानते हैं कि जनार्दनसे अधिक दूसरा कोई मेरा प्रिय नहीं है, विष्णु मुझे प्राणोंसे भी अधिक प्रिय हैं, यह जानते हुए भी तुमने सर्वेश्वरेश्वर देवकी निन्दा किस प्रकार की ! तुम्हारे पिता (तुम्हारे लिये) गुरु एवं पूजनीय हैं। उनका भी गुरु तथा पूजनीय मैं हूँ। लोकगुरु भगवान् हरि मेरे भी पूजनीय और गुरु हैं। मूढ़ पापिन् ! गुरुके भी गुरु तुम्हारे लिये पूज्य एवं पूज्यतम हैं। तुम पूज्यकी निन्दा करते हो, इसलिये तुम नीचे क्यों नहीं गिर गये ॥ २९–३२ ॥

शोचनीया दुराचारा दानवामी कृतास्त्वया। येषां त्वं कर्कशो राजा वासुदेवस्य निन्दकः ॥ ३३ ॥
यस्मात् पूज्योऽर्चनीयश्च भवता निन्दितो हरिः। तस्मात् पापसमाचार राज्यनाशमवाप्नुहि ॥ ३४ ॥
यथा नान्यत् प्रियतरं विद्यते मम केशवात्। मनसा कर्मणा वाचा राज्यभ्रष्टस्तथा पत ॥ ३५ ॥
यथा न तस्मादपरं व्यतिरिक्तं हि विद्यते। चतुर्दशसु लोकेषु राज्यभ्रष्टस्तथा पत ॥ ३६ ॥
सर्वेषामपि भूतानां नान्यल्लोके परायणम्। यथा तथाऽनुपश्येयं भवन्तं राज्यविच्युतम् ॥ ३७ ॥

तुमने दुराचरण करनेवाले इन दानवोंको शोचनीय बना दिया। क्योंकि वासुदेवकी निन्दा करनेवाले कर्कश स्वभावके तुम इनके राजा हो। हे पापका आचरण करनेवाले ! यतः तुमने पूजनीय एवं अर्चनीय विष्णुकी निन्दा की है, अतः तुम्हारे राज्यका विनाश होगा। क्योंकि मन, कर्म एवं वाणीसे मेरा केशवसे अधिक दूसरा कोई नहीं है, अतः राज्यसे भ्रष्ट होकर तुम अधःपतित हो जाओ। क्योंकि चौदहों लोकोंमें उनसे भिन्न दूसरा कोई नहीं है, अतः राज्य-भ्रष्ट होकर तुम पतित हो जाओ; क्योंकि संसारमें सभी भूतोंका (वासुदेवके अतिरिक्त) कोई आधार नहीं है, अतः मैं तुम्हें राज्यच्युत हुआ देखूँ ॥ ३३–३७ ॥

पुलस्त्य उवाच

एवमुच्चारिते वाक्ये बलिः सत्वरितस्तदा। अवतीर्यासनाद् ब्रह्मन् कृताञ्जलिपुटो बली ॥ ३८ ॥
शिरसा प्रणिपत्याह प्रसादं यातु मे गुरुः। कृतापराधानपि हि क्षमन्ति गुरवः शिशून् ॥ ३९ ॥

साधु यदह शप्तो भवता दानवेश्वर। न बिभेमि परेभ्योऽहं न च राज्यपरिक्षयात् ॥ ४० ॥
न दुःख मम विभो यदहं राज्यविच्युत। दुःखं कृतापराधत्वाद् भवतो मे महत्तरम् ॥ ४१ ॥
तत् क्षम्यतां तात ममापराधो बालोऽस्म्यनाथोऽस्मि सुदुर्मतिश्च।
कृतेऽपि दोषे गुरव शिशूना क्षमन्ति दैन्यं समुपागतानाम् ॥ ४२ ॥

पुलस्त्यजी बोले—महान् ! इस प्रकार कहे जानेपर बलशाली बलि शीघ्र ही आसनसे नीचे उतरा और हाथ जोड़कर उसने सिरसे झुककर प्रणाम कर कहा—गुरो ! मेरे ऊपर आप प्रसन्न हों। बड़े लोग अपराध करनेवाले बालकोंको क्षमा करते हैं। दानवेश्वर ! आपने मुझे शाप दिया ठीक है। मैं शत्रुओंसे तथा राज्यके विनाशसे भयभीत नहीं हूँ। विभो ! मुझे राज्यसे भ्रष्ट हो जानेका दुःख भी नहीं है, परंतु आपका अपराध करनेका दुःख अधिक दुःख है। इसलिये तात ! आप मेरे अपराधको क्षमा करें। मैं एक अनाथ दुर्बुद्धि शिशु हूँ। दोष करनेपर भी आर्त बने हुए बालकोंको क्षमा कर देते हैं ॥ ३८–४२ ॥

पुलस्त्य उवाच

स एवमुक्तो वचनं महात्मा विमुक्तमोहो हरिपादभक्त।
चिरं विचिन्त्याद्भुतमेतदित्यमुवाच पौत्रं मधुरं वचोऽथ ॥ ४३ ॥

(फिर) पुलस्त्यजी बोले—इस प्रकारके वचन कहनेपर विष्णुके चरणोंमें श्रद्धा रखनेवाले ज्ञानी महात्मा प्रह्लादने बहुत देरतक विचारकर पौत्रसे इस प्रकार अद्भुत एवं मधुर यह वचन कहा ॥ ४३ ॥

प्रह्लाद उवाच

हेन मे ज्ञानं विवेकश्च तिरस्कृत। येन सर्वगतं विष्णुं जानस्त्वां शप्तवानहम् ॥ ४४ ॥
भाव्यं वै भवतो येन दानव। ममाविश महाबाहो विवेकप्रतिषेधकः ॥ ४५ ॥
राज्यकृतेऽपि विभो न ज्वरं कर्तुमर्हसि। अवश्यभाविनो ह्यर्था न विनश्यन्ति कर्हिचित् ॥ ४६ ॥
त्नार्थे राज्यभोगधनाय च। आगमे निर्गमे प्राज्ञो न विषादं समाचरेत् ॥ ४७ ॥

प्रह्लादने कहा—तात ! अज्ञानने मेरे ज्ञान एवं विवेकको ढक लिया था। इसीसे विष्णुको सर्वव्यापी जानते हुए भी मैंने तुम्हें शाप दे दिया। दानव ! निश्चय ही तुम्हारी इस प्रकारकी होनहार था। इसीसे विवेकका अवरोध करनेवाला अज्ञान मुझमें प्रवेश कर गया था। इसलिये विभो ! राज्यके लिये कष्ट मत करो। होनहार कभी भी विनष्ट नहीं होते। बुद्धिमान् व्यक्तिको पुत्र, मित्र पत्नी राज्यभोग और धनके आने जानेमें खिन्न नहीं होना चाहिये ॥ ४४–४७ ॥

समायान्ति पूर्वकर्मविधानतः। सुखदुःखानि दैत्येन्द्र नरस्तानि सहेत् तथा ॥ ४८ ॥
आपत्सु न विषण्णो भवेद् वशी। सम्पदं च सुविस्तीर्णां प्राप्य नोऽधृतिमान् भवेत् ॥ ४९ ॥
मुह्यन्ति न हृष्यन्ति धनागमे। धीराः कार्येषु च सदा भवन्ति पुरुषोत्तमाः ॥ ५० ॥
दैत्येन्द्र न विषादं कथंचन। कर्तुमर्हसि विद्वांस्त्वं पण्डितो नावसीदति ॥ ५१ ॥

! पूर्वजन्ममें किये हुए कर्मोंके विधानसे जैसे-जैसे सुख और दुःख आते हैं मनुष्यको उन्हें उसी प्रकार सहन करना चाहिये। संयम करनेवाले व्यक्तिको आपत्तियोंका आगमन देखकर घबराना नहीं होना चाहिये और अधिक सम्पत्तिको देखकर धीरता नहीं खो देनी चाहिये। उत्तम पुरुष ... नहीं होते ... की प्राप्ति होनेपर हर्ष नहीं करते। वे सदा कार्योंके प्रति सदा धीर ... अतः तुम्हें किसी प्रकारका शोक नहीं करना चाहिये तुम विद्वान् हो ।

तथाऽन्यच्च महाबाहो हितं शृणु महार्थकम्। भवतोऽथ तथाऽन्येषां श्रुत्वा तच्च समाचर ॥ ५२ ॥
शरण्यं शरणं गच्छ तमेव पुरुषोत्तमम्। स ते त्राता भयादस्माद् दानवेन्द्र भविष्यति ॥ ५३ ॥
ये संश्रिता हरिमनन्तमनादिमध्यं विष्णुं चराचरगुरुं हरिमीशितारम्।
संसारगर्तपतितस्य करावलम्बं नूनं न ते भुवि नरा ज्वरिणो भवन्ति ॥ ५४ ॥
तन्मना दानवश्रेष्ठ तद्भक्तश्च भवाधुना। स एव भवतः श्रेयो विधास्यति जनार्दनः ॥ ५५ ॥
अहं च पापोपशमार्थमीशमाराध्य यास्ये प्रतितीर्थयात्राम्।
विमुक्तपापश्च ततो गमिष्ये यत्राच्युतो लोकपतिर्नृसिंहः ॥ ५६ ॥

महाबाहो! तुम अपने लिये तथा अन्योंके लिये महान् अर्थपूर्ण एवं कल्याणकर (वचन) सुनो और सुनकर वैसा ही करो। दानवेन्द्र! तुम उन्हीं शरणागतकी रक्षा करनेवाले पुरुषोत्तमकी शरणमें जाओ। वे ही इस भयसे तुम्हारी रक्षा करेंगे। आदि, मध्य और अन्तसे हीन, चर और अचरके गुरु, संसाररूपी गर्त्तमें गिरे हुओंके लिये हाथका आश्रय देनेवाले एवं सबके नियन्ता हरि विष्णुकी शरणमें जानेवाले मनुष्य निश्चय ही संसारमें संतप्त नहीं होते। दानवश्रेष्ठ! अब तुम अपना मन उन्हींमें लगाकर उनके भक्त बनो। वे जनार्दन ही तुम्हारा कल्याण करेंगे। मैं भी पापके विनाशके लिये ईश्वरकी आराधनाकर तीर्थयात्रा करने जाऊँगा और पापसे विमुक्त होकर मैं वहाँ जाऊँगा, जहाँ लोकपति अच्युत नृसिंह हैं ॥ ५२–५६ ॥

पुलस्त्य उवाच

इत्येवमाश्वास्य बलिं महात्मा संस्मृत्य योगाधिपतिं च विष्णुम्।
आमन्त्र्य सर्वान् दनुयूथपालान् जगाम कर्तुं त्वथ तीर्थयात्राम् ॥ ५७ ॥

इति श्रीवामनपुराणे सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

पुलस्त्यजी बोले—इस प्रकार बलिको आश्वासन देनेके बाद महात्मा-(प्रह्लाद-) ने योगके अधिपति विष्णुका स्मरण किया और दानवसमूहोंके पालकोंसे अनुमति लेकर तीर्थयात्रा करने चले गये। ॥ ५७ ॥

इस प्रकार श्रीवामनपुराणमें सतहत्तरवाँ अध्याय समाप्त हुआ ॥ ७७ ॥

[अथाष्टसप्ततितमोऽध्यायः]

नारद उवाच

कानि तीर्थानि विप्रेन्द्र प्रह्लादोऽनुजगाम ह। प्रह्लादतीर्थयात्रां मे सम्यगाख्यातुमर्हसि ॥ १ ॥

अठहत्तरवाँ अध्याय प्रारम्भ

(प्रह्लादकी तीर्थयात्रा, धुन्धु और वामन-प्रसङ्ग, धुन्धुका यज्ञानुष्ठान, वामनका प्रादुर्भाव और उनके लिये दान देनेका धुन्धुका निश्चय, वामनका त्रिविक्रम होना और धुन्धुका वध)

नारदने कहा (पूछा)—श्रेष्ठ विप्र! प्रह्लाद (क्रमशः) किन-किन तीर्थोंमें गये। कृपया आप मुझसे प्रह्लादकी तीर्थयात्राका भलीभाँति वर्णन कीजिये ॥ १ ॥

पुलस्त्य उवाच

शृणुष्व कथयिष्यामि पापपङ्कप्रणाशिनीम्। प्रह्लादतीर्थयात्रां ते शुद्धपुण्यप्रदायिनीम् ॥ २ ॥
संत्यज्य मेरुं कनकाचलेन्द्रं तीर्थं जगामामरसंघजुष्टम्।
स्थानं पृथिव्यां शुभदं हि मानसं यत्र स्थितो मत्स्यवपुः सुरेशः ॥ ३ ॥

तस्मिंस्तीर्थवरे स्नात्वा संतर्प्य पितृदेवताः । सम्पूज्य च जगन्नाथमच्युतं श्रुतिभिर्युतम् ॥ ४ ॥
उपोष्य भूयः सम्पूज्य देवर्षिपितृमानवान् । जगाम कच्छपं द्रष्टुं कौशिक्यां पापनाशनम् ॥ ५ ॥
तस्यां स्नात्वा महानद्यां सम्पूज्य च जगत्पतिम् । समुपोष्य शुचिर्भूत्वा दत्त्वा विप्रेषु दक्षिणाम् ॥ ६ ॥
नमस्कृत्य जगन्नाथमथो कूर्मवपुर्धरम् ।
ततो जगाम कृष्णाख्यं द्रष्टुं वाजिमुखं प्रभुम् । तत्र देवह्रदे स्नात्वा तर्पयित्वा पितॄन् सुरान् ॥ ७ ॥
सम्पूज्य हयशीर्षं च जगाम गजसाह्वयम् । तत्र देवं जगन्नाथं गोविन्दं चक्रपाणिनम् ॥ ८ ॥
स्नात्वा सम्पूज्य विधिवज्जगाम यमुनां नदीम् ।
तस्यां स्नातः शुचिर्भूत्वा संतर्प्यर्षिसुरान् पितॄन् । ददर्श देवदेवेशं लोकनाथं त्रिविक्रमम् ॥ ९ ॥

पुलस्त्यजी बोले—नारदजी ! सुनिये, मैं आपसे पापकी कीचड़को नष्ट करनेवाली एवं पवित्र पुण्यको देनेवाली प्रह्लादकी तीर्थयात्राको कहता हूँ । सुवर्णमय श्रेष्ठ मेरु पर्वतको छोड़कर वे (सबसे पहले) ऋषियोंसे सेवित (और) पृथ्वीमें प्रसिद्ध कल्याणकारी मानसतीर्थमें गये, जहाँ मत्स्यशरीरधारी (मत्स्यावतारी) देवाधिदेव निवास करते हैं । उस उत्तम तीर्थमें स्नान और पितृ-देव-तर्पण कर उन्होंने वेद-मन्त्रोंसे अच्युत भगवान् विश्वेशका पूजन किया । फिर वहीं उपवास रहकर देवों, ऋषियों, पितरों और मनुष्योंकी (यथायोग्य) पूजा कर कौशिकीमें (अवस्थित) पापका नाश करनेवाले भगवान् कच्छपका दर्शन करने गये । उस महानदीमें स्नान करनेके बाद उन्होंने जगत्-स्वामी भगवान्की पूजा की और उपवास (व्रत) करके पवित्र होकर ब्राह्मणोंको दक्षिणा दिया । उसके बाद कच्छपावतार जगन्नाथ भगवान्को नमस्कार कर वे वहाँसे कृष्ण नामके अश्वमुख भगवान्का दर्शन करने चले गये । वहाँ उन्होंने देवह्रदमें स्नानकर देवों एवं पितरोंका तर्पण किया और हयग्रीव भगवान्का अर्चन कर वे हस्तिनापुर चले गये । वहाँ स्नान करनेके बाद चक्रपाणि विश्वपति गोविन्ददेवकी विधिसे पूजा करनेके बाद वे यमुना नदीके पास पहुँच गये । उसमें स्नान करके पवित्र होकर उन्होंने ऋषियों, पितरों और देवोंका तर्पण किया तथा देवोंके देव जगन्नाथ त्रिविक्रम-(वामन भगवान्) का दर्शन किया ॥ २-९ ॥

नारद उवाच

साम्प्रतं भगवान् विष्णुस्त्रैलोक्याक्रमणं वपुः । करिष्यति जगत्स्वामी बलेर्बन्धनमीश्वरः ॥ १० ॥
तत्कथं पूर्वकालेऽपि विभुरासीत् त्रिविक्रमः । कस्य वा बन्धनं विष्णुः कृतवांस्तत्र मे वद ॥ ११ ॥

नारदजीने पूछा—इस समय जगत्स्वामी भगवान् विष्णु तीनों लोकोंको आक्रान्त करनेवाला (विराट्‌रूप) देह धारण करेंगे और बलिको बाँधेंगे तो कैसे वे भगवान् विष्णु पहले समयमें त्रिविक्रम हुए थे और (उस समय) उन्होंने किसका बन्धन किया था—यह मुझे बतलाइये ॥ १०-११ ॥

पुलस्त्य उवाच

श्रूयतां कथयिष्यामि योऽस्य प्रोक्तस्त्रिविक्रमः । यस्मिन् काले समभूच्च यं च बद्धवानसौ ॥ १२ ॥
आसीद् धुन्धुरिति ख्यातः कश्यपस्यौरसः सुतः । दनुगर्भसमुद्भूतो [illegible] महाबलपराक्रमः ॥ १३ ॥
[illegible] ॥ १४ ॥
स समाराध्य वरदं ब्रह्माणं [illegible] ॥ १५ ॥
तद् वरं तस्य च प्रादात् तपसा [illegible]
चतुर्थस्य कलेरादौ जित्वा देवान् सवासवान् । धुन्धुः शक्रत्वमकरोद्धिरण्यकशिपौ सति ॥ १६ ॥
तस्मिन् काले स बलवान् हिरण्यकशिपुस्ततः । चचार मन्दरगिरौ दैत्यं धुन्धुं [illegible] ॥ १७ ॥
ततोऽसुरा यथा कामं विहरन्ति त्रिविष्टपे । ब्रह्मलोके च त्रिदशाः संस्थिता [illegible] ॥ १८ ॥

पुलस्त्यजी बोले—नारदजी ! वे त्रिविक्रम भगवान् कौन हैं, कब हुए और उन्होंने किसको ठगा ? यह सब जो आपने पूछा है उसे मैं कहता हूँ; आप सुनिये। दनुके गर्भसे उत्पन्न अत्यन्त बलवान् एवं पराक्रमी धुन्धु नामसे प्रसिद्ध कश्यपका एक औरस पुत्र था। नारदजी ! उस दैत्यने तपस्यासे वरदानी ब्रह्माकी आराधना करके उनसे इन्द्र आदि देवताओंसे (अपनेको) अवध्य होनेकी याचना की। (उसकी) तपस्यासे प्रसन्न होकर पद्मयोनि ब्रह्माजीने उसे वह (वाञ्छित) वर दे दिया। उसके बाद वह बलवान् धुन्धु स्वर्गमें चला गया। चतुर्थ कलियुगके आदिमें हिरण्यकशिपुके वर्तमान रहते समय धुन्धु इन्द्रसहित देवोंको जीतकर स्वयं इन्द्र बन गया। उस समय धुन्धुका आश्रय लेकर बलवान् दैत्य हिरण्यकशिपु मन्दर पर्वतपर (स्वच्छन्दतासे) विचरण कर रहा था। दैत्यगण भी स्वच्छन्दतासे स्वर्गमें विचरण करने लगे। (इससे) सभी देवता दुःखी होकर ब्रह्मलोकमें जाकर रहने लगे ॥ १२–१८ ॥

ततोऽमराणां ब्रह्मसदो निवासिनः श्रुत्वाऽथ धुन्धुर्दितिजानुवाच ।
व्रजाम दैत्या वयमब्जजस्य सदो विजेतुं त्रिदशान् सशक्रान् ॥ १९ ॥
ते धुन्धुवाक्यं तु निशम्य दैत्याः प्रोचुर्न नो विद्यति लोकपाल ।
गतिर्यया याम पितामहाजिरं सुदुर्गमोऽयं परमो हि मार्गः ॥ २० ॥
इतः सहस्रैर्बहुयोजनाख्यैर्लोको महर्नाम महर्षिजुष्टः ।
येषां हि दृष्ट्यार्पणचोदितेन दहन्ति दैत्याः सहसेक्षितेन ॥ २१ ॥
ततोऽपरो योजनकोटिना वै लोको जनो नाम वसन्ति यत्र ।
गोमातरोऽस्मासु विनाशकारि यासां रजोऽप्याहु महासुरेन्द्र ॥ २२ ॥
ततोऽपरो योजनकोटिभिस्तु षड्भिस्तपो नाम तपस्विजुष्टः ।
तिष्ठन्ति यत्रासुर साध्यवर्या येषां हि निश्वाससमरुत् त्वसह्यः ॥ २३ ॥

तब देवोंका ब्रह्मलोकमें रहना सुनकर धुन्धुने दैत्योंसे कहा—दैत्यो ! इन्द्रसहित देवोंको जीतनेके लिये हमलोग (अब) ब्रह्मलोक चलें। धुन्धुका वचन सुनकर उन दैत्योंने कहा—लोकपाल ! हमलोगोंमें वह गति नहीं है, जिससे पितामह (ब्रह्मा) के लोकमें जा सकें। (वहाँका) मार्ग बहुत दूर एवं बीहड़ है। यहाँसे हजारों योजन दूर महर्षियोंसे सेवित 'महः' नामका लोक है। उन ऋषियोंकी सहसा दृष्टि पड़ते ही समस्त दैत्य जल जाते हैं। उससे भी एक कोटि योजन दूर 'जन' नामक एक लोक है जहाँ गोमाताएँ रहती हैं ! महासुरेन्द्र ! उनकी धूलि भी हमलोगोंका विनाश कर सकती है। उसके बाद छः करोड़ योजनकी दूरीपर तपस्वियोंसे भरा 'तपः' लोक है। असुरराज ! वहाँ श्रेष्ठ साध्यगण रहते हैं। उनका निःश्वास-वायु असहनीय है ॥ १९–२३ ॥

ततोऽपरो योजनकोटिभिस्तु त्रिंशद्भिरादित्यसहस्रदीप्तिः ।
सत्याभिधानो भगवन्निवासो ब्रह्मसदोऽभूद् भवतो हि योऽन्यो ॥ २४ ॥

यत्र वेदध्वनिं श्रुत्वा विकसन्ति सुरादयः । संकोचमसुरा यान्ति ये च तेषां सधर्मिणः ॥ २५ ॥
तस्मात्तत्र न गच्छामो नालमेतत् समागमः । पद्मजभुवनं धुन्धो दुरारोहं सदा नृभिः ॥ २६ ॥
तेषां वचनमाकर्ण्य धुन्धुः प्रोवाच दानवान् । गन्तुकामः स सदनं ब्रह्मणो जेतुमीश्वरान् ॥ २७ ॥

उसके बाद तीस करोड़ योजनकी दूरीपर हजारों सूर्योंके समान प्रदीप्त 'सत्य' नामका लोक है। वह लोक [illegible] है जिसे [illegible] कर दिया था। जिसकी वेदध्वनि सुनकर देवता आदि विकसित [illegible] संकुचित (म्लान) हो जाते हैं। अतः महाबाहु धुन्धो ! आप

ऐसी बुद्धि न करें; क्योंकि ब्रह्मलोक मनुष्यों-(एवं दैत्यों-) के लिये सर्वथा अगम्य है। उनकी बात सुनकर (भी) देवोंको जीतनेके लिये ब्रह्मलोक जानेकी इच्छावाले धुन्धुने दानवोंसे (फिर) कहा—॥ २४–२७ ॥

कथं तु कर्मणा केन गम्यते दानवर्षभाः। कथं तत्र सहस्राक्षः सम्प्राप्तः सह दैवतैः ॥ २८ ॥
ते धुन्धुना दानवेन्द्राः पृष्टाः प्रोचुर्वचोऽधिपम्। कर्म तन्न वयं विद्मः शुक्रस्तद् वेत्त्यसंशयम् ॥ २९ ॥
दैत्यानां वचनं श्रुत्वा धुन्धुर्दैत्यपुरोहितम्। पप्रच्छ शुक्रं किं कर्म कृत्वा ब्रह्मसदो गतिः ॥ ३० ॥
ततोऽस्मै कथयामास दैत्याचार्यः कलिप्रिय। शक्रस्य चरितं धीमान् पुरा वृत्ररिपोः किल ॥ ३१ ॥
शक्रः शतं तु पुण्यानां क्रतूनामयजत् पुरा। दैत्येन्द्र वाजिमेधानां तेन ब्रह्मसदो गतः ॥ ३२ ॥

दानवश्रेष्ठो! वहाँ कैसे और किस कर्मसे जाया जा सकता है? इन्द्र देवोंके साथ वहाँ कैसे पहुँचे? धुन्धुके पूछनेपर उन श्रेष्ठ दानवोंने कहा—हमलोग उस कर्मको तो नहीं जानते, किंतु शुक्राचार्य उसको निःसंदेह जानते हैं। दैत्योंका वचन सुनकर धुन्धुने दैत्योंके पुरोहित शुक्राचार्यजीसे पूछा—(आचार्यजी!) किस कर्मको करनेसे ब्रह्मलोकमें जाया जा सकता है? (पुलस्त्यजी कहते हैं—) कलिप्रिय! उसके बाद दैत्योंके गुरु श्रीमान् शुक्राचार्यने उससे वृत्रशत्रु इन्द्रका चरित कहा। उन्होंने कहा—दैत्येन्द्र! पहले समयमें इन्द्रने सौ पवित्र अश्वमेध यज्ञ किये थे। इसीसे वे ब्रह्मलोक गये ॥ २८–३२ ॥

तद्वाक्यं दानवपतिः श्रुत्वा शुक्रस्य वीर्यवान्।
यष्टुं तुरगमेधानां चकार मतिमुत्तमाम्। अथामन्त्र्यासुरगुरुं दानवांश्चाप्यनुत्तमान् ॥ ३३ ॥
प्रोवाच यक्ष्येऽहं वाजिभिर्हयमेधैः सदक्षिणैः। तदागच्छध्वमवनीं गच्छामो वसुधाधिपान् ॥ ३४ ॥
विजित्य हयमेधान् वै यथाकामगुणान्वितान्। आहूयन्तां च विधयस्त्वाज्ञाप्यन्तां च शुल्वकाः ॥ ३५ ॥
आमन्त्र्यन्तां च ऋषयः प्रयामो देविकातटम्।
सा हि पुण्या सरिच्छ्रेष्ठा सर्वसिद्धिकरी शुभा। स्थानं प्राचीनमासाद्य वाजिमेधान् यजामहे ॥ ३६ ॥

शुक्राचार्यके उस वाक्यको सुनकर बलवान् दानवपतिने अश्वमेधयज्ञ करनेकी उत्कट इच्छा की। उसके बाद दैत्योंके गुरुको और अच्छे दैत्योंको बुलाकर उसने कहा—मैं दक्षिणासहित अश्वमेध यज्ञोंका अनुष्ठान करूँगा। इसलिये आओ, हमलोग पृथ्वीपर चलें और राजाओंको जीतकर इच्छानुकूल सामग्री एवं विधिसे पूर्ण अश्वमेधोंका अनुष्ठान करें। विधियोंको बुलाओ एवं शुल्बकोंको आदेश दे दो और ऋषियोंको आमन्त्रित करो। हमलोग देविकाके तटपर चलें। यह पुनीत उत्तम नदी सत्याधायिनी तथा सर्वसिद्धिकारिणी है। उस प्राचीन स्थानपर पहुँचकर हम अश्वमेध यज्ञ करेंगे ॥ ३३–३६ ॥

इत्थं सुरारेर्वचनं निशम्यासुरयाजकः। बाढमित्यब्रवीद्धृष्टो विधयः संदिदेश सः ॥ ३७ ॥
ततो धुन्धुर्देविकायाः प्राचीने पापनाशने। भार्गवेन्द्रेण शुक्रेण वाजिमेधाय दीक्षितः ॥ ३८ ॥
सदस्या ऋत्विजश्चापि तत्रासन् भार्गवा द्विजाः। शुक्रस्यानुमते ब्रह्मन् शुक्रशिष्याश्च पण्डिताः ॥ ३९ ॥
यज्ञभागभुजस्तत्र स्वर्भानुप्रमुखा मुने। कृताश्चासुरनाथेन शुक्रस्यानुमतेऽसुराः ॥ ४० ॥
ततः प्रवृत्तो यज्ञस्तु समुत्सृष्टस्तथा हयः। हयस्यानुययौ श्रीमानसिलोमा महासुरः ॥ ४१ ॥

देवोंके शत्रु धुन्धुके उस वचनको सुनकर दैत्योंके यज्ञ करानेवाले शुक्राचार्यने 'ठीक है'—ऐसा कहा और प्रसन्नतापूर्वक उन्होंने विधियोंको आदेश दे दिया। उसके बाद भार्गवश्रेष्ठ शुक्राचार्यने पापोंका नाश करनेवाले देविकाके प्राचीन तटपर अश्वमेध यज्ञके (अनुष्ठानके) लिये धुन्धुको दीक्षित किया। ब्रह्मन्! शुक्राचार्यकी अनुमतिसे उनके शिष्य तथा भार्गव-गोत्रीय विद्वान् ब्राह्मण उस यज्ञमें सदस्य एवं ऋत्विक् बने। मुने!

शुक्राचार्यकी अनुमतिसे दैत्यश्रेष्ठने स्वर्भानु आदि असुरोंको (देवोंके स्थानपर) यज्ञभागका रक्षक और भोक्ता बनाया गया। उसके बाद यह अश्वमेध आरम्भ हुआ और (दिग्विजयार्थक) अश्व छोड़ा गया। अतिबल नामका विराट् दैत्य घोड़ेके पीछे (उसकी रक्षाके लिये) चला ॥ ३०–४१ ॥

ततोऽग्निधूमेन मही सशैला व्याप्ता दिशः खं विदिशश्च पूर्णाः।
तेनोग्रगन्धेन दिवस्पृशेन मरुद्ववौ ब्रह्मलोके महर्षे ॥ ४२ ॥
तं गन्धमाघ्राय सुरा विषण्णा जानन्त धुन्धुं हयमेधदीक्षितम्।
ततः शरण्यं शरणं जनार्दनं जग्मुः समस्ता जगतः परायणम् ॥ ४३ ॥
प्रणम्य वरदं देवं पद्मनाभं जनार्दनम्। प्रोचुः सर्वे सुरगणा भयगद्गदया गिरा ॥ ४४ ॥
भगवन् देवदेवेश चराचरपरायण। विज्ञप्तिः श्रूयतां विष्णो सुरगणार्तिनाशन ॥ ४५ ॥

महर्षे! उसके बाद यज्ञके धूएँसे पहाड़ोंके साथ पृथ्वी, आकाश, दिशाएँ और विदिशाएँ भर गयीं। आकाशमें ऊँचे उठे हुए उग्र गन्धवाले धूएँसे मिली हुई वायु ब्रह्मलोकमें बहने लगी। उस गन्धको सूँघकर देवगण उदास हो गये। उन्हें यह पता चल गया कि धुन्धुने अश्वमेधकी दीक्षा ग्रहण की (और यज्ञानुष्ठान कर रहा) है। उसके बाद वे सम्पूर्ण संसारके आश्रय और शरण देनेवाले भगवान् जनार्दनकी शरणमें गये। वरदान देनेवाले पद्मनाभ जनार्दन देवको प्रणाम कर सभी देवोंने भयसे विकल वाणीमें कहा— देवेश्वर! देवदेव! चर और अचरके कल्याण करनेमें नित्य उद्यत रहनेवाले देवाधिदेव विष्णो! आप हमारा निवेदन सुनें—॥ ४२–४५ ॥

धुन्धुर्नामासुरपतिर्बलवान् वरबृंहितः। सर्वान् सुरान् विनिर्जित्य त्रैलोक्यमहरद् बलिः ॥ ४६ ॥
भूयो निराश्रितो देवान् शशाङ्काङ्कान्न यतो हरे। अतो विवृद्धिमगमद् यथा व्याधिरुपेक्षितः ॥ ४७ ॥
साम्प्रतं ब्रह्मलोकस्थानपि जेतुं समुद्यतः। शुक्रस्य मतमास्थाय सोऽश्वमेधाय दीक्षितः ॥ ४८ ॥
शतं क्रतूनामिष्ट्वाऽसौ ब्रह्मलोकं महासुरः। आरोढुमिच्छति यतो विजेतुं त्रिदशानपि ॥ ४९ ॥
तस्मादकालहीनं तु चिन्तयस्व जगद्गुरो। उपायं मखविध्वंसे येन स्याम सुनिर्वृताः ॥ ५० ॥

धुन्धु नामक बलवान् दैत्यपति शंकरसे वर प्राप्त कर लेनेके कारण बढ़ गया है। उस बलवान्‌ने सभी देवोंको पराजित कर त्रिलोकी (के अधिकार) को छीन लिया है। हरे! निराश्रय शरण करनेवाले शंकरके सिवा हम देवोंका और कोई रक्षक नहीं है, इसलिये वह असुर उपेक्षित रोगकी तरह बढ़ (प्रबल) हो गया है। इस समय वह ब्रह्मलोकमें रहनेवाले देवोंको भी जीतनेके लिये तैयार होकर शुक्राचार्यके मतके अनुसार अश्वमेध-यज्ञकी दीक्षा ले चुका है। वह सौ अश्वमेधयज्ञ करके देवताओंपर विजय पानेके लिये ब्रह्मलोकमें जाना चाहता है। इसलिये जगद्गुरो! आप उसके यज्ञके विध्वंस करनेका उपाय बिना समय बिताये सोचें, जिससे हमलोग निश्चिन्त हो जायँ ॥ ४६–५० ॥

इत्थं सुराणां वचनं भगवान् मधुसूदनः।
[illegible] [illegible] [illegible]। विसृज्य देवताः सर्वा ज्ञात्वाऽजेयं महासुरम् ॥ ५१ ॥
[illegible] मतिं चक्रे धुन्धोर्विनिग्रहाय वै। ततः कृत्वा स भगवान् वामनं रूपमीश्वरः ॥ ५२ ॥
[illegible] [illegible] प्रययौ देविकातटे। [illegible] यदृच्छया ॥ ५३ ॥
[illegible] [illegible] [illegible]। ततः कायं परित्यज्य पतितं ब्राह्मणोत्तमाः ॥ ५४ ॥

समुत्तारयितुं विप्रमाद्रवन्त ममाकुलाः । सदस्या यजमानश्च ऋत्विजोऽथ महौजसः ॥ ५५ ॥
निमज्जमानमुज्जह्रुः सर्वे ते वामनं द्विजम् ।
समुत्तार्य प्रसन्नास्ते प्रपच्छुः सर्व एव हि । किमर्थं पतितोऽस्मीह केनाक्षिप्तोऽसि नो वद ॥ ५६ ॥

सभी देवताओंको अभयदान देकर उन महाबाहुने उन देवताओंको लौटा दिया और उस महान् धर्मध्वजी (धर्मके नामपर पाखण्ड रचनेवाला) दैत्य धुन्धुको अजेय समझकर उन्होंने (श्रीहरिने) उसे बाँधनेका विचार किया । उसके बाद भगवान् विष्णुने बौनाका रूप धर लिया और देविका नदीके जलमें (अपनी) देहको लकड़ीकी तरह निरालम्ब छोड़ दिया । खुले हुए केशोंवाले वे क्षणमात्रमें अपने-आप डूबने-उतराने लगे । उसके बाद दैत्यपतिने तथा अन्य दैत्यों एवं ऋषियोंने उन्हें देखा । उसके बाद व्याकुल होकर वे श्रेष्ठ ब्राह्मण यज्ञके सभी काम छोड़कर उस ब्राह्मणको निकालनेके लिये दौड़े । सभी सदस्य, यजमान एवं अति तेजस्वी ऋत्विजोंने डूबते हुए बौनाके आकारवाले ब्राह्मणको (नदीके जलसे बाहर) निकाला और उससे पूछा—हमें यह बतलाओ कि तुम यहाँ क्यों गिरे अथवा तुम्हें किसने फेंका ! ॥ ५१–५६ ॥

तेषामाकर्ण्य वचनं कम्पमानो मुहुर्मुहुः । प्राह धुन्धुपुरोगांस्तान्यथावृत्तमथ कारणम् ॥ ५७ ॥
ब्राह्मणो गुणवानासीत् प्रभास इति विश्रुतः । सर्वशास्त्रार्थवित् प्राज्ञो गोत्रतश्चापि वारुणः ॥ ५८ ॥
तस्य पुत्रद्वयं जातं मन्दप्रज्ञं सुदुःखितम् । तत्र ज्येष्ठो मम भ्राता कनीयानपरस्त्वहम् ॥ ५९ ॥
नेत्रभास इति ख्यातो ज्येष्ठो भ्राता ममासुर । मम नाम पिता चक्रे गतिभासेति कौतुकात् ॥ ६० ॥

उसने उनके वचनको सुनकर बार-बार काँपते हुए धुन्धु आदिसे कहा—आपलोग इसका कारण सुनें । वरुण-गोत्रमें उत्पन्न प्रभास नामके एक ब्राह्मण थे । वे सभी शास्त्रोंके तात्पर्यको जाननेवाले और बुद्धिमान् थे । उनके दो पुत्र उत्पन्न हुए । वे दोनों ही अल्पबुद्धि और अत्यन्त दुःखग्रस्त थे । उनमें मेरा भाई बड़ा और मैं छोटा हूँ । अये दैत्य ! मेरा बड़ा भाई 'नेत्रभास' नामसे प्रसिद्ध है । मेरे पिताने कुतूहलवश मेरा नाम 'गतिभास' रख दिया ॥ ५७–६० ॥

महासुर ॥ ६१ ॥
रम्यश्चावसथो धुन्धो शुभश्चासीत् पितुर्मम । विविधैर्गुणैर्युक्तश्चारुरूपो
ततः कालेन महता आवयोः स पिता मृतः । तस्यौर्ध्वदेहिकं कृत्वा गृहमावां समागतौ ॥ ६२ ॥
ततो मयोक्तः स भ्राता विभजाव गृहं वयम् । तेनोक्तो नैव भवतो विद्यते भाग इत्यहम् ॥ ६३ ॥
कुब्जवामनखञ्जानां क्लीबानां श्वित्रिणामपि । उन्मत्तानां तथान्धानां धनभागो न विद्यते ॥ ६४ ॥
शय्यासनस्थानमात्रं स्वेच्छयान्नभुजिक्रिया । एतावद् दीयते तेभ्यो नार्थभागहरा हि ते ॥ ६५ ॥

महासुर धुन्धो ! मेरे पिताका निवास-स्थान सुन्दर, आनन्ददायक, सभी गुणोंसे युक्त एवं मनोहर था । उसके बाद बहुत दिनोंके पश्चात् हम दोनोंके पिता स्वर्ग चले गये । उनकी दाह-संस्कारादि—श्राद्धक्रिया करके हम दोनों भाई घर आ गये । उसके बाद मैंने (अपने उन) बड़े भाईसे कहा—हम दोनों आपसमें घरका बँटवारा कर लें । उसने मुझसे कहा—तुम्हारा हिस्सा नहीं है; क्योंकि कुबड़े, बौने, लँगड़े, हिजड़े, चकत्तेवाले, पागल और अन्धोंका धनमें हिस्सा नहीं होता है । उन्हें केवल सोने भरका स्थान तथा अपनी इच्छाके अनुसार अन्नभोगका अधिकार दिया जाता है । वे सम्पत्तिके भागी—अधिकारी नहीं होते ॥ ६१–६५ ॥

एवमुक्ते मया सोक्तः किमर्थं पैतृकाद् गृहात् । धनार्धभागमर्हामि नाहं न्यायेन केन वै ॥ ६६ ॥
इत्युक्तवति वाक्येऽसौ भ्राता मे कोपसंयुतः । समुत्क्षिप्याक्षिपद्यामस्यां मामिति कारणात् ॥ ६७ ॥

शुक्राचार्यकी अनुमतिसे दैत्याचार्यने स्वर्भानु आदि असुरोंको (देवोंके स्थानपर) यज्ञभागका रक्षक और भोक्ता बनाया गया । उसके बाद यज्ञ आरम्भ हुआ और (दिग्विजय-सूचक) अश्व छोड़ा गया । असिलोमा नामका विराट् दैत्य घोड़ेके पीछे (उसकी रक्षाके लिये) चला ॥ ३७–४१ ॥

ततोऽग्निधूमेन मही सशैला व्याप्ता दिशः खं विदिशश्च पूर्णाः ।
तेनोग्रगन्धेन दिवस्पृशेन मरुद्ववौ ब्रह्मलोके महर्षे ॥ ४२ ॥
तं गन्धमाघ्राय सुरा विषण्णा जानन्त धुन्धुं हयमेधदीक्षितम् ।
ततः शरण्यं शरणं जनार्दनं जग्मुः सशक्रा जगतः परायणम् ॥ ४३ ॥
प्रणम्य वरदं देवं पद्मनाभं जनार्दनम् । प्रोचुः सर्वे सुरगणा भयगद्गदया गिरा ॥ ४४ ॥
महाबाहो ! चक्रकी नेमिद्वारा मेरा यह प्राकृत विकार ही काटा गया है । इसके द्वारा मेरा स्वभाव नहीं क्षत हुआ है । यह तो अच्छेद्य एवं अदाह्य है । केशव ! चक्रद्वारा किये गये ये तीनों अंश निस्सन्देह पुण्य प्रदान करनेवाले होंगे । एक अंश हिरण्याक्ष नामधारी, दूसरा सुवर्णाक्ष नामधारी और तीसरा विरूपाक्ष नामका होगा । ये तीनों अंश मनुष्योंके लिये पुण्यप्रदाता होंगे । विभो ! उठिये और देव-शत्रुका वध करनेके लिये जाइये । विष्णो ! श्रीदामाके वध किये जानेपर देवता प्रसन्न होंगे । शंकरके इस प्रकार कहनेपर भगवान् गरुडध्वजने पर्वतकी ऊँची चोटीपर जाकर श्रीदामाको देखा । देवताओंके दर्पका विनाश करनेवाले उस दैत्यको देखकर देवश्रेष्ठ विष्णुने बार-बार (यह लो) 'तुम मारे गये' ऐसा कहते हुए तीव्र गतिसे चक्र चलाया ॥ ३६-४१ ॥

ततस्तु तेनाप्रतिपौरुषेण चक्रेण दैत्यस्य शिरो निकृत्तम् ।
संछिन्नशीर्षो निपपात शैलाद् वज्राहतं शैलशिरो यथैव ॥ ४२ ॥
तस्मिन् हते देवरिपौ मुरारिरीशं समाराध्य विरूपनेत्रम् ।
लब्ध्वा च चक्रं प्रवरं महायुधं जगाम देवो निलयं पयोनिधिम् ॥ ४३ ॥
सोऽयं पुत्र विरूपाक्षो देवदेवो महेश्वरः । तमाराधय चेत् साधो क्षीरेणेच्छसि भोजनम् ॥ ४४ ॥
तन्मातुर्वचनं श्रुत्वा वीतमन्युसुतो बली । तमाराध्य विरूपाक्षं प्राप्तः क्षीरेण भोजनम् ॥ ४५ ॥
एवं तथोक्तं परमं पवित्रं संछेदनं शर्वतनोः पुरा वै ।
तत्तीर्थवर्यं स महासुरो वै समाससादाथ सुपुण्यहेतोः ॥ ४६ ॥

इति श्रीवामनपुराणे द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

फिर तो अनुपम पौरुषवाले उस चक्रने दैत्यका मस्तक काट डाला । मस्तक कट जानेपर दैत्य [illegible] ऊपरसे इस प्रकार गिरा जैसे वज्रसे आहत होकर पर्वतकी ऊँची चोटी गिरती है । उस देव-शत्रुके [illegible] ॥ मुरारिने विरूपाक्ष शंकरकी आराधना की और चक्ररूपी श्रेष्ठ महायुध लेकर वे देव क्षीरसागरमें [illegible] ४३ ॥ चले गये । [वीतमन्युकी धर्मशीला पत्नी आत्रेयी कहती हैं—] पुत्र ! ये वही देव-देव [illegible] ॥ ४४ ॥ साधो ! यदि तुम दूधके साथ भोजन करना चाहते हो तो उनकी सेवा-पूजा करो । [illegible] जाकर हयग्रीवका वीतमन्युके बलवान् पुत्रने उन विरूपाक्ष शंकरकी आराधनाकर दुग्धसे युक्त [illegible] तर वे पाताल देशमें इस प्रकार प्राचीन कालमें घटित हुई शंकरके शरीर-छेदनसे सम्बद्ध [illegible] गये । उसी श्रेष्ठ तीर्थमें वे महान् असुर प्रह्लाद सुन्दर पुण्य-प्राप्तिके [illegible]

इस प्रकार श्रीवामनपुराणमें बयासीवाँ [illegible]

[अथ त्र्यशीतितमोऽध्यायः]

पुलस्त्य उवाच

तस्मिंस्तीर्थवरे स्नात्वा दृष्ट्वा देवं त्रिलोचनम्। पूजयित्वा सुवर्णाक्षं नैमिषं प्रययौ ततः॥ १॥
तत्र तीर्थसहस्राणि त्रिंशत्पापहराणि च। गोमत्याः काञ्चनाक्ष्याश्च गुरुदायाश्च मध्यतः॥ २॥
तेषु स्नात्वार्च्य देवेशं पीतवाससमच्युतम्। ऋषीनपि च सम्पूज्य नैमिषारण्यवासिनः॥ ३॥
देवदेवं तथेशानं सम्पूज्य विधिना ततः। गयायां गोपतिं द्रष्टुं जगाम स महासुरः॥ ४॥

तिरासीवाँ अध्याय प्रारम्भ

(प्रह्लादकी अनुक्रमागत तीर्थ-यात्रामें अनेक तीर्थोंका महत्त्व)

पुलस्त्यजी बोले—प्रह्लादने उस उत्तम तीर्थमें स्नान कर त्रिनयन महादेवका दर्शन किया और सुवर्णाक्षकी पूजाकर वे नैमिषारण्य चले गये। वहाँ गोमती, काञ्चनाक्षी और गुरुदाके मध्यमें पाप-नाश करनेवाले तीस हजार तीर्थ हैं। उनमें स्नानकर उन्होंने पीताम्बर धारण करनेवाले देवेश्वर अच्युतकी पूजा की। नैमिषारण्यमें रहनेवाले ऋषियोंकी पूजा करनेके पश्चात् देवाधिदेव महेशका विधिपूर्वक पूजन कर वे महासुर गोपतिका दर्शन करनेके लिये गयातीर्थमें चले गये॥ १-४॥

तत्र ब्रह्मध्वजे स्नात्वा कृत्वा चास्य प्रदक्षिणाम्। पिण्डनिर्वपणं पुण्यं पितृणां स चकार ह॥ ५॥
उदपाने तथा स्नात्वा तत्राभ्यर्च्य पितॄन् वशी। गदापाणिं समभ्यर्च्य गोपतिं चापि शङ्करम्॥ ६॥
इन्द्रतीर्थे तथा स्नात्वा संतर्प्य पितृदेवताः। महानदीजले स्नात्वा सरयूमाजगाम सः॥ ७॥
तस्यां स्नात्वा समभ्यर्च्य गोप्रतारे कुशेशयम्। उपोष्य रजनीमेकां विरजां नगरीं ययौ॥ ८॥

वहाँ ब्रह्मध्वजमें स्नान और उसकी प्रदक्षिणा कर उन्होंने पितरोंके निमित्त पवित्र पिण्डदान किया। (फिर) उदपानमें स्नानकर जितेन्द्रिय (प्रह्लाद) ने पितरों, गदापाणि (विष्णु) एवं गोपति शंकरकी पूजा की। इन्द्रतीर्थमें (भी) स्नानकर उन्होंने पितरों एवं देवोंका तर्पण किया तथा महानदीके जलमें स्नानकर वे सरयूके तीरपर पहुँचे। उसमें स्नानकर उन्होंने गोप्रतारमें कुशेशयकी पूजा की एवं वहाँ एक रात्रि निवास कर वे विरजा नगरीमें गये॥ ५-८॥

स्नात्वा विरजसे तीर्थे दत्त्वा पिण्डं पितॄंस्तथा। दर्शनार्थं ययौ श्रीमानजितं पुरुषोत्तमम्॥ ९॥
तं दृष्ट्वा पुण्डरीकाक्षमक्षरं परमं शुचिः। षड्रात्रमुष्य तत्रैव महेन्द्रं दक्षिणं ययौ॥ १०॥
तत्र देववरं शम्भुमर्धनारीश्वरं हरम्। दृष्ट्वार्च्य सम्पूज्य पितॄन् महेन्द्रं चोत्तरं गतः॥ ११॥
तत्र देववरं शम्भुं गोपालं सोमपायिनम्। दृष्ट्वा स्नात्वा सोमतीर्थे सह्याचलमुपागतः॥ १२॥

फिर विरजातीर्थमें स्नान करनेके बाद पितरोंको पिण्डदान कर वे श्रीमान् पुरुषोत्तम अजितका दर्शन करने चले गये। वे पवित्र असुर अविनाशी पुरुषोत्तमका दर्शन करनेके पश्चात् छः रातोंतक वहीं निवासकर दक्षिण दिशामें स्थित महेन्द्र पर्वतपर चले गये। (वे) वहाँ देवश्रेष्ठ अर्धनारीश्वर महादेवका दर्शन तथा पूजनकर पितरोंकी पूजा करके उत्तर दिशाकी ओर चले गये। वहाँ देवश्रेष्ठ शम्भु और सोमपायी गोपालका दर्शन करनेके पश्चात् सोमतीर्थमें स्नान कर वे सह्याचलपर चले गये॥ ९-१२॥

तत्र स्नात्वा महोदक्यां वैकुण्ठं चार्च्य भक्तितः। सुरान् पितॄन् समभ्यर्च्य पारियात्रं गिरिं गतः॥ १३॥
तत्र स्नात्वा लाङ्गलिन्यां पूजयित्वा सनातनम्। कशेरुदेशं चाभ्येत्य विश्वरूपं ददर्श सः॥ १४॥
तत्र [illegible] शूलपाणिनम्। विश्वरूपमथात्मानं दर्शयामास योगवित्॥ १५॥
तत्र मङ्कणिकातीर्थे स्नात्वाभ्यर्च्य महेश्वरम्। जगामाद्रिं स सौगन्धिं प्रह्लादो मलयाचलम्॥ १६॥

वहाँ महोदकीमें स्नान करनेके बाद श्रद्धापूर्वक विष्णु, देवताओं एवं पितरोंका पूजन कर वे पारियात्र पर्वतपर चले गये। वहाँ लाङ्गलिनीमें स्नान करनेके बाद उन्होंने अपराजितका पूजन किया और कशेरुदेशमें जाकर विश्वरूपका दर्शन किया। वहाँ योगवित् देववर शम्भुने गणोंसे पूजित अपना विश्वरूप प्रकट किया था; वहाँ मङ्कुणिकाके जलमें स्नान करनेके बाद महेश्वरका पूजनकर प्रह्लाद सुगन्धियुक्त मलय पर्वतपर गये ॥ १३–१६ ॥

महाह्रदे ततः स्नात्वा पूजयित्वा च शङ्करम्। ततो जगाम योगात्मा द्रष्टुं विन्ध्ये सदाशिवम् ॥ १७ ॥
ततो विपाशासलिले स्नात्वाभ्यर्च्य सदाशिवम्। त्रिरात्रं समुपोष्याथ अवन्तीं नगरीं ययौ ॥ १८ ॥
तत्र शिप्राजले स्नात्वा विष्णुं सम्पूज्य भक्तितः। श्मशानस्थं ददर्शाथ महाकालवपुर्धरम् ॥ १९ ॥
तस्मिन् हि सर्वसत्त्वानां तेन रूपेण शङ्करः। तामसं रूपमास्थाय संहारं कुरुते वशी ॥ २० ॥

उसके बाद महाह्रदमें स्नान करनेके पश्चात् शंकरकी पूजाकर योगात्मा प्रह्लाद सदाशिवका दर्शन करनेके लिये विन्ध्यपर्वतपर गये। उसके बाद विपाशाके जलमें उन्होंने स्नान किया और सदाशिवका पूजन किया। उसके पश्चात् तीन रातोंतक वहाँ निवास करके वे अवन्ती नगरीमें गये। वहाँ शिप्राके जलमें स्नान करनेके बाद श्रद्धापूर्वक विष्णुका पूजनकर उन्होंने श्मशानमें स्थित महाकालशरीरधारीका दर्शन किया। वहाँ उस रूपमें स्थित आत्मवशी शंकर तामसरूप धारण करके समस्त प्राणियोंका संहार करते हैं ॥ १७–२० ॥

तत्रस्थेन सुरेशेन श्वेतकिर्नाम भूपतिः। रक्षितस्त्वन्तकं दग्ध्वा सर्वभूतापहारिणम् ॥ २१ ॥
तत्रातिहृष्टो वसति नित्यं शर्वः सहोमया। वृतः प्रमथकोटीभिर्बहुभिस्त्रिदशार्चितः ॥ २२ ॥
तं दृष्ट्वाथ महाकालं कालकालान्तकान्तकम्। यमसंयमनं मृत्योर्मृत्युं चित्रविचित्रकम् ॥ २३ ॥
श्मशाननिलयं शम्भुं भूतनाथं जगत्पतिम्। पूजयित्वा शूलधरं जगाम निषधान् प्रति ॥ २४ ॥

वहाँपर स्थित हुए सुरेशने सर्वभूतापहारी (समस्त भूतोंका अपहरण करनेवाले) अन्तकको जलाकर श्वेतकि नामक राजाकी रक्षा की थी। करोड़ों गणोंसे घिरे हुए एवं देवोंसे पूजित भगवान् शंकर उमाके साथ अत्यन्त प्रसन्नतापूर्वक वहाँ नित्य निवास करते हैं। उन कालोंके काल, अन्तकोंके अन्तक, यमोंके नियामक, मृत्युके मृत्यु, चित्रविचित्र श्मशानके वासी, भूतपति, जगत्पति, शूल धारण करनेवाले शंकरका दर्शन एवं पूजनकर वे निषध-देशकी ओर चले गये ॥ २१–२४ ॥

तत्रामरेश्वरं देवं दृष्ट्वा सम्पूज्य भक्तितः। महोदयं समभ्येत्य हयग्रीवं ददर्श सः ॥ २५ ॥
अश्वतीर्थे ततः स्नात्वा दृष्ट्वा च तुरगाननम्। श्रीधरं चैव सम्पूज्य पञ्चालविषयं ययौ ॥ २६ ॥
तत्रेश्वरगुणैर्युक्तं पुत्रमर्थपतेरथ। पाञ्चालिकं वशी दृष्ट्वा प्रयागं परतो ययौ ॥ २७ ॥
स्नात्वा सन्निहिते तीर्थे यामुने लोकविश्रुते। दृष्ट्वा वटेश्वरं रुद्रं माधवं योगशायिनम् ॥ २८ ॥
द्वावेव भक्तितः पूज्यौ पूजयित्वा महासुरः। माघमासमथोपोष्य ततो वाराणसीं गतः ॥ २९ ॥

वहाँ श्रद्धापूर्वक अमरेश्वर देवका दर्शन एवं अर्चन करनेके बाद उन्होंने महोदयमें जाकर हयग्रीवका दर्शन किया। उसके बाद अश्वतीर्थमें स्नान कर अश्वमुखका दर्शन तथा श्रीधरका अर्चन कर वे पाञ्चाल देशमें गये। जितेन्द्रिय प्रह्लाद वहाँ ईश्वरीय गुणोंसे सम्पन्न धनपति कुबेरके पुत्र पाञ्चालिकका दर्शनकर प्रयाग चले गये। निकटमें रहनेवाले यमुनाके विख्यात तीर्थमें स्नान करनेके पश्चात् वटेश्वर रुद्र तथा योगशायी माधवका दर्शन एवं श्रद्धापूर्वक उन दोनों पूजनीयोंका अर्चन कर उन महासुरने माघमासमें वहाँ निवास किया। उसके बाद वे वाराणसी चले गये ॥ २५–२९ ॥

ततोऽस्यां वरणायां च तीर्थेषु च पृथक् पृथक्। सर्वपापहरायेषु स्नात्वाऽर्च्य पितृदेवताः ॥ ३० ॥
प्रदक्षिणीकृत्य पुरीं पूज्याविमुक्तकेशवौ। लोलं दिवाकरं दृष्ट्वा ततो मधुवनं ययौ ॥ ३१ ॥
तत्र स्वयम्भुवं देवं ददर्शासुरसत्तमः। तमभ्यर्च्य महातेजाः पुष्करारण्यमागमत् ॥ ३२ ॥
तेषु त्रिष्वपि तीर्थेषु स्नात्वाऽर्च्य पितृदेवताः। पुष्कराक्षमयोगन्धिं ब्रह्माणं चाप्यपूजयत् ॥ ३३ ॥
ततो भूयः सरस्वत्यास्तीर्थे त्रैलोक्यविश्रुते। कोटितीर्थे रुद्रकोटिं ददर्श वृषभध्वजम् ॥ ३४ ॥

इसके बाद समस्त पापोंका अपहरण करनेवाले असी और वरुणाके विभिन्न तीर्थोंमें स्नानके बाद पितरों एवं देवोंका अर्चनकर उन्होंने (वाराणसी) पुरीकी प्रदक्षिणा की। उसके बाद अविमुक्तेश्वर एवं केशवकी पूजा तथा लोलार्कका दर्शन करके वे मधुवन चले गये। महातेजस्वी असुरोत्तम प्रह्लाद वहाँ स्वयम्भू देवका दर्शन एवं पूजनकर पुष्करारण्यमें गये। उन तीनों तीर्थोंमें स्नान करनेके बाद पितरों एवं देवोंका पूजन कर उन्होंने अयोगन्धि, पुष्कराक्ष तथा ब्रह्माका अर्चन किया। उसके बाद उन्होंने कोटितीर्थमें सरस्वतीके तटपर स्थित लोकविख्यात रुद्रकोटि वृषभध्वजका दर्शन किया ॥ ३०–३४ ॥

नैमिषेया द्विजवरा मागधेयाः ससैन्धवाः। धर्मारण्याः पौष्करेया दण्डकारण्यकास्तथा ॥ ३५ ॥
चाम्पेया भारुकच्छेया देविकातीरगाश्च ये। ते तत्र शङ्करं द्रष्टुं समायाता द्विजातयः ॥ ३६ ॥
कोटिसंख्यास्तपःसिद्धा हरदर्शनलालसाः। अहं पूर्वमहं पूर्वमित्येवं वादिनो मुने ॥ ३७ ॥
तान् संक्षुब्धान् हरो दृष्ट्वा महर्षीन् दग्धकिल्बिषान्। तेषामेवानुकम्पार्थं कोटिमूर्त्तिरभूद् भवः ॥ ३८ ॥

(कहा है कि प्राचीन समयमें) नैमिषारण्य, मगध, सिन्धुप्रदेश, धर्मारण्य, पुष्कर, दण्डकारण्य, चम्पा, भरुकच्छ एवं देविकाके तटपर रहनेवाले श्रेष्ठ ब्राह्मण वहाँ शंकरका दर्शन करने आये थे। मुने ! शिवके दर्शनकी लालसावाले करोड़ों सिद्ध तपस्वी 'मैं पहले दर्शन करूँगा', 'मैं पहले दर्शन करूँगा' इस प्रकारका विवाद करने लगे। उन निष्पाप महर्षियोंको खिन्न और क्षुब्ध देखकर शंकरने उनपर कृपाकर करोड़ों मूर्त्तियाँ धारण कर लीं ॥ ३५–३८ ॥

ततस्ते मुनयः प्रीताः सर्व एव महेश्वरम्।
सम्पूजयन्तस्तस्थुर्वै तीर्थं कृत्वा पृथक् पृथक्। इत्येवं रुद्रकोटीति नाम्ना शम्भुरजायत ॥ ३९ ॥
तं ददर्श महातेजाः प्रह्लादो भक्तिमान् वशी।
कोटितीर्थे ततः स्नात्वा तर्पयित्वा वसून् पितॄन्। रुद्रकोटिं समभ्यर्च्य जगाम कुरुजाङ्गलम् ॥ ४० ॥
तत्र देववरं स्थाणुं शङ्करं पार्वतीप्रियम्। सरस्वतीजले मग्नं ददर्श सुरपूजितम् ॥ ४१ ॥
सारस्वतेऽम्भसि स्नात्वा स्थाणुं सम्पूज्य भक्तितः। स्नात्वा दशाश्वमेधे च सम्पूज्य च सुरान् पितॄन् ॥ ४२ ॥

इसके बाद वे सभी मुनि प्रसन्नतापूर्वक अलग-अलग तीर्थ बनाकर महेश्वरकी पूजा करते हुए निवास करने लगे। इस प्रकार शम्भुका नाम रुद्रकोटि हुआ। महातेजस्वी भक्त जितेन्द्रिय प्रह्लादने उनका दर्शन किया एवं कोटितीर्थमें स्नानकर वसुओं तथा पितरोंका तर्पण किया। उसके बाद रुद्रकोटिका अर्चनकर वे कुरुजाङ्गलमें चले गये। उन्होंने वहाँ सरस्वतीके जलमें निमग्न हुए देवताओंसे पूजित स्थाणु—पार्वतीपति भगवान् शंकरका दर्शन किया। सरस्वतीके जलमें स्नानकर उन्होंने भक्तिपूर्वक स्थाणुकी पूजा की तथा दशाश्वमेधमें स्नानकर देवों एवं पितरोंका पूजन किया ॥ ३९–४२ ॥

एकहंसे समभ्यर्च्य स्नात्वा [illegible] मुनिः। अभिवाद्य गुरुं शुक्रं सोमतीर्थं जगाम ह ॥ ४३ ॥
तत्र स्नात्वाऽर्च्य च पितॄन् सोमं सम्पूज्य भक्तितः। क्षीरिकावासमभ्येत्य स्नानं चक्रे महायशाः ॥ ४४ ॥
प्रदक्षिणीकृत्य महीं गत्वा मान्यं बुद्धिमान्। भूयः कुरुध्वजं दृष्ट्वा पद्माख्यं नगरं गतः ॥ ४५ ॥

तत्रार्च्य मित्रावरुणौ भास्करौ लोकपूजितौ। कुमारधारामभ्येत्य ददर्श स्वामिनं वशी ॥ ४६ ॥
स्नात्वा कपिलधारायां संतर्प्याभ्यर्च्य पितॄन् सुरान्। दृष्ट्वा स्कन्दं समभ्यर्च्य नर्मदायां जगाम ॥ ४७ ॥
तस्यां स्नात्वा समभ्यर्च्य वासुदेवं श्रियः पतिम्। जगाम भूधरं द्रष्टुं वाराहं चक्रधारिणम् ॥ ४८ ॥

कन्याह्रदमें स्नान करनेके बाद पवित्र होकर उन्होंने सहस्रलिङ्गका अर्चन किया। इसके बाद (शुक्रतीर्थमें) गुरु शुक्राचार्यको प्रणामकर वे सोमतीर्थ चले गये। वहाँ स्नान करनेके बाद श्रद्धापूर्वक पितरों एवं सोमका अर्चन करके उन महायशस्वीने क्षीरिकावासमें जाकर स्नान किया। वहाँके वृक्षकी प्रदक्षिणाकर तथा वरुणकी पूजा करनेके पश्चात् बुद्धिमान् प्रह्लाद फिर कुरध्वजका दर्शनकर पद्मा नामकी नगरीमें चले गये। वहाँ लोकपूजित तेजस्वी मित्रावरुणका पूजन करनेके बाद कुमारधारामें जाकर जितेन्द्रिय प्रह्लादने स्वामी कार्तिकेयका दर्शन किया। कपिलधारामें स्नान करके पितृतर्पण, देवपूजन एवं स्कन्दका दर्शन तथा अर्चन कर वे नर्मदाके निकट गये। उसमें स्नान करके लक्ष्मीपति वासुदेवकी अर्चना कर वे चक्र धारण करनेवाले भूधर वाराहदेवका दर्शन करने गये ॥ ४३-४८ ॥

स्नात्वा कोकामुखे तीर्थे सम्पूज्य धरणीधरम्। त्रिसौवर्णं महादेवमर्बुदेशं जगाम ॥ ४९ ॥
तत्र नारीह्रदे स्नात्वा पूजयित्वा च शङ्करम्। कालिञ्जरं समभ्येत्य नीलकण्ठं ददर्श सः ॥ ५० ॥
नीलतीर्थजले स्नात्वा पूजयित्वा ततः शिवम्। जगाम सागरानूपे प्रभासे द्रष्टुमीश्वरम् ॥ ५१ ॥
स्नात्वा च संगमे नद्याः सरस्वत्यार्णवस्य च। सोमेश्वरं लोकपतिं ददर्श स कपर्दिनम् ॥ ५२ ॥
यो दक्षशापनिर्दग्धः क्षयी ताराधिपः शशी। आप्यायितः शङ्करेण विष्णुना सकपर्दिना ॥ ५३ ॥

वे कोकामुख तीर्थमें स्नान और धरणीधरकी पूजा करके अर्बुदेशमें त्रिसौवर्ण महादेवके पास गये। वहाँ उन्होंने नारीह्रदमें स्नान और शङ्करकी अर्चना करनेके बाद कालिञ्जरमें आकर नीलकण्ठका दर्शन किया। नीलतीर्थके जलमें स्नान करनेके बाद शिवका पूजन कर वे समुद्रके तटपर प्रभासतीर्थमें भगवान्‌का दर्शन करने गये। वहाँ उन्होंने सरस्वती नदी और सागरके सङ्गममें स्नानकर लोकपति कपर्दी सोमेश्वरका दर्शन किया। कपर्दी शंकर एवं विष्णुने दक्षके शापसे दग्ध हुए एवं क्षयरोगसे ग्रसित ताराधिप चन्द्रमाको पूर्ण किया था ॥ ४९-५३ ॥

तावर्च्य देवप्रवरौ प्रजगाम महालयम्। तत्र रुद्रं समभ्यर्च्य प्रजगामोत्तरान् कुरून् ॥ ५४ ॥
पद्मनाभं स तत्रार्च्य सप्तगोदावरं ययौ। तत्र स्नात्वाऽर्च्य विश्वेशं भीमं त्रैलोक्यवन्दितम् ॥ ५५ ॥
गत्वा दारुवने श्रीमान् लिङ्गं स ददर्श ह। तमर्च्य ब्राह्मणीं गत्वा स्नात्वाऽर्च्य त्रिदशेश्वरम् ॥ ५६ ॥
प्लक्षावतरणं गत्वा श्रीनिवासमपूजयत्। ततश्च कुण्डिनं गत्वा सम्पूज्य प्राणतृप्तिदम् ॥ ५७ ॥
शूर्पारके चतुर्बाहुं पूजयित्वा विधानतः। मागधारण्यमासाद्य ददर्श वसुधाधिपम् ॥ ५८ ॥
तमर्चयित्वा विश्वेशं स जगाम प्रजामुखम्। महातीर्थे ततः स्नात्वा वासुदेवं प्रणम्य च ॥ ५९ ॥
शोणं सम्प्राप्य सम्पूज्य रुक्मवर्माणमीश्वरम्। महाकोश्यां महादेवं हंसाख्यं भक्तिमानथ ॥ ६० ॥
पूजयित्वा जगामाथ सैन्धवारण्यमुत्तमम्।
तत्रेश्वरं सुनेत्राख्यं शङ्खशूलधरं गुरुम्। पूजयित्वा महाबाहुः प्रजगाम त्रिविष्टपम् ॥ ६१ ॥

उन दोनो श्रेष्ठ देवोंका पूजनकर वे महालय गये; वहाँ रुद्रका पूजन कर वे उत्तरकुरु गये। वहाँ पद्मनाभका अर्चन कर वे सप्तगोदावर-तीर्थमें गये। वहाँ स्नान करनेके बाद उन्होंने तीनों लोकोंसे वन्दित भीमविश्वेश्वरका पूजन किया। दारुवनमें जाकर श्रीमान् प्रह्लादने लिङ्गका दर्शन किया। उनकी पूजा करनेके पश्चात् ब्राह्मणी (नदी-) में जाकर उन्होंने स्नान और त्रिदशेश्वर महादेवकी अर्चना की। उसके बाद प्लक्षावतरणमें जाकर

उन्होंने श्रीनिवासकी अर्चना की। फिर कुण्डिनमें जाकर प्राणोंके तृप्तिदाता देवका अर्चन किया। उन्होंने शूर्पारकमें चतुर्भुज देवकी भलीभाँति पूजा करनेके बाद मागधारण्यमें जाकर वसुधाधिपका दर्शन किया। उन विश्वेशका पूजन कर वे प्रजामुखमें गये। उसके बाद उन्होंने महातीर्थमें स्नानकर वासुदेवको प्रणाम किया। उन्होंने शोणतटपर जाकर स्वर्णकवच धारण करनेवाले ईश्वरका पूजन किया। उसके बाद श्रद्धालु-(प्रह्लाद-) ने महाकोशीमें हंस नामक महादेवका अर्चन किया एवं श्रेष्ठ सैन्धवारण्यमें जाकर शङ्ख तथा शूल धारण करनेवाले सुनेत्र नामक पूज्य ईश्वरका पूजन किया। उसके बाद वे महाबाहु त्रिविष्टप चले गये ॥ ५४–६१ ॥

तत्र देवं महेशानं जटाधरमिति श्रुतम्। तं दृष्ट्वाऽर्च्य हरिं चासौ तीर्थं कनखलं ययौ ॥ ६२ ॥
तत्रार्च्य भद्रकालीशं वीरभद्रं च दानवः। धनाधिपं च मेघाङ्कं ययावथ गिरिव्रजम् ॥ ६३ ॥
तत्र देवं पशुपतिं लोकनाथं महेश्वरम्। सम्पूजयित्वा विधिवत्कामरूपं जगाम ह ॥ ६४ ॥
शशिप्रभं देववरं त्रिनेत्रं सम्पूजयित्वा सह वै मृडान्या।
जगाम तीर्थप्रवरं महाख्यं तस्मिन् महादेवमपूजयत् सः ॥ ६५ ॥

वहाँ जटाधर नामसे प्रसिद्ध महेशान देवका दर्शन और विष्णुकी पूजा कर वे कनखल तीर्थमें गये। दानव प्रह्लाद वहाँ भद्रकालीश और वीरभद्र तथा धनाधिप मेघाङ्ककी पूजा कर गिरिव्रज चले गये। वहाँ लोकनाथ महेश्वर पशुपति देवका विधिवत् अर्चन कर वे कामरूप चले गये। वहाँ चन्द्रकी कान्तिसे युक्त देवश्रेष्ठ त्रिनेत्र शंकरकी मृडानी-(पार्वती-)के साथ विधिवत् अर्चना कर प्रह्लाद श्रेष्ठ महालय तीर्थमें गये और वहाँपर (भी) उन्होंने महादेवकी अर्चना की ॥ ६२–६५ ॥

ततस्त्रिकूटं गिरिमत्रिपुत्रं जगाम द्रष्टुं स हि चक्रपाणिनम्।
तमीड्य भक्त्या तु गजेन्द्रमोक्षणं जजाप जप्यं परमं पवित्रम् ॥ ६६ ॥
तत्रोष्य दैत्येश्वरसूनुरादरान्मासत्रयं मूलफलाम्बुभक्षी।
निवेद्य विप्रप्रवरेषु काञ्चनं जगाम घोरं स हि दण्डकं वनम् ॥ ६७ ॥
तत्र दिव्यं महाशाखं वनस्पतिवपुर्धरम्। ददर्श पुण्डरीकाक्षं महाश्वापदवारणम् ॥ ६८ ॥
तस्याधस्तात् त्रिरात्रं स महाभागवतोऽसुरः। स्थितः स्थण्डिलशायी तु पठन् सारस्वतं स्तवम् ॥ ६९ ॥

उसके बाद वे अत्रिपुत्र चक्रपाणि विष्णुका दर्शन करनेके लिये त्रिकूट पर्वतपर चले गये और श्रद्धापूर्वक उनकी पूजा कर उन्होंने परम पवित्र जपनेयोग्य गजेन्द्र-मोक्षणस्तवका पाठ किया। मूल, फल एवं जलका भक्षण करते हुए दैत्येश्वर-पुत्र प्रह्लादने वहाँ तीन मासतक श्रद्धापूर्वक निवास किया। उसके बाद श्रेष्ठ ब्राह्मणोंको सुवर्ण दान कर वे घोर दण्डकवन चले गये। वहाँ उन्होंने महान् हिंस्र पशुओंके निवारक, महान् शाखाओंसे युक्त वनस्पतिका शरीर धारण करनेवाले पुण्डरीकाक्षका दर्शन किया। सारस्वतस्तोत्रका पाठ करते हुए महान् विष्णुभक्त असुर प्रह्लादने तीन रातोंतक उसके नीचे बिना बिस्तरके चबूतरेपर शयन किया ॥ ६६–६९ ॥

तस्मात् तीर्थवरं विद्वान् सर्वपापप्रमोचनम्। जगाम दानवो द्रष्टुं सर्वपापहरं हरिम् ॥ ७० ॥
तस्याग्रतो जजापासौ स्तवौ पापप्रणाशनौ। यौ पुरा भगवान् प्राह क्रोडरूपी जनार्दनः ॥ ७१ ॥
तस्मादथागाद् दैत्येन्द्रः शालग्रामं महाफलम्। यत्र संनिहितो विष्णुश्चरेषु स्थावरेषु च ॥ ७२ ॥
तत्र सर्वगतं विष्णुं मत्वा चक्रे रतिं बली। पूजयन् भगवत्पादौ महाभागवतो मुने ॥ ७३ ॥
इयं तवोक्ता मुनिसंघजुष्टा प्रह्लादतीर्थानुगतिः सुपुण्या।
यत्कीर्तनाच्छ्रवणात् स्पर्शनाच्च विमुक्तपापा मनुजा भवन्ति ॥ ७४ ॥

इति श्रीवामनपुराणे त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

विद्वान् दानव (प्रह्लादजी) वहाँसे सर्वपापहारी हरिका दर्शन करनेके लिये सर्वपापनाशक श्रेष्ठ तीर्थमें चले गये। उन्होंने उनके सामने प्राचीन कालमें काडम्बरी जनार्दनसे कथित पापनाश करनेवाले दो स्तोत्रोंका पाठ किया। उसके बाद वे वहाँसे दैत्येन्द्र (प्रह्लाद) महाफलदायक शाल्मतीर्थमें गये। वहाँ विष्णु समस्त चर और स्थावर पदार्थोंमें विराजमान हैं। [पुलस्त्यजी कहते हैं—] मुने! वहाँ महान् विष्णुभक्त बलवान् प्रह्लाद विष्णुको सर्वव्यापी जानकर भगवान्के चरणोंकी पूजा करते हुए उन (की भक्ति) में परायण हो गये। मैंने तुमसे मुनियोंके समूहोंसे सेवित अत्यन्त पवित्र प्रह्लादकी तीर्थयात्राका वर्णन कर दिया, जिसके कीर्तन, श्रवण एवं स्पर्शसे मनुष्य निष्पाप हो जाते हैं ॥ ७०-७४ ॥

इस प्रकार श्रीवामनपुराणमें तिरासीवाँ अध्याय समाप्त हुआ ॥ ८३ ॥

[शेष अध्याय अगले अङ्कमें*]

भगवान् वामनसे श्रेयःकामना

येनेन्द्रसन्त्रासविनाशहेतवे स्वमायया वामनविग्रहो धृतः ।
त्रिविक्रमत्वेन बलिर्बबन्ध यः स माधवः श्रीनिरतोऽहर्निशम् ॥

जिन्होंने देवराज इन्द्रके (दैत्योंसे पराजयरूप) कष्टकी निवृत्तिके लिये अपनी मायासे वामन-(बटु)का शरीर धारण कर लिया, विराट्वपु त्रिविक्रम बनकर तीन पगोंसे सम्पूर्ण त्रिलोकीको नापते हुए जिन्होंने दैत्यराज बलिको बाँध लिया (अर्थात् उसे अनुग्रहपूर्वक ऐश्वर्य-रहित कर दिया) ऐसे वे लक्ष्मीपति भगवान् (वामन) श्रीहरि अहर्निश (हम सबका) कल्याण करें। —श्रीविन्ध्येश्वरीप्रसादजी मिश्र, 'विनय'

नम्र निवेदन और क्षमा-याचना

भगवान् वामनका लघु पूजनरूप यह विशेषाङ्क 'कल्याण'के पाठकोंके करकमलोंमें सादर समर्पित है। इसकी अच्छाइयाँ भगवत्कृपाकी प्रसाद-स्वरूपा हैं और त्रुटियाँ हमारी अल्पज्ञता—असमर्थताकी स्वाभाविक अनिवार्यता। अतः हमारी त्रुटियाँ पाठकोंके समक्ष इस दृष्टिसे क्षम्य होंगी और इस पुराणके उपयोगी, उपादेय वस्तुविषय सर्वथा रुचिप्रद, पठनीय, मननीय एवं अनुपालनीय होकर कल्याणकारी होंगे—यही हमारी आशा और अभिलाषा है।

भगवान् व्यासदेवकी कल्याणकारिणी लेखनीने पुराणोंको प्रस्तुत कर विश्वका—विशेषतः साधारण जनवर्गका, जो तत्त्वविमर्शी क्लिष्ट शास्त्रोंकी दुरूहता और प्रगल्भताको सरलतासे आत्मसात् नहीं कर सकते, उनका—महान् कल्याण किया है। पुराण विद्या सर्वसुलभ, सबके लिये सुगम है और पुराण हमारी प्राचीन भारतीय सांस्कृतिक प्रकाश-स्तम्भ हैं, जिनसे हमारे जीवनके कल्याण-पथ प्रकाशित एवं निर्देशित हैं। पुराणोंमें हमारी सांस्कृतिक मूर्तरूप तीर्थ, व्रत, पुरावृत्त, देवी-देवताओं, सृष्टिक्रम (सर्ग-प्रतिसर्ग) राजवंशों, मन्वन्तरों आदिका सुनिपुण वर्णन तो मिलता ही है, नीति और धर्मके प्रशस्त विवेचन भी सोदाहरण प्रस्तुत हुए हैं ... के और उपबृंहण हैं, ज्ञान-विज्ञानकी सांस्कृतिक सम्पत्ति हैं। यदि हम पुराण-प्रदर्शित पथमें चलें, ...

* इस जनवरी (१९८८) के विशेषाङ्कमें स्थानाभावसे हम पूरा वामनपुराण न दे सके इसे पूरा कर रहे हैं।

उपदेशोंका अनुपालन करें तो हमारा मङ्गलमय लोक और कल्याणमय परलोक—उभय साथ-साथ सिद्ध होते चले जायँ। आज जगद्गुरु भारतके लिये यह अत्यन्त आवश्यक है।

वामनपुराण अष्टादशपुराणोंकी शृङ्खलामें चौदहवीं कड़ीके रूपमें परिगणित है। इसमें भगवान् त्रिविक्रम-(वामन-) का माहात्म्य प्रमुखतया वर्णित है। इस पुराणमें मुख्यतः वामन-बलिके चरित्रके अतिरिक्त शिव-पार्वती एवं नर-नारायणकी कथा, विष्णु-शिव-संवाद, देवीमाहात्म्य, पृथूदक तीर्थ, कुरुजाङ्गल क्षेत्रादि तथा अनेक अन्य तीर्थों और मूर्तियोंका सुविशद वर्णन है। कई महत्त्वके स्तोत्र (सरस्वतीस्तोत्र, पापप्रशमनस्तोत्र, गजेन्द्रमोक्षस्तोत्र प्रभृति) एवं प्रह्लाद, श्रीदामा आदिके चरित्र वर्णित हैं। व्रतोंके वर्णन और माहात्म्य भी सुन्दरतासे निरूपित हैं। कर्क-चतुर्थीकथा, कायञ्चलीव्रतकथा, गङ्गामानसिक स्नान, गङ्गामाहात्म्य, दधिवामनस्तोत्र, वाराहमाहात्म्य, वेङ्कट-गिरिमाहात्म्य आदि इसीके अन्तर्गत माने जाते हैं। थोड़ेमें यह कहा जा सकता है कि यह पुराण नितान्त उपयोगी अतएव सर्वथा उपादेय है। हिन्दी-अनुवादसहित यह पुराण ८३ वें अध्यायतक 'कल्याण'के छप्पनवें वर्षके प्रथम एवं विशेष अङ्कके रूपमें हम ग्राहकोंको भेंट कर रहे हैं। (शेष दूसरे (फरवरीके) अङ्कमें देकर उपलब्ध पुराणको पूर्ण किया जा रहा है।)

यह पुराण वैष्णवपुराण तो है ही, शिव-पार्वतीके विशद चरित्र-वर्णन होनेसे शैव भी है। विष्णु और शिवके ऐक्यका अनूठा प्रतिपादन इस पुराणकी अद्वितीय विशेषता है।

जिन श्रद्धेय सन्त-महात्माओं, पूज्य आचार्यों, मनीषी लेखकोंने शुभाशंसाएँ, शुभाशीर्वाद एवं रचनाएँ भेज-कर हमें अनुगृहीत किया है, उनका चिरऋण हमारे ऊपर है और उनके प्रतिदानमें हम उनसे प्रणिपातपूर्वक कृतज्ञता ज्ञापित करते हैं। वे सहज कृपालुता-वश हमें अनुगृहीत करते रहेंगे—ऐसी आशा है।

विशेषाङ्कके परिसीमित कलेवरमें स्थानाभावसे हम जिनके लेखादि न दे सके हैं, वे हमारी उस विवशताको देखते हुए क्षमा करेंगे जिससे हम बाध्य होकर प्रकृत जनवरीके अङ्कमें पूर्ण श्रीवामनपुराण ही न दे सके हैं और अगले अङ्कमें शेषांश देकर इसे पूरा करनेके लिये विवश हुए हैं।

वामनपुराणके अनुवाद करनेमें जिन प्रतियोंसे हमें यथास्थान सहायता मिली है उनके सहृदय प्रकाशकों एवं संस्थानोंके हम कृतज्ञ हैं और उनका हार्दिक आभार ज्ञापित करते हैं। पाठ-निर्द्धारणादि कार्योंमें हमें सर्वभारतीय काशिराजन्यासकी प्रतियोंसे और वेंकटेश्वर प्रेससे प्रकाशित सटीक एवं मूल प्रतियोंसे उल्लेख्य सहायताएँ मिली हैं। हम इन दोनों संस्थानोंके विशेष आभारी हैं।

सम्पादन-कार्यमें जिन विद्वानों और कर्मचारियोंने मनोयोगसे हमारी सहायता की है, उन्हें हम धन्यवाद देते हैं। प्रूफ पढ़नेवाले एवं अन्य कर्मचारियोंने भी अपने कर्तव्यके प्रति तत्परता तथा कर्तव्यशीलता दिखलायी है। वे प्रशंसाके पात्र हैं।

कल्याणका कार्य भगवान्का कार्य है और 'श्रीवामनपुराणाङ्क' तो साक्षात् भगवान्की वाङ्मयी मूर्ति ही है। इस मूर्तिकी अर्चा-पूजामें जिनका सहयोग है, वे सुतरां कल्याणके भागी हैं, उनकी कर्तव्य-निष्ठा मङ्गलमयी हो—यही हमारी उन प्रभुसे प्रार्थना है।

—मोतीलाल जालान
(सम्पादक)

● ॐ श्रीपरमात्मने नमः ●



भगवान् वामनका स्तवन

अदितिरुवाच

यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमङ्गलनामधेय ।
आपन्नलोकवृजिनोपशमोदयाद्य शं नः कृधीश भगवन्नसि दीननाथः ॥
विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ।
स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥
आयुः परं वपुरभीष्टमतुल्यलक्ष्मीर्द्योभूरसाः सकलयोगगुणास्त्रिवर्गः ।
ज्ञानं च केवलमनन्त भवन्ति तुष्टात् त्वत्तो नृणां किमु सपत्नजयादिराशीः ॥

(श्रीमद्भा० ८ । १७ । ८–१०)

अदितिने कहा—आप यज्ञके स्वामी हैं और स्वयं यज्ञ भी आप ही हैं । अच्युत ! आपके चरणकमलोंका आश्रय लेकर लोग भवसागरसे तर जाते हैं; आपके यश-कीर्तनका श्रवण भी संसारसे तारनेवाला है । आपके नामोंके श्रवणमात्रसे ही कल्याण हो जाता है । आदिपुरुष ! जो आपकी शरणमें आ जाता है, आप उसकी सारी विपत्तियोंका नाश कर देते हैं । भगवन् ! आप दीनोंके स्वामी हैं । आप हमारा कल्याण कीजिये । आप विश्वकी उत्पत्ति, स्थिति और प्रलयके कारण हैं और विश्वरूप भी आप ही हैं । अनन्त होनेपर भी स्वच्छन्दतासे आप अनेक शक्ति और गुणोंको स्वीकार कर लेते हैं । आप सदा अपने स्वरूपमें ही स्थित रहते हैं । नित्य-निरन्तर बढ़ते हुए पूर्ण बोधके द्वारा आप हृदयके अन्धकारको नष्ट करते रहते हैं । भगवन् ! मैं आपको नमस्कार करती हूँ । प्रभो ! अनन्त ! जब आप प्रसन्न हो जाते हैं, तब मनुष्योंको ब्रह्माजीकी दीर्घ आयु, उनके ही समान दिव्य शरीर, प्रत्येक अभीष्ट वस्तु, अतुलित धन, स्वर्ग, पृथ्वी, पाताल, योगकी समस्त सिद्धियाँ, अर्थ-धर्म-कामरूप त्रिवर्ग और अद्वितीय ज्ञानतक प्राप्त हो जाता है; फिर शत्रुओंपर विजय प्राप्त करना आदि जो छोटी-छोटी कामनाएँ हैं, उनके सम्बन्धमें तो कहना ही क्या है ।

Free of charge] संस्करण १,६०,००० [बिना मूल्य

आदि सम्पादक—नित्यलीलालीन भाईजी श्रीहनुमानप्रसादजी पोद्दार

सम्पादक, मुद्रक एवं प्रकाशक—मोतीलाल जालान, गीताप्रेस, गोरखपुर

[भारतसरकारद्वारा उपलब्ध कराये गये रियायती मूल्यके कागजपर मुद्रित]



शरणागत गजेन्द्रकी पाशोंसे मुक्ति

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥




ये मानवा विगतरागपरापरज्ञा नारायणं सुरगुरुं सततं स्मरन्ति ।
ते धौतपाण्डुरपुटा इव राजहंसाः संसारसागरजलस्य तरन्ति पारम् ॥
(श्रीवा० पु० ९१।७१)

वर्ष [illegible] } गोरखपुर, सौर फाल्गुन, श्रीकृष्ण-संवत् ५२०७, फरवरी १९८२ ई० { संख्या २
पूर्ण संख्या ६६३

गजेन्द्रपर श्रीहरिका अनुग्रह

सोऽन्तःसरस्युरुबलेन गृहीत आर्तो
दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम् ।
उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रा-
न्नारायणाखिलगुरो भगवन् नमस्ते ॥
(श्रीमद्भा० ८।३।३२)

सरोवरके भीतर बलवान् ग्राहने गजेन्द्रको पकड़ रखा था और वह व्याकुल हो रहा था । जब उसने देखा कि आकाशमें गरुडपर बैठकर हाथमें चक्र लिये भगवान् श्रीहरि आ गये हैं, तब अपनी एक सुन्दर पुष्प लेकर उसने ऊपरको उठाया और बड़े —'नारायण ! जगद्गुरो ! भगवन् ! आपको नमस्कार है ।'



शरणागत गजेन्द्रकी पाशोंसे मुक्ति

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥



ये मानवा विगतरागपरापरज्ञा नारायणं सुरगुरुं सततं स्मरन्ति।
ते धौतपाण्डुरपुटा इव राजहंसाः संसारसागरजलस्य तरन्ति पारम्॥
(श्रीवा० पु० ९१ । ७१)

५६ } गोरखपुर, सौर फाल्गुन, श्रीकृष्ण-संवत् ५२०७, फरवरी १९८२ ई० { संख्या २ पूर्ण संख्या ६६२

गजेन्द्रपर श्रीहरिका अनुग्रह

सोऽन्तःसरस्युरुबलेन गृहीत आर्तो
दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम्।
उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रा-
न्नारायणाखिलगुरो भगवन् नमस्ते॥
(श्रीमद्भा० ८ । ३ । ३२)

सरोवरके भीतर बलवान् ग्राहने गजेन्द्रको पकड़ रखा था और वह अत्यन्त व्याकुल हो रहा था। जब उसने देखा कि आकाशमें गरुड़पर सवार होकर हाथमें चक्र लिये भगवान् श्रीहरि आ गये हैं, तब अपनी सूँड़में कमलका एक सुन्दर पुष्प लेकर उसने ऊपरको उठाया और बड़े कष्टसे बोला—'नारायण! जगद्गुरो! भगवन्! आपको नमस्कार है।'



शरणागत गजेन्द्रकी पाशोंसे क्ति



ये मानवा विगतरागपरापरज्ञा नारायणं सुरगुरुं सततं स्मरन्ति।
ते धौतपाण्डुरपुटा इव राजहंसाः संसारसागरजलस्य तरन्ति पारम्॥
(भीवा॰ पु॰ ९३। ७१)

६ } गोरखपुर, सौर फाल्गुन, श्रीकृष्ण-सम्वत् ५२०७, फरवरी १९८२ ई० { संख्या २ / पूर्ण संख्या ६६३

गजेन्द्रपर श्रीहरिका अनुग्रह

सोऽन्तः सरस्युरुबलेन गृहीत आर्तो
दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम्।
उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रा-
न्नारायणाखिलगुरो भगवन् नमस्ते॥
(श्रीमद्भा॰ ८। ३। ३२)

सरोवरके भीतर बलवान् ग्राहने गजेन्द्रको पकड़ रखा था और वह अत्यन्त व्याकुल हो रहा था। जब उसने देखा कि आकाशमें गरुड़पर सवार होकर हाथमें चक्र लिये भगवान् श्रीहरि आ गये हैं, तब अपनी सूँड़में कमलका एक सुन्दर पुष्प लेकर उसने ऊपरको उठाया और बड़े कष्टसे बोला—'नारायण! जगद्गुरो! भगवन्! आपको नमस्कार है।'

[अथ चतुरशीतितमोऽध्यायः]

नारद उवाच

यान् जप्यान् भगवद्भक्त्या प्रह्लादो दानवोऽजपत्। गजेन्द्रमोक्षणादींस्तु चतुरस्तान् वदस्व मे ॥ १ ॥

चौरासीवाँ अध्याय प्रारम्भ

(प्रह्लादके तीर्थयात्रा-प्रसङ्गमें त्रिकूटगिरिस्थित सरोवरमें ग्राहद्वारा गजेन्द्रका पकड़ा जाना, गजेन्द्रद्वारा विष्णुकी स्तुति, गज-ग्राहका उद्धार एवं 'गजेन्द्रमोक्षणस्तोत्र'की फलश्रुति)

नारदजीने कहा—दनुवंशमें उत्पन्न हुए प्रह्लादने भगवान्‌की भक्तिसे भावित होकर जप (पाठ) करनेयोग्य गजेन्द्रमोक्षणादि जिन चार स्तोत्रोंका जप किया था उन चारों स्तोत्रोंको आप मुझे बतलावें ॥ १ ॥

पुलस्त्य उवाच

शृणुष्व कथयिष्यामि जप्यानेतांस्तपोधन। दुःस्वप्ननाशो भवति यैरुक्तैः संश्रुतैः स्मृतैः ॥ २ ॥
गजेन्द्रमोक्षणं त्वादौ शृणुष्व तदनन्तरम्। सारस्वतं ततः पुण्यौ पापप्रशमनौ स्तवौ ॥ ३ ॥
सर्वरत्नमयः श्रीमांस्त्रिकूटो नाम पर्वतः। सुतः पर्वतराजस्य सुमेरोर्भास्करद्युतेः ॥ ४ ॥
क्षीरोदजलवीच्यग्रैर्धौतामलशिलातलः। उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः ॥ ५ ॥

पुलस्त्यजी बोले—तपोधन ! मैं उन (जप करनेयोग्य) स्तोत्रोंका वर्णन करता हूँ जिनके कहने, सुनने और स्मरण करनेसे दुःस्वप्नोंका विनाश होता है उसे आप सुनें। पहले गजेन्द्रमोक्षण-स्तोत्र सुनिये। उसके बाद सारस्वतस्तोत्र एवं उसके बाद पापोंके प्रशमन करनेवाले (दो पवित्र) स्तोत्रोंका वर्णन करूँगा। सूर्यके सदृश कान्तिवाले पर्वतराज सुमेरुका पुत्र सर्वरत्नोंसे भरा श्रीसे सम्पन्न त्रिकूट नामका एक पर्वत है। क्षीरसागरके जलकी लहरोंसे धुले हुए निर्मल शिलातलवाला वह पर्वत समुद्रका भेदन कर उसके ऊपर निकल आया है एवं देवता और ऋषिगण वहाँ सदा निवास करते हैं ॥ २—५ ॥

अप्सरोभिः परिवृतः श्रीमान् प्रस्रवणाकुलः। गन्धर्वैः किन्नरैर्यक्षैः सिद्धचारणपन्नगैः ॥ ६ ॥
विद्याधरैः सपत्नीकैः संयतैश्च तपस्विभिः। वृकद्वीपिगजेन्द्रैश्च वृतगात्रो विराजते ॥ ७ ॥
पुंनागैः कर्णिकारैश्च बिल्वामलकपाटलैः। चूतनीपकदम्बैश्च चन्दनागुरुचम्पकैः ॥ ८ ॥
शालैस्तालैस्तमालैश्च सरलार्जुनपर्पटैः। तथान्यैर्विविधैर्वृक्षैः सर्वतः समलङ्कृतः ॥ ९ ॥

अप्सराओंसे घिरा, झरते हुए झरनोंवाला, गन्धर्वों, किन्नरों, यक्षों, सिद्धों, चारणों, पन्नगों, पत्नीके साथ विद्याधरों, संयमका पालन करनेवाले तपस्वियों और भेड़ियों, चीतों एवं गजेन्द्रोंसे भरा-पूरा वह शोभाशाली पर्वत अत्यन्त सुशोभित है। पुंनाग, कर्णिकार, बिल्व, आमलक, पाटल, आम्र, नीप, कदम्ब, चन्दन, अगुरु, चम्पक, शाल, ताल, तमाल, सरल, अर्जुन, पर्पट तथा दूसरे बहुत प्रकारके वृक्षोंसे वह पर्वत सब तरहसे सुशोभित है ॥ ६—९ ॥

नानाधात्वङ्कितैः शृङ्गैः प्रस्रवद्भिः समन्ततः। शोभितो रुचिरप्रख्यैस्त्रिभिर्विस्तीर्णसानुभिः ॥ १० ॥
मृगैः शाखामृगैः सिंहैर्मातङ्गैश्च सदामदैः। जीवंजीवकसंघुष्टैश्चकोरशिखिनादितैः ॥ ११ ॥
तस्यैकं काञ्चनं शृङ्गं सेवते यं दिवाकरः। नानापुष्पसमाकीर्णं नानागन्धाधिवासितम् ॥ १२ ॥
द्वितीयं राजतं शृङ्गं सेवते यं निशाकरः। पाण्डुराम्बुदसंकाशं तुषारचयसंनिभम् ॥ १३ ॥

वह पर्वत भाँति-भाँतिकी धातुओंसे चमकती चोटियों, चारों ओरसे बहनेवाले झरनों और अत्यन्त मनोहर तथा सुदूर देशमें फैले हुए तीन शिखरोंसे शोभित है। वह पर्वत हरिण, बन्दर, सिंह, मदसे मतवाले हाथी,

चातक, चकोर एवं मोर आदिके शब्दोंसे सदा शब्दायमान होता रहता है। कई प्रकारके फूलोंसे भरे-पूरे एवं तरह-तरहकी सुगन्धोंसे सुवासित उसके एक सुनहले शिखरका सेवन सूर्य करते हैं। सफेद बादलोंकी तरह एवं बर्फके ढेरके समान चाँदी-जैसी उसकी दूसरी चोटीका सेवन चन्द्रमा करते हैं॥ १०–१३॥

वज्रेन्द्रनीलवैडूर्यतेजोभिर्भासयन् दिशः। तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमुत्तमम्॥ १४॥
न तत् कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः। नातप्ततपसो लोके ये च पापकृतो जनाः॥ १५॥
तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम्। कारण्डवसमाकीर्णं राजहंसोपशोभितम्॥ १६॥
कुमुदोत्पलकह्लारैः पुण्डरीकैश्च मण्डितम्। कमलैः शतपत्रैश्च काञ्चनैः समलङ्कृतम्॥ १७॥
पत्रैर्मरकतप्रख्यैः पुष्पैः काञ्चनसंनिभैः। गुल्मैः कीचकवेणूनां समन्तात् परिवेष्टितम्॥ १८॥

हीरा, इन्द्रनील, वैडूर्य आदि रत्नोंकी चमकसे दिशाओंको प्रकाशित करनेवाला उसका अत्यन्त उत्तम तीसरा शिखर ब्रह्माका निवास-स्थान है। कृतघ्न, क्रूर, नास्तिक, तपस्यासे हीन एवं लोकमें पापकर्म करनेवाले मनुष्य उसे नहीं देख सकते। उस पर्वतके पीछेकी ओर कमलोंसे युक्त, कारण्डव पक्षियोंसे भरे, राजहंसोंसे सुशोभित, कुमुद, उत्पल, कह्लार, पुण्डरीक आदि अनेक प्रकारके सुनहले कमलोंसे अलङ्कृत एवं सुनहले शतपत्रोंवाले तथा अन्य प्रकारके कमलोंसे (और भी) सुशोभित एवं मरकतके सदृश पत्तों तथा सोनेके समान पुष्पों और हवासे चूँ-चूँ शब्द करनेवाले बाँसके झाड़ोंसे चारों ओरसे घिरा एक सरोवर है॥ १४–१८॥

तस्मिन् सरसि दुष्टात्मा विरूपोऽन्तर्जलेशयः। आसीद् ग्राहो गजेन्द्राणां रिपुराकेकरेक्षणः॥ १९॥
अथ दन्तोज्ज्वलमुखः कदाचिद् गजयूथपः। मदस्रावी जलाकाङ्क्षी पादचारीव पर्वतः॥ २०॥
वासयन् मदगन्धेन गिरिमैरावतोपमः। गजो ह्यञ्जनसंकाशो मदाच्चलितलोचनः॥ २१॥
तृषितः पातुकामोऽसौ अवतीर्णश्च तज्जलम्। सलीलः पङ्कजवने यूथमध्यगतश्चरन्॥ २२॥
गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्तिना। पश्यन्तीनां करेणूनां क्रोशन्तीनां च दारुणम्॥ २३॥
ह्रियते पङ्कजवने ग्राहेणातिबलीयसा। वारुणैः संयतः पाशैर्निष्प्रयत्नगतिः कृतः॥ २४॥

उस सरोवरके जलमें हाथियोंका शत्रु दुष्ट स्वभाववाला जलमें रहनेवाला टेढ़ी आँखोंवाला कुरूप एक मगर रहता था। एक समय उज्ज्वल दाँतोंवाला, मदस्रावी, पैरसे चलनेवाले पर्वतके समान, मदके गन्धसे वासित ऐरावतके सदृश अञ्जनकी भाँति काला, मदके कारण चञ्चल नेत्रोंवाला, प्यासा एक गजयूथपति पानी पीनेकी इच्छासे उस सरोवरके जलमें पैठा और कमलोंके समूहमें अपने झुंडके बीचमें रहकर क्रीडा करने लगा। (जलके भीतर) अपने शरीरको छिपाये हुए एक भयंकर ग्राहने उसे पकड़ लिया। करुण स्वरमें चिग्घाड़ कर रही हथिनियोंके देखते ही देखते अत्यन्त बलवान् ग्राह उसे कमलोंसे संयुक्त जलमें खींच ले गया और वरुणके पाशोंसे बाँधकर उसे चेष्टारहित एवं गतिहीन (विवश) कर दिया॥ १९–२४॥

वेष्ट्यमानः सुघोरैस्तु पाशैर्नागो दृढैस्तथा। विस्फूर्ज्य च यथाशक्ति विक्रोशंश्च महारवान्॥ २५॥
व्यथितः स निरुत्साहो गृहीतो घोरकर्मणा। परमापदमापन्नो मनसाऽचिन्तयद्धरिम्॥ २६॥
स तु नागवरः श्रीमान् नारायणपरायणः। तमेव शरणं देवं गतः सर्वात्मना तदा॥ २७॥
एकात्मा निगृहीतात्मा विशुद्धेनान्तरात्मना। जन्मजन्मान्तराभ्यासाद् भक्तिमान् गरुडध्वजे॥ २८॥
नान्यं देवं महादेवात् पूजयामास केशवात्। मथितामृतफेनाभं शङ्खचक्रगदाधरम्॥ २९॥
सहस्रशुभनामानमादिदेवमजं विभुम्।
प्रगृह्य पुष्कराग्रेण काञ्चनं कमलोत्तमम्। आपद्विमोक्षमन्विच्छन् गजः स्तोत्रमुदीरयत्॥ ३०॥

वहाँ सुदृढ़ और भयङ्कर पाशोंसे आबद्ध हो जानेके कारण गजराज यथाशक्ति छटपटाकर ऊँचे स्वरसे चिग्घाड़ने लगा। क्रूर कर्मवाले-(उस ग्राह-)के द्वारा पकड़े जानेपर वह पीड़ित और उत्साहरहित हो गया। भारी विपत्तिमें पड़कर वह मनसे भगवान् श्रीहरिका ध्यान करने लगा। वह सुन्दर गजराज (पूर्वजन्मका) नारायणका भक्त था। इसलिये वह उस समय सर्वतोभावेन उन्हीं देवकी शरणमें प्रपन्न हो गया। वह गजराज जन्म-जन्मान्तर-के अभ्याससे एकाग्र एवं संयतचित्त होकर विशुद्ध अन्तःकरणसे गरुडध्वज भगवान् विष्णुकी भक्तिमें लग गया था। उसने महान् देव केशव (श्रीविष्णु)के सिवा अन्य देवताओंकी पूजा नहीं की। उस गजने मथे हुए अमृतके फेनके समान कान्तिवाले, शङ्ख तथा चक्र और गदाको धारण करनेवाले, सहस्रों शुभ नामोंवाले, आदिदेव एवं अजन्मा सर्वव्यापक विष्णु-(नारायण-)का ध्यान किया और अपने शुण्डके अग्रभागमें एक उत्तम स्वर्ण-कमल लेकर (इस) आपत्तिसे मुक्ति प्राप्त करनेकी इच्छासे इस स्तोत्रका पाठ करने लगा ॥ २५—३० ॥

गजेन्द्र उवाच

ॐ नमो मूलप्रकृतये अजिताय महात्मने। अनाश्रिताय देवाय निःस्पृहाय नमोऽस्तु ते ॥ ३१ ॥
नम आद्याय बीजाय आर्षेयाय प्रवर्तिने। अनन्तराय चैकाय अव्यक्ताय नमो नमः ॥ ३२ ॥
नमो गुह्याय गूढाय गुणाय गुणवर्तिने। अप्रतर्क्याप्रमेयाय अतुलाय नमो नमः ॥ ३३ ॥
नमः शिवाय शान्ताय निश्चिन्ताय यशस्विने। सनातनाय पूर्वाय पुराणाय नमो नमः ॥ ३४ ॥

गजेन्द्र बोला—ॐ मूलप्रकृतिस्वरूप महान् आत्मा अजित विष्णुभगवान्‌को नमस्कार है। अन्योंपर आश्रित न रहनेवाले एवं (किसी वस्तुकी प्राप्तिकी) इच्छासे रहित आप देवको नमस्कार है। आद्यबीजस्वरूप, ऋषियोंके आराध्यदेव संसारचक्रके प्रवर्तक आपको नमस्कार है। अन्तररहित—सर्वत्र व्याप्त एकमात्र अव्यक्तको पुनः-पुनः नमस्कार है। गुह्य, गूढ़, गुणस्वरूप एवं गुणोंमें रहनेवालेको नमस्कार है। तर्कसे अतीत, निर्णयात्मिका बुद्धिसे भी नहीं समझे जानेयोग्य, अतुलनीय (आप)को बार-बार नमस्कार है। प्रथम मङ्गलमय, शान्त, निश्चिन्त, यशस्वी, सनातन और पुराणपुरुषको बार-बार नमस्कार है ॥ ३१—३४ ॥

नमो देवाधिदेवाय स्वभावाय नमो नमः। नमो जगत्प्रतिष्ठाय गोविन्दाय नमो नमः ॥ ३५ ॥
नमोऽस्तु पद्मनाभाय नमो योगोद्भवाय च। विश्वेश्वराय देवाय शिवाय हरये नमः ॥ ३६ ॥
नमोऽस्तु तस्मै देवाय निर्गुणाय गुणात्मने। नारायणाय विश्वाय देवानां परमात्मने ॥ ३७ ॥
नमो नमः कारणवामनाय नारायणायामितविक्रमाय।
श्रीशार्ङ्गचक्रासिगदाधराय नमोऽस्तु तस्मै पुरुषोत्तमाय ॥ ३८ ॥

आप देवाधिदेवको नमस्कार है। स्वभावस्वरूपी आपको बार-बार नमस्कार है। जगत्‌की प्रतिष्ठा करनेवाले-(आप-)को नमस्कार है। गोविन्दको बार-बार नमस्कार है। पद्मनाभको नमस्कार है और योगसे उत्पन्न होनेवाले (आप) योगोद्भवको नमस्कार है। विश्वेश्वर, देव, शिव, हरिको नमस्कार है। निर्गुण और गुणात्मा उन (प्रसिद्ध) देवको नमस्कार है। विश्वात्मा, नारायण एवं देवोंके परम आत्मा-(आप-)को नमस्कार है। कारणवश वामनरूप धारण करनेवाले, अतुल विक्रमवाले नारायणको नमस्कार है। श्री, शार्ङ्ग, चक्र, तलवार एवं गदा धारण करनेवाले उन पुरुषोत्तमको नमस्कार है ॥ ३५—३८ ॥

गुह्याय वेदनिलयाय महोदराय सिंहाय दैत्यनिधनाय चतुर्भुजाय।
ब्रह्मेन्द्ररुद्रमुनिचारणसंस्तुताय देवोत्तमाय वरदाय नमोऽच्युताय ॥ ३९ ॥
नागेन्द्रदेहशयनासनसुप्रियाय गोक्षीरहेमशुकनीलघनोपमाय।
पीताम्बराय मधुकैटभनाशनाय विश्वाय चारुमुकुटाय नमोऽजराय ॥ ४० ॥

नाभिप्रजातकमलस्थचतुर्मुखाय क्षीरोदकार्णवनिकेतयशोधराय ।
नानाविचित्रमुकुटाङ्गदभूषणाय सर्वेश्वराय वरदाय नमो वराय ॥ ४
भक्तिप्रियाय वरदीप्तसुदर्शनाय फुल्लारविन्दविपुलायतलोचनाय ।
देवेन्द्रविघ्नशमनोद्यतपौरुषाय योगेश्वराय विरजाय नमो वराय ॥ ४२

गुह्य, वेदनिलय, महोदर, दैत्यके निधनके लिये सिंहरूप धारण करनेवाले, चार भुजाओं
इन्द्र, रुद्र, मुनि तथा चारणोंके द्वारा स्तुत किये गये वरदानी देवोत्तम अच्युत भगवान्‌को नम
शेषनागके शरीरपर प्रसन्नतापूर्वक शयन करनेवाले, गोदुग्ध, स्वर्ण, शुक एवं नीलघनकी उपमासे युक्त,
धारण करनेवाले, मधु-कैटभका विनाश करनेवाले, सुन्दर मुकुट धारण करनेवाले, वृद्धावस्थासे रहित, विश्व
आप देवको नमस्कार है । नाभिसे उत्पन्न हुए कमलपर स्थित ब्रह्मासे युक्त, क्षीरसमुद्रको अपना निवास बन
यशस्वी, अनेक प्रकारके विचित्र मुकुट एवं अङ्गद आदि आभूषणोंसे युक्त, वरदानी तथा वरस्वरूप सर्वे
नमस्कार है । भक्तिके प्रेमी, श्रेष्ठ दीप्तिसे सर्वथा पूर्ण सुन्दर दिखायी देनेवाले, खिले हुए कमलके समान
आँखोंवाले, देवेन्द्रके विघ्नोंका विनाश करनेके लिये पुरुषार्थ करनेको उद्यत वरस्वरूप, विरज योगेश
नमस्कार है ॥ ३९–४२ ॥

ब्रह्मायनाय त्रिदशायनाय लोकाधिनाथाय भवापनाय ।
नारायणायात्महितायनाय महावराहाय नमस्करोमि ॥ ४३ ॥
कूटस्थमव्यक्तमचिन्त्यरूपं नारायणं कारणमादिदेवम् ।
युगान्तशेषं पुरुषं पुराणं तं देवदेवं शरणं प्रपद्ये ॥ ४४ ॥
योगेश्वरं चारुविचित्रमौलिमज्ञेयमग्र्यं प्रकृतेः परस्थम् ।
क्षेत्रज्ञमात्मप्रभवं वरेण्यं तं वासुदेवं शरणं प्रपद्ये ॥ ४५ ॥
अदृश्यमव्यक्तमचिन्त्यमव्ययं महर्षयो ब्रह्ममयं सनातनम् ।
वदन्ति यं वै पुरुषं सनातनं तं देवगुह्यं शरणं प्रपद्ये ॥ ४६ ॥

ब्रह्मा और अन्य देवोंके आश्रयस्वरूप, लोकाधिनाथ, भवहर्त्ता, नारायण आत्महितके आश्रयस्थान
महावराहको नमस्कार करता हूँ । मैं कूटस्थ, अव्यक्त, अचिन्त्य रूपवाले, कारणस्वरूप, आदिदेव नारायण, युगान्तमें
शेष रहनेवाले पुराणपुरुष, देवाधिदेवकी शरण ग्रहण करता हूँ । मैं योगेश्वर, सुन्दर विचित्र रंगोंसे युक्त मुकुटको
धारण करनेवाले, अज्ञेय, सर्वश्रेष्ठ, प्रकृतिके परे अवस्थित, क्षेत्रज्ञ, आत्मप्रभव, वरेण्य उन वासुदेवकी शरण ग्रहण
करता हूँ । महर्षिजन जिन्हें अदृश्य, अव्यक्त, अचिन्तनीय, अव्यय, ब्रह्ममय और सनातन पुरुष कहते हैं, उन
देवगुह्यकी मैं शरण ग्रहण करता हूँ ॥ ४३–४६ ॥

यदक्षरं ब्रह्म वदन्ति सर्वगं निशम्य यं मृत्युमुखात् प्रमुच्यते ।
तमीश्वरं तृप्तमनुत्तमैर्गुणैः परायणं विष्णुमुपैमि शाश्वतम् ॥ ४७ ॥
कार्यं क्रिया कारणमप्रमेयं हिरण्यबाहुं वरपद्मनाभम् ।
महाबलं वेदनिधिं सुरेशं व्रजामि विष्णुं शरणं जनार्दनम् ॥ ४८ ॥
किरीटकेयूरमहार्हनिष्कैर्मण्युत्तमालङ्कृतसर्वगात्रम् ।
पीताम्बरं काञ्चनभक्तिचित्रं मालाधरं केशवमभ्युपैमि ॥ ४९ ॥
भवोद्भवं वेदविदां वरिष्ठं योगात्मनां सांख्यविदां वरिष्ठ
आदित्यरुद्राश्विवसुप्रभावं प्रभुं

(ब्रह्मवेत्ता) जिसे अक्षर एवं सर्वव्यापी ब्रह्म कहते हैं तथा जिसके श्रवणसे मृत्युके मुखसे मुक्ति मिल जाती है, मैं उसी श्रेष्ठ गुणोंसे युक्त, आत्मतृप्त, शाश्वत आश्रयस्वरूप ईश्वरकी शरण ग्रहण करता हूँ। मैं कार्य, क्रिया और कारण-स्वरूप, प्रमाणसे अगम्य, हिरण्यबाहु, नाभिमें श्रेष्ठ कमल धारण करनेवाले, महाबलशाली, वेदोंकी निधि, सुरेश्वर जनार्दन विष्णुकी शरणमें जाता हूँ। मैं किरीट, केयूर एवं अतिमूल्यवान् श्रेष्ठ मणियोंसे सुसज्जित समस्त शरीरवाले, पीताम्बर धारण करनेवाले, स्वर्णिम पत्र-रचनासे अलङ्कृत, माला धारण करनेवाले केशवकी शरणमें जाता हूँ। मैं संसारको उत्पन्न करनेवाले, वेदके जाननेवालोंमें श्रेष्ठ, योगात्माओं तथा सांख्यशास्त्रके ज्ञाताओंमें श्रेष्ठ, आदित्य, रुद्र, अश्विनीकुमार एवं वसुओंके प्रभावसे युक्त अच्युत, आत्मस्वरूप प्रभुकी शरण ग्रहण करता हूँ ॥ ४७—५० ॥

श्रीवत्साङ्कं महादेवं देवगुह्यमनौपमम्। प्रपद्ये सूक्ष्ममचलं वरेण्यमभयप्रदम् ॥ ५१ ॥
प्रभवं सर्वभूतानां निर्गुणं परमेश्वरम्। प्रपद्ये मुक्तसङ्गानां यतीनां परमां गतिम् ॥ ५२ ॥
भगवन्तं गुणाध्यक्षमक्षरं पुष्करेक्षणम्। शरण्यं शरणं भक्त्या प्रपद्ये भक्तवत्सलम् ॥ ५३ ॥
त्रिविक्रमं त्रिलोकेशं सर्वेषां प्रपितामहम्। योगात्मानं महात्मानं प्रपद्येऽहं जनार्दनम् ॥ ५४ ॥
आदिदेवमजं शम्भुं व्यक्ताव्यक्तं सनातनम्। नारायणमणीयांसं प्रपद्ये ब्राह्मणप्रियम् ॥ ५५ ॥

मैं श्रीवत्स-चिह्न धारण करनेवाले, महान् देव, देवताओंमें गुह्य, उपमासे रहित, सूक्ष्म, अचल तथा अभय देनेवाले वरेण्य देवकी शरण ग्रहण करता हूँ। मैं समस्त प्राणियोंकी सृष्टि करनेवाले, निर्गुण, निःसङ्ग, यम और नियमका पालन करनेवाले संन्यासियोंकी परम गतिस्वरूप परमेश्वरकी शरण ग्रहण करता हूँ। मैं गुणाध्यक्ष, अक्षर, कमलनयन, आश्रय ग्रहण करनेयोग्य, शरण देनेवाले, भक्तोंसे प्रेम रखनेवाले भगवान्‌की श्रद्धापूर्वक शरण ग्रहण करता हूँ। मैं तीन पगोंमें तीनों लोकोंको नाप लेनेवाले, तीनों लोकोंके ईश्वर, सभीके प्रपितामह, योगकी मूर्ति, महात्मा जनार्दनकी शरण ग्रहण करता हूँ। मैं आदिदेव, अजन्मा, शम्भु, व्यक्त और अव्यक्तस्वरूप, सनातन, परम सूक्ष्म, ब्राह्मणप्रिय नारायणकी शरण ग्रहण करता हूँ ॥ ५१—५५ ॥

नमो वराय देवाय नमः सर्वसहाय च। प्रपद्ये देवदेवेशमणीयांसमणोः सदा ॥ ५६ ॥
एकाय लोकतत्त्वाय परतः परमात्मने। नमः सहस्रशिरसे अनन्ताय महात्मने ॥ ५७ ॥
त्वामेव परमं देवमृषयो वेदपारगाः। कीर्तयन्ति च यं सर्वे ब्रह्मादीनां परायणम् ॥ ५८ ॥
नमस्ते पुण्डरीकाक्ष भक्तानामभयप्रद। सुब्रह्मण्य नमस्तेऽस्तु त्राहि मां शरणागतम् ॥ ५९ ॥

श्रेष्ठ देवको नमस्कार है। सर्वशक्तिमान्‌को नमस्कार है। मैं सदा सूक्ष्म-से-सूक्ष्म देवदेवेशकी शरण हूँ। लोकतत्त्वस्वरूप, एकमात्र, परात्पर परमात्मा, सहस्रशीर्ष महात्मा अनन्तको नमस्कार है। वेदोंके पारगामी ऋषिगण आपको ही परम देव एवं ब्रह्मा आदि देवोंका आश्रयस्थान कहते हैं। हे पुण्डरीकाक्ष! हे भक्तोंको अभयदान देनेवाले! आपको नमस्कार है। सुब्रह्मण्य! आपको नमस्कार है। आप मुझ शरणागतकी रक्षा करें ॥५६—५९॥

पुलस्त्य उवाच

भक्तिं तस्यानुसंचिन्त्य नागस्यामोघसम्भवः। प्रीतिमानभवद् विष्णुः शङ्खचक्रगदाधरः ॥ ६० ॥
सांनिध्यं कल्पयामास तस्मिन् सरसि केशवः। गरुडस्थो जगत्स्वामी लोकाधारस्तपोधनः ॥ ६१ ॥
ग्राहग्रस्तं गजेन्द्रं तं तं च ग्राहं जलाशयात्। उज्जहाराप्रमेयात्मा तरसा मधुसूदनः ॥ ६२ ॥

स्थलस्थं दारयामास ग्राहं चक्रेण माधवः । मोक्षयामास नागेन्द्रं पाशेभ्यः शरणागतम् ॥ ६३ ॥
स हि देवलशापेन हूहूर्गन्धर्वसत्तमः । ग्राहत्वमगमत् कृष्णाद् वधं प्राप्य दिवं गतः ॥ ६४ ॥

पुलस्त्यजी बोले—शङ्ख, चक्र एवं गदाको धारण करनेवाले, सबके आश्रय विष्णु उस गजेन्द्रकी भक्तिका विचार कर प्रसन्न हो गये । उसके बाद संसारके आधार जगत्स्वामी त्रिलोचन कमल गरुड़पर सवार हो उस सरोवरके निकट गये । अप्रमेय आत्मस्वरूप मधुसूदनने ग्राहके द्वारा पकड़े गये उस गजेन्द्र तथा उस ग्राहको वेगपूर्वक सरोवरसे बाहर निकाला । माधवने पृथ्वीपर स्थित ग्राहको चक्रके द्वारा विदीर्ण कर शरणापन्न गजेन्द्रको बन्धनसे मुक्त कर दिया । देवलके शापसे ग्राह बना हुआ गन्धर्वश्रेष्ठ हूहू भगवान् श्रीकृष्णसे मृत्यु पाकर स्वर्ग चला गया ॥ ६०–६४ ॥

गजोऽपि विष्णुना स्पृष्टो जातो दिव्यवपुः पुमान् । आपद्विमुक्तौ युगपद् गजगन्धर्वसत्तमौ ॥ ६५ ॥
प्रीतिमान् पुण्डरीकाक्षः शरणागतवत्सलः । अभवत् स्वथ देवेशस्ताभ्यां चैव प्रपूजितः ॥ ६६ ॥
इदं च भगवान् योगी गजेन्द्रं शरणागतम् । प्रोवाच मुनिशार्दूल मधुरं मधुसूदनः ॥ ६७ ॥

भगवान् विष्णुका स्पर्श होनेसे वह हाथी भी दिव्य शरीर धारण करनेवाला पुरुष हो गया । इस प्रकार हाथी एवं गन्धर्वश्रेष्ठ दोनों एक ही साथ सङ्कटसे मुक्त हो गये । मुनिवर ! उसके बाद उन दोनोंसे पूजित होकर शरणागतवत्सल पुण्डरीकाक्ष देवेश प्रसन्न हुए और उन योगी भगवान् मधुसूदनने शरणागत गजेन्द्रसे यह मधुर वचन कहा—॥ ६५–६७ ॥

श्रीभगवानुवाच

ये मां त्वां च सरश्चैव ग्राहस्य च विदारणम् । गुल्मकीचकरेणूनां रूपं मेरोः सुतस्य च ॥ ६८ ॥
अश्वत्थं भास्करं गङ्गां नैमिषारण्यमेव च । संस्मरिष्यन्ति मनुजाः प्रयताः स्थिरबुद्धयः ॥ ६९ ॥
कीर्तयिष्यन्ति भक्त्या च श्रोष्यन्ति च शुचिव्रताः । दुःस्वप्नो नश्यते तेषां सुस्वप्नश्च भविष्यति ॥ ७० ॥
मात्स्यं कौर्मं च वाराहं वामनं तार्क्ष्यमेव च । नारसिंहं च नागेन्द्रं सृष्टिप्रलयकारकम् ॥ ७१ ॥
एतानि प्रातरुत्थाय संस्मरिष्यन्ति ये नराः । सर्वपापैः प्रमुच्यन्ते पुण्यं लोकमवाप्नुयुः ॥ ७२ ॥

श्रीभगवान्‌ने कहा—स्थिर बुद्धिसे पवित्र व्रत धारण करनेवाले जो मनुष्य प्रयत्नपूर्वक मेरा, तुम्हारा तथा इस सरोवरका एवं ग्राहके विदारण, गुल्म, कीचक, रेणु एवं मेरु पुत्रके रूप पीपल, सूर्य, गङ्गा और नैमिषारण्यका श्रद्धापूर्वक स्मरण एवं कीर्तन तथा श्रवण करेंगे उनके दुःस्वप्नका विनाश हो जायगा एवं सुस्वप्नकी सृष्टि होगी । जो मनुष्य प्रातःकाल उठकर मत्स्यावतार, कूर्मावतार, वराहावतार, वामनावतार, गरुड़, नरसिंहावतार, गजेन्द्र और सृष्टि-प्रलय करनेवाले (भगवान्) का स्मरण करेंगे, वे सम्पूर्ण पापोंसे मुक्त होकर पुण्यलोकको प्राप्त करेंगे ॥ ६८–७२ ॥

पुलस्त्य उवाच

एवमुक्त्वा हृषीकेशो गजेन्द्रं गरुडध्वजः । स्पर्शयामास हस्तेन गजं गन्धर्वमेव च ॥ ७३ ॥
ततो दिव्यवपुर्भूत्वा गजेन्द्रो मधुसूदनम् । जगाम शरणं विप्र नारायणपरायणः ॥ ७४ ॥
ततो नारायणः श्रीमान् मोक्षयित्वा गजोत्तमम् । पापबन्धाच्च शापाच्च ग्राहं चाद्भुतकर्मकृत् ॥ ७५ ॥
ऋषिभिः स्तूयमानश्च देवगुह्यपरायणैः । गतः स भगवान् विष्णुर्दुर्विज्ञेयगतिः प्रभुः ॥ ७६ ॥

पुलस्त्यजी बोले—(नारदजी !) गजेन्द्रसे ऐसा कहकर गरुड़ध्वज हृषीकेशने हाथसे गजेन्द्र और गन्धर्व दोनोंका स्पर्श किया । हे विप्र ! उसके बाद नारायणकी आराधना करनेमें लीन गजेन्द्र दिव्य शरीर धारणकर मधुसूदनकी शरणमें चला गया । उसके बाद अद्भुत कर्म करनेवाले श्रीमान् नारायणने गजोत्तम एवं ग्राहको पापबन्धसे एवं शापसे मुक्त किया । भगवद्भक्त ऋषियोंद्वारा स्तुत होते हुए वे अविज्ञेय गतिवाले प्रभु भगवान् विष्णु (अपने धाम) चले गये ॥ ७३–७६ ॥

गजेन्द्रमोक्षणं दृष्ट्वा देवाः शक्रपुरोगमाः । ववन्दिरे महात्मानं प्रभुं नारायणं हरिम् ॥ ७७ ॥
महर्षयश्चारणाश्च दृष्ट्वा गजविमोक्षणम् । विस्मयोत्फुल्लनयनाः संस्तुवन्ति जनार्दनम् ॥ ७८ ॥
प्रजापतिपतिर्ब्रह्मा चक्रपाणिविचेष्टितम् । गजेन्द्रमोक्षणं दृष्ट्वा इदं वचनमब्रवीत् ॥ ७९ ॥
य इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः । प्राप्नुयात् परमां सिद्धिं दुःस्वप्नस्तस्य नश्यति ॥ ८० ॥

गजेन्द्रके मोक्षको देखकर इन्द्र आदि देवोंने महात्मा प्रभु नारायण श्रीहरिकी वन्दना की । गजको ग्राहसे मुक्त हुए देखकर विस्मयसे खिले नेत्रोंवाले महर्षियों एवं चारणोंने जनार्दनकी स्तुति की । चक्रपाणिके गजेन्द्रमोक्षणरूपी कर्मको देखकर प्रजापति ब्रह्माने यह वचन कहा—जो मनुष्य प्रातःकाल उठकर प्रतिदिन इसे सुनेगा, वह परमसिद्धिको प्राप्त करेगा और उसका दुःस्वप्न विनष्ट हो जायगा ॥ ७७–८० ॥

गजेन्द्रमोक्षणं पुण्यं सर्वपापप्रणाशनम् ।
कथितेन स्मृतेनाथ श्रुतेन च तपोधन । गजेन्द्रमोक्षणेनेह : पापात् प्रमुच्यते ॥ ८१ ॥
एतत्पवित्रं परमं सुपुण्यं संकीर्तनीयं चरितं मुरारेः ।
यस्मिन् किलोक्ते बहुपापबन्धनात् लभ्येत मोक्षो द्विरदेन यद्वत् ॥ ८२ ॥
अजं वरेण्यं वरपद्मनाभं नारायणं ब्रह्मनिधिं सुरेशम् ।
तं देवगुह्यं पुरुषं पुराणं वन्दाम्यहं लोकपतिं वरेण्यम् ॥ ८३ ॥

तपोधन ! गजेन्द्रमोक्ष पवित्र और सब प्रकारके पापोंका नाश करनेवाला है । इस गजेन्द्रमोक्षके कहने, स्मरण करने और सुननेसे मनुष्य तुरंत सभी पापोंसे मुक्त हो जाता है । मुरारि विष्णुका यह पवित्र चरित्र पुण्य प्रदान करनेवाला तथा कीर्तन करने योग्य है । इसे कहनेसे मनुष्य गजेन्द्रके समान अनेक पापोंके बन्धनसे मुक्त हो जाता है । मैं अज, वरेण्य, श्रेष्ठ, पद्मनाभ, नारायण, ब्रह्मनिधि, सुरेश, देवगुह्य, पुराणपुरुष उन लोक-स्वामीकी वन्दना करता हूँ ॥ ८१–८३ ॥

पुलस्त्य उवाच

एतत् तवोक्तं प्रवरं स्तवं मुरारेर्वरनागकीर्तनम् ।
यं कीर्त्य संश्रुत्य तथा विचिन्त्य पापापनोदं पुरुषो लभेत ॥ ८४ ॥

इति श्रीवामनपुराणे चतुरशीतितमोऽध्यायः ॥ ८४ ॥

पुलस्त्यजी बोले—स्तुतियोंमें श्रेष्ठ गजेन्द्रद्वारा कीर्तित मुरारिके इस श्रेष्ठ स्तोत्रको मैंने तुमसे कहा । इसके कीर्तन, श्रवण तथा चिन्तन करनेसे मनुष्य पापोंसे विमुक्ति पा जाता है ॥ ८४ ॥

इस प्रकार श्रीवामनपुराणमें चौरासीवाँ अध्याय समाप्त हुआ ॥ ८४ ॥

[अथ पञ्चाशीतितमोऽध्यायः]

पुलस्त्य उवाच

कश्चिदासीद् द्विजद्रोग्धा पिशुनः क्षत्रियाधमः । परपीडारुचिः क्षुद्रः स्वभावादपि निर्घृणः ॥ १ ॥
पर्यासिताः सदा तेन पितृदेवद्विजातयः । स त्वायुषि परिक्षीणे जज्ञे घोरो निशाचरः ॥ २ ॥
तेनैव कर्मदोषेण स्वेन पापकृतां वरः । क्रूरैश्चक्रे ततो वृत्तिं राक्षसत्वाद् विशेषतः ॥ ३ ॥
तस्य पापरतस्यैवं जग्मुर्वर्षशतानि तु । तेनैव कर्मदोषेण नान्यां वृत्तिमरोचयत् ॥ ४ ॥
यं यं पश्यति सत्त्वं स तं तमादाय राक्षसः । चखाद रौद्रकर्मासौ बाहुगोचरमागतम् ॥ ५ ॥

पचासीवाँ अध्याय प्रारम्भ

(सारस्वतस्तोत्रके संदर्भमें विष्णुपञ्जरस्तोत्र, सारस्वतस्तव-कथन-प्रसङ्गमें राक्षस-वृत्तान्त, राक्षसग्रस्त मुनिकी अग्नि-प्रार्थना, सारस्वतस्तोत्र और मुनिद्वारा राक्षसको उपदेश)

पुलस्त्यजी बोले—(नारदजी!) ब्राह्मणसे वैर और घृणा रखनेवाला, चुगलखोर, दूसरोंको कष्ट देनेवाला, नीच, स्वभावसे भी निर्दय एक अधम क्षत्रिय था। उसने सदा ही पितरों, देवों एवं द्विजातियोंका अपमान किया। आयु समाप्त होनेपर वह भयंकर राक्षस हुआ। अपने उसी कर्मके दोष एवं विशेषकर राक्षस होनेके कारण वह नीच पापी अशुभ कर्मोंद्वारा जीवनका निर्वाह करता रहा। पापकर्म करते हुए उसके सौ वर्ष बीत गये। उसी कर्म-दोषके कारण जीविकाके दूसरे साधनोंमें उसकी इच्छा नहीं होती थी। वह निन्दनीय कर्म करनेवाला राक्षस जिस प्राणीको देखता उसे अपनी भुजाओंसे पकड़कर खा जाता था ॥ १—५ ॥

एवं तस्यातिदुष्टस्य कुर्वतः प्राणिनां वधम् । जगाम च महान् कालः परिणामं तथा वयः ॥ ६ ॥
स कदाचित् तपस्यन्तं ददर्श सरितस्तटे । महाभागमूर्ध्वभुजं यथावत्संयतेन्द्रियम् ॥ ७ ॥
अनया रक्षया ब्रह्मन् कृतरक्षं तपोनिधिम् । योगाचार्यं शुचिं दक्षं वासुदेवपरायणम् ॥ ८ ॥
विष्णुः प्राच्यां स्थितश्चक्री विष्णुर्दक्षिणतो गदी । प्रतीच्यां शार्ङ्गधृग्विष्णुर्विष्णुः खड्गी ममोत्तरे ॥ ९ ॥
हृषीकेशो विकोणेषु तच्छिद्रेषु जनार्दनः । क्रोडरूपी हरिर्भूमौ नारसिंहोऽम्बरे मम ॥ १० ॥
क्षुरान्तममलं चक्रं भ्रमत्येतत् सुदर्शनम् । अस्यांशुमाला दुष्प्रेक्ष्या हन्तुं प्रेतनिशाचरान् ॥ ११ ॥

इस प्रकार प्राणियोंका संहार करते हुए उस अतिदुष्टका अधिक समय बीत गया और उसकी अवस्था ढलने लगी। किसी समय उसने नदी-तीरपर बाँह ऊपर उठाये एवं, भलीभाँति इन्द्रियोंपर संयत किये हुए महाभाग्यशाली ऋषिको तपस्या करते हुए देखा। ब्रह्मन्! तपोनिधि पवित्र दक्ष और वासुदेवकी आराधना करनेमें तत्पर उस योगाचार्यने अपनी रक्षा इस रक्षामन्त्रके द्वारा कर ली थी कि पूर्वदिशामें चक्र धारण करनेवाले विष्णु, दक्षिण दिशामें गदा धारण करनेवाले विष्णु, पश्चिम दिशामें शार्ङ्गधनुष धारण करनेवाले और उत्तर दिशामें खड्ग धारण करनेवाले विष्णु मेरी रक्षा करें। दिशाओंके कोणों (अग्निकोण … वायव्यकोण, ईशानकोणों-)में हृषीकेश, उन दिशाओं और कोणोंके मध्य अवशिष्ट स्थानोंमें जनार्दन … रूप धारण करनेवाले हरि एव आकाशमें नृसिंहभगवान् मेरी रक्षा करें। प्रेतों एवं … छुरेकी धारके समान अत्यन्त तीक्ष्ण यह निर्मल सुदर्शन चक्र घूम रहा है। … प्रयत्न करनेपर भी सम्भव नहीं है ॥ ६—११ ॥

गदा चेयं सहस्रार्चिःप्रध्वमत् पावको यथा। रक्षोभूतपिशाचानां डाकिनीनां च शातनी ॥ १२ ॥
शार्ङ्गं विस्फूर्जितं चैव वासुदेवस्य मद्रिपून्। तिर्यङ्मनुष्यकूष्माण्डप्रेतादीन् हन्त्वशेषतः ॥ १३ ॥
खड्गधाराज्वलज्ज्योत्स्नानिर्धूता ये समाहिताः। ते यान्तु सौम्यतां सद्यो गरुडेनेव पन्नगाः ॥ १४ ॥
ये कूष्माण्डास्तथा यक्षा दैत्या ये च निशाचराः। प्रेता विनायकाः क्रूरा मनुष्या जृम्भकाः खगाः ॥ १५ ॥
सिंहादयो ये पशवो दन्दशूकाश्च पन्नगाः। सर्वे भवन्तु मे सौम्या विष्णुचक्ररवाहताः ॥ १६ ॥

ज्वाला उगलनेवाली अग्निकी भाँति हजारों किरणोंसे युक्त यह गदा राक्षसों, भूतों, पिशाचों और डाकिनियोंका संहार करे। वासुदेवका चमकनेवाला शार्ङ्गधनुष मेरे साथ शत्रुका काम करनेवाले हिंसक पशु-पक्षियों, मनुष्यों, दानवों तथा प्रेतोंका जड़-मूलसे विनाश करे। जैसे गरुड़को देखकर साँप शान्त हो जाते हैं, उसी प्रकार (विष्णुके) खड्गकी चमकती हुई तेज धारसे मेरा अहित करनेवाले निष्प्रभ होकर तत्काल शान्त हो जायँ। सारे कूष्माण्ड, यक्ष, दैत्य, निशाचर, प्रेत, विनायक, क्रूर मनुष्य, जृम्भक, पक्षी, सिंहादि पशु एवं तीव्र दाँतोंसे काटनेवाले सर्प आदि—ये सभी विष्णुके चक्रकी तीव्र गतिसे घायल होकर मेरे प्रति सरल बन जायँ ॥ १२—१६ ॥

चित्तवृत्तिहरा ये च ये जनाः स्मृतिहारकाः। बलौजसां च हर्तारश्छायाविध्वंसकाश्च ये ॥ १७ ॥
ये चोपभोगहर्तारो ये च लक्षणनाशकाः। कूष्माण्डास्ते प्रणश्यन्तु विष्णुचक्ररवाहताः ॥ १८ ॥
बुद्धिस्वास्थ्यं मनःस्वास्थ्यं स्वास्थ्यमैन्द्रियकं तथा। ममास्तु देवदेवस्य वासुदेवस्य कीर्तनात् ॥ १९ ॥
पृष्ठे पुरस्तादथ दक्षिणोत्तरे विकोणतश्चास्तु जनार्दनो हरिः।
तमीड्यमीशानमनन्तमच्युतं जनार्दनं प्रणिपतितो न सीदति ॥ २० ॥

जो चित्तकी वृत्तियों—मानसिक आचार-व्यवहारोंका हरण करनेवाले, स्मृतिको हरण करनेवाले, बल और ओजको अपहरण करनेवाले, कान्तिका विध्वंस करनेवाले, सुखोंका विनाश करनेवाले तथा सुलक्षणोंके विनाशक हैं, वे सभी कूष्माण्डादि (भूत-प्रेत) विष्णुके चक्रकी तीव्र गतिसे घायल होकर नष्ट हो जायँ। देवदेव वासुदेवके कीर्तनसे मुझे बुद्धि, मन तथा इन्द्रियोंकी सबलता प्राप्त हो। जनार्दन हरि मेरे पीछे, आगे, दायें, बायें एवं दिशाओंके कोणों-(अग्निकोण, नैर्ऋत्यकोण, वायव्यकोण, ईशानकोण-) में स्थित रहें। स्तुतियोग्य उन ईशान, अनन्त, अच्युत जनार्दनको साष्टाङ्ग प्रणिपात करनेवाला मनुष्य दुःखी नहीं होता ॥ १७—२० ॥

यथा परं ब्रह्म हरिस्तथा परं जगत्स्वरूपश्च स एव केशवः।
ऋतेन तेनाच्युतनामकीर्तनात्प्रणाशमेतु त्रिविधं ममाशुभम् ॥ २१ ॥
इत्यसावात्मरक्षार्थं कृत्वा वै विष्णुपञ्जरम्। संस्थितोऽसावपि बली राक्षसः समुपाद्रवत् ॥ २२ ॥
ततो द्विजनियुक्तायां रक्षायां रजनीचरः। निर्धूतवेगः सहसा तस्थौ मासचतुष्टयम् ॥ २३ ॥
यावद् द्विजस्य देवर्षे समाप्तिं समाधितः। जाते जप्यावसानेऽसौ तं ददर्श निशाचरम् ॥ २४ ॥
दीनं हतबलोत्साहं कान्दिशीकं हतौजसम्। तं दृष्ट्वा कृपयाविष्टः समाश्वास्य निशाचरम् ॥ २५ ॥
पप्रच्छागमने हेतुं स चाचष्ट यथातथम्। स्वभावमात्मनो दृष्टुं रक्षया तेजसः क्षितिम् ॥ २६ ॥
कथयित्वा च तद्रक्षः कारणं विविधं ततः। प्रसीदेत्यब्रवीद् विप्रं निर्विण्णः स्वेन कर्मणा ॥ २७ ॥

जैसे ब्रह्म श्रेष्ठ है उसी प्रकार हरि भी श्रेष्ठ हैं। वे केशव ही जगत्के (नित्य) स्वरूप हैं। अच्युत भगवान्के नाम-कीर्तनके उस सत्यद्वारा मेरे तीनों प्रकारके अमङ्गल नष्ट हो जायँ। इस प्रकार अपनी रक्षाके लिये विष्णुपञ्जरस्तोत्रका पाठकर वे खड़े थे। वह बलवान् राक्षस उनकी ओर दौड़ा। देवर्षे! उसके बाद द्विजद्वारा रक्षाकी व्यवस्था रहनेपर वह राक्षस गतिहीन होकर चार मासतक, जबतक कि ब्राह्मणकी समाप्ति समाप्त

नहीं हुई तबतक, रुका रहा। जप समाप्त होनेपर उन्होंने उस निशाचरको देखा। उन्होंने दीन, बलसे हीन, उत्साहसे रहित, भयसे आकुल तथा खिन्न हुए उस निशाचरको देखकर दयापूर्वक उसे निर्भयता प्रदान कर दी तथा उससे आनेका कारण पूछा। उसने अपने यथार्थ स्वभावका वैसे ही रूप पर अनेपर तेजका नाश होना बताया। उसके बाद दूसरे और भी बहुत-से कारणोंका वर्णन कर अपने कर्मसे दुःखी हुए उस राक्षसने मुनिसे कहा—आप प्रसन्न हो जायँ ॥ २१—२७ ॥

बहूनि पापानि मया कृतानि बहवो हताः।
कृताः स्त्रियो मया बह्वयो विधवाः पुत्रवर्जिताः। जन्तवश्च सत्त्वानामल्पकानां क्षयः कृतः ॥ २८ ॥
तस्मात् पापादहं मोक्षमिच्छामि त्वत्प्रसादतः। पापप्रशमनायालं कुरु मे धर्मदेशनम् ॥ २९ ॥
पापस्यास्य क्षयकरमुपदेशं प्रयच्छ मे। तस्य तद् वचनं श्रुत्वा राक्षसस्य द्विजोत्तमः ॥ ३० ॥
वचनं प्राह धर्मात्मा हेतुमच्च सुभाषितम्।
कथं क्रूरस्वभावस्य सततस्य निशाचर। सहसैव समायाता जिज्ञासा धर्मवर्त्मनि ॥ ३१ ॥

मैंने बहुत पाप किये हैं। मैंने बहुत-से मनुष्योंको मारा है। मैंने बहुत-सी स्त्रियोंको विधवा एवं पुत्रसे हीन कर दिया है तथा निर्दोष और निर्बल प्राणियोंका विनाश किया है। आपकी दयासे मैं उन पापोंसे मुक्त होना चाहता हूँ; अतः आप मुझे पापोंका नाश करनेवाले धर्माचरणका उपदेश दें। आप मुझे इस पापको नष्ट करनेवाला उपदेश प्रदान करें। उस राक्षसके उस वचनको सुनकर धर्मात्मा द्विजोत्तमने युक्तियुक्त मधुर वचन कहा—निशाचर! क्रूर स्वभावके होते हुए भी एकाएक धर्मके मार्गमें तुम्हारी जिज्ञासा कैसे उत्पन्न हुई?॥ २८—३१ ॥

राक्षस उवाच

त्वां वै समागतोऽस्म्यत्र क्षिप्तोऽहं रक्षया बलात्। तव संसर्गतो ब्रह्मन् जातो निर्वेद उत्तमः ॥ ३२ ॥
का सा रक्षा न तां वेद्मि वेद्मि नास्याः परायणम्। यस्याः संसर्गमासाद्य निर्वेदं प्रापितं परम् ॥ ३३ ॥
त्वं कृपां कुरु धर्मज्ञ मय्यनुक्रोशमावह। यथा पापापनोदो मे भवत्यार्य तथा कुरु ॥ ३४ ॥

राक्षसने कहा—मैं आज आपके निकट आते ही बलपूर्वक रक्षाद्वारा फेंक दिया गया। ब्रह्मन्! आपके सम्पर्कसे मुझे श्रेष्ठ वैराग्य प्राप्त हो गया। मैं यह नहीं समझ पाता हूँ कि जिसका सम्पर्क पाकर मुझे श्रेष्ठ वैराग्य उत्पन्न हुआ है वह रक्षा क्या है और उसका आधार कौन है? धर्मज्ञ! आर्य! आप कृपा करें। मेरे ऊपर दया करें। आप वह कार्य करें जिससे मेरे पापोंका विनाश हो जाय ॥ ३२—३४ ॥

पुलस्त्य उवाच

इत्येवमुक्तः स मुनिस्तदा वै तेन रक्षसा। प्रत्युवाच महाभागो विमृश्य सुचिरं मुनिः ॥ ३५ ॥

पुलस्त्यजी बोले—उस राक्षसके इस प्रकार कहनेपर उन महाभाग मुनिने बहुत देरतक विचार कर उत्तर दिया ॥ ३५ ॥

ऋषिरुवाच

यन्ममाहोपदेशार्थं निर्विण्णः स्वेन कर्मणा। युक्तमेतद्धि पापानां निवृत्तिरुपकारिका ॥ ३६ ॥
करिष्ये यातुधानानां न त्वहं धर्मदेशनम्। तान् सम्पृच्छ द्विजान् सौम्य ये वै प्रवचने रताः ॥ ३७ ॥
एवमुक्त्वा ययौ विप्रश्चिन्तामाप स राक्षसः। कथं पापापनोदः स्यादिति चिन्ताकुलेन्द्रियः ॥ ३८ ॥
न चखाद स सत्त्वानि क्षुधा सम्बाधितोऽपि सन्। षष्ठे षष्ठे तदा काले जन्तुमेकमभक्षयत् ॥ ३९ ॥
स कदाचित्क्षुधाविष्टः पर्यटन् विपुले वने। ददर्शाथ फलाहारमागतं ब्रह्मचारिणम् ॥ ४० ॥
गृहीतो रक्षसा तेन स तदा मुनिदारकः। निराशो जीविते प्राह सामपूर्वं निशाचरम् ॥ ४१ ॥

ऋषिने उत्तर दिया—अपने कर्मसे पीड़ित होकर तुमने मुझसे जो उपदेश देनेके लिये कहा है, सो ठीक ही है। पापोंकी निवृत्तिसे उपकार होता है। परंतु मैं राक्षसोंको धर्मका उपदेश नहीं दूँगा। अतः भले राक्षस! इस विषयको तुम उन ब्राह्मणोंसे पूछो जो विषयोंपर शास्त्रीय व्याख्यान करते हैं। इस प्रकार कहकर वह ब्राह्मण चला गया। वह राक्षस चिन्तासे आकुल हो गया। मेरे पाप किस प्रकार दूर होंगे—इस विषयकी चिन्तासे उसकी इन्द्रियाँ घबड़ा गयीं। (पर) भूखसे कष्ट पानेपर भी उसने प्राणियोंका भक्षण करना छोड़ दिया। (प्रतिदिन) प्रत्येक छठे समय एक जीवका आहार करने लगा। किसी समय भूखसे पीड़ित होकर विशाल वनमें घूमते हुए उसने फल लेनेके लिये आये हुए एक ब्रह्मचारीको देखा। राक्षसने मुनिपुत्रको पकड़ लिया। उसके बाद जीवनसे निराश होकर उस ब्रह्मचारीने शान्त भाव प्रकट करनेवाला वचन कहा ॥ ३६–४१ ॥

ब्राह्मण उवाच

भो भद्र ब्रूहि यत् कार्यं गृहीतो येन हेतुना। तदनुब्रूहि भद्रं ते अयमस्म्यनुशाधि माम् ॥ ४२ ॥

ब्राह्मणने कहा—भद्र! यह बतलाओ कि तुम्हारा क्या कार्य है, तुमने मुझे क्यों पकड़ा है? तुम्हारा कल्याण हो। यह मैं प्रस्तुत हूँ। मुझे आज्ञा दो ॥ ४२ ॥

राक्षस उवाच

षष्ठे काले त्वमाहारः क्षुधितस्य समागतः। निःश्रीकस्यातिपापस्य निर्घृणस्य द्विजद्रुहः ॥ ४३ ॥

राक्षसने कहा—ब्रह्मचारिन्! इस समय मैं ब्राह्मणोंसे द्वेष और घृणा करनेके कारण श्रीसे हीन, अत्यन्त पापी और निर्दय हो गया हूँ। मुझे भूख लगी हुई है। आज छठे समयमें तुम मेरे भोजनके रूपमें आये हो ॥ ४३ ॥

ब्राह्मण

यद्यवश्यं त्वया चाहं भक्षितव्यो निशाचर। आयास्यामि तवाद्यैव निवेद्य गुरवे फलम् ॥ ४४ ॥
गुर्वर्थमेतदागत्य यत्फलग्रहणं कृतम्। निष्ठा स्य फलानि विनिवेदितुम् ॥ ४५ ॥
स त्वं मुहूर्तमात्रं प्रतिपालय। निवेद्य गुरवे यावदिहागच्छाम्यहं फलम् ॥ ४६ ॥

ब्राह्मणने कहा—निशाचर! यदि अवश्य ही तुम मुझे खाना चाहते हो तो मैं ये फल गुरुको समर्पित करके अभी आ जाता हूँ। यहाँ आकर गुरुके लिये मैंने जो फल एकत्र किये हैं, उन्हें गुरुको समर्पित करनेके लिये मेरी अत्यन्त श्रद्धा है। अतः तुम यहाँ मुहूर्तमात्र मेरी प्रतीक्षा करो, जबतककि मैं इन फलोंको गुरुको देकर लौट आता हूँ ॥ ४४–४६ ॥

राक्षस उवाच

षष्ठे काले न मे ब्रह्मन् कश्चिद् ग्रहणमागतः। प्रतिमुच्येत देवोऽपि इति मे पापजीविका ॥ ४७ ॥
एक एवात्र मोक्षस्य तव हेतुः शृणुष्व तत्। मुञ्चाम्यहमसंदिग्धं यदि तत् कुरुते भवान् ॥ ४८ ॥

राक्षसने कहा—ब्रह्मन्! छठे समयमें मेरे पंजेमें आया हुआ कोई देवता भी छूट नहीं सकता। यही मेरी पापजीविका है। तुम्हारे छूटनेका एक ही उपाय है, उसे सुनो। यदि तुम उसे करो तो निःसंदेह मैं तुमको छोड़ दूँगा ॥ ४७-४८ ॥

ब्राह्मण उवाच

गुरोर्यन्न विरोधाय यन्न धर्मोपरोधकम्। तत् करिष्याम्यहं रक्षो यन्न व्रतहरं मम ॥ ४९ ॥

ब्राह्मणने कहा—राक्षस! यदि वह कार्य गुरुकी सेवाकार्यमें विरोध डालनेवाला, धर्मके विषयमें बाधा डालनेवाला एवं मेरे व्रतको नष्ट करनेवाला न होगा तो मैं उसे करूँगा केवल तुमसे अपने छुटकारेके लिये नहीं ॥ ४९ ॥

राक्षस उवाच

मया निसर्गतो ब्रह्मन् जातिदोषाद् विशेषतः । निर्विवेकेन चित्तेन पापकर्म सदा कृतम् ॥ ५० ॥
आबाल्यान्मम पापेषु न धर्मेषु रतं मनः । तत्पापसंक्षयान्मोक्षं प्राप्नुयां येन तद् वद ॥ ५१ ॥
यानि पापानि कर्माणि बालत्वाचरितानि च । दुष्टं योनिमिमां प्राप्य तन्मुक्तिं कथय द्विज ॥ ५२ ॥
यद्येतद् द्विजपुत्र त्वं सम्यग्याख्यस्यशेषतः । ततः क्षुधार्तान्मत्तस्त्वं नियतं मोक्षमाप्स्यसि ॥ ५३ ॥
न चेत् तत्पापशीलोऽहमत्यर्थं क्षुत्पिपासितः । षष्ठे काले नृशंसात्मा भक्षयिष्यामि निर्घृणः ॥ ५४ ॥

राक्षसने कहा—ब्रह्मन् ! मैंने स्वभावतः तथा विशेषतः जातिदोषके कारण और विचारशक्तिसे रहित मनके कारण सदा पापका कार्य किया है। बाल्यावस्थासे ही मेरा मन धर्ममें नहीं, अपितु पापमें आसक्त रहा है। इसलिये तुम वह उपाय बताओ जिससे पापका नाश होकर मेरी मुक्ति हो जाय। द्विज ! इस पापयोनिको पाकर अज्ञानवश मैंने जिन पापकर्मोंका आचरण किया है, उनसे छुटकारा पानेका उपाय बतलाओ। ब्राह्मणपुत्र ! यदि तुम मुझे यह भलीभाँति बतलाओ तो मुझ भूखसे पीड़ित हुएसे निःसंदेह छुटकारा पा जाओगे। यदि ऐसा नहीं हुआ तो अत्यन्त भूखा-प्यासा निर्दय हुआ मैं छठे समयमें (प्राप्त हुए) तुमको खा जाऊँगा ॥ ५०—५४ ॥

पुलस्त्य उवाच

एवमुक्तो मुनिसुतस्तेन घोरेण रक्षसा । चिन्तामवाप महतीमशक्तस्तदुदीरणे ॥ ५५ ॥
स विमृश्य चिरं विप्रः शरणं जातवेदसम् । जगाम ज्ञानदानाय संशयं परमं गतः ॥ ५६ ॥
यदि शुश्रूषितो वह्निर्गुरुशुश्रूषणादनु । व्रतानि वा सुचीर्णानि सप्तार्चिः पातु मां ततः ॥ ५७ ॥
न मातरं न पितरं गौरवेण यथा गुरुम् । सर्वदैवावगच्छामि तथा मां पातु पावकः ॥ ५८ ॥
यथा गुरुं न मनसा कर्मणा वचसाऽपि वा । अवजानाम्यहं तेन पातु सत्येन पावकः ॥ ५९ ॥
इत्येवं मनसा सत्यान् कुर्वतः शपथान् पुनः । सप्तार्चिषा समादिष्टा प्रादुरासीत् सरस्वती ॥ ६० ॥
सा प्रोवाच द्विजसुतं राक्षसग्रहणाकुलम् । मा भैर्द्विजसुताहं त्वां मोक्षयिष्यामि संकटात् ॥ ६१ ॥
यदस्य रक्षसः श्रेयो जिह्वाग्रे संस्थिता तव । तद् सर्वं कथयिष्यामि ततो मोक्षमवाप्स्यसि ॥ ६२ ॥
अदृश्या रक्षसा तेन प्रोक्त्वेत्थं सा सरस्वती । अदर्शनं गता सोऽपि द्विजः प्राह निशाचरम् ॥ ६३ ॥

पुलस्त्यजी बोले—उस भयंकर राक्षसके इस प्रकार कहनेपर मुनिपुत्र (राक्षसकी पापसे मुक्तिका उपाय) कहनेमें असमर्थ होनेसे बहुत चिन्तित हुआ। बहुत समयतक विचार करनेके पश्चात् अत्यन्त संशययुक्त ब्राह्मण ज्ञानदानके हेतु अग्निके पास गया। (उसने कहा—) अग्निदेव ! गुरुकी सेवा करनेके बाद यदि मैंने आपकी सेवा की हो तथा व्रतोंका अच्छी तरह पालन किया हो तो हे सप्तार्चि ! आप मेरी रक्षा करें। अग्निदेव ! यदि मैंने गौरवमें माता-पितासे गुरुको अधिक महत्त्व दिया हो तो आप मेरी रक्षा करें। यदि मन, कर्म एवं वाणीसे भी मैंने गुरुका अनादर न किया हो तो उस सत्यके कारण अग्निदेव आप मेरी रक्षा करें। इस प्रकार मनसे सत्य शपथोंके लेनेवाले उसके सामने अग्निदेवके आदेशसे सरस्वती प्रकट हुईं। उन्होंने राक्षसके द्वारा पकड़े जानेके कारण व्याकुल हुए ब्राह्मणके पुत्रसे कहा—ब्राह्मणपुत्र ! डरो मत। मैं तुम्हें संकटसे मुक्त करूँगी। तुम्हारी जीभके अग्रभागपर स्थित होकर मैं राक्षसके कल्याणकारी समस्त विषयोंका कथन करूँगी। उसके बाद तुम मुक्त हो जाओगे। उस राक्षससे अदृश्य रहती हुई सरस्वती ऐसा कहनेके बाद अन्तर्धान हो गयी। उस ब्राह्मणने निशाचरसे (सरस्वतीकी शक्तिसे) कहा—॥ ५५—६३ ॥

ब्राह्मण उवाच

श्रूयतां तव यच्छ्रेयस्तथाऽन्येषां च पापिनाम्। समस्तपापशुद्ध्यर्थं पुण्योपचयदं च यत् ॥ ६४ ॥
प्रातरुत्थाय जप्तव्यं मध्याह्नेऽह्नःक्षयेऽपि वा। असंशयं सदा जप्यो जपतां पुष्टिशान्तिदः ॥ ६५ ॥
ॐ हरिं कृष्णं हृषीकेशं वासुदेवं जनार्दनम्। प्रणतोऽस्मि जगन्नाथं स मे पापं व्यपोहतु ॥ ६६ ॥
चराचरगुरुं नाथं गोविन्दं शेषशायिनम्। प्रणतोऽस्मि परं देवं स मे पापं व्यपोहतु ॥ ६७ ॥
शङ्खिनं चक्रिणं शार्ङ्गधारिणं स्रग्धरं परम्। प्रणतोऽस्मि पतिं लक्ष्म्याः स मे पापं व्यपोहतु ॥ ६८ ॥
दामोदरमुदाराक्षं पुण्डरीकाक्षमच्युतम्। प्रणतोऽस्मि स्तुतं स्तुत्यैः स मे पापं व्यपोहतु ॥ ६९ ॥
नारायणं नरं शौरिं माधवं मधुसूदनम्। प्रणतोऽस्मि धराधारं स मे पापं व्यपोहतु ॥ ७० ॥

ब्राह्मणने कहा—(निशाचर!)सुनो! तुम्हारे और दूसरे अन्य पापियोंके लिये कल्याणकर सारे पापोंकी शुद्धि एवं पुण्य बढ़ानेवाले तत्त्वोंको मैं कहता हूँ। प्रातःकाल उठकर, मध्याह्नमें अथवा सायंकाल इस जपने योग्य स्तोत्रका सदा जप करना चाहिये। यह जप जप करनेवालेको निःसंदेह शान्ति एवं पुष्टि प्रदान करता है। ॐ, हरि, कृष्ण, हृषीकेश, वासुदेव, जनार्दन, जगन्नाथको मैं प्रणाम करता हूँ। वे मेरे पापको दूर करें। चर और अचरके गुरु, नाथ, शेषशय्यापर विराजमान, परमदेव गोविन्दको मैं प्रणाम करता हूँ। वे मेरे पापको दूर करें। शङ्ख धारण करनेवाले, चक्र धारण करनेवाले, शार्ङ्ग धारण करनेवाले एवं उत्तम मालाधारी, लक्ष्मीपतिको मैं प्रणाम करता हूँ। वे मेरे पापको दूर करें। दामोदर, उदाराक्ष, पुण्डरीकाक्ष, स्तवनीय स्तोत्रोंसे स्तुत अच्युतको मैं नमस्कार करता हूँ। वे मेरे पापोंको दूर करें। नारायण, नर, शौरि, माधव, मधुसूदन एवं धराको धारण करनेवाले भगवान्‌को मैं प्रणाम करता हूँ। वे मेरे पापको दूर करें ॥ ६४—७० ॥

केशवं चन्द्रसूर्याक्षं कंसकेशिनिषूदनम्। प्रणतोऽस्मि महाबाहुं स मे पापं व्यपोहतु ॥ ७१ ॥
श्रीवत्सवक्षसं श्रीशं श्रीधरं श्रीनिकेतनम्। प्रणतोऽस्मि श्रियः कान्तं स मे पापं व्यपोहतु ॥ ७२ ॥
यमीशं सर्वभूतानां ध्यायन्ति यतयोऽक्षरम्। वासुदेवमनिर्देश्यं तमस्मि शरणं गतः ॥ ७३ ॥
समस्तालम्बनेभ्यो यं व्यावृत्य मनसो गतिम्। ध्यायन्ति वासुदेवाख्यं तमस्मि शरणं गतः ॥ ७४ ॥
सर्वगं सर्वभूतं च सर्वस्याधारमीश्वरम्। वासुदेवं परं ब्रह्म तमस्मि शरणं गतः ॥ ७५ ॥
परमात्मानमव्यक्तं यं प्रयान्ति सुमेधसः। कर्मक्षयेऽक्षयं देवं तमस्मि शरणं गतः ॥ ७६ ॥
पुण्यपापविनिर्मुक्ता यं प्रविश्य पुनर्भवम्। न योगिनः प्राप्नुवन्ति तमस्मि शरणं गतः ॥ ७७ ॥
ब्रह्मा भूत्वा जगत् सर्वं सदेवासुरमानुषम्। यः सृजत्यच्युतो देवस्तमस्मि शरणं गतः ॥ ७८ ॥

चन्द्र एवं सूर्यरूपी नेत्रोंवाले, कंस और केशीको मारनेवाले महाबाहु केशवको मैं प्रणाम करता हूँ। वे मेरे पापोंको दूर करें। वक्षःस्थलपर श्रीवत्स धारण करनेवाले, श्रीश, श्रीधर, श्रीनिकेतन एवं श्रीकान्तको मैं प्रणाम करता हूँ। वे मेरे पापोंको दूर करें। संयम करनेवाले लोग जिन सब प्राणियोंके स्वामी, अक्षर एवं अनिर्देश्य वासुदेवका ध्यान करते हैं मैं उनकी शरण ग्रहण करता हूँ। (संन्यासी लोग) अन्य समस्त सहारोंसे मनकी गतिको लौटाकर जिस वासुदेव नामक ईश्वरका ध्यान करते हैं, मैं उनकी शरणमें जाता हूँ। मैं सर्वगत, सर्वभूत, सर्वाधार ईश्वर एवं वासुदेव नामक परब्रह्मकी शरण जाता हूँ। श्रेष्ठ बुद्धिसम्पन्न लोग कर्मका नाश होनेपर जिन अदृश्य, अविनाशी, परमात्मदेवको प्राप्त करते हैं, मैं उनकी शरणमें जाता हूँ। पुण्य तथा पापसे रहित योगीलोग जिन्हें पाकर फिर जन्म ग्रहण नहीं करते, मैं उनकी शरणमें जाता हूँ। ब्रह्माका रूप धारण कर देवता, दैत्य एवं मनुष्योंसे युक्त सारे जगत्‌की सृष्टि करनेवाले अच्युत देवकी मैं शरणमें जाता हूँ ॥ ७१—७८ ॥

ब्रह्मत्वे यस्य वक्त्रेभ्यश्चतुर्वेदमयं वपुः। प्रभोः पुरातनो जज्ञे नतोऽस्मि शरणं गतः॥ ७९॥
ब्रह्मरूपधरं देवं जगद्योनिं जनार्दनम्। स्रष्टृत्वे संस्थितं सृष्टौ प्रणतोऽस्मि सनातनम्॥ ८०॥
स्रष्टा भूत्वा स्थितो योगी स्थित्यामसुरसूदनः। तमादिपुरुषं विष्णुं प्रणतोऽस्मि जनार्दनम्॥ ८१॥
धृता मही हता दैत्याः परित्रातास्तथा सुराः। येन तं विष्णुमाद्येशं प्रणतोऽस्मि जनार्दनम्॥ ८२॥
यज्ञैर्यजन्ति यं विप्रा यज्ञेशं यज्ञभावनम्। तं यज्ञपुरुषं विष्णुं प्रणतोऽस्मि सनातनम्॥ ८३॥
पातालवीथीभूतानि तथा लोकान् निहन्ति यः। तमन्तपुरुषं रुद्रं प्रणतोऽस्मि सनातनम्॥ ८४॥
सम्भक्षयित्वा सकलं यथासृष्टमिदं जगत्। यो वै नृत्यति रुद्रात्मा प्रणतोऽस्मि जनार्दनम्॥ ८५॥
सुरासुराः पितृगणाः यक्षगन्धर्वराक्षसाः। सम्भूता यस्य देवस्य सर्वगं तं नमाम्यहम्॥ ८६॥

ब्रह्माका रूप धारण करनेपर जिनके मुखोंसे चारों वेदोंसे युक्त शरीर धारण करनेवाले पुरातन प्रभुका आविर्भाव हुआ था, मैं उनकी शरणमें जाता हूँ। मैं सृष्टिके लिये ब्रह्माका रूप धारण करनेवाले सनातन जगद्योनि जनार्दनको प्रणाम करता हूँ। सृष्टिकर्ता होकर योगीरूपमें विद्यमान एवं स्थितिकालमें असुरोंका नाश करनेवाले आदिपुरुष जनार्दनको मैं प्रणाम करता हूँ। मैं उन आदि पुरुष ईश्वर जनार्दन विष्णुको प्रणाम करता हूँ, जिन्होंने पृथ्वीको धारण किया है, दैत्योंको मारा है एवं देवताओंकी रक्षा की है। ब्राह्मणलोग यज्ञोंके द्वारा जिनकी अर्चना करते हैं, मैं उन यज्ञपुरुष, यज्ञभावन, यज्ञेश, सनातन विष्णुको प्रणाम करता हूँ। मैं पाताललोकमें रहनेवाले प्राणियों तथा लोकोंका विनाश करनेवाले उन अन्तपुरुष सनातन रुद्रको प्रणाम करता हूँ। सृष्ट किये गये इस समस्त जगत्का भक्षणकर नृत्य करनेवाले रुद्ररूप जनार्दनको मैं प्रणाम करता हूँ। मैं सर्वत्र गमन करनेवाले देवको प्रणाम करता हूँ, जिनसे समस्त सुर, असुर, पितृगण, यक्ष, गन्धर्व एवं राक्षस उत्पन्न हुए हैं॥ ७९—८६॥

समस्तदेवाः सकला मनुष्याणां च जातयः। यस्यांशभूता देवस्य सर्वगं तं नतोऽस्म्यहम्॥ ८७॥
वृक्षगुल्मादयो यस्य तथा पशुमृगादयः। एकांशभूता देवस्य सर्वगं तं नमाम्यहम्॥ ८८॥
यस्मान्नान्यत् परं किञ्चिद् यस्मिन् सर्वं महात्मनि। यः सर्वमध्यगोऽनन्तः सर्वगं तं नमाम्यहम्॥ ८९॥
यथा सर्वेषु भूतेषु गूढोऽग्निरिव दारुषु। विष्णुरेवं तथा पापं ममाशेषं प्रणश्यतु॥ ९०॥
यथा विष्णुमयं सर्वं ब्रह्मादि सचराचरम्। यच्च ज्ञानपरिच्छेद्यं पापं नश्यतु मे तथा॥ ९१॥
शुभाशुभानि कर्माणि रजःसत्त्वतमांसि च। अनेकजन्मकर्मोत्थं पापं नश्यतु मे तथा॥ ९२॥
यन्निशायां च यत्प्रातर्यन्मध्याह्नापराह्णयोः। सन्ध्ययोश्च कृतं पापं कर्मणा मनसा गिरा॥ ९३॥
यत् तिष्ठता यद् व्रजता यच्च शय्यागतेन मे। कृतं यदशुभं कर्म कायेन मनसा गिरा॥ ९४॥
अज्ञानतो ज्ञानतो वा मदाच्चलितमानसैः। तत् क्षिप्रं विलयं यातु वासुदेवस्य [illegible]

मैं उन सर्वव्यापी देवको प्रणाम करता हूँ जिनके [illegible] सम्पूर्ण देव एवं [illegible]
उत्पन्न हुई हैं। वृक्ष, गुल्म आदि तथा पशु [illegible] अनेकांश एक अंशमात्र हैं [illegible]
प्रणाम करता हूँ। मैं उन सर्वव्यापी देवको प्रणाम करता हूँ जिनसे पृथक् कोई [illegible]
सम्पूर्ण पदार्थ स्थित हैं तथा जो सभीके [illegible] रहनेवाले और [illegible]
समस्त प्राणियोंमें व्याप्त विष्णु मेरे सम्पूर्ण [illegible] नष्ट करें; क्योंकि [illegible]
जगत् व्याप्त है तथा जो इनके द्वारा [illegible] है। [illegible]
मेरे शुभ तथा अशुभ कर्म, [illegible]

कर्म, मन एवं वाणीके द्वारा रात्रिमें तथा प्रातःकाल, मध्याह्नकाल, अपराह्नकाल और सन्ध्याकालमें चलते, बैठते और शयन करते हुए ज्ञान या अज्ञानपूर्वक अथवा निरहंकार मनसे मैंने जो अशुभ (पाप) कर्म किये हों वे वासुदेवके नाम-कीर्तनसे शीघ्र नष्ट हो जायँ ॥ ८७–९५ ॥

परदारपरद्रव्यवाञ्छाद्रोहोद्भवं च यत्। परपीडोद्भवां निन्दां कुर्वता यन्महात्मनाम् ॥ ९६ ॥
यच्च भोज्ये तथा पेये भक्ष्ये चोष्ये विलेहने। तद् यातु विलयं तोये यथा लवणभाजनम् ॥ ९७ ॥
यद् बाल्ये यच्च कौमारे यत् पापं यौवने मम। वयःपरिणतो यच्च यच्च जन्मान्तरे कृतम् ॥ ९८ ॥
तन्नारायण गोविन्द हरिकृष्णेश कीर्तनात्। प्रयातु विलयं तोये यथा लवणभाजनम् ॥ ९९ ॥
विष्णवे वासुदेवाय हरये केशवाय च। जनार्दनाय कृष्णाय नमो भूयो नमो नमः ॥१००॥
भविष्यन्नरकघ्नाय नमः कंसविघातिने। अरिष्टकेशिचाणूरदेवारिक्षयिणे नमः ॥१०१॥
कोऽन्यो बलेर्वञ्चयिता त्वामृते वै भविष्यति। कोऽन्यो नाशयति बलाद् दर्पं हैहयभूपतेः ॥१०२॥
कः करिष्यत्यथाऽन्यो वै सागरे सेतुबन्धनम्। वधिष्यति दशग्रीवं कः सामात्यपुरःसरम् ॥१०३॥

परस्त्री और परधनकी कामना, द्रोह, परपीड़ा, महात्माओंकी निन्दा तथा (निषिद्ध) भोज्य, पेय, भक्ष्य, चोष्य एवं चाटनेवाले वस्तुके कारण उत्पन्न सम्पूर्ण पाप इस प्रकार नष्ट हो जायँ जैसे लवण रखनेवाला मिट्टीका पात्र पानीमें (पड़ते ही) नष्ट हो जाता है। नारायण, गोविन्द, हरि, कृष्ण, ईशका कीर्तन करनेसे बाल्यकाल, कुमारावस्था, यौवन, वार्द्धक्य एवं जन्मान्तरमें किये गये मेरे सम्पूर्ण पाप इस प्रकार नष्ट हो जायँ जैसे जलमें नमक रखनेसे मिट्टीका बर्तन विलीन हो जाता (गल जाता) है। हरि, विष्णु, वासुदेव, केशव, जनार्दन, कृष्णको पुनः-पुनः प्रणाम है। भावी नरकका नाश करनेवाले तथा कंसको मारनेवालेको नमस्कार है। अरिष्ट, केशी एवं चाणूर आदि राक्षसोंके नष्ट करनेवालेको नमस्कार है। आपके सिवाय बलिको कौन छल सकता था एवं आपके बिना हैहयनरेशके घमंडको कौन नष्ट कर सकता था? आपके सिवाय समुद्रमें सेतुको कौन बाँध सकता था तथा मन्त्री आदिके साथ ही दशग्रीव रावणको कौन मार सकता था ॥ ९६–१०३ ॥

कस्त्वामृतेऽन्यो नन्दस्य गोकुले रतिमेष्यति।
प्रलम्बपूतनादीनां त्वामृते मधुसूदन। निहन्ताऽप्यथवा देवदेव भविष्यति ॥१०४॥
जपन्नेवं नरः पुण्यं वैष्णवं धर्ममुत्तमम्। इष्टानिष्टप्रसंगेभ्यो ज्ञानतोऽज्ञानतोऽपि वा ॥१०५॥
कृतं तेन तु यत् पापं सप्तजन्मान्तराणि वै। महापातकसंज्ञं वा तथा चैवोपपातकम् ॥१०६॥
यज्ञादीनि च पुण्यानि जपहोमव्रतानि च। नाशयेद् योगिनां सर्वमामपात्रमिवाम्भसि ॥१०७॥
नरः संवत्सरं पूर्णं तिलपात्राणि षोडश। अहन्यहनि यो दद्यात् पठत्येतच्च तत्समम् ॥१०८॥
अविलुप्तब्रह्मचर्यं सम्प्राप्य स्मरणं हरेः। विष्णुलोकमवाप्नोति सत्यमेतन्मयोदितम् ॥१०९॥
यथैतत् सत्यमुक्तं मे न ह्यल्पमपि मे मृषा। राक्षसग्रस्तसर्वाङ्गं तथा मामेष मुञ्चतु ॥११०॥

मधुसूदन! आपके सिवाय कौन ऐसा है जो नन्दके गोकुलमें प्रेममयी क्रीडा कर सके? देवदेव! आपके सिवा प्रलम्ब और पूतना आदिका वध एवं शासन कौन कर सकता था? इस धर्ममय उत्तम वैष्णव-मन्त्रका जप करनेवाला मनुष्य इष्ट और अनिष्टके प्रसङ्गवश तथा ज्ञान या अज्ञानपूर्वक सात जन्मोंमें किये अपने महापातकों, उपपातकों, यज्ञ, होम एवं व्रत आदिके पुण्य कर्मोंके भी योगको इस प्रकार नष्ट कर देता है जैसे जलमें मिट्टीका घड़ा नष्ट हो जाता है। मैं यह सत्य कहता हूँ कि अखण्डित ब्रह्मचर्य एवं हरिस्मरणपूर्वक एक वर्षतक इस

स्तोत्रके पाठके साथ प्रतिदिन तिलसे भरे सोलह पात्रोंका दान करनेवाला मनुष्य विष्णुलोकको प्राप्त करता है। यदि मैंने यह सत्य कहा हो एवं इसमें अल्पमात्र भी असत्य न हो तो यह राक्षस मत्र अङ्गोंसे पीडित हो मुझे मुक्त छोड दे ॥ १०४-११० ॥

पुलस्त्य उवाच

एवमुच्चारिते तेन मुक्तो विप्रस्तु रक्षसा। अकामेन द्विजो भूयस्तमाह रजनीचरम् ॥१११॥

पुलस्त्यजी बोले—उसके ऐसा कहते ही राक्षसने ब्राह्मणको छोड़ दिया। पुनः द्विजने निष्कामभावसे राक्षससे कहा—॥ १११ ॥

ब्राह्मण उवाच

एतद् भद्र मया ख्यातं तव पातकनाशनम्। विष्णोः सारस्वतं स्तोत्रं यज्जगाद सरस्वती ॥११२॥
हुताशनेन प्रहिता मम जिह्वाग्रसंस्थिता। जगादेमं स्तवं विष्णोः सर्वेषां चोपशान्तिदम् ॥११३॥
अनेनैव जगन्नाथं त्वमाराधय केशवम्। ततः शापापनोदं तु स्तुते लप्स्यसि केशवे ॥११४॥
अहर्निशं हृषीकेशं स्तवेनानेन राक्षस। स्तुहि भक्तिं दृढां कृत्वा ततः पापाद् विमोक्ष्यसे ॥११५॥
स्तुतो हि सर्वपापानि नाशयिष्यत्यसंशयम्। स्तुतो हि भक्त्या नृणां वै सर्वपापहरो हरिः ॥११६॥

ब्राह्मणने कहा—भद्र! सरस्वती देवीने जिस पापका नाश करनेवाले सारस्वत विष्णुस्तोत्रको कहा है, उसे मैंने तुमसे कह दिया। अग्निदेवसे भेजी गयी एवं मेरी जिह्वाके अग्रभागमें स्थित सरस्वतीने सभीको शान्ति देनेवाले इस विष्णुस्तोत्रको कहा है। तुम इसीसे जगत्स्वामी केशवकी आराधना करो। उसके बाद केशवकी स्तुति करनेसे तुम शापसे मुक्त हो जाओगे। राक्षस! इस स्तुतिके द्वारा दृढ भक्तिपूर्वक दिन-रात हृषीकेशकी स्तुति करो। तब तुम पापसे मुक्त हो जाओगे। स्तुति किये गये हरि निःसंदेह समस्त पापोंको नष्ट करेंगे। भक्तिपूर्वक स्तुति करनेसे सम्पूर्ण पापोंको नष्ट करनेवाले हरि मनुष्योंके सब पापोंका नाश कर देते हैं॥ ११२-११६ ॥

पुलस्त्य उवाच

ततः प्रणम्य तं विप्रं प्रसाद्य स निशाचरः। तदैव तपसे धीमान् शालग्राममगाद् वशी ॥११७॥
अहर्निशं स एवैनं जपन् सारस्वतं स्तवम्। देवक्रियारतिर्भूत्वा तपस्तेपे निशाचरः ॥११८॥
समाराध्य जगन्नाथं स तत्र पुरुषोत्तमम्। सर्वपापविनिर्मुक्तो विष्णुलोकमवाप्तवान् ॥११९॥
एतत् ते कथितं ब्रह्मन् विष्णोः सारस्वतं स्तवम्। विप्रवक्त्रस्थया सम्यक् सरस्वत्या समीरितम् ॥१२०॥
य एतत् परमं स्तोत्रं वासुदेवस्य मानवः। पठिष्यति स सर्वेभ्यः पापेभ्यो मोक्षमाप्स्यति ॥१२१॥

इति श्रीवामनपुराणे पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

पुलस्त्यजी बोले—उसके बाद आत्मनिष्ठ वह राक्षस ब्राह्मणको प्रणाम एवं प्रसन्न करनेके पश्चात् उसी समय तपस्याके लिये शालग्राम नामक स्थानमें चला गया। वह राक्षस दिन-रात इसी सारस्वतस्तोत्रका जप करते हुए देवक्रियामें लीन होकर तप करने लगा। वहाँ पुरुषोत्तम जगन्नाथकी पूजा कर सम्पूर्ण पापोंसे मुक्त होकर उसने विष्णुलोक प्राप्त किया। ब्रह्मन्! मैंने तुमसे ब्राह्मणके मुखसे सरस्वतीद्वारा कहा गया विष्णुका यह सारस्वतस्तोत्र कहा। वासुदेवके इस श्रेष्ठ स्तोत्रको पढ़नेवाला मनुष्य सम्पूर्ण पापोंसे मुक्त हो जायगा ॥ ११७-१२१ ॥

इस प्रकार श्रीवामनपुराणमें पचासीवाँ अध्याय समाप्त हुआ ॥ ८५ ॥



[अथ षडशीतितमोऽध्यायः]

पुलस्त्य उवाच

नमस्तेऽस्तु जगन्नाथ देवदेव नमोऽस्तु ते। वासुदेव नमस्तेऽस्तु बहुरूप नमोऽस्तु ते ॥ १ ॥
एकशृङ्ग नमस्तुभ्यं नमस्तुभ्यं वृषाकपे। श्रीनिवास नमस्तेऽस्तु नमस्ते भूतभावन ॥ २ ॥
विष्वक्सेन नमस्तुभ्यं नारायण नमोऽस्तु ते। ध्रुवध्वज नमस्तेऽस्तु सत्यध्वज नमोऽस्तु ते ॥ ३ ॥
यज्ञध्वज नमस्तुभ्यं धर्मध्वज नमोऽस्तु ते। तालध्वज नमस्तेऽस्तु नमस्ते गरुडध्वज ॥ ४ ॥
वरेण्य विष्णो वैकुण्ठ नमस्ते पुरुषोत्तम। नमो जयन्त विजय जयानन्त पराजित ॥ ५ ॥
कृतावर्त महावर्त महादेव नमोऽस्तु ते। अनाद्याद्यन्त मध्यान्त नमस्ते पद्मजप्रिय ॥ ६ ॥
पुरञ्जय नमस्तुभ्यं शत्रुञ्जय नमोऽस्तु ते। शुभञ्जय नमस्तेऽस्तु नमस्तेऽस्तु धनञ्जय ॥ ७ ॥
सृष्टिगर्भ नमस्तुभ्यं शुचिश्रवः पृथुश्रवः। नमो हिरण्यगर्भाय पद्मगर्भाय ते नमः ॥ ८ ॥

छियासीवाँ अध्याय प्रारम्भ

(स्तोत्रोंके क्रममें पुलस्त्यजीद्वारा उपदिष्ट महेश्वर-कथित पापप्रशमनस्तोत्र)

पुलस्त्यजी बोले—हे जगन्नाथ ! आपको नमस्कार है। हे देवदेव ! आपको नमस्कार है। हे वासुदेव ! आपको नमस्कार है। हे अनन्त रूप धारण करनेवाले ! आपको नमस्कार है। हे एकशृङ्ग ! आपको नमस्कार है। हे वृषाकपे ! आपको नमस्कार है। हे श्रीनिवास ! आपको नमस्कार है। हे भूतभावन ! आपको नमस्कार है। हे विष्वक्सेन ! आपको नमस्कार है। हे नारायण ! आपको नमस्कार है। हे ध्रुवध्वज ! आपको नमस्कार है। हे सत्यध्वज ! आपको नमस्कार है। हे यज्ञध्वज ! आपको नमस्कार है। हे धर्मध्वज ! आपको नमस्कार है। हे तालध्वज ! आपको नमस्कार है। हे गरुडध्वज ! आपको नमस्कार है। हे वरेण्य ! हे विष्णो ! हे वैकुण्ठ ! हे पुरुषोत्तम ! आपको नमस्कार है। हे जयन्त ! हे विजय ! हे जय ! हे अनन्त ! हे पराजित ! आपको नमस्कार है। हे कृतावर्त ! हे महावर्त ! हे महादेव ! आपको नमस्कार है। हे अनादि एवं आदि और अन्तमें विद्यमान ! हे मध्यान्त, ! (मध्य और अन्तवाले) हे पद्मजप्रिय ! आपको प्रणाम है। हे पुरञ्जय ! आपको नमस्कार है। हे शत्रुञ्जय ! आपको प्रणाम है। हे शुभञ्जय ! आपको प्रणाम है। हे धनञ्जय ! आपको प्रणाम है। सृष्टिगर्भ ! हे सृष्टिको अपनेमें सुरक्षित रखनेवाले ! श्रवण-मात्रसे ही पवित्र कर देनेवाले हे शुचिश्रवः ! आर्तजनोंकी पुकारको विशाल कानोंसे सुननेवाले हे पृथुश्रवः ! आपको नमस्कार है। आप हिरण्यगर्भको नमस्कार है। आप पद्मगर्भको नमस्कार है ॥ १-८ ॥

नमः कमलनेत्राय कालनेत्राय ते नमः। कालनाभ नमस्तुभ्यं महानाभ नमो नमः ॥ ९ ॥
वृष्टिमूल महामूल मूलावास नमोऽस्तु ते। धर्मावास जलावास श्रीनिवास नमोऽस्तु ते ॥ १० ॥
धर्माध्यक्ष प्रजाध्यक्ष लोकाध्यक्ष नमो नमः। सेनाध्यक्ष नमस्तुभ्यं कालाध्यक्ष नमोऽस्तु ते ॥ ११ ॥
गदाधर श्रुतिधर चक्रधारिन् श्रियोधर। वनमालाधर हरे नमस्ते धरणीधर ॥ १२ ॥
आर्चिषेण महासेन नमस्तेऽस्तु पुरुष्टुत। बहुकल्प महाकल्प नमस्ते कल्पनामुख ॥ १३ ॥
सर्वात्मन् सर्वग विभो विरिञ्चे श्वेत केशव। नील रक्त महानील अनिरुद्ध नमोऽस्तु ते ॥ १४ ॥
द्वादशात्मक कालात्मन् सामात्मन् परमात्मक। व्योमकात्मक सुब्रह्मन् भूतात्मक नमोऽस्तु ते ॥ १५ ॥
हरिकेश महाकेश गुडाकेश नमोऽस्तु ते। मुञ्जकेश हृषीकेश सर्वनाथ नमोऽस्तु ते ॥ १६ ॥

आप कमलनेत्रको प्रणाम है। आप कालनेत्रको प्रणाम है। हे कालनाभ ! आपको प्रणाम है। हे महानाभ ! आपको बारम्बार प्रणाम है। हे वृष्टिमूल ! हे महामूल ! हे मूलावास ! आपको प्रणाम है। हे धर्मावास ! हे जलावास !

हे श्रीनिवास ! आपको प्रणाम है । हे सभाध्यक्ष ! हे प्रजाध्यक्ष ! हे लोकाध्यक्ष ! आपको बार-बार प्रणाम है । हे सेनाध्यक्ष ! आपको प्रणाम है । हे कालाध्यक्ष ! आपको प्रणाम है । हे गदाधर ! हे श्रुतिधर ! हे चक्रधर ! हे श्रीधर ! वनमाला और पृथ्वीको धारण करनेवाले हे हरे ! आपको प्रणाम है । हे अर्चिदण ! हे महासेन ! हे पुरुषसे स्तुत ! आपको प्रणाम है । हे बहुकल्प ! हे महाकल्प ! हे कल्पनामुख ! आपको प्रणाम है । हे सर्वात्मन् ! हे सर्वग ! हे विभो ! हे विरिञ्चिन् ! हे श्वेत ! हे कपोत ! हे नील ! हे रक्त ! हे महानील ! हे अनिरुद्ध ! आपको नमस्कार है । हे द्वादशात्मक ! हे भागात्मन् ! हे सामात्मन् ! हे परमात्मक ! हे आकाशात्मक ! हे सुमहान् ! हे भूतात्मक ! आपको प्रणाम है । हे हरिकेश ! हे महाकेश ! हे गुडाकेश ! आपको प्रणाम है । हे मुञ्जकेश ! हे हृषीकेश ! हे सर्वनाथ ! आपको प्रणाम है ॥ ०–१६ ॥

सूक्ष्म स्थूल महास्थूल महासूक्ष्म शुभङ्कर । श्वेतपीताम्बरधर नीलवास नमोऽस्तु ते ॥ १७ ॥
कुशेशय नमस्तेऽस्तु पद्मेशय जलेशय । गोविन्द प्रीतिकर्ता च हंस पीताम्बरप्रिय ॥ १८ ॥
अधोक्षज नमस्तुभ्यं सीरध्वज जनार्दन । वामनाय नमस्तेऽस्तु नमस्ते मधुसूदन ॥ १९ ॥
सहस्रशीर्षाय नमो ब्रह्मशीर्षाय ते नमः । नमः सहस्रनेत्राय सोमसूर्यानलेक्षण ॥ २० ॥
नमश्चाथर्वशिरसे महाशीर्षाय ते नमः । नमस्ते धर्मनेत्राय महानेत्राय ते नमः ॥ २१ ॥
नमः सहस्रपादाय सहस्रभुजमन्यवे । नमो यज्ञवराहाय महारूपाय ते नमः ॥ २२ ॥
नमस्ते विश्वदेवाय विश्वात्मन् विश्वसम्भव । विश्वरूप नमस्तेऽस्तु त्वत्तो विश्वमभूदिदम् ॥ २३ ॥
न्यग्रोधस्त्वं महाशाखस्त्वं मूलकुसुमार्चित । स्कन्धपत्राङ्कुरलतापल्लवाय नमोऽस्तु ते ॥ २४ ॥

हे सूक्ष्म ! हे स्थूल ! हे महास्थूल ! हे महासूक्ष्म ! हे शुभङ्कर ! हे उज्ज्वल-पीले वस्त्रको धारण करनेवाले ! हे नीलवास ! आपको प्रणाम है । हे कुशपर शयन करनेवाले ! हे पद्मपर शयन करनेवाले ! हे जलमें शयन करनेवाले ! हे गोविन्द ! हे प्रीतिकर्त ! हे हंस ! हे पीताम्बरप्रिय ! आपको नमस्कार है । हे अधोक्षज ! हे सीरध्वज ! हे जनार्दन ! आपको प्रणाम है । हे वामन ! आपको प्रणाम है । हे मधुसूदन ! आपको प्रणाम है । आप सहस्रसिरवालेको नमस्कार है । आप ब्रह्मशीर्षको प्रणाम है । आप सहस्रनेत्र और चन्द्र सूर्य एवं अग्निरूपी आँखवालेको प्रणाम है । अथर्वशिराको नमस्कार है । महाशीर्षको प्रणाम है । धर्मनेत्रको प्रणाम है । महानेत्रको प्रणाम है । सहस्रपादको नमस्कार है । सहस्रों भुजाओं एवं सहस्रों यज्ञवालेको नमस्कार है । यज्ञवराहको नमस्कार है । आप महारूपको नमस्कार है । विश्वदेवको प्रणाम है । हे विश्वात्मन् ! हे विश्वसम्भव ! हे विश्वरूप ! आपको नमस्कार है । आपसे यह विश्व उत्पन्न हुआ है । आप न्यग्रोध और महाशाख हैं आप ही मूलकुसुमार्चित हैं । स्कन्ध पत्र अङ्कुर लता एवं पल्लवस्वरूप आपको नमस्कार है ॥ १७–२४ ॥

मूलं ते ब्राह्मणा ब्रह्मन् स्कन्धस्ते क्षत्रियाः प्रभो । वैश्याः शाखा दलं शूद्रा वनस्पते नमोऽस्तु ते ॥ २५ ॥
ब्राह्मणाः साग्नयो वक्त्रा दोर्दण्डाः सायुधा नृपाः । पार्श्वाद् विशश्चोरुयुगाज्जाताः शूद्राश्च पादतः ॥ २६ ॥
नेत्राद् भानुरभूत् तुभ्यं पद्भ्यां भूः श्रोत्रयोर्दिशः । नाभ्या ह्यभूदन्तरिक्षं शशाङ्को मनसस्तव ॥ २७ ॥
प्राणाद् वायुः समभवत् कामाद् ब्रह्मा पितामहः । क्रोधात् त्रिनयनो रुद्रः शीर्ष्णो द्यौः समवर्तत ॥ २८ ॥
इन्द्राग्नी वदनात् तुभ्यं पशवो मलसम्भवाः । ओषध्यो रोमसम्भूता विराजस्त्वं नमोऽस्तु ते ॥ २९ ॥
पुष्पहास नमस्तेऽस्तु महाहास नमोऽस्तु ते । ॐकारस्त्वं वषट्कारो वौषट् त्वं च स्वधा सुधा ॥ ३० ॥
स्वाहाकार नमस्तुभ्यं हन्तकार नमोऽस्तु ते । सर्वाकार निराकार वेदाकार नमोऽस्तु ते ॥ ३१ ॥
त्वं हि वेदमयो देव सर्वदेवमयस्तथा । सर्वतीर्थमयश्चैव सर्वयज्ञमयस्तथा ॥ ३२ ॥

ब्रह्मन् ! ब्राह्मण आपके मूल हैं। प्रभो ! क्षत्रिय आपके स्कन्ध, वैश्य शाखा एवं शूद्र पत्ते हैं। वनस्पते ! आपको नमस्कार है। अग्निसहित ब्राह्मण आपके मुख एवं शस्त्रसहित क्षत्रिय आपकी भुजाएँ हैं। वैश्य आपके दोनों जाँघोंके पार्श्वभागसे तथा शूद्र आपके चरणोंसे उत्पन्न हुए हैं। आपके नेत्रसे सूर्य उत्पन्न हुए हैं। आपके चरणोंसे पृथ्वी, कानोंसे दिशाएँ, नाभिसे अन्तरिक्ष तथा मनसे चन्द्रमा उत्पन्न हुए हैं। आपके प्राणसे वायु, कामसे पितामह ब्रह्मा, क्रोधसे त्रिनेत्र रुद्र और सिरसे द्युलोक आविर्भूत हुए हैं। आपके मुखसे इन्द्र और अग्नि, मलसे पशु तथा रोमसे ओषधियाँ उत्पन्न हुईं। आप विराज हैं। आपको नमस्कार है। हे पुष्पहास ! आपको प्रणाम है। हे महाहास ! आपको प्रणाम है। आप ओङ्कार, वषट्कार और वौषट् हैं। आप स्वधा और सुधा हैं। हे स्वाहाकार ! आपको प्रणाम है। हे हन्तकार ! आपको प्रणाम है। हे सर्वाकार ! हे निराकार ! हे वेदाकार ! आपको प्रणाम है। आप वेदमय देव तथा सर्वदेवमय हैं। आप सर्वतीर्थमय और सर्वयज्ञमय हैं ॥ २५-३२ ॥

नमस्ते यज्ञपुरुष यज्ञभागभुजे नमः। नमः सहस्रधाराय शतधाराय ते नमः ॥ ३३ ॥
भूर्भुवःस्वःस्वरूपाय गोदायामृतदायिने। सुवर्णब्रह्मदात्रे च सर्वदात्रे च ते नमः ॥ ३४ ॥
ब्रह्मेशाय नमस्तुभ्यं ब्रह्मादे ब्रह्मरूपधृक्। परब्रह्म नमस्तेऽस्तु शब्दब्रह्म नमोऽस्तु ते ॥ ३५ ॥
विद्यास्त्वं वेद्यरूपस्त्वं वेदनीयस्त्वमेव च। बुद्धिस्त्वमपि बोध्यश्च बोधस्त्वं च नमोऽस्तु ते ॥ ३६ ॥
होता होमश्च हव्यं च हूयमानश्च हव्यवाट्। पाता पोता च पूतश्च पावनीयश्च ॐ नमः ॥ ३७ ॥
हन्ता च हन्यमानश्च ह्रियमाणस्त्वमेव च। हर्त्ता नेता च नीतिश्च पूज्योऽग्र्यो विश्वधार्यसि ॥ ३८ ॥
स्रुक्स्रुवौ परधामासि कपालोलूखलोऽरणिः। यज्ञपात्रारणेयस्त्वमेकधा बहुधा त्रिधा ॥ ३९ ॥
यज्ञस्त्वं यजमानस्त्वमीड्यस्त्वमसि याजकः। ज्ञाता ज्ञेयस्तथा ज्ञानं ध्येयो ध्याताऽसि चेश्वर ॥ ४० ॥
ध्यानयोगश्च योगी च गतिर्मोक्षो धृतिः सुखम्। योगाङ्गानि त्वमीशानः सर्वगस्त्वं नमोऽस्तु ते ॥ ४१ ॥

यज्ञपुरुष ! आपको प्रणाम है। हे यज्ञभागके भोक्तः ! आपको प्रणाम है। सहस्रधार और शतधारको प्रणाम है। भूर्भुवःस्वःस्वरूप, गोदाता, अमृतदाता, सुवर्ण और ब्रह्म (संसारके निमित्त और उपादान कारण आदि) के भी जन्मदाता तथा सर्वदाता आपको प्रणाम है। आप ब्रह्मेशको नमस्कार है। हे ब्रह्मादि ! हे ब्रह्मरूपधारिन् ! हे परमब्रह्म ! आपको प्रणाम है। हे शब्दब्रह्म ! आपको प्रणाम है। आप ही विद्या, आप ही वेद्यरूप तथा आप ही जानने योग्य हैं। आप ही बुद्धि, बोध्य और बोधरूप हैं। आपको प्रणाम है। आप होता, होम, हव्य, हूयमान द्रव्य तथा हव्यवाट्, पाता, पोता, पूत तथा पावनीय ओङ्कार हैं। आपको नमस्कार है। आप हन्ता, हन्यमान, ह्रियमाण, हर्ता, नेता, नीति, पूज्य, श्रेष्ठ तथा संसारको धारण करनेवाले हैं। आप स्रुक्, स्रुव, परधाम, कपाली, उलूखल, अरणि, यज्ञपात्र, आरणेय, एकधा, त्रिधा और बहुधा हैं। आप यज्ञ हैं और आप यजमान हैं। आप स्तुत्य और याजक हैं। आप ज्ञाता, ज्ञेय, ज्ञान, ध्येय, ध्याता तथा ईश्वर हैं। आप ध्यानयोग, योगी, गति, मोक्ष, धृति, सुख, योगाङ्ग, ईशान एवं सर्वग हैं। आपको नमस्कार है ॥ ३३-४१ ॥

ब्रह्मा होता तथोद्गाता साम यूपोऽथ दक्षिणा। दीक्षा त्वं त्वं पुरोडाशस्त्वं पशुः पशुवाह्यसि ॥ ४२ ॥
गुह्यो धाता च परमः शिवो नारायणस्तथा। महाजनो निरयनः सहस्रार्केन्दुरूपवान् ॥ ४३ ॥
द्वादशारोऽथ षण्णाभिस्त्रिव्यूहो द्वियुगस्तथा। कालचक्रो भवानीशो नमस्ते पुरुषोत्तमः ॥ ४४ ॥
पराक्रमो विक्रमस्त्वं हयग्रीवो हरीश्वरः। नरेश्वरोऽथ ब्रह्मेशः सूर्येशस्त्वं नमोऽस्तु ते ॥ ४५ ॥
अश्ववक्त्रो महामेधाः शम्भुः शक्रः प्रभञ्जनः। मित्रावरुणमूर्तिस्त्वममूर्तिरनघः परः ॥ ४६ ॥
प्राग्वंशकायो भूतादिर्महाभूतोऽच्युतो द्विजः। त्वमूर्ध्वकर्त्ता ऊर्ध्वश्च ऊर्ध्वरेता नमोऽस्तु ते ॥ ४७ ॥
महापातकहा त्वं च उपपातकहा तथा। अनीशः सर्वपापेभ्यस्त्वामहं शरणं गतः ॥ ४८ ॥

इत्येतत् परमं स्तोत्रं सर्वपापप्रमोचनम्। महेश्वरेण कथितं वाराणस्यां पुरा मुने ॥ ४९ ॥
केशवस्याग्रतो गत्वा स्नात्वा तीर्थे सितोदके। उपशान्तस्तथा जातो रुद्रः पापवशात् ततः ॥ ५० ॥
एतत् पवित्रं त्रिपुरघ्नभाषितं पठन् नरो विष्णुपरो महर्षे।
विमुक्तपापो ह्युपशान्तमूर्तिः सम्पूज्यते देववरैः प्रसिद्धैः ॥ ५१ ॥

इति श्रीवामनपुराणे षडशीतितमोऽध्यायः ॥ ८६ ॥

आप ब्रह्मा, होता, उद्गाता, साम, यूप, दक्षिणा तथा दीक्षा हैं। आप पुरोडाश एवं आप ही पशु तथा पशुवाही हैं। आप गुह्य, धाता, परम, शिव, नारायण, महाजन, निराश्रय तथा हजारों सूर्य और चन्द्रमाके समान रूपवान् हैं। आप बारह अरों, छः नाभियों, तीन व्यूहों एवं दो युगोंवाले कालचक्र तथा ईश एवं पुरुषोत्तम हैं। आपको नमस्कार है। आप पराक्रम, विक्रम, हयग्रीव, हरीश्वर, नरेश्वर, ब्रह्मेश और सूर्येश हैं। आपको नमस्कार है। आप अश्ववक्त्र, महामेधा, शम्भु, शक्र, प्रभञ्जन, मित्रावरुणकी मूर्ति, अमूर्ति, निष्पाप और श्रेष्ठ हैं। आप प्राग्वंशकाय (मूलपुरुष), भूतादि, महाभूत, अच्युत और द्विज हैं। आप ऊर्ध्वकर्ता, ऊर्ध्व और ऊर्ध्वरेता हैं। आपको नमस्कार है। आप महापातकोंका विनाश करनेवाले तथा उपपातकोंके नाशक हैं। आप सभी पापोंसे निर्लिप्त हैं। मैं आपकी शरणमें आया हूँ। मुने! प्राचीन कालमें महेश्वरने सम्पूर्ण पापोंसे मुक्ति देनेवाले इस श्रेष्ठ स्तोत्रको वाराणसीमें कहा था। तीर्थके स्वच्छ जलमें स्नान कर केशवका दर्शन करनेसे रुद्र पापके प्रभावसे मुक्त एवं शान्त हुए थे। महर्षे! त्रिपुरारिके द्वारा कहे गये इस स्तोत्रका पाठ करनेसे विष्णुभक्त मनुष्य पापसे मुक्त और सौम्य होकर प्रसिद्ध तथा श्रेष्ठ देवताओंसे पूजित होता है ॥ ४२—५१ ॥

इस प्रकार श्रीवामनपुराणमें छियासीवाँ अध्याय समाप्त हुआ ॥ ८६ ॥

[अथ सप्ताशीतितमोऽध्यायः]

पुलस्त्य उवाच

द्वितीयं पापशमनं स्तवं वक्ष्यामि ते मुने। येन सम्यगधीतेन पापं नाशं तु गच्छति ॥ १ ॥
मत्स्यं नमस्ये देवेशं कूर्मं गोविन्दमेव च। हयशीर्षं नमस्येऽहं भवं विष्णुं त्रिविक्रमम् ॥ २ ॥
नमस्ये माधवेशानौ हृषीकेशकुमारिणौ। नारायणं नमस्येऽहं नमस्ये गरुडासनम् ॥ ३ ॥
ऊर्ध्वकेशं नृसिंहं च रूपधारं कुरुध्वजम्। कामपालमखण्डं च नमस्ये ब्राह्मणप्रियम् ॥ ४ ॥
अजितं विश्वकर्माणं पुण्डरीकं द्विजप्रियम्। हंसं शम्भुं नमस्ये च ब्रह्माणं सप्रजापतिम् ॥ ५ ॥
नमस्ये शूलबाहुं च देवं चक्रधरं तथा। शिवं विष्णुं सुवर्णाक्षं गोपतिं पीतवाससम् ॥ ६ ॥
नमस्ये च गदापाणिं नमस्ये च कुशेशयम्। अर्धनारीश्वरं देवं नमस्ये पापनाशनम् ॥ ७ ॥
गोपालं च सवैकुण्ठं नमस्ये चापराजितम्। नमस्ये विश्वरूपं च सौगन्धिं सर्वदाशिवम् ॥ ८ ॥

सतासीवाँ अध्याय प्रारम्भ

(अगस्त्यद्वारा कथित पापप्रशमनस्तोत्र)

पुलस्त्यजी बोले—मुने! अब मैं आपसे पापोंका निवारण करनेवाला दूसरा स्तोत्र कहूँगा; जिसका भलीभाँति अध्ययन (पाठ) करनेसे पाप विनष्ट हो जाता है। मैं मत्स्य एवं कच्छपका रूप धारण करनेवाले देवेश गोविन्द भगवान्‌को नमस्कार करता हूँ। मैं हयशीर्ष, भव और त्रिविक्रम विष्णु भगवान्‌को नमस्कार करता हूँ। मैं माधव, ईशान, हृषीकेश और कुमारको नमस्कार करता हूँ। मैं नारायणको नमस्कार करता हूँ। मैं गरुडासन भगवान्‌को नमस्कार करता हूँ। मैं ऊर्ध्वकेश तथा नरसिंहका रूप धारण करनेवाले [illegible] भगवान्,

अखण्ड और ब्राह्मणप्रिय देवको नमस्कार करता हूँ। मैं अजित, विश्वकर्मा, पुण्डरीक, द्विजप्रिय, हंस, शम्भु तथा प्रजापतिके सहित ब्रह्माको नमस्कार करता हूँ। मैं शूलबाहु, चक्रधरदेव, शिव, विष्णु, सुवर्णाक्ष और गोपति तथा पीतवासाको प्रणाम करता हूँ। मैं गदा धारण करनेवाले गदाधर भगवान्‌को नमस्कार करता हूँ और कुशेशयको नमस्कार करता हूँ। मैं पापका नाश करनेवाले अर्धनारीश्वर देवको नमस्कार करता हूँ। मैं वैकुण्ठसहित गोपाल तथा अपराजितको नमस्कार करता हूँ। मैं विश्वरूप, सौगन्धि और सदाशिवको प्रणाम करता हूँ॥ १—८॥

पाञ्चालिकं हयग्रीवं स्वयम्भुवममरेश्वरम्। नमस्ये पुष्कराक्षं च पयोगन्धिं च केशवम्॥ ९॥
अविमुक्तं च लोलं च ज्येष्ठेशं मध्यमं तथा। उपशान्तं नमस्येऽहं मार्कण्डेयं सजम्बुकम्॥ १०॥
नमस्ये पद्मकिरणं नमस्ये वडवामुखम्। कार्तिकेयं नमस्येऽहं बाह्लीकं शिखि तथा॥ ११॥
नमस्ये स्थाणुमनघं नमस्ये वनमालिनम्। नमस्ये लाङ्गलीशं च नमस्येऽहं श्रियः पतिम्॥ १२॥
नमस्ये च त्रिनयनं नमस्ये हव्यवाहनम्। नमस्ये च त्रिसौवर्णं नमस्ये धरणीधरम्॥ १३॥
त्रिणाचिकेतं ब्रह्मेशं नमस्ये शशिभूषणम्। दिनं नमस्ये च सर्वामयविनाशनम्॥ १४॥
नमस्ये शशिनं सूर्यं ध्रुवं रौद्रं महौजसम्। प भं हिरण्याक्षं नमस्ये स्कन्दमव्ययम्॥ १५॥
नमस्ये भीमहंसौ च नमस्ये हाटकेश्वरम्। सदाहंसं नमस्ये च नमस्ये प्राणतर्पणम्॥ १६॥

मैं पाञ्चालिक, हयग्रीव, स्वयम्भुव, अमरेश्वर, पुष्कराक्ष, पयोगन्धि और केशवको नमस्कार करता हूँ। मैं अविमुक्त, लोल, ज्येष्ठेश, मध्यम, उपशान्त तथा जम्बुकसहित मार्कण्डेयको नमस्कार करता हूँ। मैं पद्मकिरणको नमस्कार करता हूँ। मैं वडवामुखको नमस्कार करता हूँ। मैं कार्तिकेय, बाह्लीक तथा शिखीको प्रणाम करता हूँ। मैं स्थाणु एवं अनघको नमस्कार करता हूँ तथा वनमालीको नमस्कार करता हूँ। मैं लाङ्गलीश तथा लक्ष्मीपतिको नमस्कार करता हूँ। मैं त्रिनेत्रको प्रणाम करता हूँ तथा हव्यवाहनको नमस्कार करता हूँ। मैं त्रिसौवर्णको नमस्कार करता हूँ तथा धरणीधरको नमस्कार करता हूँ। मैं त्रिणाचिकेत, ब्रह्मेश तथा शशिभूषणको प्रणाम करता हूँ। मैं सम्पूर्ण रोगोंको नष्ट करनेवाले कपर्दी भगवान्‌को प्रणाम करता हूँ। मैं चन्द्र, सूर्य, ध्रुव तथा महान् ओजस्वी रुद्रभगवान्‌को प्रणाम करता हूँ। मैं पद्मनाभ, हिरण्याक्ष तथा अव्यय स्कन्दको प्रणाम करता हूँ। मैं भीम और हंसको प्रणाम करता हूँ। मैं हाटकेश्वरको प्रणाम करता हूँ। मैं सदाहंसको प्रणाम करता हूँ और प्राणोंको तृप्त करनेवालेको प्रणाम करता हूँ॥ ९—१६॥

नमस्ये रुक्मकवचं महायोगिनमीश्वरम्। नमस्ये श्रीनिवासं च नमस्ये पुरुषोत्तमम्॥ १७॥
नमस्ये च चतुर्बाहुं नमस्ये वसुधाधिपम्। वनस्पतिं पशुपतिं नमस्ये प्रभुमव्ययम्॥ १८॥
श्रीकण्ठं वासुदेवं नीलकण्ठं सदण्डिनम्। नमस्ये सर्वमनघं गौरीशं नकुलीश्वरम्॥ १९॥
मनोहरं कृष्णकेशं नमस्ये चक्रपाणिनम्। यशोधरं महाबाहुं नमस्ये च कुशप्रियम्॥ २०॥
भूधरं छादितगदं सुनेत्रं शूलशङ्खिनम्। भद्राक्षं वीरभद्रं च नमस्ये शङ्कुकर्णिकम्॥ २१॥
वृषध्वजं महेशं च विश्वामित्रं शशिप्रभम्। उपेन्द्रं चैव गोविन्दं नमस्ये पङ्कजप्रियम्॥ २२॥
सहस्रशिरसं देवं नमस्ये कुन्दमालिनम्। कालाग्निं रुद्रदेवेशं नमस्ये कृत्तिवाससम्॥ २३॥
नमस्ये छागलेशं च नमस्ये पङ्कजासनम्। सहस्राक्षं कोकनदं नमस्ये हरिशङ्करम्॥ २४॥

मैं रुक्म-कवच धारण करनेवाले महायोगी ईश्वरको नमस्कार करता हूँ और पुरुषोत्तम श्रीनिवास भगवान्‌को नमस्कार करता हूँ। मैं चार भुजा धारण करनेवाले देवको प्रणाम करता हूँ। मैं पृथ्वीके अधिपतिको प्रणाम करता हूँ। मैं वनस्पति, पशुपति और अव्यय प्रभुको प्रणाम करता हूँ। मैं श्रीकण्ठ वासुदेव, दण्डिसहित नीलकण्ठ, सर्व, अनघ, गौरीश तथा नकुलीश्वर भगवान्‌को नमस्कार करता हूँ। मैं मनको हरण करनेवाले कृष्णकेश चक्रपाणि

भगवान्‌को नमस्कार करता हूँ और यशोधारी, महाबाहु कुशप्रियको नमस्कार करता हूँ। मैं भूधर, छादितगद, सुनेत्र, शूलशंखी, भद्राक्ष, वीरभद्र तथा शंकुकर्णेश्वरको नमस्कार करता हूँ। मैं वृषध्वज, महेश, विश्वामित्र, शशिप्रभ, उपेन्द्र, गोविन्द तथा पङ्कजप्रियको नमस्कार करता हूँ। मैं सहस्रशीर्ष तथा कुन्दमाली देवको नमस्कार करता हूँ। मैं कालाग्नि, रुद्रदेवेश तथा कृत्तिवासाको प्रणाम करता हूँ। मैं छागलेशको नमस्कार करता हूँ तथा पङ्कजासनको नमस्कार करता हूँ। मैं सहस्राक्ष, कोकनद तथा हरिशंकरको नमस्कार करता हूँ ॥ १७–२४ ॥

अगस्त्यं गरुडं विष्णुं कपिलं ब्रह्मवाङ्मयम्। सनातनं च ब्रह्माणं नमस्ये ब्रह्मतत्परम् ॥ २५ ॥
अप्रतर्क्यं चतुर्बाहुं सहस्रांशुं तपोमयम्। नमस्ये धर्मराजानं देवं गरुडवाहनम् ॥ २६ ॥
सर्वभूतगतं शान्तं निर्मलं सर्वलक्षणम्। महायोगिनमव्यक्तं नमस्ये पापनाशनम् ॥ २७ ॥
निरञ्जनं निराकारं निर्गुणं निर्मलं पदम्। नमस्ये पापहन्तारं शरण्यं शरणं व्रजे ॥ २८ ॥
एतत् पवित्रं परमं पुराणं प्रोक्तं त्वगस्त्येन महर्षिणा च।
धन्यं यशस्यं बहुपापनाशनं संकीर्तनात् स्मरणात् संश्रवात् ॥ २९ ॥

इति श्रीवामनपुराणे सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

मैं अगस्त्य, गरुड, विष्णु, कपिल, ब्रह्मवाङ्मय, सनातन, ब्रह्मा तथा ब्रह्मतत्परको नमस्कार करता हूँ। मैं अनुमानसे परे, चार भुजाधारी, सहस्रांशु, तपोमूर्ति, धर्मराज गरुडवाहन देवको नमस्कार करता हूँ। मैं सम्पूर्ण प्राणियोंमें व्याप्त, शान्तस्वरूप, निर्मल, समस्त लक्षणोंसे युक्त, महान् योगी, अव्यक्तस्वरूप एवं पाप नाश करनेवाले भगवान्‌को नमस्कार करता हूँ। मैं निरञ्जन, निराकार, गुणोंसे रहित, निर्मलपदस्वरूप, पाप हरण करनेवालेको नमस्कार करता हूँ तथा शरणागतकी रक्षा करनेवालेकी शरणमें जाता हूँ।

महर्षि अगस्त्यने इस परम पवित्र पुरातन स्तोत्रको कहा था। इसके कथन, स्मरण तथा श्रवण करनेसे अनेक पापोंका विनाश हो जाता है और मनुष्य धन्य एवं यशस्वी हो जाता है ॥ २५–२९ ॥

इस प्रकार श्रीवामनपुराणमें सत्तासीवाँ अध्याय समाप्त हुआ ॥ ८७ ॥

[अथाष्टाशीतितमोऽध्यायः]

पुलस्त्य उवाच

गतेऽथ तीर्थयात्रायां प्रह्लादे दानवेश्वरे। कुरुक्षेत्रं समभ्यागाद् यष्टुं वैरोचनो बलिः ॥ १ ॥
तस्मिन् महाधर्मयुते तीर्थे ब्राह्मणपुङ्गवः। शुक्रो द्विजातिप्रवरानामन्त्रयत भार्गवान् ॥ २ ॥
भृगूनामन्त्र्यमाणान् वै श्रुत्वात्रेयाः सगौतमाः। कौशिकाङ्गिरसश्चैव तत्यजुः कुरुजाङ्गलान् ॥ ३ ॥
उत्तराशां प्रजग्मुस्ते नदीमनु शतद्रुकाम्। शतद्रवे जले स्नात्वा विपाशां प्रययुस्ततः ॥ ४ ॥
विपाय तत्राप्यरतिं स्नात्वाऽभ्यर्च्य पितृदेवताः। प्रजग्मुः किरणां पुण्यां दिनेशकिरणच्युताम् ॥ ५ ॥
तस्यां स्नात्वाऽर्च्य देवर्षे सर्व एव महर्षयः। ऐरावतीं सुपुण्योदां स्नात्वा जग्मुरथेश्वरीम् ॥ ६ ॥
देविकायां जले स्नात्वा पयोष्ण्यां चैव तापसाः। अवतीर्णा मुने स्नातुमात्रेयाद्याः शुभां नदीम् ॥ ७ ॥
ततो निमग्ना ददृशुः प्रतिबिम्बमथात्मनः। अन्तर्जले द्विजश्रेष्ठ महदाश्चर्यकारकम् ॥ ८ ॥

अट्ठासीवाँ अध्याय प्रारम्भ

(बलिका कुरुक्षेत्रमें आना, वहाँके मुनियोंका पलायन, वामनका आविर्भाव, उनकी स्तुति, बलिके यज्ञमें जानेकी उत्कण्ठा और भरद्वाजसे स्वस्थानका कथन)

पुलस्त्यजी बोले—दानवेश्वर प्रह्लादके तीर्थयात्राके लिये चले जानेपर विरोचनका पुत्र बलि कुरुक्षेत्रमें यज्ञ करनेके लिये गया। उस महान् धर्मयुक्त तीर्थमें ब्राह्मणश्रेष्ठ शुक्राचार्यने द्विजोंमें अत्यन्त श्रेष्ठ भार्गवोंको निमन्त्रित किया।

भृगुवंशीय ब्राह्मणोंका आमन्त्रित किया जाना सुनकर अत्रि, गौतम, कौशिक और अङ्गिरागोत्रीय ब्राह्मणोंने कुरुजाङ्गल-का त्याग कर दिया। वे उत्तर दिशामें शतद्रु नदीके तटपर गये। शतद्रुके जलमें स्नान करनेके बाद वे वहाँसे विपाशा नदीके निकट चले गये। वहाँ भी मनके अनुकूल न होनेके कारण वे सब स्नान करनेके पश्चात् पितरों एवं देवोंका पूजन कर सूर्यकी किरणोंसे उत्पन्न किरणा नदीके समीप गये। देवर्षे! उसमें स्नान और अर्चन करनेके बाद सभी महर्षि पवित्र जलवाली ऐरावती नदीके निकट गये तथा उसमें स्नान करके ईश्वरी नदीके तटपर चले गये। मुने! देविका और पयोष्णीमें स्नान करके आत्रेय आदि तपस्वियोंने शुभा नामकी नदीमें स्नान करनेके लिये प्रवेश किया। द्विजश्रेष्ठ! जलमें गोता लगानेपर उन लोगोंने जलके भीतर महान आश्चर्य उत्पन्न करनेवाली अपनी-अपनी परछाईं देखी॥ १-८॥

उन्मज्जने च ददृशुः पुनर्विस्मितमानसाः। ततः स्नात्वा समुत्तीर्णा ऋषयः सर्व एव हि॥ ९॥
जग्मुस्ततोऽपि ते ब्रह्मन् कथयन्तः परस्परम्। चिन्तयन्तश्च सततं किमेतदिति विस्मिताः॥ १०॥
ततो दूरादपश्यन्त वनषण्डं सुविस्तृतम्। वनं हरगलश्यामं खगध्वनिनिनादितम्॥ ११॥
अतितुङ्गतया व्योम आवृण्वानं नगोत्तमम्। विस्तृताभिर्जटाभिस्तु अन्तर्भूमिं च नारद॥ १२॥
काननं पुष्पितैर्वृक्षैरतिभाति समन्ततः। दशार्द्धवर्णैः सुखदैर्नभस्तारागणैरिव॥ १३॥
तं दृष्ट्वा कमलैर्व्याप्तं पुण्डरीकैश्च शोभितम्। तद्वत् कोकनदैर्व्याप्तं वनं पद्मवनं यथा॥ १४॥
प्रजग्मुस्तुष्टिमतुलां ते ह्लादं परमं ययुः। विविशुः प्रीतमनसो हंसा इव महासरः॥ १५॥
तन्मध्ये ददृशुः पुण्यमाश्रमं लोकपूजितम्। चतुर्णां लोकपालानां वर्गाणां मुनिसत्तम॥ १६॥

महर्षियोंने डुबकी लगानेके बाद जब सिर ऊपर किया तब पुनः वैसा ही देखा; इससे वे आश्चर्यमें भर गये। उसके बाद स्नान करके सभी ऋषि बाहर निकले। ब्रह्मन्! उसके पश्चात् वे सभी लोग यह क्या है?—इस विषयमें आश्चर्यपूर्वक आपसमें बातचीत एवं विचार-विमर्श करते हुए वहाँसे भी चले गये। उसके बाद उन लोगोंने दूरसे ही अतिविस्तृत, शंकरके कण्ठकी भाँति श्यामवर्णवाले और पक्षियोंकी ध्वनिसे भरा एक वृक्षोंका समूह (वन) देखा। नारदजी! वह वन अत्यन्त ऊँचा होनेके कारण आकाशको घेरे हुए था तथा उसकी नीचेकी भूमि बिखरे हुए फलोंसे ढकी रहती थी। वह वन तारागणोंसे जगमगाते हुए आकाशके समान खिले हुए पँचरंगे वृक्षोंसे बहुत सुन्दर लग रहा था। कमल-वनके समान कमलोंसे व्याप्त, पुण्डरीकोंसे विभूषित एवं कोकनदोंसे भरे उस वनको देखकर वे अत्यन्त प्रसन्न एवं गद्गद हो गये। वे लोग संतुष्ट-चित्तसे उसमें इस प्रकार प्रविष्ट हुए, जिस प्रकार हंस महासरोवरमें प्रवेश करते हैं। मुनिसत्तम! उन लोगोंने उसके बीचमें लोकपालोंके चार वर्गों-(धर्म, अर्थ, काम एवं मोक्ष-) का लोकपूजित पवित्र आश्रम देखा॥ ९-१६॥

धर्माश्रमं प्राङ्मुखं तु पलाशविटपावृतम्। प्रतीच्यभिमुखं ब्रह्मन् अर्थस्येक्षुवनावृतम्॥ १७॥
[illegible]णाभिमुखं काम्यं र[illegible] [illegible]ोकवनावृतम्। उदङ्मुखं च मोक्षस्य शुद्धस्फटिकवर्चसम्॥ १८॥
स्वाधर्मा मोक्षः काम [illegible] श्रमी। आश्रम्यर्थौ द्वापरान्ते निष्पाद्यौ धर्म आश्रमी॥ १९॥
मुनयो द[illegible] [illegible]। तत्रैव च गतिं चक्रुरखण्डे सलिलाप्लुते॥ २०॥
[illegible]ः। चतुर्मूर्तिर्जगन्नाथः पूर्वमेव प्रतिष्ठितः॥ २१॥
[illegible]। शुश्रूषयाऽथ तपसा ब्रह्मचर्येण नारद॥ २२॥
[illegible]। असुरेभ्यस्तदा भीताः स्वाश्रित्याञ्जनपर्वतम्॥ २३॥
[illegible]। स्नात्वा जले हि कालिन्द्याः प्रजग्मुर्दक्षिणामुखाः॥ २४॥

ब्रह्मन् ! पूर्व दिशाकी ओर सुन्दर पलाशवृक्षसे घिरा हुआ धर्माश्रम, पश्चिममें जम्बूवनसे घिरा हुआ अर्थाश्रम, दक्षिणकी ओर कदली और अशोकके वनसे घिरा हुआ कामाश्रम तथा उत्तरकी ओर शुद्धस्फटिकके समान तेजस्वी मोक्षाश्रम स्थित था । कृतयुगके अन्तमें मोक्ष अपने आश्रममें निवास करने लगता है, त्रेतामें काम आश्रमवासी हो जाता है, द्वापरके अन्तमें अर्थ आश्रमी बन जाता है और कलिके आदिमें धर्म आश्रममें रहना प्रारम्भ करता है । अव्यय, आत्रेय आदि मुनियोंने उन आश्रमोंको देखकर अखण्ड जलसे परिपूर्ण उस स्थानमें सुखसे रहनेका निश्चय किया । धर्म आदिके द्वारा भगवान् विष्णु अखण्ड नामसे स्थित हैं । जगन्नाथ चार मूर्तियोंवाले हैं, यह पहलेसे ही निश्चित है । नारदजी ! अद्भुत योगात्मा ऋषिगण सेवा, तप और ब्रह्मचर्यके द्वारा उनकी पूजा करते हैं । असुरोंसे त्रस्त होकर वे मुनिगण सम्मिलितरूपसे उस अखण्ड पर्वतका भलीभाँति आश्रयण कर रहने लगे । ब्रह्मन् ! केवल पत्थरसे कूटे हुए अन्नको खानेवाले वानप्रस्थी साधु तथा सूर्यकी किरणोंका पान करनेवाले अन्य ब्राह्मण आदि कालिन्दीके जलमें स्नान कर दक्षिण दिशाकी ओर चले गये ॥ १७–२४ ॥

अवन्तिविषयं प्राप्य विष्णुमासाद्य संस्थिताः । विष्णोरपि प्रसादेन दुष्प्रवेशां महासुरैः ॥ २५ ॥
वालखिल्यादयो जग्मुस्त्रस्ता दानवाद् भयात् । रुद्रकोटिं समाश्रित्य स्थितास्ते ब्रह्मचारिणः ॥ २६ ॥
एवं गतेषु विप्रेषु गौतमाङ्गिरसादिषु । शुक्रस्तु भार्गवान् सर्वान् निन्ये यज्ञविधौ मुने ॥ २७ ॥
अधिष्ठिते भार्गवैस्तु महायज्ञेऽमितद्युते । यज्ञदीक्षां बलेः शुक्रश्चकार विधिना स्वयम् ॥ २८ ॥
श्वेताम्बरधरो दैत्यः श्वेतमाल्यानुलेपनः । मृगाजिनावृतः पृष्ठे बर्हिपत्रविचित्रितः ॥ २९ ॥
समास्ते वितते यज्ञे सदस्यैरभिसंवृतः । हयग्रीवप्रलम्बाद्यैर्मयबाणपुरोगमैः ॥ ३० ॥
पत्नी विन्ध्यावली चास्य दीक्षिता यज्ञकर्मणि । ललनानां सहस्रस्य प्रधाना ऋषिकन्यका ॥ ३१ ॥
शुक्रेणाश्वः श्वेतवर्णो मधुमासे सुलक्षणः । महीं विहर्तुमुत्सृष्टस्तारकाक्षोऽन्वगाच्च तम् ॥ ३२ ॥

